श्री महर्षि व्यास-प्रणीत

महाभारत।

९ शल्यपर्व।

(भाषाभाष्य समेत)

भाषान्तरकर्ता और प्रकाशक
श्रीपाद दामोदर सातवळेकर
स्वाध्यायमण्डल, औंध (जि० सातारा.)

संवत् १९८५,

शक १८५०,

सन १९२९

:४१

कपटका कपटसे निवारण ।

वासुदेव उवाच ।

मायाविन इमां मायां
मायया जहि भारत ।
मायावी मायया वध्यः
सत्यमेतद्युधिष्ठिर ॥ ७ ॥

शल्य. अ. ३१

श्री वासुदेव कहते हैं- हे युधिष्ठिर !

" इस कपटी की इस माया का मायासे ही नाश कर, क्योंकि कपट करनेवालेका वध कपटसे ही करना योग्य है । यही सत्य धर्म है । "

मुद्रक तथा प्रकाशक-श्रीपाद दामोदर सातवलेकर, भारत मुद्रणालय,

स्वाध्याय मंडल, औंध, (जि. सातारा)

श्री महर्षिव्यासप्रणीतम्।

म हा भा र त म्।

शल्यपर्व ।

श्रीगणेशाय नमः ॥ श्रीवेदव्यासाय नमः॥

नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ १ ॥

जनमेजय उवाच-एवं निपातिते कर्णे समरे सव्यसाचिना।
अल्पाऽवशिष्टाः कुरवः किमकुर्वत वै द्विज ॥ १ ॥
उदीर्यमाणं च बलं दृष्ट्वा राजा सुयोधनः।
पाण्डवैः प्राप्तकालं च किं प्रापद्यत कौरवः ॥ २ ॥
एतदिच्छाम्यहं श्रोतुं तदाचक्ष्व द्विजोत्तम।
न हि तृप्यामि पूर्वेषां शृण्वानश्चरितं महत् ॥ ३ ॥

वैशम्पायन उवाच-ततः कर्णे हते राजन्धार्त्तराष्ट्रः सुयोधनः।

शल्यपर्व में पहला अध्याय और

शल्याभिषेक पर्व।

नारायण, नरोंमें श्रेष्ठ नर और दिव्य स्वरूपवाली सरस्वतीको प्रणाम करके जय कीर्तन करना उचित है ॥ (१)

महाराज जनमेजय बोले, हे ब्राह्मण-श्रेष्ठ! वैशम्पायन मुने! जब अर्जुनने कर्णको इस प्रकार मार डाला, तब बचे हुए कौरवोंने क्या किया? राजा दुर्योधनने पाण्डवोंकी सेनाको बढते हुए देख समयानुसार क्या उपाय किया? हे ब्राह्मण श्रेष्ठ! मैं अपने पूर्व पुरुषोंका चरित्र सुनकर तृप्त नहीं होता, इस लिये इस कथाको सुनना चाहता हूं; आप मुझसे कहिये ॥ (२—३)

श्रीवैशम्पायन मुनि बोले, हे महा-

भृशं शोकार्णवे मग्नो निराशः सर्वतोऽभवत ॥ ४ ॥
हा कर्ण हा कर्ण इति शोचमानः पुनः पुनः ।
कृच्छ्रात्स्वशिबिरं प्राप्तो हतशेषैर्नृपैः सह ॥ ५ ॥
स समाश्वास्य मानोऽपि हेतुभिः शास्त्रनिश्चितैः ।
राजभिर्नालभच्छर्म सूतपुत्रवधं स्मरन् ॥ ६ ॥
स दैवं बलवन्मत्वा भवितव्यं च पार्थिवः ।
संग्रामे निश्चयं कृत्वा पुनर्युद्धाय निर्ययौ ॥ ७ ॥
शल्यं सेनापतिं कृत्वा विधिवद्राजपुङ्गवः ।
रणाय निर्ययौ राजा हतशैषैर्नृपैः सह ॥ ८ ॥
ततः सुतुमुलं युद्धं कुरुपाण्डवसेनयोः ।
बभूव भरतश्रेष्ठ देवासुररणोपमम् ॥ ९ ॥
ततः शल्यो महाराज कृत्वा कदनमाहवे ।
ससैन्योऽथ स मध्याह्ने धर्मराजेन घातितः ॥ १० ॥
ततो दुर्योधनो राजा हतबन्धू रणाजिरात् ।
अपसृत्य ह्रदं घोरं विवेश रिपुजाद्भयात् ॥ ११ ॥
अथापराह्ने तस्याह्नः परिवार्य सुयोधनः ।

राज ! कर्णके मरनेके पश्चात् राजा दुर्योधन शोक समुद्र में डूब गये और विजयसे निराश होकर बार बार हा कर्ण! हा कर्ण ! कहकर रोने लगे, इस प्रकार रोते हुए राजोंके सहित बहुत कठिनता से अपने डेरोंमें पहुंचे। यद्यपि अनेक राजोंने शास्त्रमें लिखे अनेक उपाय कर राजा दुर्योधनको बहुत समझाया, तो भी उन्हें सूतपुत्र कर्णके शोकसे शान्ति न हुई, परन्तु होनहार और प्रारब्धको बलवान् समझ कर राजा दुर्योधन फिर युद्धको चले॥ (४—७)

उसी समय उन्होंने राजा शल्य को सेनापति बनाया और बचे हुए राजोंके समेत युद्धको चले॥ हे भरत कुलश्रेष्ठ! तब पाण्डव और कौरवोंकी सेनाका देवासुर संग्रामके समान घोर युद्ध हुआ॥ हे महाराज ! शल्यने पाण्डवोंकी सेना का बहुत नाश किया, परन्तु दो प्रहर समय के पश्चात् महाराज युधिष्ठिर के हाथसे मारे गये॥ (८-१०)

तब राजा दुर्योधन अपने सब बन्धुओंको मरा देख युद्ध छोडकर भाग गये, और शत्रुओंके भयसे एक भयानक तालावमें घुसकर रहने लगे॥ उसी दिन दो पहरके पश्चात् भीमसेनने अपने

ह्रदादाहूय युद्धाय भीमसेनेन पातितः ॥ १२ ॥
तस्मिन्हते महेष्वासे हतशिष्टास्त्रयो रथाः ।
संरम्भान्निशि राजेन्द्र जघ्नुः पाञ्चालसोमकान्॥१३॥
ततः पूर्वाह्णसमये शिबिरादेत्य सञ्जयः ।
प्रविवेश पुरीं दीनो दुःखशोकसमन्वितः ॥ १४ ॥
स प्रविश्य पुरीं सूतो भुजावुच्छ्रित्य दुःखितः ।
वेपमानस्ततो राज्ञः प्रविवेशनिकेतनम् ॥ १५ ॥
रुरोद च नरव्याघ्र हा राजन्निति दुःखितः ।
अहो बत विनष्टाः स्म निधनेन महात्मनः ॥ १६ ॥
विधिश्च बलवानत्र पौरुषं तु निरर्थकम् ।
शक्रतुल्यबलाः सर्वे यथाऽवध्यन्त पाण्डवैः ॥ १७ ॥
दृष्ट्वैव च पुरे राजन् जनः सर्वः ससञ्जयम् ।
क्लेशेन महता युक्तं सर्वतो राजसत्तम ॥ १८ ॥
रुरोद च भृशोद्विग्नो हा राजन्निति विस्वरम् ।
आकुमारं नरव्याघ्र तत्र तत्र समन्ततः ॥ १९ ॥
आर्त्तनादं ततश्चक्रे श्रुत्वा विनिहतं नृपम् ।

बन्धुओंके सहित राजा दुर्योधनको तलावमेंसे पुकार कर मार डाला॥ हे राजन्! जब महा धनुषधारी राजा दुर्योधन मारे गये, तब तीन महारथोंने क्रोध करके रात्रिको सृञ्जय, सोमक और पाञ्चाल वंशी राजपूतोंका नाश कर दिया॥ (११-१३)

तब युद्धके डेरोंसे चलकर दूसरे दिन के पहले पहरमें दुःख और शोकसे व्याकुल होकर सञ्जय हस्तिनापुरमें आये, सूतपुत्र सञ्जय शोकसे व्याकुल दोनों हाथ उठाये रोते हुए राजभवनमें पहुंचे और हाय राजा दुर्योधन, हाय राजा कहकर रोने लगे, और कहने लगे। हाय उस महात्माके मरनेसे हम सब नष्ट होगये, प्रारब्ध बडी बलवान है, और बल निरर्थक है, देखो इन्द्रके समान महा पराक्रमी सब वीरोंको पाण्डवोंने मार डाला॥ (१४—१७)

हे राजन् जनमेजय! जिस समय सञ्जयने नगरमें प्रवेश किया, उनको देखतेही सब नगर निवासी बालक, बूढे हा महाराज! हा महाराज! कहकर सब स्थान और मार्गोंमें रोने लगे। जिस समय सञ्जयके मुखसे सुना कि महाराज दुर्योधन मर गये, तब सब नगर निवासी

धावतश्चाप्यपश्यामस्तत्र तान्पुरुषर्षभान् ॥ २० ॥
नष्टचित्तानिवोन्मत्तान् शोकेन भृशपीडितान् ।
तथा स विह्वलः सूतः प्रविश्य नृपतिक्षयम् ॥ २१ ॥
ददर्श नृपतिश्रेष्ठं प्रज्ञाचक्षुषमीश्वरम् ।
तथा चासीनमनघं समन्तात्परिवारितम् ॥ २२ ॥
स्नुषाभिर्भरतश्रेष्ठ गान्धार्या विदुरेण च ।
तथान्यैश्च सुहृद्भिश्च ज्ञातिभिश्च हितैषिभिः ॥ २३ ॥
तमेव चार्थं ध्यायन्तं कर्णस्य निधनं प्रति ।
रुदन्नेवाब्रवीद्वाक्यं राजानं जनमेजय ॥ २४ ॥
नातिहृष्टमनाः सूतो वाक्यसन्दिग्धया गिरा ।
सञ्जयोऽहं नरव्याघ्र नमस्ते भरतर्षभ ॥ २५ ॥
मद्राधिपो हतः शल्यः शकुनिः सौबलस्तथा ।
उलूकः पुरुषव्याघ्र कैतव्यो दृढविक्रमः ॥ २६ ॥
संशप्तका हताः सर्वे काम्बोजाश्च शकैः सह ।
म्लेच्छाश्च पार्वतीयाश्च यवना विनिपातिताः ॥ २७ ॥
प्राच्या हता महाराज दाक्षिणात्याश्च सर्वशः ।
उदीच्याश्च हताः सर्वे प्रतीच्याश्च नरोत्तमाः ॥ २८ ॥
राजानो राजपुत्राश्च सर्वे ते निहता नृप ।

घबडाकर इधर उधर छटपटाने लगे। उस समय हमने उन नगर निवासियोंको चेतनारहित और पागलके समान देखा, इसी प्रकार सञ्जय भी घबडाते और रोते हुए राजभवनमें पहुंचे ॥ (१८-२१)

वहां जाकर सब जगत्के स्वामी बुद्धिरूपी नेत्रवाले, अर्थात् अन्धे, पापरहित महाराज धृतराष्ट्रके बेटोंकी बहू, गान्धारी, विदुर तथा और मन्त्री, हित चाहनेवाले, बन्धुओंके सहित बैठे और सूतपुत्र कर्णके मरनेके पश्चात् युद्धमें क्या हुआ, यह शोचते हुए देखा और रोकर तथा दुःखी होकर ऐसे वचन कहे। हे पुरुषसिंह भरतकुल श्रेष्ठ! मैं सञ्जय आपके चरणोंमें प्रणाम करता हूं ॥ २२-२५

हे महाराज! महाराज मद्रराज शल्य, सुबलपुत्र शकुनी, पुरुषसिंह महाछली महावीर उलूक, सब संशप्तक, सब काम्बोज शक, म्लेच्छ, पर्वती, यवन, पूर्व, दक्षिण पश्चिम, उत्तरके सब क्षत्री राजा राजपुत्र और आपकी ओरके सब क्षत्री मारे गये, इसके पश्चात् पाण्डुपुत्र भीमसेनने अपनी

दुर्योधनो हतो राजा यथोक्तं पाण्डवेन ह ॥ २९ ॥
भग्नसक्थो महाराज शेते पांसुषु रूषितः।
धृष्टद्युम्नो महाराज शिखण्डी चापराजितः ॥ ३० ॥
उत्तमौजा युधामन्युस्तथा राजन्प्रभद्रकः।
पञ्चालाश्च नरव्याघ्र चेदयश्च निषूदिताः ॥ ३१ ॥
तव पुत्रा हताः सर्वे द्रौपदेयाश्च भारत।
कर्णपुत्रो हतः शूरो वृषसेनः प्रतापवान् ॥ ३२ ॥
नरा विनिहताः सर्वे गजाश्च विनिपातिताः।
रथिनश्च नरव्याघ्र हयाश्च निहता युधि ॥ ३३ ॥
किञ्चिच्छेषं च शिबिरं तावकानां कृतं प्रभो।
पाण्डवानां कुरूणां च समासाद्य परस्परम् ॥ ३४ ॥
प्रायः स्त्रीशेषमभवज्जगत्कालेन मोहितम्।
सप्त पाण्डवतः शेषा धार्तराष्ट्रास्त्रयो रथाः ॥ ३५ ॥
ते चैव भ्रातरः पञ्च वासुदेवोऽथ सात्यकिः।
कृपश्च कृतवर्मा च द्रौणिश्च जयतां वरः ॥ ३६ ॥
तथाऽप्येते महाराज रथिनो नृपसत्तम।
अक्षौहिणीनां सर्वासां समेतानां जनेश्वर ॥ ३७ ॥

प्रतिज्ञाके अनुसार अर्थात् जङ्घा तोडकर राजा दुर्योधनको मार डाला। हे महाराज! आज राजा दुर्योधन जङ्घाहीन होकर धूलमें लपटे हुए पृथ्वीमें सो रहे हैं॥ (२६—३०)

धृष्टद्युम्न, शिखण्डी, उत्तमौजा, युधामन्यु, प्रभद्रक, सब पाञ्चाल, पुरुषसिंह राजा चेदिवंश समेत मारे गये॥ आपके सब पुत्र, द्रौपदीके पांचौ पुत्र और महावीर कर्णपुत्र वृषसेन भी मारे गये॥ सब रथी पदाति घोडे और हाथियोंपर चढनेवाले वीर मारे गये॥ हे पृथ्वीनाथ! अब पाण्डव और कौरवोंके डेरोंमें बहुत थोडे मनुष्य रह गये, ये सब परस्पर लडकर मर गये, इस समय जगत्में केवल स्त्री ही बच गयीं हैं। पाण्डवोंकी ओरसे सात और दुर्योधनकी ओरसे केवल तीन वीर बचे हैं। (३१-३५)

उधर पांचों भाई पाण्डव, श्रीकृष्ण और सात्यकी और इधर कृपाचार्य, कृतवर्मा और विजयी अश्वत्थामा बचे हैं॥ हे महाराज! उन अठारह अक्षौहिणियोंमें केवल ये दश वीर बचे रहे हैं॥ और सब मारे गये। हे भरतकुल-

एते शेषा महाराज सर्वेऽन्ये निधनं गताः ।
कालेन निहतं सर्वं जगद्वै भरतर्षभ ॥ ३८ ॥
दुर्योधनं वै पुरतः कृत्वा वैरं च भारत ।
वैशम्पायन उवाच-एतच्छ्रुत्वा वचः क्रूरं धृतराष्ट्रो जनेश्वरः ॥ ३९ ॥
निपपात स राजेन्द्रो गतसत्वो महीतले ।
तस्मिन्निपतिते भूमौ विदुरोऽपि महायशाः ॥ ४० ॥
निपपात महाराज शोकव्यसनकर्शितः ।
गान्धारी च नृपश्रेष्ठ सर्वाश्च कुरुयोषितः ॥ ४१ ॥
पतिताः सहसा भूमौ श्रुत्वा क्रूरवचस्तदा ।
निःसंज्ञं पतितं भूमौ तदाऽऽसीद्राजमण्डलम् ॥ ४२ ॥
प्रलापयुक्तं महति चित्रन्यस्तं पटे यथा ।
कृच्छ्रेण तु ततो राजा धृतराष्ट्रो महीपतिः ॥ ४३ ॥
शनैरलभत प्राणान्पुत्रव्यसनकर्शितः ।
लब्ध्वा तु स नृपः संज्ञां वेपमानः सुदुःखितः॥ ४४ ॥
उदीक्ष्य च दिशः सर्वाः क्षत्तारं वाक्यमब्रवीत् ।
विद्वन्क्षत्तर्महाप्राज्ञ त्वं गतिर्भरतर्षभ ॥ ४५ ॥
ममानाथस्य सुभृशं पुत्रैर्हीनस्य सर्वशः ।
एवमुक्त्वा ततो भूतो विसंज्ञो निपपात ह ॥ ४६ ॥
तं तथा पतितं दृष्ट्वा बान्धवा येऽस्य केचन ।

श्रेष्ठ ! यह ऐसा समय आया कि सब जगत् मर गया, इस समय केवल दुर्योधनका वैर हेतु मात्र होगया और सब समय के अनुसार ही हुआ। (३५-३९)

वैशम्पायन मुनि बोले, हे महाराज! राजा धृतराष्ट्र इस कठोर वचनको सुनते ही मूर्छित होकर पृथ्वीमें गिर गये उन के गिरते ही महा बुद्धिमान विदुर भी शोकसे व्यकुल होकर गिर गये, इसी प्रकार गान्धारी आदि सब कुरुकुल की रानी मूर्छित हो गिर गई। उस समय समस्त राजसभा मूर्च्छित होनेके कारण कागज पर लिखे हुए चित्रके समान दीखने लगी, थोडे समय के पश्चात् महाराज धृतराष्ट्र चैतन्य होकर पुत्रके शोकसे व्याकुल होकर धीरे धीरे विदुरसे बोले, हे भरतकुलश्रेष्ठ ! महाबुद्धिमान इस समय तुम ही हमारी गति हो इस समय मेरे सब पुत्र मारे गये, मैं अनाथ होगया; ऐसा कह फिर मूर्च्छित हो

शीतैस्ते सिषिचुस्तौ यैर्विव्यजुर्व्यजनैरपि ॥ ४७ ॥
स तु दीर्घेण कालेन प्रत्याश्वस्तो नराधिपः।
तूष्णीं दध्यौ महीपालः पुत्रव्यसनकर्शितः ॥ ४८ ॥
निःश्वसन्जिह्मग इव कुम्भक्षिप्तो विशाम्पते।
सञ्जयोऽप्यरुदत्तत्र दृष्ट्वा राजानमातुरम् ॥ ४९ ॥
तथा सर्वाः स्त्रियश्चैव गान्धारी च यशस्विनी।
ततो दीर्घेण कालेन विदुरं वाक्यमब्रवीत् ॥ ५० ॥
धृतराष्ट्रो नरश्रेष्ठ मुह्यमानो मुहुर्मुहुः।
गच्छन्तु योषितः सर्वा गान्धारी च यशस्विनी॥५१॥
तथेमे सुहृदः सर्वे भ्राम्यते मे मनो भृशम्।
एवमुक्तस्ततः क्षत्ता ताः स्त्रियो भरतर्षभ ॥ ५२ ॥
विसर्जयामास शनैर्वेपमानः पुनः पुनः।
निश्चक्रमुस्ततः सर्वाः स्त्रियो भरतसत्तम ॥ ५३ ॥
सुहृदश्च तथा सर्वे दृष्ट्वा राजानमातुरम्।
ततो नरपतिं तूर्णं लब्धसंज्ञं परन्तप ॥ ५४ ॥
अवैक्षत्सञ्जयो दीनं रोदमानं भृशातुरम्।
प्राञ्जलिर्निःश्वसन्तं च तं नरेन्द्रं मुहुर्मुहुः।

भूमिपर गिर गये॥ (३९—४६)

महाराजको मूर्छित देख सब बान्धव शीतल जल छिडकने लगे, और पङ्खासे हवा करने लगे, बहुत समयके पश्चात् पुत्र शोकसे व्याकुल राजा धृतराष्ट्र सावधान हुए जैसे घडेमें बन्द सांप ऊंचे श्वास लेता है, ऐसे ही राजा धृतराष्ट्र भी ऊंचे स्वांस लेने लगे। राजाको व्याकुल देखकर सञ्जय भी रोने लगे, इसी प्रकार सब स्त्रियों समेत यशस्विनी गान्धारी भी रोने लगी, फिर बार बार रोते हुए राजा धृतराष्ट्र विदुरसे सब स्त्रियों सहित यशस्विनी गान्धारीको विदा करो, मेरा मन इस समय बहुत घवडा रहा है, इस लिये सब सभासद अपने अपने घरको जांय। (४७-५२)

विदुरने ऐसी आज्ञा सुनकर सब सभासद और स्त्रियोंको विदा कर दिया, उस समय विदुरका शरीर भी दुःखसे कांप रहा था, मुखसे वचन नहीं निकलता था, राजाको व्याकुल देख सब स्त्री और सभासद चले गये। तब राजाको अत्यन्त व्याकुल जानकर सञ्जय हाथ जोड कर और विदुर मीठे मीठे

समाश्वासयत क्षत्ता वचसा मधुरेण च ॥ ५५ ॥

इति श्रीमहाभारते० शल्यपर्वणि धृतराष्ट्रमोहे प्रथमोऽध्यायः ॥ १ ॥

वैशम्पायन उवाच-विसृष्टास्वथ नारीषु धृतराष्ट्रोऽम्बिकासुतः ।
विललाप महाराज दुःखाद्दुःखांतरं गतः ॥ १ ॥
सधूममिव निःश्वस्य करौ धुन्वन्पुनःपुनः ।
विचिंत्य च महाराज वचनं चेदमब्रवीत् ॥ २ ॥
धृतराष्ट्र उवाच- अहो बत महद्दुःखं यदहं पाण्डवान्रणे ।
क्षेमिणश्चाव्ययांश्चैव त्वत्तः सूत शृणोमि वै ॥ ३ ॥
वज्रसारमयं नूनं हृदयं सुदृढं मम ।
यच्छ्रुत्वा निहतान्पुत्रान्दीर्यते न सहस्रधा ॥ ४ ॥
चिन्तयित्वा वयस्तेषां बालक्रीडां च सञ्जय ।
हतान्पुत्रानशेषेण दीर्यते मे भृशं मनः ॥ ५ ॥
अनेत्रत्वाद्यदेतेषां न मे रूपनिदर्शनम् ।
पुत्रस्नेहकृता प्रीतिर्नित्यमेतेषु धारिता ॥ ६ ॥
बालभावमतिक्रम्य यौवनस्थांश्च तानहम् ।
मध्यप्राप्तांस्तथा श्रुत्वा हृष्ट आसं तदाऽनघ ॥ ७ ॥
तानद्य निहतान्श्रुत्वा हतैश्वर्यान्हतौजसः ।

वचनोंसे स्वांस लेते हुए और रोते हुए राजाको समझाने लगे ॥ (५२-५५)

शल्यपर्वमें एक अध्याय समाप्त ।

शल्यपर्वमें द्वितीय अध्याय ।

वैशम्पायन बोले, हे राजन् ! जब सब स्त्री चली गई तब अम्बिकापुत्र धृतराष्ट्र अत्यन्त दुःखसे व्याकुल होकर रोने लगे, थोडे समयके पश्चात् ऊंची स्वांस लेकर हाथ पटकते हुए ऐसे वचन बोले ॥ (१-२)

धृतराष्ट्र बोले, हे सञ्जय ! हाय बडे दुःखकी बात है, कि मैं तुम्हारे मुखसे पाण्डवोंको कुशल सहित जीता सुनता हूं। मेरा हृदय वज्रसे भी अधिक कठोर है जो पुत्रोंकी मृत्यु सुनकर भी नहीं फटता, हे सञ्जय ! अपने पुत्रोंके खेल और मृत्युको स्मरण करके मेरा मन व्याकुल हुआ जाता है, मैंने अन्धा होनेके कारण उनका रूप नहीं देखा था, तोभी पुत्रोंका मुझे बहुत प्रेम था, हे पाप रहित ! मेरे पुत्र बालक अवस्थासे युवा अवस्थाको प्राप्त हुए सुन कर मैं बहुत प्रसन्न हुआ था, आज उनका धन और तेज नष्ट हो गया, और वे भी

न लभेयं क्वचिच्छान्तिं पुत्राधिभिरभिद्रुतः ॥ ८ ॥
एह्येहि पुत्र राजेन्द्र ममानाथस्य सांप्रतम् ।
त्वया हीनो महाबाहो कां नु यास्याम्यहं गतिम् ॥९॥
कथं त्वं पृथिवीपालांस्त्यक्त्वा तात समागतान् ।
शेषे विनिहतो भूमौ प्राकृतः कुनृपो यथा ॥ १० ॥
गतिर्भूत्वा महाराज ज्ञातीनां सुहृदां तथा ।
अन्धं वृद्धं च मां वीर विहाय क नु यास्यसि ॥ ११ ॥
सा कृपा सा च ते प्रीतिः सा च राजन्सुमानिता ।
कथं विनिहतः पार्थैः संयुगेष्वपराजितः ॥ १२ ॥
को नु मामुत्थितं वीर तात तातेति वक्ष्यति ।
महाराजेति सततं लोकनाथेति चासकृत ॥ १३ ॥
परिष्वज्य च मां कंठे स्नेहेन क्लिन्नलोचनः ।
अनुशाधीति कौरव्य तत्साधु वद मे वचः ॥ १४ ॥
ननु नामाहमश्रौषं वचनं तव पुत्रक ।
भूयसी मम पृथ्वीयं यथा पार्थस्य नो तथा ॥ १५ ॥
भगदत्तः कृपः शल्य आवन्त्योऽथ जयद्रथः ।
भूरिश्रवाः सोमदत्तो महाराजश्च बाह्लिकः ॥ १६ ॥

मर गये, यह सुनकर मुझे कहीं शान्ति नहीं होती। मैं अपने पुत्रोंके दुःखसे व्याकुल हो गया हूं ॥ (१-८)

हे महाबाहो राजेन्द्र ! हे पुत्र दुर्योधन ! तुम मेरे पास आओ, आओ अब तुम्हारे बिना मेरी कौन रक्षा करेगा ? हे तात ! आज तुम आये हुए राजोंको छोडकर साधारण राजाके समान पृथ्वी में मरे हुए क्यों पडे हो ? हे महाराज! हे वीर ! तुम सब राजा और सब बन्धुओंकी गति थे, आज मुझ अन्धेको छोडकर कहां चले जाते हो ? तुम्हें युद्धमें कोई नहीं जीत सक्ता था, आज पाण्डवोंने युद्धमें प्रीति, आदर और कृपा आदि तुम्हारे गुण कैसे नष्ट कर दिये ? हे वीर ! अब तुम्हारे बिना मुझे प्रतिदिन पिता महाराज और लोकनाथ कौन कहेगा ? हे पुत्र ! तुम प्रेमसे आंसू भर कर और कण्ठमें लेकर मीठे वचनोंसे कहो कि, हे कुरुराज ! मुझे कुछ आज्ञा दीजिये, तुमने पहले हमसे कहा था कि इस समस्त पृथ्वीपर जैसा हमारा अधिकार है ऐसा पाण्डवोंका नहीं ॥ (९-१५)

हमारी ओर भगदत्त, कृपाचार्य,

अश्वत्थामा च भोजश्च मागधश्च महाबलः ।
बृहद्बलश्च काशीशः शकुनिश्चापि सौबलः ॥ १७ ॥
म्लेच्छाश्च शतसाहस्राः शकाश्च यवनैः सह ।
सुदक्षिणश्च काम्बोजस्त्रिगर्ताधिपतिस्तथा ॥ १८ ॥
भीष्मः पितामहश्चैव भारद्वाजोऽथ गौतमः ।
श्रुतायुश्चायुतायुश्च शतायुश्चापि वीर्यवान् ॥ १९ ॥
जलसन्धोऽथार्ष्यशृंगी राक्षसश्चाप्यलायुधः ।
अलम्बुषो महाबाहुः सुबाहुश्च महारथः ॥ २० ॥
एते चान्ये च बहवो राजानो राजसत्तम ।
मदर्थमुद्यताः सर्वे प्राणांस्त्यक्त्वा धनानि च ॥ २१ ॥
तेषां मध्येस्थितो युद्धे भ्रातृभिः परिवारितः ।
योधयिष्याम्यहं पार्थान्पाञ्चालांश्चैव सर्वशः ॥ २२ ॥
चेदींश्च नृपशार्दूल द्रौपदेयांश्च संयुगे ।
सात्यकिं कुन्तिभोजं च राक्षसं च घटोत्कचम् ॥२३ ॥
एकोऽप्येषां महाराज समर्थः सन्निवारणे ।
समरे पाण्डवेयानां संक्रुद्धो ह्यभिधावताम् ॥ २४ ॥
किं पुनः सहिता वीराः कृतवैराश्च पाण्डवैः ।
अथवा सर्व एवैते पाण्डवस्यानुयायिभिः ॥ २५ ॥

शल्य, विन्द अनुविन्द, जयद्रथ, भूरिश्रवा, सोमदत्त, महाराज बाह्लीक, अश्वत्थामा, कृतवर्मा, मगधराज, अतिबली काशिराज, सुबलपुत्र शकुनि, सहस्रों म्लेच्छ, शक, यवन, काम्बोज देशी सुदक्षिण, त्रिगर्तदेशी सुशर्मा, पितामह भीष्म, भरद्वाजपुत्र द्रोणाचार्य, श्रुतायु, अयुतायु, बलवान शतायु, जलसन्ध, ऋष्य शृङ्गी, अलायुध राक्षस, महाबाहु अलम्बुष और महारथ सुबाहु, इनको आदि लेकर और भी अनेक राजा लोग मेरे लिये प्राण और धनका मोह छोडकर युद्ध करनेको उपस्थित हैं। १६–२१

मैं इन सबके बीचमें खडा होकर अपने भाइयोंके सहित समस्त पाञ्चाल, सृञ्जय और पाण्डवोंसे युद्ध करूंगा॥ हे राजसिंह! मैं एकलाही चन्देरीके राजा द्रौपदीके पांचोंपुत्र सात्यकी कुन्तिभोज, और भोज, घटोत्कच राक्षसको युद्धमें निवारण करूंगा। जिस समय मैं क्रोध करके युद्धमें अकेला जाऊंगा, उसी समय पाण्डवोंके सब वीरोंको जीत लूंगा॥ फिर

योत्स्यंते सह राजेन्द्र हनिष्यन्ति च तान्मृधे ।
कर्णं एको मया सार्द्धं निहनिष्यति पाण्डवान् ॥२६॥
ततो नृपतयो वीराः स्थास्यन्ति मम शासने ।
यश्च तेषां प्रणेता वै वासुदेवो महाबलः ॥ २७ ॥
न स संनह्यते राजन्निति मामब्रवीद्वचः ।
तस्याथ वदतः सूत बहुशो मम सन्निधौ ॥ २८ ॥
शक्तितो ह्यनुपश्यामि निहतान्पाण्डवान् रणे ।
तेषां मध्ये स्थिता यत्र हन्यंते मम पुत्रकाः ॥ २९ ॥
व्यायच्छमानाः समरे किमन्यद्भागधेयतः ।
भीष्मश्च निहतो यत्र लोकनाथः प्रतापवान् ॥ ३० ॥
शिखण्डिनं समासाद्य मृगेन्द्र इव जम्बुकम् ।
द्रोणश्च ब्राह्मणो यत्र सर्वशस्त्रास्त्रपारगः ॥ ३१ ॥
निहतः पाण्डवैः सङ्ख्ये किमन्यद्भागधेयतः ।
कर्णश्च निहतः सङ्ख्ये दिव्यास्त्रज्ञो महाबलः ॥ ३२ ॥
भूरिश्रवा हतो यत्र सोमदत्तश्च संयुगे ।
बाह्लिकश्च महाराज किमन्यद्भागधेयतः ॥ ३३ ॥

इन वीरोंके सहित युद्ध करनेकी तो कथा ही क्या है? (२२-२५)

अथवा ये सब राजा पाण्डवोंके सहायकोंसे युद्ध करेंगे, तथा उन्हें मारेंगे। और एकले कर्ण ही मेरी सहायतासे पांचों पाण्डवोंको मार डालेंगे ॥ पाण्डवोंके मरनेके पश्चात् सब राजा और वीर मेरी आज्ञामें चलेंगे । हे राजन्! जो महाबलवान श्रीकृष्णचन्द्र पाण्डवोंके प्रधान हैं, सो कदापि युद्ध करनेको खडे नहीं होंगे, इत्यादि अनेक वचन तुमने कर्णके आगे मुझसे कहे थे। सो आज मैं प्रारब्धसे उन पाण्डवोंको तो जीता देखता हूं । और तुम्ही उनके हाथसे काल वश हुए॥ (२६—२९)

हे सञ्जय! देखो जैसे सियार सिंहको मार डालता है। ऐसे शिखण्डीने महाप्रतापी लोकनाथ भीष्मको युद्धमें मारडाला, यहां प्रारब्धके सिवाय और कौन बलवान कहा जा सकता है? ब्राह्मणश्रेष्ठ सब शत्रुनाशन अस्त्रविद्या जाननेवाले द्रोणाचार्यको धृष्टद्युम्नने मारडाला, कहो इसमें प्रारब्धके सिवाय किसको दोष दें? महाबलवान दिव्य शस्त्र जाननेवाले, कर्णको युद्धमें अर्जुनने मार डाला, यहां प्रारब्धके सिवाय और कि-

भगदत्तो हतो यत्र गजयुद्धविशारदः।
जयद्रथश्च निहतः किमन्यद्भागधेयतः ॥ ३४ ॥
सुदक्षिणो हतो यत्र जलसन्धश्च पौरवः।
श्रुतायुश्चायुतायुश्च किमन्यद्भागधेयतः ॥ ३५ ॥
महाबलस्तथा पाण्ड्यः सर्वशस्त्रभृतां वरः।
निहतः पाण्डवैः सङ्ख्ये किमन्यद्भागधेयतः ॥ ३६ ॥
बृहद्बलो हतो यत्र मागधश्च महाबलः।
उग्रायुधश्च विक्रान्तः प्रतिमानं धनुष्मताम् ॥ ३७ ॥
आवन्त्यो निहतो यत्र त्रैगर्त्तश्च जनाधिपः।
संशप्तकाश्च निहताः किमन्यद्भागधेयतः ॥ ३८ ॥
अलम्बुषस्तथा राजन् राक्षसश्चाप्यलायुधः।
आर्ष्यशृंगिश्च निहतः किमन्यद्भागधेयतः ॥ ३९ ॥
नारायणा हता यत्र गोपाला युद्धदुर्मदाः।
म्लेच्छाश्च बहुसाहस्राः किमन्यद्भागधेयतः ॥ ४० ॥
शकुनिः सौबलो यत्र कैतव्यश्च महाबलः।
निहतः सबलो वीरः किमन्यद्भागधेयतः ॥ ४१ ॥
एते चान्ये च बहवः कृतास्त्रा युद्धदुर्मदाः।
राजानो राजपुत्राश्च शूराः परिघबाहवः ॥ ४२ ॥
निहता बहवो यत्र किमन्यद्भागधेयतः।
यत्र शूरा महेष्वासाः कृतास्त्रा युद्धदुर्मदाः ॥ ४३ ॥

सको बलवान कहें? देखो भूरिश्रवा, महाराज बाह्लीक भी युद्धमें मारे गये, इसमें प्रारब्धके सिवाय और किसको दोष दें? जहां गजयुद्धमें पण्डित भगदत्त और महावीर जयद्रथ मारे गये, तहां प्रारब्धको छोड किसको दोष दें? ।३०-३४

देखो सुदक्षिण, पुरुवंशी जलसन्ध, श्रुतायु, अयुतायु, महाबलवान सर्व शास्त्रज्ञ महाराज पाण्डव, महाबली मगधदेशका राजा उग्रायुध, विक्रान्त, प्रतिमान, विन्द, अनुविन्द, राजा त्रिगर्तदेशीय, संशप्तक, अलम्बुष राक्षस, अलायुध, ऋषीशृङ्गी, महाबली, नारायणी सेना, असंख्य म्लेच्छ, सुबलपुत्र शकुनि, महा बलवान उलूक, वीर सुबल इनको आदि लेकर और भी अनेक वीर शस्त्रविद्याके जाननेवाले, परिघके समान हाथवाले राजा और राजपुत्र युद्धमें मारे गये,

बहवो निहताः सूत महेन्द्रसमविक्रमाः ।
नानादेशसमावृत्ताः क्षत्रिया यत्र सञ्जय ॥ ४४ ॥
निहताः समरे सर्वे किमन्यद्भागधेयतः ॥
पुत्राश्च मे विनिहताः पौत्राश्चैव महाबलाः ॥ ४५ ॥
वयस्या भ्रातरश्चैव किमन्यद्भागधेयतः ।
भागधेयसमायुक्तो ध्रुवमुत्पद्यते नरः ॥ ४६ ॥
यस्तु भाग्यसमायुक्तः स शुभं प्राप्नुयान्नरः ।
अहं वियुक्तस्तैर्भाग्यैः पुत्रैश्चैवेह सञ्जय ॥ ४७ ॥
कथमद्य भविष्यामि वृद्धः शत्रुवशं गतः ।
नान्यदत्र परं मन्ये वनवासादृते प्रभो ॥ ४८ ॥
सोऽहं वनं गमिष्यामि निर्बन्धुर्ज्ञातिसंक्षये ।
न हि मेऽन्यद्भवेच्छ्रेयो वनाभ्युपगमादृते ॥ ४९ ॥
इमामवस्थां प्राप्तस्य लूनपक्षस्य सञ्जय ।
दुर्योधनो हतो यत्र शल्यश्च निहतो युधि ॥ ५० ॥
दुःशासनो विविंशश्च विकर्णश्च महाबलः ।
कथं हि भीमसेनस्य श्रोष्येऽहं शब्दमुत्तमम् ॥ ५१ ॥
एकेन समरे येन हतं पुत्रशतं मम ।
असकृद्वदतस्तस्य दुर्योधनवधेन च ॥ ५२ ॥

यहां प्रारब्धको छोड किसे बली कहें ॥ (३५—४३)

हे सूतपुत्र सञ्जय ! ये सब अनेक देशोंसे आये हुए क्षत्री शूरवीर शस्त्रविद्याके जाननेवाले और इन्द्रके समान बलवान थे, सो सब तथा मेरे बलवान बेटे और पोते मारे गये ॥ यहां प्रारब्धके सिवाय किसको बलवान कहें ? मेरी ही प्रारब्धसे मेरे सब भाई और मित्र मारे गये, मनुष्य प्रारब्धहीके वशमें होकर जन्म लेता है ॥ हे सञ्जय ! प्रारब्धहीसे जगत्में सुख होता है, मैं अत्यन्त मन्द भाग्य हूं। इसहीसे मेरे सब पुत्र मारे गये ॥ (४४—४७)

हे सञ्जय! अब मैं बूढा होकर शत्रुओंके वशमें कैसे रहूंगा ? इसलिये वनवास करना ही मेरे लिये अच्छा है, मुझे वनको जानेके सिवाय और किसी बातमें कल्याण नहीं होगा । इसलिये वनहीको चला जाऊंगा । हे सञ्जय! मैं इस समय पङ्खरहित पक्षीके समान होगया हूं । देखो दुर्योधन और शल्य भी मारे गये।

दुःखशोकाभिसन्तप्तो न श्रोष्ये परुषा गिरः।
वैशम्पायन उवाच-एवं वृद्धश्च सन्तप्तः पार्थिवो हतबान्धवः ॥ ५३ ॥
मुहुर्मुहुर्मुह्यमानः पुत्राधिभिरभिप्लुतः।
विलप्य सुचिरं कालं धृतराष्ट्रोऽम्बिकासुतः ॥ ५४ ॥
दीर्घमुष्णं स निःश्वस्य चिन्तयित्वा पराभवम्।
दुःखेन महता राजन्सन्तप्तो भरतर्षभः ॥ ५५ ॥
पुनर्गावल्गणिं सूतं पर्यपृच्छद्यथातथम्।
धृतराष्ट्र उवाच- भीष्मद्रोणौ हतौ श्रुत्वा सूतपुत्रं च घातितम् ॥ ५६ ।
सेनापतिं प्रणेतारं किमकुर्वत मामकाः।
यं यं सेनाप्रणेतारं युधि कुर्वन्ति मामकाः ॥ ५७ ॥
अचिरेणैव कालेन तं तं निघ्नन्ति पाण्डवाः।
रणमूर्ध्नि हतो भीष्मः पश्यतां वः किरीटिना ॥ ५८ ॥
एवमेव हतो द्रोणः सर्वेषामेव पश्यताम्।
एवमेव हतः कर्णः सूतपुत्रः प्रतापवान् ॥ ५९ ॥
सराजकानां सर्वेषां पश्यतां वः किरीटिना।
पूर्वमेवाहमुक्तो वै विदुरेण महात्मना ॥ ६० ॥

जिस भीमसेनने दुर्योधन, दुःशासन, विविंशति और महाबलवान विकर्ण आदि मेरे सौ पुत्रोंको मार डाला। उसके वचन मैं कैसे सुनूंगा ? जिस एकलेने मेरे दुर्योधन आदि सौ पुत्रोंको मारा उस भीमसेनके कठोर वचनोंको मैं कैसे सुनूंगा॥ (४८-५३)

श्रीवैशम्पायन बोले, इस प्रकार बूढे राजा धृतराष्ट्र पुत्रोंके शोकसे व्याकुल होकर बार बार मूर्च्छित होने और रोने लगे। इस प्रकार बहुत समयतक रोकर और अपने निरादरको स्मरण करने और दुःखसे व्याकुल होकर फिर सञ्जयसे ऐसा प्रश्न किया। (५४—५४)

धृतराष्ट्र बोले, हे सञ्जय ! मेरे पुत्रोंने भीष्म, द्रोण और कर्णको मरा देख किसको सेनापति बनाया ? हाय ! मेरे पुत्र जिसको सेनापति बनाते हैं। उसीको पाण्डव चटपट मार डालते हैं। देखो, तुम्हारे देखते देखते अर्जुनने भीष्मको मारडाला, इसी प्रकार द्रोणाचार्य और प्रतापी कर्ण भी मारे गये॥ देखो महात्मा विदुरने हमसे जो कहा था, कि "दुर्योधनके दोषसे सब प्रजाका नाश होजायगा। ये सब सभासद मूर्ख होगये हैं। कुछ नहीं समझते और सम-

दुर्योधनापराधेन प्रजेयं विनशिष्यति ।
केचिन्न सम्यक्पश्यन्ति मूढाः सम्यगवेक्ष्य च ॥६१॥
तदिदं मम मूढस्य तथा भूतं वचः स्म तत् ।
यदब्रवीत्स धर्मात्मा विदुरो दीर्घदर्शिवान् ।
तत्तथा समनुप्राप्तं वचनं सत्यवादिनः ॥ ६२ ॥
दैवोपहतचित्तेन यन्मया न कृतं पुरा ।
अनयस्य फलं तस्य ब्रूहि गावल्गणे पुनः ॥ ६३ ॥
को वा मुखमनीकानामासीत्कर्णे निपातिते ।
अर्जुनं वासुदेवं च को वा प्रत्युद्ययौ रथी ॥ ६४ ॥
केऽरक्षन्दक्षिणं चक्रं मद्रराजस्य संयुगे ।
वामं च योद्धुकामस्य के वा वीरस्य पृष्ठतः ॥ ६५ ॥
कथं च वः समेतानां मद्रराजो महारथः ।
निहतः पाण्डवैः संख्ये पुत्रो वा मम सञ्जय ॥ ६६ ॥
ब्रूहि सर्वं यथा तत्त्वं भरतानां महाक्षयम् ।
यथा च निहतः संख्ये पुत्रो दुर्योधनो मम ॥ ६७ ॥
पञ्चालाश्च यथा सर्वे निहताः सपदानुगाः ।
धृष्टद्युम्नः शिखण्डी च द्रौपद्याः पञ्च चात्मजाः॥ ६८ ॥
पाण्डवाश्च यथा मुक्तास्तथोभौ माधवौ युधि ।
कृपश्च कृतवर्मा च भारद्वाजस्य चात्मजाः ॥ ६९ ॥

झकर भी उपाय नहीं करते"॥(५६-६०)

सोही दीर्घदर्शी महात्मा विदुरका वचन आज मुझ मूर्खके आगे आगया, सत्यवादी विदुरने जो कुछ कहा था सो सभी सत्य हुआ ॥ हे सञ्जय ! मैंने जो प्रारब्धके वशमें होकर अन्याय किया था । उसीका यह फल हुआ, अब तुम शल्य और दुर्योधनके युद्ध करनेका वृत्तान्त हमसे कहो; कर्णके मरनेके पश्चात् कौन सेनापति हुआ ? अर्जुन और कृष्णसे कौन महारथ युद्ध करनेको गया ? और मद्रराज शल्यके दहिने पहियेकी रक्षा किसने की और बांये पहियेकी किसने की और उनके रथकी रक्षा हेतु पीछे कौन रहा ? कहो हमारे सब वीरोंके बीचमें पाण्डवोंने मद्रराज शल्य और दुर्योधनको कैसे मार डाला ? जिस प्रकार हमारा पुत्र दुर्योधन युद्धमें मारा गया और भरतवंशका नाश हुआ सो सब कथा हमसे कहो ! कहो सब सेना

यद्यथा यादृशं चैव युद्धं वृत्तं च साम्प्रतम् ।
अखिलं श्रोतुमिच्छामि कुशलो ह्यसि सञ्जय ॥७०॥ [१२५]

इति महाभारते० शल्यपर्वणि धृतराष्ट्रविलापे द्वितीयोऽध्यायः ॥ २ ॥

सञ्जय उवाच— शृणुराजन्नवहितो यथावृत्तो महान्क्षयः ।
कुरूणां पाण्डवानां च समासाद्य परस्परम् ॥ १ ॥
निहते सूतपुत्रे तु पाण्डवेन महात्मना ।
विद्रुतेषु च सैन्येषु समानीतेषु चासकृत् ॥ २ ॥
घोरे मनुष्यदेहानामाजौ नरवरक्षये ।
यत्तत्कर्णे हते पार्थः सिंहनादमथाकरोत् ॥ ३ ॥
तदा तव सुतान्राजन्प्राविशत्सुमहद्भयम् ।
न सन्धातुमनीकानि न चैवाथ पराक्रमे ॥ ४ ॥
आसीद् बुद्धिर्हते कर्णे तव योधस्य कस्य चित् ।
वणिजो नावि भिन्नायामगाधे विप्लवा इव ॥ ५ ॥
अपारे पारमिच्छन्तो हते द्वीपे किरीटिना ।
सूतपुत्रे हते राजन्वित्रस्ताः शरविक्षताः ॥ ६ ॥
अनाथा नाथमिच्छन्तो मृगाः सिंहार्दिता इव ।

के सहित पाञ्चालदेशी धृष्टद्युम्न, शिखण्डि और द्रौपदीके पांचों पुत्र कैसे मारे गये? कहो; पांचों पाण्डव, सात्यकी, कृतवर्मा कृपाचार्य और अश्वत्थामा कैसे जीते बचे ? (६२—६९)

शल्यपर्वमें दो अध्याय समाप्त ।

शल्यपर्वमें तीन अध्याय ।

सञ्जय बोले, हे राजन् ! अब आप सावधान होकर कौरव और पाण्डवोंका जिस प्रकार परस्पर युद्ध हुआ सो कथा हम कहते हैं, सुनो। हे राजेन्द्र ! जिस समय महात्मा अर्जुनने कर्णको मारडाला और तुम्हारी सब सेना इधर उधर को भागने लगी और अनेक उत्तम वीर मरकर पृथ्वीमें गिरने लगे तब अर्जुन सिंहके समान गर्जे। तब तुम्हारे पुत्र डरसे व्याकुल होगये, वे लोग अपनी सेनाको न सम्भाल सके और न युद्ध कर सके॥ (१—४)

जैसे समुद्रमें नाव टूटनेसे बनिये घबडा जाते हैं ऐसेही तुम्हारे पुत्र कर्णके मरनेसे अथाह शोक और भय समुद्र में डूबने लगे। जैसे अपार समुद्र में डूबते मनुष्य पार जानेकी इच्छा करते हैं ऐसेही अर्जुनके बाणसे कर्णरूपी द्वीप टूटनेपर तुम्हारे पुत्र शोक समुद्र के पार

भग्नशृङ्गा इव वृषाः शीर्णदंष्ट्रा इवोरगाः ॥ ७ ॥
प्रत्युपायाम सायाह्ने निर्जिताः सव्यसाचिना ।
हतप्रवीरा विध्वस्ता निकृत्ता निशितैः शरैः ॥ ८ ॥
सूतपुत्रे हते राजन्पुत्रास्ते प्राद्रवंस्ततः ।
विध्वस्तकवचाः सर्वे कां-दिशीका विचेतसः ॥ ९ ॥
अन्योन्यमभिनिघ्नन्तो वीक्षमाणा भयाद्दिशः ।
मामेव नूनं बीभत्सुर्मामेव च वृकोदरः ॥ १० ॥
अभियातीति मन्वानाः पेतुर्मम्लुश्च भारत ।
अश्वानन्ये गजानन्ये रथानन्ये महारथाः ॥ ११ ॥
आरुह्य जवसम्पन्नाः पादातान्प्रजहुर्भयात् ।
कुञ्जरैः स्यन्दना भग्नाः सादिनश्च महारथैः ॥ १२ ॥
पदातिसङ्घाश्चाश्वौघैः पलायद्भिर्भृशं हताः ।
व्यालतस्करसङ्कीर्णे सार्थहीना यथा वने ॥ १३ ॥
तथा त्वदीयानि हते सूतपुत्रे तदाऽभवन् ।
हतारोहास्तथा नागाश्छिन्नहस्तास्तथा परे ॥ १४ ॥
सर्वं पार्थमयं लोकमपश्यन्वै भयार्दिताः ।

जानेकी इच्छा करने लगे, जैसे सिंहसे व्याकुल हरिण, सींग टूटे बैल और दांत टूटे सांप घबडाते हैं, वैसे ही कर्णके मरनेसे तुम्हारे पुत्र अनाथ होकर घबडाने लगे। (५-८)

सन्ध्याके समय कवच और ध्वजासे हीन होकर अर्जुनके बाणोंसे व्याकुल तुम्हारे पुत्र युद्धसे लौटे, उस समय तुम्हारे पुत्र ऐसे व्याकुल हुए कि उन्हें दिशाका भी ज्ञान न रहा, उस समय उन सबको यही ज्ञान होता था कि हमारे ही पीछे अर्जुन और भीमसेन दौडे चले आते हैं, अपनी सेनाकी आप ही नाश करते थे और चारों ओरको देखते हुए भागे चले जाते थे, कोई डरता था, और कोई घबडाकर भागता था, कोई हाथी, कोई घोडे और कोई महारथ रथोंपर चढकर युद्धसे भागते थे और पदातियोंको मारते थे, जैसे सांप और चोरोंसे भरे हुए वनको छोडकर पथिक भागते हैं, वैसे ही तुम्हारी सेना व्याकुल होकर भागी, हाथियोंने रथोंको तोड डाला, और घोडोंकी झपट में आकर अनेक पदाति मर गये, अनेक हाथियोंपर चढे वीर मर गये। किसी हाथीका सूंड कट गया। (९-१४)

तान्प्रेक्ष्य द्रवतः सर्वान् भीमसेनभयार्दितान् ॥ १५ ॥
दुर्योधनोऽथ स्वं सूतं हाहाकृत्वैवमब्रवीत् ।
नातिक्रमिष्यते पार्थो धनुष्पाणिमवस्थितम् ॥ १६ ॥
जघने युद्धमानं मां तूर्णमश्वान्प्रचोदय ।
समरे युद्धमानं हि कौन्तेयो मां धनञ्जयः ॥ १७ ॥
नोत्सहेताप्यतिक्रान्तुं वेलामिव महार्णवः ।
अद्यार्जुनं सगोविन्दं मानिनं च वृकोदरम् ॥ १८ ॥
निहत्य शिष्टान् शत्रूंश्च कर्णस्यानृण्यमाप्नुयाम् ।
तच्छ्रुत्वा कुरुराजस्य शूरार्यसदृशं वचः ॥ १९ ॥
सूतो हेमपरिच्छन्नान् शनैरश्वानचोदयत् ।
गजाश्वरथहीनास्तु पादाताश्चैव मारिष ॥ २० ॥
पञ्चविंशतिसाहस्राः प्राद्रवन् शनकैरिव ।
तान् भीमसेनः संक्रुद्धो धृष्टद्युम्नश्च पार्षतः ॥ २१ ॥
बलेन चतुरङ्गेण परिक्षिप्याहनच्छरैः ।
प्रत्ययुध्यंस्तु ते सर्वे भीमसेनं सपार्षतम् ॥ २२ ॥
पार्थपार्षतयोश्चान्ये जगृहुस्तत्र नामनी ।
अक्रुद्ध्यत रणे भीमस्तैर्मृधे प्रत्यवस्थितैः ॥ २३ ॥

उस समय तुम्हारी सब सेनाको जगत् अर्जुन रूप दीखता था, भीमसेन के भयसे अपनी सेनाको भागते देख राजा दुर्योधनने अपने सारथीसे कहा जब मैं धनुष धारण करके युद्धमें जाऊंगा तब अर्जुन मुझे नहीं जीतसकेगा, मैं अभी कुन्तीपुत्र अर्जुनको युद्धमें मारूंगा, तुम घोडोंको शीघ्र हांको जैसे तटके पहाडको नहीं लांघ सक्ता, ऐसे समुद्र ही अर्जुन मुझे नहीं जीत सकेंगे,मैं अभी अर्जुन, श्रीकृष्ण, और अभिमानी भीमसेनको मारकर कर्णके ऋणसे छूटूंगा। राजाके वीर और आर्योंके समान वचन सुनकर सारथीने सोनेके जालसे ढके हुए घोडोंको धीरे धीरे हांका, राजा दुर्योधनके सङ्ग घोडे हाथी और रथोंसे हीन केवल पचीस सहस्र पदाति धीरे धीरे चले,उन सबको भीमसेन और धृष्टद्युम्नने अपनी चतुरङ्गिनी सेना के सहित बाणोंसे मार डाला, उन्होंने भी उनके सङ्ग घोर युद्ध किया कोई भीमसेन और कोई धृष्टद्युम्नका नाम लेकर पुकारने लगा। तब महा पराक्रमी भीमसेनने क्रोध किया॥ (१९—२३)

सोऽवतीर्य रथात्तूर्णं गदापाणिरयुध्यत ।
न तान्रथस्थो भूमिष्ठान्धर्मापेक्षी वृकोदरः ॥ २४ ॥
योधयामास कौन्तेयो भुजवीर्यमुपाश्रितः ।
जातरूपपरिच्छन्नां प्रगृह्य महतीं गदाम् ॥ २५ ॥
न्यवधीत्तावकान्सर्वान्दण्डपाणिरिवान्तकः ।
पदातयो हि संरब्धास्त्यक्तजीवितबान्धवाः ॥ २६ ॥
भीममभ्यद्रवन्संख्ये पतङ्गा इव पावकम् ।
आसाद्य भीमसेनं ते संरब्धा युद्धदुर्मदाः ॥ २७ ॥
विनेदुः सहसा दृष्ट्वा भूतग्रामा इवान्तकम् ।
श्येनवद्व्यचरत् भीमः खड्गेन गदया तथा ॥ २८ ॥
पञ्चविंशतिसाहस्रांस्तावकानां व्यपोथयत् ।
हत्वा तत्पुरुषानीकं भीमः सत्यपराक्रमः ॥ २९ ॥
धृष्टद्युम्नं पुरस्कृत्य पुनस्तस्थौ महाबलः ।
धनञ्जयो रथानीकमन्वपद्यत वीर्यवान् ॥ ३० ॥
माद्रीपुत्रौ च शकुनिं सात्यकिश्च महाबलः ।
जवेनाभ्यपतन् हृष्टा घ्नन्तो दौर्योधनं बलम् ॥ ३१॥

तब धर्मात्मा भीमसेनने भूमिमें खडे हुए वीरोंसे रथमें बैठकर युद्ध करना धर्म न समझा इसलिये गदा लेकर रथसे नीचे उतरे; केवल उस सोनेसे जडी हुई गदासे ही भीमसेन घोर युद्ध करने लगे, जैसे दण्डधारी यमराज प्रजाका नाश करते हैं,तैसे ही भीमसेनने अपनी गदासे उन सब वीरोंको प्राण और बन्धुओंसे छुडा दिया, वे सब वीर इस प्रकार भीमसेनकी ओर चले, जैसे पतङ्ग आगकी ओर जाते हैं, उनके पास जाते ही सब नष्ट होगये जैसे यमराजको देख प्रजाका नाश होजाता है, तैसे ही भीमसेनको देख तुम्हारी सेनाका नाश होगया भीमसेन खड्ग और गदा लेकर उस सेनामें इस प्रकार घूमने लगे, जैसे पक्षियोंमें बाज; इस प्रकार पराक्रमी भीमसेनने तुम्हारे पचीस सहस्र पदातियोंको मार डाला, इस प्रकार भीमसेन और धृष्टद्युम्न सब सेनाका नाश करके एक स्थान पर खडे होगये । (२४—३०)

अर्जुन भी रथ सेनासे युद्ध करने लगे, इसी प्रकार नकुल, सहदेव और सात्यकि तुम्हारी सेनाका नाश करते हुए शकुनिसे युद्ध करने लगे, उस

तस्याश्ववाहान्सुबहूंस्ते निहत्य शितैः शरैः ।
समन्वधावंस्त्वरितास्तत्र युद्धमवर्तत ॥ ३२ ॥
ततो धनञ्जयो राजन् रथानीकमगाहत ।
विश्रुतं त्रिषु लोकेषु गाण्डीवं व्याक्षिपन्धनुः ॥ ३३ ॥
कृष्णसारथिमायान्तं दृष्ट्वा श्वेतहयं रथम् ।
अर्जुनं चापि योद्धारं त्वदीयाः प्राद्रवन्भयात्॥ ३४ ॥
विप्रहीणरथाश्वाश्च शरैश्च परिवारिताः ।
पञ्चविंशतिसाहस्राः पार्थमार्छन्पदातयः ॥ ३५ ॥
हत्वा तत्पुरुषानीकं पञ्चालानां महारथः ।
भीमसेनं पुरस्कृत्य न चिरात्प्रत्यदृश्यत ॥ ३६ ॥
महाधनुर्धरः श्रीमानमित्रगणमर्दनः ।
पुत्रः पञ्चालराजस्य धृष्टद्युम्नो महायशाः ॥ ३७ ॥
पारावतसवर्णाश्वं कोविदारवरध्वजम् ।
धृष्टद्युम्नं रणे दृष्ट्वा त्वदीयाः प्राद्रवन्भयात् ॥ ३८ ॥
गान्धारराजं शीघ्रास्त्रमनुसृत्य यशस्विनौ ।
अचिरात्प्रत्यदृश्येतां माद्रीपुत्रौ ससात्यकी ॥ ३९ ॥
चेकितानः शिखण्डी च द्रौपदेयाश्च मारिष ।
हत्वा त्वदीयं सुमहत्सैन्यं शङ्खानथाधमन् ॥ ४० ॥

समयमें सब वीर बहुत प्रसन्नता और वेगसे युद्ध करते थे, इन तीनोंने शकुनिके सङ्गके घुडचढे वीरोंको मारकर शकुनिसे महायुद्ध किया, इसी प्रकार त्रिलोक विख्यात गाण्डीव धनुषको घुमाते हुए अर्जुन उस रथ सेनामें घोर युद्ध करने लगे, कृष्ण सारथी और सफेद घोडोंसे युक्त अर्जुनको आते देख तुम्हारी सेना इधर उधर भागने लगी ॥ (३१—३४)

किसीका रथ टूट गया, किसीके घोडे मर गये, इस प्रकार पचीस सहस्र पदाति अर्जुनकी ओर चले। उस सब सेनाको धृष्टद्युम्नने भीमसेनकी सहायतासे मार डाला॥ उत्तम कबूतरके समान सफेद रङ्गवाले, घोडे और कचनार वृक्ष युक्त ध्वजावाले, धृष्टद्युम्नके रथको देख कर तुम्हारे पुत्र इधर उधरको भागने लगे, महा यशस्वी नकुल, सहदेव और सात्यकिने शीघ्रता सहित शकुनिके पास जाकर घोर युद्ध करके उन्हें जीत लिया इसी प्रकार चेकितान शिखण्डी और

ते सर्वे तावकान्प्रेक्ष्य द्रवतो वै पराङ्मुखान् ।
अभ्यधावन्त निघ्नन्तो वृषान् जित्वा वृषा इव॥ ४१ ॥
सेनावशेषं तं दृष्ट्वा तव पुत्रस्य पाण्डवः ।
अवस्थितं सव्यसाची चुक्रोध बलवन्नृपः ॥ ४२ ॥
तत एनं शरै राजन्सहसा समवाकिरत् ।
रजसा चोद्धतेनाथ न स्म किंचन दृश्यते ॥ ४३ ॥
अन्धकारीकृते लोके शरीभूते महीतले ।
दिशः सर्वा महाराज तावकाः प्राद्रवन्भयात्॥ ४४ ॥
भज्यमानेषु सर्वेषु कुरुराजो विशाम्पते ।
परेषामात्मनश्चैव सैन्ये ते समुपाद्रवत् ॥ ४५ ॥
ततो दुर्योधनः सर्वानाजुहावाथ पाण्डवान् ।
युद्धाय भरतश्रेष्ठ देवानिव पुरा बलिः ॥ ४६ ॥
त एनमभिगर्जन्तं सहिताः समुपाद्रवन् ।
नानाशस्त्रसृजः क्रुद्धा भर्त्सयन्तो मुहुर्मुहुः ॥ ४७ ॥
दुर्योधनोऽप्यसम्भ्रान्तस्तानरीन् व्यधमच्छरैः ।
तत्राद्भुतमपश्याम तव पुत्रस्य पौरुषम् ॥ ४८ ॥

द्रौपदीके पाचों पुत्र तुम्हारी सेनाको मारकर शङ्ख बजाने लगे ॥ ३५—४०

जैसे भागते हुए बैलोंके पीछे बलवान बैल दौडते हैं, तैसे ही तुम्हारी सेनाको भागते देख पाण्डवोंके वीर दौडे, हे राजन् ! तुम्हारी बची हुई सेनाको आगे खडा देख पाण्डु पुत्र अर्जुनको महा क्रोध हुआ। तब अर्जुन उस सेना के ऊपर सहस्रों बाण वर्षाने लगे। उस समय अन्धकार और धूलसे कुछ नहीं दीखता था, हे महाराज ! उस समय चारों ओर बाण ही बाण दीखते थे, तब तुम्हारी सेना व्याकुल होकर इधर उधर को भागने लगी, (४१-४४)

हे राजेन्द्र ! जब इस प्रकार तुम्हारी सेना भागने लगी। तब दुर्योधन अपनी और पाण्डवोंकी सेनाको मारने लगे। हे राजन् ! तब बलवान् दुर्योधन युद्धमें खडे होकर सब पाण्डवोंको युद्धके लिये, इस प्रकार ललकारने लगे, जैसे पहले समयमें बलिने देवतोंको पुकारा था, पाण्डवोंके वीर भी दुर्योधनको गर्जता हुआ देख अनेक शस्त्र वर्षाते और डराते हुए दौडे। दुर्योधन भी सावधान होकर एकले ही उन सब वीरोंसे युद्ध करने लगे, उनके इस परा-

यदेनं पाण्डवाः सर्वे न शेकुरतिवर्त्तितुम् ।
नातिदूरापयातं च कृतबुद्धिः पलायने ॥ ४९ ॥
दुर्योधनः स्वकं सैन्यमपश्यद्भृशविक्षतम् ।
ततोऽवस्थाप्य राजेन्द्र कृतबुद्धिस्तवात्मजः ॥ ५० ॥
हर्षयन्निव तान्योधांस्ततो वचनमब्रवीत् ।
न तं देशं प्रपश्यामि पृथिव्यां पर्वतेषु च ॥ ५१ ॥
यत्र यातान्न वो हन्युः पाण्डवाः किं सृतेन वः ।
स्वल्पं चैव बलं तेषां कृष्णौ च भृशविक्षतौ ॥ ५२ ॥
यदि सर्वेऽत्र तिष्ठामो ध्रुवं नो विजयो भवेत् ।
विप्रयातांस्तु वो भिन्नान्पाण्डवाः कृतकिल्बिषान् ॥५३॥
अनुसृत्य हनिष्यन्ति श्रेयो नः समरे वधः ।
सुखः सांग्रामिको मृत्युः क्षत्रधर्मेण युध्यताम् ॥५४॥
मृतो दुःखं न जानीते प्रेत्य चानन्त्यमश्नुते ।
शृण्वन्तु क्षत्रियाः सर्वे यावन्तोऽत्र समागताः ॥५५॥
द्विषतो भीमसेनस्य वशमेष्यथ विह्वलाः ।

क्रमको देख हम सब लोग चकित होगये। (४५—४८)

हे राजेन्द्र! उस समय पाण्डवोंके सब योद्धा एक ओर और एकले दुर्योधन एक ओर थे, परन्तु उन्हें कोई भी न जीत सका, तब उन्होंने अपनी सेनाको व्याकुल देखकर उसे ठीक करनेकी इच्छा की। (४८—५०)

अपने योद्धाओंका उत्साह बढाते हुए महाराज दुर्योधन ऐसा वचन बोले, हमें पृथ्वी और पर्वतोंमें ऐसा कोई स्थान नहीं दीखता जहां भाग कर तुम लोग, पाण्डवोंके हाथसे बच जाओगे, इसलिये भागनेसे क्या होगा? अब इनकी सेना बहुत थोडी रह गई है, तथा कृष्ण और अर्जुनभी घावोंसे व्याकुल होगये हैं॥ यदि हम लोग सब इकट्ठे होकर इनसे लडेंगे तो अवश्य ही जीत लेंगे, और जो तुम भाग जाओगे तो पाण्डव तुम्हें मारेंगे और यह भी तुम लोग जानते हो कि युद्धमें मरना क्षत्रियोंका धर्म है, और भागकर मरना पाप है। इसलिये युद्ध करो, हमारी सेनाके सब क्षत्री सुनें कि मरा हुआ मनुष्य दुःख देखनेको नहीं आता और युद्धमें मरनेसे स्वर्ग होता है॥ (५०—५५)

जो तुम लोग भागोगे तो दौड कर भीमसेन तुम्हारा नाश कर देंगे। इस

पितामहैराचरितं न धर्मं हातुमर्हथ ॥ ५६ ॥
नान्यत्कर्मास्ति पापीयः क्षत्रियस्य पलायनात्।
न युद्धधर्माच्छ्रेयान्हि पन्थाः स्वर्गस्य कौरवाः ॥५७॥
सुचिरेणार्जितांल्लोकान्सद्यो युद्धात्समश्नुते।
तस्य तद्वचनं राज्ञः पूजयित्वा महारथाः ॥ ५८ ॥
पुनरेवाभ्यवर्तन्त क्षत्रियाः पाण्डवान्प्रति।
पराजयममृष्यन्तः कृतचित्ताश्च विक्रमे ॥ ५९ ॥
ततः प्रववृते युद्धं पुनरेव सुदारुणम्।
तावकानां परेषां च देवासुररणोपमम् ॥ ६० ॥
युधिष्ठिरपुरोगांश्च सर्वसैन्येन पाण्डवान्।
अन्वधावन्महाराज पुत्रो दुर्योधनस्तव ॥ ६१ ॥ [१८६]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यपर्वणि कौरवसैन्यापयाने तृतीयोऽध्यायः ॥ ३ ॥

सञ्जय उवाच— पतितान् रथनीडांश्च रथांश्चापि महात्मनाम्।
रणे च निहतान्नागान् दृष्ट्वा पत्तींश्च मारिष ॥ १ ॥
आयोधनं चातिघोरं रुद्रस्याक्रीडसन्निभम्।
अप्रख्यातिं गतानां तु राज्ञां शतसहस्रशः ॥ २ ॥

लिये अपने पुरुषोंका धर्म मत छोडो। हे वीरों! क्षत्रीके लिये युद्ध करनेके समान धर्म और युद्धसे भागनेके समान दूसरा पाप नहीं है, क्षत्रीको युद्ध करनेहीसे स्वर्ग होता है। जो लोग बहुत दिन तपस्या करनेसे नहीं मिलते सो क्षत्रियोंको केवल युद्ध करनेसे प्राप्त हो सक्ते हैं। (५६—५८)

राजाके ऐसे वचन सुन सब योद्धा इनकी प्रशंसा करने लगे, तब सब योद्धा-युद्धकी इच्छा और अपनी जीतकी इच्छा करके फिर पाण्डवोंसे लडनेको लौटे। तब फिर तुम्हारी और पाण्डवोंकी सेना-का ऐसा घोर युद्ध हुआ जैसा देवता और दानवोंका हुआ था, हे महाराज! उस समय अपनी सेनाको लेकर राजा दुर्योधन महात्मा युधिष्ठिरादिक पाण्डवोंसे घोर युद्ध करने लगे ॥ ५८-६१

शल्यपर्वमें तीन अध्याय समाप्त। [१८६]

शल्यपर्वमें चार अध्याय।

सञ्जय बोले, हे राजन्! युद्धभूमिमें मरे वीर, कटे रथ, हाथी और घोडे देखकर सब वीर घबडाने लगे, उस समय यह युद्धभूमि श्मशानके समान भयानक दीखती थी, तहां सैकडों सहस्रों राजा मरे पडे थे, कोई अपने मरे हुए बन्धु-

विमुखे तव पुत्रे तु शोकोपहतचेतसि।
भृशोद्विग्नेषु सैन्येषु दृष्ट्वा पार्थस्य विक्रमम् ॥ ३ ॥
ध्यायमानेषु सैन्येषु दुःखं प्राप्तेषु भारत।
बलानां मथ्यमानानां श्रुत्वा निनदमुत्तमम् ॥ ४ ॥
अभिज्ञानं नरेन्द्राणां विक्षतं प्रेक्ष्य संयुगे।
कृपाविष्टः कृपो राजन्वयः शीलसमन्वितः ॥ ५ ॥
अब्रवीत्तत्र तेजस्वी सोऽभिसृत्य जनाधिपम्।
दुर्योधनं मन्युवशाद्वाक्यं वाक्यविशारदः ॥ ६ ॥
दुर्योधन निबोधेदं यत्त्वां वक्ष्यामि कौरव।
श्रुत्वा कुरुमहाराज यदि ते रोचतेऽनघ ॥ ७ ॥
न युद्धधर्माच्छ्रेयान्वै पन्था राजेन्द्र विद्यते।
यं समाश्रित्य युद्ध्यन्ते क्षत्रियाः क्षत्रियर्षभ ॥ ८ ॥
पुत्रो भ्राता पिता चैव स्वस्रीयो मातुलस्तथा।
सम्बन्धिबान्धवाश्चैव योद्धया वै क्षत्रजीविना ॥ ९ ॥
वधे चैव परो धर्मस्तथाऽधर्मः पलायने।
ते स्म घोरां समापन्ना जीविकां जीवितार्थिनः॥ १० ॥
तदत्र प्रतिवक्ष्यामि किंचिदेव हितं वचः।

ओंको नहीं पहचानता था, तब राजा दुर्योधन कर्णके शोकसे व्याकुल होकर युद्ध छोडकर चले गये, तब तुम्हारी सेना भी अर्जुनके पराक्रमको देखकर इधर उधरको भागने लगी। (१—३)

हे भरत! जब तुम्हारी सेना दुःखसे व्याकुल होकर इधर उधर भागने लगी, तब मरते हुए वीरोंका शब्द सुनकर और प्रधान वीरोंकी इच्छा जानकर तपस्वी, बूढे, सब वचनोंका अर्थ जाननेवाले, तेजस्वी कृपाचार्य दया और क्रोधमें भरकर दुर्योधनके पास जाकर कहने लगे। हे पापरहित महाराज कुरुवंशी दुर्योधन! हम जो तुमसे कहते हैं। सो सुनो और यदि अच्छा जान पडे तो वैसा ही करो। हे क्षत्रिय श्रेष्ठ महाराज! यह बात ठीक है कि, क्षत्रीको युद्धके समान दूसरा सुखका मार्ग नहीं है इसीसे क्षत्री युद्ध करते हैं। इसी लिये क्षत्री युद्धमें भाई, बेटे, शाले, श्वसुर और बाप आदि बन्धुओंको भी नहीं मानते हैं। शत्रुओंको मारना ही धर्म और युद्धको छोडना ही अधर्म है। हाय! आज हम लोग इसी जीविकाके

हते भीष्मे च द्रोणे च कर्णे चैव महारथे ॥ ११ ॥
जयद्रथे च निहते तव भ्रातृषु चानघ ।
लक्ष्मणे तव पुत्रे च किं शेषं पर्युपास्महे ॥ १२ ॥
येषु भारं समासाद्य राज्ये मतिमकुर्महि ।
ते सन्त्यज्य तनूर्याताः शूरा ब्रह्मविदां गतिम् ॥ १३ ॥
वयं त्विह विनाभूता गुणवद्भिर्महारथैः ।
कृपणं वर्त्तयिष्याम पातयित्वा नृपान्बहून् ॥ १४ ॥
सर्वैरथ च जीवद्भिर्बीभत्सुरपराजितः ।
कृष्णनेत्रो महाबाहुर्देवैरपि दुरासदः ॥ १५ ॥
इन्द्रकार्मुकतुल्याभमिंद्रकेतुमिवोच्छ्रितम् ।
वानरं केतुमासाद्य सञ्चचाल महाचमूः ॥ १६ ॥
सिंहनादाच्च भीमस्य पाञ्चजन्यस्वनेन च ।
गाण्डीवस्य च निर्घोषात्संहृष्यन्ति मनांसि नः ॥१७॥
चरन्तीव महाविद्युन्मुष्णन्ती नयनप्रभाम् ।
अलातमिव चाविद्धं गाण्डीवं समदृश्यत ॥ १८ ॥
जाम्बूनदविचित्रं च धूयमानं महद्धनुः ।
दृश्यते दिक्षु सर्वासु विद्युदभ्रघनेष्विव ॥ १९ ॥

लिये इस घोर आपत्तिमें पड़े हैं। तौ भी तुमसे कुछ हितके वचन कहते हैं। अब भीष्म, द्रोणाचार्य और महारथ कर्ण नहीं हैं। (४—११)

देखो तुम्हारे बहनोई जयद्रथ, दुःशासन आदि भाई और पुत्र लक्ष्मण भी मारे गये, अब कौन बचा है, कि जिसके आश्रयसे हमलोग रहें ? जिनके आश्रयसे और जिनके लिये, हम लोग राज्यकी इच्छा करते थे, वे सब शरीर छोड़ स्वर्गको चले गये। हम लोग भी अब उन महारथ वीरोंके विना दुःखसे दिन काट रहे हैं। और राजोंका नाश कर रहे हैं। जितने जीते हैं, यदि सब मिलकर अर्जुनसे लड़े तो भी उसे जीत नहीं सकेंगे, क्यों कि स्वयं श्रीकृष्ण ही उनके सारथी हैं। (११—१५)

इन्द्रके धनुषके समान ऊंची वानरकी ध्वजा देखते ही तुम्हारी सेना भागने लगती है। गाण्डीव धनुष कृष्णका पाञ्चजन्य शंख और भीमसेनका गर्जना सुन हम लोगोंके रोएं खड़े होजाते हैं। अर्जुनका धनुष, बिजलीके समान जलती हुई आगके समान और चक्रके

श्वेताश्च वेगसम्पन्नाः शशिकाशसमप्रभाः ।
पिबन्त इव चाकाशं रथे युक्तास्तु वाजिनः ॥ २० ॥
उह्यमानांश्च कृष्णेन वायुनेव बलाहकाः ।
जाम्बूनदविचित्राङ्गा वहन्ते चार्जुनं रणे ॥ २१ ॥
तावकं तद्बलं राजन्नर्जुनोऽस्त्रविशारदः ।
गहनं शिशिरे कक्षं ददाहाग्निरिवोल्बणः ॥ २२ ॥
गाहमानमनीकानि महेन्द्रसदृशप्रभम् ।
धनञ्जयमपश्याम चतुर्दंष्ट्रमिव द्विपम् ॥ २३ ॥
विक्षोभयन्तं सेनां ते त्रासयन्तं च पार्थिवान् ।
धनञ्जयमपश्याम नलिनीमिव कुञ्जरम् ॥ २४ ॥
त्रासयन्तं तथा योधान्धनुर्घोषेण पाण्डवम् ।
भूय एनमपश्याम सिंहं मृगगणानिव ॥ २५ ॥
सर्वलोकमहेष्वासौ वृषभौ सर्वधन्विनाम् ।
आमुक्तकवचौ कृष्णौ लोकमध्ये विचेरतुः ॥ २६ ॥

समान घूमता हुआ चारों ओर युद्धमें दीखता है ॥ जैसे बादलमें बिजली दीखती है, ऐसे ही हम लोगोंको सोनेके तारोंसे खिचा हुआ धनुष चारों ओर दिखाई दे रहा है। हमें चारों ओर बहुत वेगसे चलनेवाले, चन्द्रमा और काशके फूलके समान सफेद अर्जुनके घोडे ऐसे दिखाई देते हैं। (१६—२०)

मानों आकाशको उडे चले जाते हैं। हमें चारों ओर ऐसा दिखाई देता है, मानो कृष्ण सोनेके जालवाले अर्जुन युक्त रथको इस प्रकार उडाये आते हैं, जैसे मेघोंको वायु। हे राजन्! शस्त्रविद्या जाननेवाले, अर्जुनने तुम्हारी सेनाका इस प्रकार नाश कर दिया जैसे गर्मीमें घोर बढी हुई अग्नि सूखे काठको जलाती है। हमें चारों ओरसे इन्द्रके समान पराक्रमी अर्जुन ही आता दीखता है, और हम उसे देखकर ऐसे डरते हैं, जैसे चार दांतवाले हाथीको देखकर साधारण मनुष्य। जैसे दुर्बल कमलको हाथी उखाडकर फेंक देता है। ऐसे ही सेनाको मारते और राजोंको डराते अर्जुनहीको हम चारों ओर देख रहे हैं। जैसे सिंहको देख हरिण घबडाते हैं, तैसे ही हम अपने वीरोंको मारते और धनुष टङ्कारते अर्जुनको देखकर डरते हैं। (२०—२५)

सब जगतके वीरोंसे श्रेष्ठ धनुषधारी कृष्ण और अर्जुनने अभी तक कवच

अद्य सप्तदशाहानि वर्तमानस्य भारत ।
संग्रामस्यातिघोरस्य वध्यतां चाभितो युधि ॥ २७ ॥
वायुनेव विधूतानि तव सैन्यानि सर्वतः ।
शरदम्भोदजालानि व्यशीर्यन्त समन्ततः ॥ २८ ॥
तां नावमिव पर्यस्तां वातधूतां महार्णवे ।
तव सेनां महाराज सव्यसाची व्यकम्पयत् ॥ २९ ॥
क नु ते सूतपुत्रोऽभूत्क नु द्रोणः सहानुगः ।
अहं क च क चात्मा ते हार्दिक्यश्च तथा क नु ॥ ३० ॥
दुःशासनश्च ते भ्राता भ्रातृभिः सहितः क नु ।
बाणगोचरसंप्राप्तं प्रेक्ष्य चैव जयद्रथम् ॥ ३१ ॥
सम्बन्धिनस्ते भ्रातॄंश्च सहायान्मातुलांस्तथा ।
सर्वान्विक्रम्य मिषतो लोकमाक्रम्य मूर्धनि ॥ ३२ ॥
जयद्रथो हतो राजन्किं नु शेषमुपास्महे ।
को हीह स पुमानस्ति यो विजेष्यति पाण्डवम् ॥ ३३ ॥
तस्य चास्त्राणि दिव्यानि विविधानि महात्मनः ।
गाण्डीवस्य च निर्घोषो धैर्याणि हरते हि नः ॥ ३४ ॥
नष्टचन्द्रा यथा रात्रिः सेनेयं हतनायका ।

नहीं उतारा है। हे राजन् ! आज सत्रह दिन हुए कि, घोर युद्ध होरहा है, और लाखों वीरोंका नाश हो चुका तो भी उन्होंने कवच नहीं खोला, जैसे शरदकालके मेघ वायु लगनेसे फट जाते हैं, ऐसेही अर्जुनको देखकर तुम्हारी सेना भागी जाती है॥ जैसे समुद्रमें पडी नावको वायु हिला देता है। ऐसे ही अर्जुनने तुम्हारी सेनाको भगा दिया है। (२६--२९)

अर्जुनके आगे सूतपुत्र कर्ण सहायकों सहित द्रोणाचार्य क्या थे ? हम, तुम, कृतवर्मा भाईयोंके सहित तुम्हारे भाई दुःशासन, अर्जुनके बाणोंके आगे क्या वस्तु हैं ? देखो जयद्रथके मरनेके समय ऊपर लिखे सभी वीर तो थे, परन्तु सबको जीतकर और सबके शिरपर हो-कर सबके देखते देखते उसको मार डाला, अब कौन ऐसा वीर बचा है जो अर्जुनको जीतेगा ? महात्मा अर्जुन दिव्य शस्त्रोंको जानते हैं। उनके धनुष टङ्कार सुनते ही धीर जाता रहता है। ३०-३४

जैसे चन्द्रमाके विना रात्रि शून्य हो जाती है। ऐसे ही हमारी सेना भी सेना-

नागभग्नद्रुमा शुष्का नदीवाकुलतां गता ॥ ३५ ॥
ध्वजिन्यां हतनेत्रायां यथेष्टं श्वेतवाहनः ।
चरिष्यति महाबाहुः कक्षेष्वग्निरिव ज्वलन् ॥ ३६ ॥
सात्यकेश्चैव यो वेगो भीमसेनस्य चोभयोः ।
दारयेच्च गिरीन्सर्वान् शोषयेच्चैव सागरान् ॥ ३७ ॥
उवाच वाक्यं यद्भीमः सभामध्ये विशांपते ।
कृतं तत्सफलं तेन भूयश्चैव करिष्यति ॥ ३८ ॥
प्रमुखस्थे तदा कर्णे बलं पाण्डवरक्षितम् ।
दुरासदं तदा गुप्तं व्यूढं गाण्डीवधन्वना ॥ ३९ ॥
युष्माभिस्तानि चीर्णानि यान्यसाधूनि साधुषु ।
अकारणकृतान्येव तेषां वः फलमागतम् ॥ ४० ॥
आत्मनोऽर्थे त्वया लोको यत्नतः सर्व आहृतः ।
स ते संशयितस्तात आत्मा वै भरतर्षभ ॥ ४१ ॥
रक्ष दुर्योधनात्मानमात्मा सर्वस्य भाजनम् ।
भिन्ने हि भाजने तात दिशो गच्छति तद्गतम् ॥ ४२ ॥

पतिके मरनेसे शून्य होगयी है, जैसे तटके वृक्षोंको हाथी तोडकर नदीमें गिरा देता है। और वह नदी इधर उधरको बहने लगती है ॥ ऐसेही हमारी सेना व्याकुल होगयी है। हे महाबाहो! जैसे जलती हुई अग्नि वनमें घूमती है। ऐसे ही अर्जुनभी तुम्हारी सेनामें घूम रहे हैं॥ सात्यकी और भीमसेनका बल ऐसा भारी है, जिससे पर्वत फट सकते हैं। समुद्र सूख सकते हैं। हे राजन्! भीमसेनने जो सभामें प्रतिज्ञा की थी, उसको उन्होंने सत्य कर दिखाया और जो रही है, उसे करेंगे॥ हे राजन्! जिस समय कर्ण जीतेही थे, तभी भीमसेनने अपनी सेनाकी कैसी रक्षाकी थी और अर्जुनने कैसा घोर व्यूह बनाया था। तुम लोगोंने महात्मा पाण्डवोंके सङ्ग वैसाही अधर्म किया है जैसा अधर्म साधुओंके सङ्ग नहीं करना चाहिये, उसीका यह फल हो रहा है॥ (३५—४०)

हे भरतकुलसिंह पुत्र दुर्योधन! तुमने अपने सुखके लिये यत्न करके सब क्षत्रियोंका नाश कराया और अपनी भी रक्षा न कर सके, हे पुत्र! तुम अपनी रक्षा करो क्यों कि अपनी रक्षासे सब सुख होते हैं। अपना शरीरही सब सुखोंका पात्र है। पात्र टूटनेसे उसमें रक्खी सब वस्तु गिर जाती हैं॥ बृहस्पतिने कहा

हीयमानेन वै संधिः पर्येष्टव्यः समेन वा ।
विग्रहो वर्धमानेन मतिरेषा बृहस्पतेः ॥ ४३ ॥
ते वयं पाण्डुपुत्रेभ्यो हीनाः स्म बलशक्तितः ।
तदत्र पांडवैः सार्धं संधिं मन्ये क्षमं प्रभो ॥ ४४ ॥
न जानीते हि यः श्रेयः श्रेयसश्चावमन्यते ।
स क्षिप्रं भ्रश्यते राज्यान्न च श्रेयोऽनुविंदते ॥ ४५ ॥
प्रणिपत्य हि राजानं राज्यं यदि लभेमहि ।
श्रेयः स्यान्न तु मौढ्येन राजन् गन्तुः पराभवम् ॥४६॥
वैचित्रवीर्यवचनात्कृपाशीलो युधिष्ठिरः ।
विनियुंजीत राज्ये त्वां गोविंदवचनेन च ॥ ४७ ॥
यद् ब्रूयाद्धि हृषीकेशो राजानमपराजितम् ।
अर्जुनं भीमसेनं च सर्वे कुर्युरसंशयम् ॥ ४८ ॥
नातिक्रमिष्यते कृष्णो वचनं कौरवस्य तु ।
धृतराष्ट्रस्य मन्येऽहं नापि कृष्णस्य पाण्डवः ॥ ४९ ॥
एतत्क्षेममहं मन्ये न च पार्थैश्च विग्रहम् ।
न त्वां ब्रवीमि कार्पण्यान्न प्राणपरिरक्षणात् ॥ ५० ॥

है कि, जब अपना पक्ष दुर्बल हो, या कुछ हानि होगई हो, तब शत्रुसे मेल कर लेना चाहिये और जब अपनी बढती हो तब फिर लडना उचित है ॥ हे पृथ्वीनाथ! इस समय हम लोगोंका पक्ष पाण्डवोंसे बहुतही दुर्बल है, इसलिये अब उनसे सन्धि करलेनी चाहिये। जो मूर्ख कल्याणको कल्याण नहीं समझता और दुःखके मार्गमें चलता है। उसका राज्य शीघ्रही नाश होजाता है। और वह महा दुःख भोगता है। ४१—४५

हे राजन्! यदि आज हमको राजा युधिष्ठिरको दण्डवत् करनेसे भी राज्य मिलै तौ भी अच्छा है। परन्तु मूर्खतासे मरना अच्छा नहीं है॥ महाराज धृतराष्ट्र और श्रीकृष्णके कहनेसे युधिष्ठिर तुम्हें अवश्य राज्य दे देंगे। श्रीकृष्ण पाण्डवोंसे जो कुछ कहेंगे वे लोग निःसंदेह वैसाही करेंगे। हमें यह निश्चय है कि, महाराज धृतराष्ट्रके वचनको परमात्मा श्री कृष्णचन्द्र मानेंगे और श्रीकृष्णचन्द्र के वचनको युधिष्ठिर अवश्य मानेंगे॥ हम पाण्डवोंसे डरकर अपने प्राणोंकी रक्षाके लिये तुमसे कुछ नहीं कहते, बरन सब जगत्‌के कल्याणके ही लिये कहते हैं कि पाण्डवोंसे मेल करना अच्छा है,

पथ्यं राजन्ब्रवीमि त्वां तत्परासुः स्मरिष्यसि।
इति वृद्धो विलप्यैतत्कृपः शारद्वतो वचः।
दीर्घमुष्णं च निःश्वस्य शुशोच च मुमोह च ॥५१॥ [२३७]

इति श्रीमहाभारते० शल्यपर्वणि कृपवाक्ये चतुर्थोऽध्यायः ॥ ४ ॥

सञ्जय उवाच— एवमुक्तस्ततो राजा गौतमेन तपस्विना।
निःश्वस्य दीर्घमुष्णं च तूष्णीमासीद्विशाम्पते ॥ १ ॥
ततो मुहूर्तं स ध्यात्वा धार्त्तराष्ट्रो महामनाः।
कृपं शारद्वतं वाक्यमित्युवाच परन्तपः ॥ २ ॥
यत्किञ्चित्सुहृदा वाच्यं तत्सर्वं श्रावितो ह्यहम्।
कृतं च भवता सर्वं प्राणान्सन्त्यज्य युध्यता ॥ ३ ॥
गाहमानमनीकानि युध्यमानं महारथैः।
पाण्डवैरतितेजोभिर्लोकस्त्वामनुदृष्टवान् ॥ ४ ॥
सुहृदा यदिदं वाक्यं भवता श्रावितो ह्यहम्।
न मां प्रीणाति तत्सर्वं मुमूर्षोरिव भेषजम् ॥ ५ ॥
हेतुकारणसंयुक्तं हितं वचनमुत्तमम्।
उच्यमानं महाबाहो न मे विप्राग्र्य रोचते ॥ ६ ॥

हे राजन्! हम ये तुमसे ऐसे वचन कहते हैं, जैसे वैद्य रोगीको पथ्य देता है, यदि अब भी न मानोगे तो बहुत पछताओगे, ऐसा कहकर बूढे कृपाचार्य ऊंची स्वास लेकर रोने लगे और मूर्छित होगये। (४६—५१) [२३७]

शल्यपर्वमें चार अध्याय समाप्त।

शल्यपर्वमें पांच अध्याय।

सञ्जय बोले, हे पृथ्वीनाथ! तपस्वी गौतमवंशी कृपाचार्यके ऐसे वचन सुन राजा दुर्योधन ऊंचा स्वांस लेकर चुप रह गये। थोडे समयके पश्चात् शत्रुनाशन दुर्योधन शरद्वतपुत्र कृपाचार्यसे ऐसे वचन बोले, हे भगवान्! मित्रोंको जो कुछ कहना चाहिये आपने वैसा ही हमसे कहा और इसमें भी कुछ सन्देह नहीं कि आपने हमारे लिये प्राणोंका भी मोह छोडकर सब कुछ किया। सब वीरोंने देखा कि महारथ पाण्डवोंके सङ्ग आपने घोर युद्ध किया, यद्यपि आपने सब वचन हमारे कल्याणहीके कहे तो भी मुझे इस प्रकार बुरे लगे, जैसे मरनेवाले रोगीको औषधि। (१—५)

हे ब्राह्मणश्रेष्ठ! मैं क्या करूं आपके वचन कारण और अर्थोंसे भरे हैं, तोभी मुझे अच्छे नहीं लगे। हमें यह सन्देह

राज्याद्विनिकृतोऽस्माभिः कथं सोऽस्मासु विश्वसेत् ।
अक्षद्यूते च नृपतिर्जितोऽस्माभिर्महाधनः ॥ ७ ॥
स कथं मम वाक्यानि श्रद्दध्याद्भूय एव तु ।
तथा दौत्येन संप्राप्तः कृष्णः पार्थहिते रतः ॥ ८ ॥
प्रलब्धश्च हृषीकेशस्तच्च कर्माविचारितम् ।
स च मे वचनं ब्रह्मन्कथमेवाभिमन्यते ॥ ९ ॥
विललाप च यत्कृष्णा सभामध्ये समेयुषी ।
न तन्मर्षयते कृष्णो न राज्यहरणं तथा ॥ १० ॥
एकप्राणावुभौ कृष्णावन्योन्यमभिसंश्रितौ ।
पुरा यच्छ्रुतमेवासीदद्य पश्यामि तत्प्रभो ॥ ११ ॥
स्वस्रीयं निहतं श्रुत्वा दुःखं स्वपिति केशवः ।
कृतागसो वयं तस्य स मदर्थं कथं क्षमेत् ॥ १२ ॥
अभिमन्योर्विनाशेन न शर्म लभतेऽर्जुनः ।
स कथं माद्धिते यत्नं प्रकरिष्यति याचितः ॥ १३ ॥
मध्यमः पाण्डवस्तीक्ष्णो भीमसेनो महाबलः ।
प्रतिज्ञातं च तेनोग्रं भज्येतापि न संनमेत् ॥ १४ ॥

है कि जिस महाधनवाले राजा युधिष्ठिर को अधर्मसे जुएमें जीतकर राज्यसे निकाल दिया था, वे अब हमारा विश्वास काहेको करेंगे ? वह युधिष्ठिर अब मेरी बातोंका कैसे विश्वास करेंगे ? और यह भी आप जानते हैं कि कृष्ण सदा पाण्डवोंहीका कल्याण चाहते हैं । हे ब्राह्मणश्रेष्ठ ! हमने विना विचारे श्रीकृष्णका निरादर किया था, सो अब वो हमारी बात कैसे मानेंगे ? सभामें जो द्रौपदी रोई थी और हमने पाण्डवों को राज्यसे निकाल दिया था, भला कृष्ण इन बातोंको कब क्षमा करेंगे ? (६-१०)

हे गुरुजी ! हमने जो पहले सुना था, कि कृष्ण और अर्जुनका एक ही प्राण है सो अब प्रत्यक्ष देख लिया । अपने भानजेको मरा सुनकर क्या कृष्ण सुखसे सोते हैं ? कदापि नहीं । हम लोगोंने उनके बहुत अपराध किये हैं, इसलिये वे हमारे ऊपर क्षमा न करेंगे, अभिमन्युके मरनेसे अर्जुनको बहुत दुःख हुआ है सो हमारे कल्याणका यत्न क्यों करेंगे ? फिर भीमसेन महाक्रोधी हैं, वे शरीरके टुकडे होनेपर भी हमसे मेल न करेंगे । (११-१४)

उभौ तौ बद्धनिस्त्रिंशावुभौ चाबद्धकङ्कटौ।
कृतवैरावुभौ वीरौ यमावपि यमोपमौ ॥ १५ ॥
धृष्टद्युम्नः शिखण्डी च कृतवैरौ मया सह।
तौ कथं मद्धिते यत्नं कुर्यातां द्विजसत्तम ॥ १६ ॥
दुःशासनेन यत्कृष्णा एकवस्त्रा रजस्वला।
परिक्लिष्टा सभामध्ये सर्वलोकस्य पश्यतः ॥ १७ ॥
तथा विवसनां दीनां स्मरंत्यद्यापि पाण्डवाः।
न निवारयितुं शक्याः संग्रामात्ते परन्तपाः ॥ १८ ॥
यदा च द्रौपदी क्लिष्टा मद्विनाशाय दुःखिता।
स्थण्डिले नित्यदा शेते यावद्वैरस्य यातनम् ॥ १९ ॥
उग्रं तेपे तपः कृष्णा भर्तॄणामर्थसिद्धये।
निक्षिप्यमानं दर्पं च वासुदेवसहोदरा ॥ २० ॥
कृष्णा या प्रेष्यवद्भूत्वा शुश्रूषां कुरुते सदा।
इति सर्वं समुन्नद्धं न निर्वाति कथञ्च न ॥ २१ ॥
अभिमन्योर्विनाशेन स सन्धेयः कथं मया।
कथं च राजा भुक्त्वेमां पृथिवीं सागराम्बराम् ॥ २२ ॥

आप जानते हैं कि नकुल और सहदेव यम और मृत्युके समान वीर तथा मेरी ओरसे मनमें भारी वैर रखते हैं इसी लिये, रात दिन कवच पहने ही रहते हैं भला वे कैसे क्षमा करेंगे? हे ब्राह्मणश्रेष्ठ! धृष्टद्युम्न और शिखण्डीके मनमें मेरी ओरसे कितना वैर है सो आप जानते ही हैं, भला वे मुझसे काहे को मेल करेंगे? दुःशासनने रजस्वला और एक वस्त्र धारिणी द्रौपदीको जो सब लोगोंके आगे दुःख दिया था पाण्डवोंको अभीतक द्रौपदीकी वही दशा दिखाई देती है, उन शत्रुनाशन वीरोंको युद्धसे कोई नहीं रोक सक्ता। जिस दिनसे मैंने अपने नाशके लिये द्रौपदीको दुःख दिया है, तभी से वह पृथ्वीमें सोती है और जबतक वैरका बदला न हो चुकेगा तबतक सोवेगी। द्रौपदी अपने पतियोंकी विजयके लिये घोर तपस्या कर रही है और कृष्णकी बहन सुभद्रा दासीके समान उनकी सेवा कर रही है, पाण्डव लोग इन बातोंको कैसे भूलेंगे? (१४-२१)

अभिमन्युके मरनेके पश्चात् अब राजा युधिष्ठिर मुझसे कैसे सन्धि करेंगे? मैंने समुद्र पर्यन्त पृथ्वीका राज्य किया है

पाण्डवानां प्रसादेन भोक्ष्ये राज्यमहं कथम् ।
उपर्युपरि राज्ञां वै ज्वलित्वा भास्करो यथा ॥ २३ ॥
युधिष्ठिरं कथं पश्चादनुयास्यामि दासवत् ।
कथं भुक्त्वा स्वयं भोगान्दत्वा दायांश्च पुष्कलान् ॥२४॥
कृपणं वर्तयिष्यामि कृपणैः सह जीविकाम् ।
नाभ्यसूयामि ते वाक्यमुक्तं स्निग्धं हितं त्वया ॥२५॥
न तु सन्धिमहं मन्ये प्राप्तकालं कथंचन ।
सुनीतमनुपश्यामि सुयुद्धेन परन्तप ॥ २६ ॥
नायं क्लीबयितुं कालः संयोद्धुं काल एव नः ।
इष्टं मे बहुभिर्यज्ञैर्दत्ता विप्रेषु दक्षिणाः ॥ २७ ॥
प्राप्ताः कामाः श्रुता वेदाः शत्रूणां मूर्ध्नि च स्थितम् ।
भृत्या मे सुभृतास्तात दीनश्चाभ्युद्धृतो जनः ॥ २८ ॥
नोत्सहेऽद्य द्विजश्रेष्ठ पाण्डवान्वक्तुमीदृशम् ।
जितानि परराष्ट्राणि स्वराष्ट्रमनुपालितम् ॥ २९ ॥
भुक्ताश्च विविधा भोगास्त्रिवर्गः सेवितो मया ।

और सब राजोंके शिरपर अपना तेज सूर्यके समान प्रकाशित किया है, सो मैं अब पाण्डवोंका दिया हुआ राज्य कैसे भोगूंगा ? सब राज्यका भोग करके अब युधिष्ठिरके पीछे दासके समान कैसे चलूंगा ? अनेक भारी भारी दान देकर और सब भोगोंको भोगकर अब दरिद्री पाण्डवोंके सङ्ग दरिद्र कैसे भोगूंगा ? मैं आपके वचनोंकी निन्दा नहीं करता, क्यों कि आपने हमारे हितके लिये मोटे वचन कहे हैं। परन्तु ऊपर लिखे कारणोंसे सन्धि करना भी स्वीकार नहीं करता । इस समय केवल युद्धहीसे पाण्डवोंका जीतना अच्छा जानता हूं। (२२-२४)

हे शत्रुनाशन ! हम अनेक यज्ञ कर चुके और ब्राह्मणको मन भरके दक्षिणा भी दे चुके, अब कायर बनकर युद्ध छोडना अच्छा नहीं। इस समय हमें अपने पराक्रमसे घोर युद्ध करना ही उचित है, हे भगवन् ! हमें अब क्या करना शेष है । देखिये सब भोग भोग चुके, वेद पढे, शत्रुओंको जीता, दासोंका पालन करा, दुखियोंको दुःखसे छुडाया, अपने राज्यकी रक्षा की और शत्रुओंके राज्य छीन लिये, सो हम अब पाण्डवोंसे दीन वचन नहीं कह सक्ते, मैंने सब भोग भोगे, धन धर्म और सब

पितॄणां गतवानृण्यं क्षत्रधर्मस्य चोभयोः ॥ ३० ॥
न ध्रुवं सुखमस्तीति कुतो राष्ट्रं कुतो यशः।
इह कीर्तिर्विधातव्या सा च युद्धेन नान्यथा ॥ ३१ ॥
गृहे यत्क्षत्रियस्यापि निधनं तद्विगर्हितम्।
अधर्मः सुमहानेष यच्छय्यामरणं गृहे ॥ ३२ ॥
अरण्ये यो विमुच्येत संग्रामे वा तनुं नरः।
क्रतूनाहृत्य महतो महिमानं स गच्छति ॥ ३३ ॥
कृपणं विलपन्नार्त्तो जरयाऽभिपरिप्लुतः।
म्रियते रुदतां मध्ये ज्ञातीनां न स पूरुषः ॥ ३४ ॥
त्यक्त्वा तु विविधान् भोगान्प्राप्तानां परमां गतिम्।
अपीदानीं सुयुद्धेन गच्छेयं यत्सलोकताम् ॥ ३५ ॥
शूराणामार्यवृत्तानां संग्रामेष्वनिवर्तिनाम्
धीमतां सत्यसन्धानां सर्वेषां क्रतुयाजिनाम् ॥ ३६ ॥
शस्त्रावभृथपूतानां ध्रुवं वासस्त्रिविष्टपे।
मुदा नूनं प्रपश्यन्ति युद्धे ह्यप्सरसां गणाः ॥ ३७ ॥
पश्यन्ति नूनं पितरः पूजितान्सुरसंसदि।
अप्सरोभिः परिवृतान्मोदमानांस्त्रिविष्टपे ॥ ३८ ॥

काम प्राप्त किये पितरोंसे भी अनृण होगया, और क्षत्री धर्मका भी पालन होगया। (२५—३०)

अब विना युद्ध किये सब यश और कीर्ति कहां प्राप्ति हो सक्ती है। क्षत्रियोंको घरमें मरना बहुत लज्जाकी बात है, हम घरमें मरनेका पाप नहीं करेंगे, जो क्षत्री जन्ममें अनेक यज्ञ करके वनमें तपस्यासे या युद्धमें लडकर शरीर छोडता है, उसे धन्य है, और वही श्रेष्ठ कहाता है। जो मूर्ख क्षत्री बुढापेसे कांपता हुआ दुःखसे पीडित रोता हुआ रोती हुई स्त्रियोंके बीचमें शरीर छोडता है। उसे धिक्कार है और वह नपुंसक है॥ जो महात्मा हमारे लिये उत्तम उत्तम कर्म करके स्वर्गको चले गये, हमभी अब घोर युद्ध करके उन्होंके पास जाना चाहते हैं॥ (३१—३५)

जो महात्मा वीर अपने जन्ममें उत्तम कर्म और बडे यज्ञ करते हैं। तथा युद्धसे कभी नहीं लौटते और युद्धमें मरते हैं। उन्हें अवश्य ही स्वर्गमें वास मिलता है, युद्धमें अनेक अप्सरा खडी हुई यही विचार किया करती हैं। कि कौनसा

पन्थानममरैर्यान्तं शूरैश्चैवानिवर्त्तिभिः ।
अपि तत्सङ्गतं मार्गं वयमध्यारुहेमहि ॥ ३९ ॥
पितामहेन वृद्धेन तथाऽऽचार्येण धीमता ।
जयद्रथेन कर्णेन तथा दुःशासनेन च ॥ ४० ॥
घटमाना मदर्थेऽस्मिन्हताः शूरा जनाधिपाः ।
शेरते लोहिताक्ताङ्गाः संग्रामे शरविक्षताः ॥ ४१ ॥
उत्तमास्त्रविदः शूरा यथोक्तक्रतुयाजिनः ।
त्यक्त्वा प्राणान्यथान्यायमिन्द्रसद्मसु धिष्ठिताः ॥४२॥
तैः स्वयं रचितो मार्गो दुर्गमो हि पुनर्भवेत् ।
सम्पतद्भिर्महावेगैर्यास्यद्भिरिह सद्गतिम् ॥ ४३ ॥
ये मदर्थे हताः शूरास्तेषां कृतमनुस्मरन् ।
ऋणं तत्प्रतियुञ्जानो न राज्ये मन आदधे ॥ ४४ ॥
घातयित्वा वयस्यांश्च भ्रातॄनथ पितामहान् ।
जीवितं यदि रक्षेयं लोको मां गर्हयेद्ध्रुवम् ॥ ४५ ॥
कीदृशं च भवेद्राज्यं मम हीनस्य बन्धुभिः ।

वीर मरे और हम लेजांय। स्वर्गमें वीरों के सङ्ग अनेक अप्सरा रहती हैं, और उनके पितर अथवा देवता देखकर प्रसन्न होते हैं ॥ जिस मार्गपर देवता और युद्धसे न लौटनेवाले, वीर जाते हैं, हम लोगभी उसीसे स्वर्गमें जाना चाहते हैं॥ बूढे पितामह भीष्म, गुरु द्रोणाचार्य, जयद्रथ, कर्ण और दुःशासन आदि अनेक प्रधान क्षत्री और राजा लोग हमारे लिये रुधिरमें भीगे मरे हुए पृथ्वी में पडे हैं ॥ (३६-४०)

ये सब बुद्धिमान बलवान और घोर योद्धा थे, ये सब यज्ञ करनेवाले, शस्त्र विद्याके पण्डित और वीर थे, अब शरीर छोडकर इन्द्र लोकमें विहार करते हैं। (४१—४२)

उन सब महात्माओंने कठिनतासे जाने योग्य स्वर्गका मार्ग सीधा कर दिया है॥ यदि इस समय हम लोग चूक जांयगे, तो फिर वह मार्ग न पावेंगे, जो योद्धा मेरे लिये मर गये हैं। उनका कर्म देखकर मुझे ऐसा जान पडता है कि मैं उनका बहुत ऋणी हूं। इसीसे अब राज्य करनेकी इच्छा नहीं करता। भाई, मित्र, पितामह और गुरु आदि महात्माओंको मरवा कर यदि मैं अब अपनी रक्षा करूं तो लोग मुझे धिक्कार देंगे। भाई और मित्रोंके विना

सखिभिश्च विशेषेण प्रणिपत्य च पाण्डवम् ॥ ४६ ॥
सोऽहमेतादृशं कृत्वा जगतोऽस्य पराभवम् ।
सुयुद्धेन ततः स्वर्गं प्राप्स्यामि न तदन्यथा ॥ ४७ ॥
एवं दुर्योधनेनोक्तं सर्वे सम्पूज्य तद्वचः ।
साधु साध्विति राजानं क्षत्रियाः सम्बभाषिरे ॥ ४८ ॥
पराजयमशोचन्तः कृतचित्ताश्च विक्रमे ।
सर्वे सुनिश्चिता योद्धुमुदग्रमनसोऽभवन् ॥ ४९ ॥
ततो वाहान्समाश्वास्य सर्वे युद्धाभिनन्दिनः ।
ऊने द्वियोजने गत्वा प्रत्यतिष्ठन्त कौरवाः ॥ ५० ॥
आकाशे विद्रुमे पुण्ये प्रस्थे हिमवतः शुभे ।
अरुणां सरस्वतीं प्राप्य पपुः सस्नुश्च ते जलम् ॥ ५१ ॥
तव पुत्रकृतोत्साहाः पर्यवर्तन्त ते ततः ।
पर्यवस्थाप्य चात्मानमन्योन्येन पुनस्तदा ।
सर्वे राजन्न्यवर्त्तन्त क्षत्रियाः कालचोदिताः ॥ ५२ ॥[२८९]

इति श्रीमहाभारते० शल्यपर्वणि दुर्योधनवाक्ये पञ्चमोऽध्यायः ॥ ५ ॥

सञ्जय उवाच— अथ हैमवते प्रस्थे स्थित्वा युद्धाभिनन्दिनः ।
सर्वे एव महायोधास्तत्र तत्र समागताः ॥ १ ॥
शल्यश्च चित्रसेनश्च शकुनिश्च महारथः ।

अब मैं क्या राज्य करूंगा ? और विशेष कर युधिष्ठिरको प्रणाम करके ? ४३-४६

सो अब हमने दृढ सङ्कल्प यही किया है, कि जगत्में अपनी अपकीर्ति न कराके युद्धमें मरकर स्वर्गको जांय । राजा दुर्योधनके ऐसे वचन सुन सब क्षत्री प्रसन्न होकर धन्य धन्य कहने लगे। और अपनी विजयकी इच्छा करके युद्ध करनेको उपस्थित हुए ॥ तब सब क्षत्री अपने डेरोंमें गये फिर आठ कोसतक घूमकर घोडे, हाथी, और ऊटोंको सावधान करके पवित्र वृक्ष रहित हिमाचलकी तरहटीमें जाकर सबने पवित्र सरस्वतीका जल पिया । फिर राजा दुर्योधनका उत्साह देखकर सब क्षत्री अपने अपने डेरोंसे एक दूसरेको धीरज देते हुए राजाके पासको चले, हमने उसी समय निश्चय कर लिया कि इन सबका भी काल आगया । (४७-५२) [२८९]

शल्यपर्व में पांच अध्याय समाप्त

शल्यपर्वमें छः अध्याय ।

सञ्जय बोले, हे राजन् धृतराष्ट्र !

अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ॥ २ ॥
सुषेणोऽरिष्टसेनश्च धृतसेनश्च वीर्यवान् ।
जयत्सेनश्च राजानस्ते रात्रिमुषितास्ततः ॥ ३ ॥
रणे कर्णे हते वीरे त्रासिता जितकाशिभिः ।
नालभन् शर्म ते पुत्रा हिमवन्तमृते गिरिम् ॥ ४ ॥
तेऽब्रुवन्सहितास्तत्र राजानं शल्यसन्निधौ ।
कृतयत्ना रणे राजन्संपूज्य विधिवत्तदा ॥ ५ ॥
कृत्वा सेनाप्रणेतारं परांस्त्वं योद्धुमर्हसि ।
येनाभिगुप्ताः संग्रामे जयेमासुहृदो वयम् ॥ ६ ॥
ततो दुर्योधनः स्थित्वा रथे रथवरोत्तमम् ।
सर्वयुद्धविभावज्ञमन्तकप्रतिमं युधि ॥ ७ ॥
स्वङ्गं प्रच्छन्नशिरसं कम्बुग्रीवं प्रियंवदम् ।
व्याकोशपद्मपत्राक्षं व्याघ्रास्यं मेरुगौरवम् ॥ ८ ॥
स्थाणोर्वृषस्य सदृशं स्कन्धनेत्रगतिस्वरैः ।
पुष्टश्लिष्टायतभुजं सुविस्तीर्णवरोरसम् ॥ ९ ॥
बले जवे च सदृशमरुणानुजवातयोः ।

अनन्तर सब क्षत्री निर्मल हिमाचलके शिखरपर चढ गये, वहां शल्य, चित्रसेन, महारथ शकुनि, अश्वत्थामा, कृपाचार्य, भोज वंशी कृतवर्मा, सुषेण, अरिष्टसेन, धृतसेन जयत्सेन और राजा दुर्योधन इकट्ठे हुए और सब लोगोंने वहीं रात्रिको बिताया। हे राजन् ! वीर कर्णके मरनेके पश्चात् विजयी पाण्डवोंसे डरे हुए तुम्हारे पुत्रोंको हिमाचलके सिवाय और कहीं सुख न मिला। (१-४)

हे राजन् ! उन सब क्षत्रियोंने राजा दुर्योधनके आगे राजा शल्यकी प्रशंसा करके युद्धके लिये ऐसे वचन कहे। हे राजन् दुर्योधन ! आप ऐसे वीरको सेनापति कीजिये जिससे रक्षित होकर हमलोग क्षत्रियोंको जीत सकें ॥ (५-६)

तब राजा दुर्योधन अपने रथमें बैठकर महारथोंमें श्रेष्ठ, सब युद्ध विद्याओंके जाननेवाले, यमराजके समान वीर, सुन्दर शरीर वाले, टोप पहने, शङ्खके समान गलेवाले मीठे वचन बोलनेवाले फूले कमलके समान नेत्रवाले, सिंहके समान मुखवाले, मेरुके समान भारी, शिवके समान महात्मा, बैलके समान ऊंचे कंधे गंभीर वाणी और बडे नेत्रवाले, मन्द चलनेवाले मोटे और लंबे हाथ-

आदित्यस्यार्चिषा तुल्यं बुद्ध्या चोशनसा समम्॥१०॥
कान्तिरूपमुखैश्वर्यैस्त्रिभिश्चन्द्रमसा समम् ।
काञ्चनोपलसङ्घातैः सदृशं श्लिष्टसन्धिकम् ॥ ११ ॥
सुवृत्तोरुकटीजंघं सुपादं स्वंगुलीनखम् ।
स्मृत्वा स्मृत्वैव तु गुणान्धात्रा यत्नाद्विनिर्मितम्॥१२॥
सर्वलक्षणसम्पन्नं निपुणं श्रुतिसागरम् ।
जेतारं तरसाऽरीणामजेयमरिभिर्बलात् ॥ १३ ॥
दशाङ्गं यश्चतुष्पादमिष्वस्त्रं वेदतत्त्वतः ।
साङ्गांस्तु चतुरो वेदान्सम्यगाख्यानपञ्चमान् ॥ १४ ॥
आराध्य त्र्यम्बकं यत्नाद्व्रतैरुग्रैर्महातपाः ।
अयोनिजायामुत्पन्नो द्रोणेनायोनिजेन यः ॥ १५ ॥
तमप्रतिमकर्माणं रूपेणाप्रतिमं भुवि ।
पारगं सर्वविद्यानां गुणार्णवमनिन्दितम् ॥ १६ ॥
तमभ्येत्यात्मजस्तुभ्यमश्वत्थामानमब्रवीत् ।
यं पुरस्कृत्य सहिता युधि जेष्याम पाण्डवान् ॥ १७ ॥

वाले, ऊंची एंडी छाती युक्त बल और वेगमें गरुडके, तेजमें सूर्यके, बुद्धिमें बृहस्पतिके, शान्ति शोभा और सुखमें चन्द्रमाके समान, सोनेके टुकडोंके समान दृढ सन्धिवाले, सुन्दर गोल जङ्घा, कमर और पिंडलीवाले, सुन्दर चरण और अंगुली नखवाले, जिनको ब्रह्माने गुणोंसे ढूंढ ढूंढके भरा था । (७-१२)

सब लक्षणोंसे भरे, विद्याके समुद्र, शीघ्रता सहित शत्रुओंको जीतनेवाले, (आप किसीसे न हारनेवाले, ग्रहण, सीखन, धारण करना, अभ्यास करना, स्मरण रखना, छोडना शत्रुको मारना, औषधि करना, शस्त्रको तेज करना, खींचना,) इन दसों अङ्ग और (उपदेश, सेनाकी शिक्षा, अपनी रक्षा और लडाईकी सब सामग्रीको ठीक रखना) इन चारों चरणोंके सहित धनुर्वेदको जाननेवाले अङ्गोंके सहित चारों वेद और इतिहासके पण्डित जिन्होंने अनेक तपोंसे शिवको प्रसन्न किया था । जो विना योनिसे उत्पन्न हुए द्रोणाचार्यके वीर्यसे विना योनिसे उत्पन्न हुई कृपीके गर्भसे उत्पन्न हुए थे; गुणोंके समुद्र निन्दा रहित, सब विद्याओंके पार जानेवाले, गुण और रूपसे भरे अश्वत्थामाके पास गये, और यों बोले, हे गुरुपुत्र ! हम आपकी शरण हैं। आप हमारे सबके

गुरुपुत्रोऽथ सर्वेषामस्माकं परमा गतिः ।
भवांस्तस्मान्नियोगात्ते कोऽस्तु सेनापतिर्मम ॥ १८ ॥

द्रौणिरुवाच-- अयं कुलेन रूपेण तेजसा यशसा श्रिया ।
सर्वैर्गुणैः समुदितः शल्यो नोऽस्तु चमूपतिः ॥ १९ ॥
भागिनेयान्निजांस्त्यक्त्वा कृतज्ञोऽस्मानुपागतः ।
महासेनो महाबाहुर्महासेन इवापरः ॥ २० ॥
एनं सेनापतिं कृत्वा नृपतिं नृपसत्तम ।
शक्यः प्राप्तुं जयोऽस्माभिर्देवैः स्कन्दमिवाजितम्॥२१॥
तथोक्ते द्रोणपुत्रेण सर्व एव नराधिपाः ।
परिवार्य स्थिताः शल्यं जयशब्दांश्च चक्रिरे ॥ २२ ॥
युद्धाय च मतिं चक्रुरावेशं च परं ययुः ।
ततो दुर्योधनो भूमौ स्थित्वा रथवरे स्थितम् ॥ २३ ॥
उवाच प्राञ्जलिर्भूत्वा द्रोणभीष्मसमं रणे ।
अयं स कालः सम्प्राप्तो मित्राणां मित्रवत्सल॥ २४ ॥
यत्र मित्रममित्रं वा परीक्षन्ते बुधा जनाः ।

स्वामी हैं । जिसको आज्ञा कीजिये वही हमारा सेनापति होवे, परन्तु वह ऐसा होना चाहिये जिसके आश्रयसे हमलोग पाण्डवोंको जीत लें । (१२-१८)

अश्वत्थामा बोले, हे महाराज! शल्य, यश, बल, कीर्त्ति, कुल और तेजसे भरे हैं । इसलिये यही हमारे सेनापति होयं। हम और सब राजोंकी अपेक्षा इनके अधिक कृतज्ञ हैं, क्यों कि ये अपने सगे भानजोंको छोडकर हमारी ओर आये हैं । इनके बडे हाथ और बडी सेना हैं, और ये बलमें भी राजा महासेनके तुल्य हैं । इन महाराजको सेनापति बनाकर हम लोगोंकी विजय हो सक्ती है । जैसे स्वामिकार्त्तिकेय देवतोंकी सेनाकी रक्षा करते हैं । ऐसे ही ये हमारी सेनाकी रक्षा करेंगे । (१९-२०)

गुरुपुत्र अश्वत्थामाके ऐसे वचन सुन सब क्षत्री सेनापति शल्यकी जय हो; सेनापति शल्यकी जय हो; पुकारने लगे, और प्रसन्न होकर युद्ध करनेको उद्यत होगए। तब राजा दुर्योधन पृथ्वीमें खडे होकर और हाथ जोड कर उत्तम रथमें बैठे हुए भीष्म और द्रोणाचार्यके समान योद्धा राजा शल्यसे बोले, हे महावीर ! जब पण्डित लोग मित्र और शत्रुको पहचानते हैं। अब हमारा वही समय आगया है, इसलिये, आप हमारे

स भवानस्तु नः शूरः प्रणेता वाहिनीमुखे ॥ २५ ॥
रणं याते च भवति पाण्डवा मन्दचेतसः ।
भविष्यन्ति सहामात्याः पञ्चालाश्च निरुद्यमाः॥ २६॥
दुर्योधनवचः श्रुत्वा शल्यो मद्राधिपस्तदा ।
उवाच वाक्यं वाक्यज्ञो राजानं राजसन्निधौ ॥ २७ ॥
शल्य उवाच— यत्तु मां मन्यसे राजन्कुरुराज करोमि तत् ।
त्वत्प्रियार्थं हि मे सर्वं प्राणा राज्यं धनानि च॥ २८ ॥
दुर्योधन उवाच--सैनापत्येन वरये त्वामहं मातुलातुलम् ।
सोऽस्मान्पाहि युधां श्रेष्ठ स्कन्दो देवानिवाहवे॥ २९ ॥
अभिषिच्य स्वराजेन्द्र देवानामिव पावकिः ।
जहि शत्रून्रणे वीर महेन्द्रो दानवानिव ॥ ३० ॥ [३१९]

इति श्रीमहाभारते० शल्यपर्वणि शल्यदुर्योधनसंवादे षष्ठोऽध्यायः ॥ ६ ॥

सञ्जय उवाच— एवमुक्त्वा वचो राज्ञो मद्रराजः प्रतापवान् ।
दुर्योधनं तदा राजन्वाक्यमेतदुवाच ह ॥ १ ॥
दुर्योधन महाबाहो शृणु वाक्यविदां वर ।

सेनापति होकर हम लोगोंको अपनी आज्ञामें चलाइये। हे वीर! आपको युद्धमें खडा देख मूर्ख पाण्डव अपने मन्त्री और पाञ्चालोंके सहित प्रयत्नहीन हो जांयगे। (२१–२६)

मद्रदेशाधिपति सब शास्त्रोंके जाननेवाले, राजा शल्य दुर्योधनके वचन सुन सब राजोंके बीचमें ऐसा वचन बोले॥ (२७)

हे कुरुराज! तुम जो कहोगे मैं वही करूंगा क्यों कि मेरे राज्य, धन और प्राण भी तुम्हारे ही लिये हैं॥ (२८)

दुर्योधन बोले, हे मामा! आप महापराक्रमी और राजोंमें श्रेष्ठ हैं, इसलिये हम आपसे यही वरदान मांगते हैं। कि आप सेनापति होकर हमारी इस प्रकार रक्षा कीजिये जैसे स्वामिकार्तिकने देवतोंकी की थी। हे वीर! आप अपना अभिषेक कीजिये और जैसे इन्द्र दानवोंको मारते हैं, ऐसे पाण्डवोंको मारिये। (२९–३०) [३१९]

शल्यपर्वमें छः अध्याय समाप्त।

शल्यपर्वमें सात अध्याय।

सञ्जय बोले, हे राजन् धृतराष्ट्र! राजा दुर्योधनके वचन सुन मद्रराज शल्य ऐसा बोले, हे राजा दुर्योधन! हे महाबाहो! हे अर्थ जाननेवालोंमें श्रेष्ठ! तुम हमारे वचन सुनो तुम जो कृष्ण

यावेतौ मन्यसे कृष्णौ रथस्थौ रथिनां वरौ ॥ २ ॥
न मे तुल्यावुभावेतौ बाहुवीर्ये कथञ्चन ।
उद्यतां पृथिवीं सर्वां ससुरासुरमानवाम् ॥ ३ ॥
योधयेयं रणमुखे संक्रुद्धः किमु पाण्डवान् ।
विजेष्यामि रणे पार्थान् सोमकांश्च समागतान् ॥ ४ ॥
अहं सेनाप्रणेता ते भविष्यामि न संशयः ।
तं च व्यूहं विधास्यामि न तरिष्यन्ति यं परे ॥ ५ ॥
इति सत्यं ब्रवीम्येष दुर्योधन न संशयः ।
एवमुक्तस्ततो राजा मद्राधिपतिमञ्जसा ॥ ६ ॥
अभ्यषिञ्चत सेनाया मध्ये भरतसत्तम ।
विधिना शास्त्रदृष्टेन क्लिष्टरूपो विशाम्पते ॥ ७ ॥
अभिषिक्ते ततस्तस्मिन्सिंहनादो महानभूत् ।
तव सैन्येऽभ्यवाद्यन्त वादित्राणि च भारत ॥ ८ ॥
हृष्टाश्चासंस्तथा योधा मद्रकाश्च महारथाः ।
तुष्टुवुश्चैव राजानं शल्यमाहवशोभिनम् ॥ ९ ॥
जय राजंश्चिरं जीव जहि शत्रून्समागतान् ।
तव बाहुबलं प्राप्य धार्तराष्ट्रा महाबलाः ॥ १० ॥

और अर्जुनको बडा बलवान् जानते हो सो दोनोंही हमारे तुल्य नहीं हैं। मैं समस्त देवता, राक्षस और मनुष्योंके सहित जगत् भरके वीरोंसे युद्ध कर सक्ता हूं। तब पाण्डव क्या हैं? अब हम सब पाण्डव और पाञ्चालोंको युद्धमें जीतेंगे। अब हम निःसन्देह तुम्हारे सेनापति बनकर ऐसा व्यूह बनावेंगे जिसको पाण्डव कभी न तोड सकें। (१—५)

हे दुर्योधन! हम तुमसे जो कहते हैं सब सत्य मानो। राजा शल्यके ये वचन सुन राजा दुर्योधनने शास्त्रमें लिखी विधिके अनुसार राजा शल्यका अभिषेक किया। हे भरत! जब शल्यका अभिषेक होने लगा। तब तुम्हारी सेनामें अनेक बाजे बजने लगे, और क्षत्री गर्जने लगे। सब मद्रदेशी वीर बहुत प्रसन्न हुए और सब क्षत्री वीर राजा शल्यकी प्रशंसा करने लगे कि, हे राजन्! हे महाबल! आपकी जय हो आप पाण्डवोंको जीतिये, तुम्हारे बाहुबलसे धृतराष्ट्रके पुत्र बलवान दुर्योधन शत्रुओंको मारकर सब जगत्का राज्य

निखिलाः पृथिवीं सर्वां प्रशासन्तु हतद्विषः ।
त्वं हि शक्तो रणे जेतुं ससुरासुरमानवान् ॥ ११ ॥
मर्त्यधर्माण इह तु किमु सृञ्जयसोमकान् ।
एवं सम्पूज्यमानस्तु मद्राणामधिपो वली ॥ १२ ॥
हर्षं प्राप तदा वीरो दुरापमकृतात्मभिः ।
शल्य उवाच— अद्य चाहं रणे सर्वान् पञ्चालान्सह पाण्डवैः ॥ १३ ॥
निहनिष्यामि वा राजन् स्वर्गं यास्यामि वा हतः ।
अद्य पश्यन्तु मां लोका विचरन्तमभीतवत् ॥ १४ ॥
अद्य पाण्डुसुताः सर्वे वासुदेवः ससात्यकिः ।
पञ्चालाश्चेदयश्चैव द्रौपदेयाश्च सर्वशः ॥ १५ ॥
धृष्टद्युम्नः शिखण्डी च सर्वे चापि प्रभद्रकाः ।
विक्रमं मम पश्यन्तु धनुषश्च महद्बलम् ॥ १६ ॥
लाघवं चास्त्रवीर्यं च भुजयोश्च बलं युधि ।
अद्य पश्यन्तु मे पार्थाः सिद्धाश्च सह चारणैः ॥ १७ ॥
यादृशं मे बलं बाह्वोः सम्पदस्त्रेषु या च मे ।
अद्य मे विक्रमं दृष्ट्वा पाण्डवानां महारथाः ॥ १८ ॥
प्रतीकारपरा भूत्वा चेष्टन्तां विविधाः क्रियाः ।
अद्य सैन्यानि पाण्डूनां द्रावयिष्ये समन्ततः ॥ १९ ॥

पावें । आप देवता और राक्षसोंको भी युद्धमें जीत सकते हैं, फिर पाञ्चालोंकी तो बात ही क्या है ? इस प्रकारकी स्तुति सुनकर बलवान शल्य ऐसे प्रसन्न हुए जैसे मूर्ख लोग नहीं हो सकते । (६–१२)

शल्य बोले, आज युद्धमें पाञ्चालोंके सहित पाण्डवोंको या तो मारेहींगे या हमही मर जांयगे । आज हम कैसे निडर हो युद्ध करते हैं सो सब लोग देखो, आज पांचों पाण्डव कृष्ण,सात्य-कि, द्रौपदीके पांचों पुत्र, धृष्टद्युम्न, शिखण्डी और सब प्रभद्रक क्षत्री हमारे पराक्रम और धनुषविद्याको देखें । आज सब पाण्डव सिद्ध और चारणोंके सहित देखें मैं कितनी धनुषविद्या जानता हूं । आज मेरे शीघ्र बाण चलाने, हाथोंके बल और शस्त्रविद्याको सब पाण्डवोंके महारथ देखकर यत्नरहित होजांय;आज पाण्डवोंकी सेनाके प्रधान योद्धा हमारे बाणोंके काटनेका यत्न करें, आज हम पाण्डवोंकी सब सेनाको भगा देंगे । हे

द्रोणभीष्मावति विभो सूतपुत्रं च संयुगे ।
विचरिष्ये रणे युध्यन्प्रियार्थं तव कौरव ॥ २० ॥
सञ्जय उवाच— अभिषिक्ते तथा शल्ये तव सैन्येषु मानद ।
न कर्णं व्यसनं किञ्चिन्मेनिरे तत्र भारत ॥ २१ ॥
हृष्टाः सुमनसश्चैव बभूवुस्तत्र सैनिकाः ।
मेनिरे निहतान्पार्थान्मद्रराजवशङ्गतान् ॥ २२ ॥
प्रहर्षं प्राप्य सेना तु तावकी भरतर्षभ ।
तां रात्रिमुषिता सुप्ता हर्षचित्ता च साऽभवत्॥ २३ ॥
सैन्यस्य तव तं शब्दं श्रुत्वा राजा युधिष्ठिरः ।
वार्ष्णेयमब्रवीद्वाक्यं सर्वक्षत्रस्य पश्यतः ॥ २४ ॥
मद्रराजः कृतः शल्यो धार्तराष्ट्रेण माधव ।
सेनापतिर्महेष्वासः सर्वसैन्येषु पूजितः ॥ २५ ॥
एतज्ज्ञात्वा यथाभूतं कुरु माधव यत्क्षमम् ।
भवान्नेता च गोप्ता च विधत्स्व यदनन्तरम् ॥ २६ ॥
तमब्रवीन्महाराज वासुदेवो जनाधिपम् ।
आर्तायनिमहं जाने यथा तत्त्वेन भारत ॥ २७ ॥
वीर्यवांश्च महातेजा महात्मा च विशेषतः ।

दुर्योधन ! आज तुम्हारे हितके लिये वह काम करूंगा । जो भीष्म, द्रोणाचार्य और कर्णने भी नहीं किया था ॥ १३-२०

सञ्जय बोले, हे राजन् ! शल्यका अभिषेक होते ही तुम्हारी सेनाके सब योद्धा कर्णका मृत्यु भूल गये, सब लोग बहुत प्रसन्न हुए और मनमें यह निश्चय कर लिया कि, शल्यने सब पाण्डवोंको मारडाला । हे राजन् ! तुम्हारी सब सेनाने वह रात बडे आनन्दसे बिताई ॥ (२१-२३)

उस सेनाका ऐसा प्रसन्न शब्द सुनकर राजा युधिष्ठिर सब क्षत्रियोंके बीचमें श्रीकृष्णसे यों बोले। हे माधव! दुर्योधनने सब शस्त्रधारियोंमें श्रेष्ठ महापराक्रमी मद्रराज शल्यको सेनापति बनाया। आप इस सबका विचारकर जो कुछ करने योग्य काम हो सो कीजिये क्यों कि आपही हमारे आज्ञा देनेवाले और बहुत अच्छे मार्गमें चलानेवाले हैं॥ (२३-२६)

ऐसे वचन सुन श्रीकृष्ण युधिष्ठिरसे बोले, हे पृथ्वीनाथ! हे भारत! मैं अच्छी प्रकारसे शल्यके बलको जानता हूं,

कृती च चित्रयोधी च संयुक्तो लाघवेन च ॥ २८ ॥
यादृग्भीष्मस्तथा द्रोणो यादृक्कर्णश्च संयुगे।
तादृशस्तद्विशिष्टो वा मद्रराजो मतो मम ॥ २९ ॥
युध्यमानस्य तस्याहं चिन्तयानश्च भारत।
योद्धारं नाधिगच्छामि तुल्यरूपं जनाधिप ॥ ३० ॥
शिखण्ड्यर्जुनभीमानां सात्वतस्य च भारत।
धृष्टद्युम्नस्य च तथा बलेनाभ्यधिको रणे ॥ ३१ ॥
मद्रराजो महाराजः सिंहद्विरदविक्रमः।
विचरिष्यत्यभीः काले कालः क्रुद्धः प्रजास्विव ॥ ३२ ॥
तस्याद्य न प्रपश्यामि प्रतियोद्धारमाहवे।
त्वामृते पुरुषव्याघ्र शार्दूलसमविक्रमम् ॥ ३३ ॥
स देवलोके कृत्स्नेऽस्मिन्नान्यस्त्वत्तः पुमान्भवेत्।
मद्रराजं रणे क्रुद्धं यो हन्यात्कुरुनन्दन ॥ ३४ ॥
अहन्यहनि युध्यंतं क्षोभयन्तं बलं तव।
तस्माज्जहि रणे शल्यं मघवानिव शम्बरम् ॥ ३५ ॥
अजेयश्चाप्यसौ वीरो धार्त्तराष्ट्रेण सत्कृतः।

राजा शल्य बलवान तेजस्वी शीघ्र शस्त्र चलानेवाले विचित्र योद्धा और विशेष कर धर्मात्मा हैं। मेरी बुद्धिमें भीष्म, द्रोणाचार्य और कर्ण जैसे बलवान थे, शल्य उनसे कुछ अधिक हैं। हे पृथ्वीनाथ! मैं इस समय यही विचार रहा हूं कि हमारी ओर ऐसा कोन वीर है जो शल्यसे लड सके? परन्तु अभीतक मेरी बुद्धिमें कोई स्थिर नहीं हुआ। शिखण्डी, अर्जुन, भीमसेन, सात्यकी और धृष्टद्युम्नसे शल्य अधिक बलवान हैं॥ (२७-३१)

हे महाराज! सिंह और मतवाले हाथीके समान बलवान शल्य हमारी सेनामें इस प्रकार घूमेंगे जैसे यमराज क्रोध करके जगत्में घूमते हैं। हे पुरुषसिंह! हे शार्दूलके समान वीर! हम अपनी ओर शल्यसे लडने योग्य आपके सिवाय और किसीको नहीं पाते। हे कुरुनन्दन! देव लोक और मनुष्यलोकमें आपके सिवाय ऐसा कोई वीर नहीं जो क्रोध भरे शल्यको युद्धमें मार सके। यही शल्य प्रतिदिन आपकी सेनाका नाश करता है, इसलिये आप इसको इस प्रकार मारिये जैसे इन्द्रने शम्बरको मारा था। (३२—३५)

तवैव हि जयो नूनं हते मद्रेश्वरे युधि ॥ ३६ ॥
तस्मिन्हते हतं सर्वं धार्तराष्ट्रबलं महत् ।
एतच्छ्रुत्वा महाराज वचनं मम साम्प्रतम् ॥ ३७ ॥
प्रत्युद्याहि रणे पार्थ मद्रराजं महारथम् ।
जहि चैनं महाबाहो वासवो नमुचिं यथा ॥ ३८ ॥
न चैवात्र दया कार्या मातुलोऽयं ममेति वै ।
क्षत्रधर्मं पुरस्कृत्य जहि मद्रजनेश्वरम् ॥ ३९ ॥
द्रोणभीष्मार्णवं तीर्त्वा कर्णपातालसम्भवम् ।
मा निमज्जस्व सगणः शल्यमासाद्य गोष्पदम् ॥ ४० ॥
यच्च ते तपसो वीर्यं यच्च क्षात्रं बलं तव ।
तद्दर्शय रणे सर्वं जहि चैनं महारथम् ॥ ४१ ॥
एतावदुक्त्वा वचनं केशवः परवीरहा ।
जगाम शिबिरं सायं पूज्यमानोऽथ पाण्डवैः ॥ ४२ ॥
केशवे तु तदा याते धर्मपुत्रो युधिष्ठिरः ।
विसृज्य सर्वान् भ्रातॄंश्च पञ्चालानथ सोमकान् ॥ ४३ ॥
सुष्वाप रजनीं तां तु विशल्य इव कुञ्जरः ।

हे पृथ्वीनाथ ! एकले शल्यको ही कोई नहीं जीत सकता जिसपर भी धृतराष्ट्रके पुत्रोंने सेनापति बनाया है । हमें यह निश्चय है कि शल्यके मरनेहीसे आपकी विजय होगी ॥ हे महाराज ! शल्यके मरनेहीसे सब धृतराष्ट्रके पुत्र मर जांयगे । हे महाराज ! आप हमारे वचनोंको स्वीकार करके महारथ शल्यसे युद्ध करनेको जाइये और जैसे इन्द्रने नमुचिको मारा था वैसे शल्यको आप मारें । हे महाराज ! यह हमारा मामा है ऐसा विचारकर आप उसपर दया मत कीजिये क्यों कि क्षत्रियोंका ऐसा ही धर्म है । (३६—३९)

आपने भीष्म और द्रोणाचार्यरूपी समुद्र और कर्णरूपी तालावकोभी तैरा, अब शल्यरूपी गायके पैरमें भाइयोंके सहित मत डूबियो, आज हम आपकी तपस्या और हाथोंका बल देखेंगे, आप क्षत्रियोंके अनुसार इस महारथ शल्यको मारिये । (४०—४१)

राजा युधिष्ठिरसे ऐसा वचन कहकर और उनकी आज्ञा लेकर श्रीकृष्ण सोनेके लिये अपने डेरेमें चले गये; श्रीकृष्णके जानेके पश्चात् महाराज युधिष्ठिरने अपने सब भाई, पाञ्चाल और सोमक-

ते च सर्वे महेष्वासाः पञ्चालाः पाण्डवास्तथा ॥४४॥
कर्णस्य निधने हृष्टाः सुषुपुस्तां निशां तदा।
गतज्वरं महेष्वासं तीर्णपारं महारथम् ॥ ४५ ॥
बभूव पाण्डवेयानां सैन्यं च मुदितं नृप।
सूतपुत्रस्य निधने जयं लब्ध्वा च मारिष ॥ ४६ ॥ [३६५]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यपर्वणि शल्यसेनापत्याभिषेके सप्तमोऽध्यायः॥ ७॥

सञ्जय उवाच—व्यतीतायां रजन्यां तु राजा दुर्योधनस्तदा।
अब्रवीत्तावकान्सर्वान्सन्नह्यन्तां महारथाः ॥ १ ॥
राज्ञश्च मतमाज्ञाय समनह्यत सा चमूः।
अयोजयन् रथांस्तूर्णं पर्यधावंस्तथाऽपरे ॥ २ ॥
अकल्प्यन्त च मातङ्गाः समनह्यन्त पत्तयः।
रथानास्तरणोपेतांश्चक्रुरन्ये सहस्रशः ॥ ३ ॥
वादित्राणां च निनदः प्रादुरासीद्विशाम्पते।
अयोधनार्थं योधानां बलानां चाप्युदीर्यताम् ॥ ४ ॥
ततो बलानि सर्वाणि सेनाशिष्टानि भारत।
प्रस्थितानि व्यदृश्यन्त मृत्युं कृत्वा निवर्त्तनम् ॥ ५ ॥
शल्यं सेनापतिं कृत्वा मद्रराजं महारथाः।

वंशी क्षत्रियोंको सोनेकी आज्ञा दी, फिर आपभी मतवाले हाथीके समान सुखसे सोरहे, अनन्तर अपने अपने डेरोंमें जाकर सब पाञ्चाल और पाण्डव कर्णके मरनेसे प्रसन्न होकर सुखसे सोये, कर्णके मरनेसे राजा युधिष्ठिरकी सब सेनाको यह निश्चय होगया कि हमारी जीत होगई। (४२–४६) [३६५]

शल्यपर्वमें सात अध्याय समाप्त।

शल्यपर्वमें आठ अध्याय।

सञ्जय बोले, हे राजन्! जब तीन पहर रात बीत चुकी तब राजा दुर्योधन उठे और सब सेनाको युद्धके लिये तैयार होनेकी आज्ञा दी, राजाकी आज्ञा सुनते ही सब योद्धा तैयार होने लगे, कोई हाथी और कोई घोडेको कसने लगा, कहीं सहस्रों रथ इकट्ठे होने लगे और कहीं पैदलोंके झुण्ड बंधने लगे। हे राजन्! उस समय सेनाको ठीक करनेके लिये और वीरोंका उत्साह बढानेके लिये तुम्हारी सेनामें अनेक प्रकारके बाजे बजने लगे। हे राजन्! तब सब बची हुई सेना एक दिन अवश्य ही मरना होगा यह विचार कर युद्धको उपस्थित होगई। (१—५)

प्रविभज्य बलं सर्वमनीकेषु व्यवस्थिताः ॥ ६ ॥
ततः सर्वे समागम्य पुत्रेण तव सैनिकाः ।
कृपश्च कृतवर्मा च द्रौणिः शल्योऽथ सौबलः ॥ ७ ॥
अन्ये च पार्थिवाः शेषाः समयं चक्रुराहताः ।
न न एकेन योद्धव्यं कथंचिदपि पाण्डवैः ॥ ८ ॥
यो ह्येकः पाण्डवैर्युध्येद्यो वा युद्ध्यन्तमुत्सृजेत् ।
स पञ्चभिर्भवेद्युक्तः पातकैश्चोपपातकैः ॥ ९ ॥
अन्योन्यं परिरक्षद्भिर्योद्धव्यं सहितैश्च ह ।
एवं ते समयं कृत्वा सर्वे तत्र महारथाः ॥ १० ॥
मद्रराजं पुरस्कृत्य तूर्णमभ्यद्रवन्परान् ।
तथैव पाण्डवा राजन्व्यूह्य सैन्यं महारणे ॥ ११ ॥
अभ्ययुः कौरवान् राजन्योत्स्यमानाः समन्ततः ।
तद्बलं भरतश्रेष्ठ क्षुब्धार्णवसमस्वनम् ॥ १२ ॥
समुद्धूतार्णवाकारमुद्धूतरथकुञ्जरम् ।
धृतराष्ट्र उवाच– द्रोणस्य चैव भीष्मस्य राधेयस्य च मे श्रुतम् ॥ १३ ॥
पातनं शंस मे भूयः शल्यस्याथ सुतस्य मे ।

तब महापराक्रमी महारथ सेनापति शल्यने सब सेनाका विभाग किया, तिसके पीछे कृपाचार्य कृतवर्मा अश्वत्थामा और सुबलपुत्र शकुनि आदि सब प्रधान वीर शल्यको आगे करके राजा दुर्योधनके पास आये और उनसे सत्कार पाकर ऐसा विचार करने लगे, कि हम लोग, किस प्रकार पाण्डवोंसे युद्ध करें, मद्रराज शल्यने यह आज्ञा दी कि जो हमारी ओरका वीर एकला पाण्डवोंसे युद्ध करेगा, या लडते हुए पाण्डवोंको छोड कर हटेगा, उसे पांच महापाप और सब छोटे छोटे पाप लगेंगे, आज हम सब महारथ एक स्थानपर खडे होकर एक दूसरेकी रक्षा करते हुए युद्ध करेंगे, ऐसा कहकर आप सबसे आगे, और सब योद्धा उनके पीछे युद्ध करनेको चले । (६–१०)

हे राजन् ! उधर पाण्डवोंने भी युद्ध करनेके लिये अपनी सेनाका व्यूह बनाया और युद्ध करनेको चले, हे महाराज! वह रथोंसे भरी सेना इस प्रकार चली जैसे शुक्ल पक्षमें समुद्र बढता है।(१०-१२)

धृतराष्ट्र बोले, हे सञ्जय ! हमने भीष्म द्रोण और कर्णका मरना सुना; अब शल्य और दुर्योधनके मरनेका वर्णन

कथं रणे हतः शल्यो धर्मराजेन सञ्जय ॥ १४ ॥
भीमेन च महाबाहुः पुत्रो दुर्योधनो मम ।
सञ्जय उवाच— क्षयं मनुष्यदेहानां तथा नागाश्वसंक्षयम् ॥ १५ ॥
शृणु राजन् स्थिरो भूत्वा संग्रामं शंसतो मम ।
आशा बलवती राजन्पुत्राणां तेऽभवत्तदा ॥ १६ ॥
हते द्रोणे च भीष्मे च सूतपुत्रे च पातिते ।
शल्यः पार्थान्रणे सर्वान्निहनिष्यति मारिष ॥ १७ ॥
तामाशां हृदये कृत्वा समाश्वस्य च भारत ।
मद्रराजं च समरे समाश्रित्य महारथम् ॥ १८ ॥
नाथवन्तं तदाऽऽत्मानममन्यन्त सुतास्तव ।
यदा कर्णे हते पार्थाः सिंहनादं प्रचक्रिरे ॥ १९ ॥
तदा तु तावकान् राजन्नाविवेश महद्भयम् ।
तान्समाश्वास्य योधांस्तु मद्रराजः प्रतापवान् ॥ २० ॥
व्यूह्य व्यूहं महाराज सर्वतो भद्रमृद्धिमत् ।
प्रत्युद्ययौ रणे पार्थान्मद्रराजः प्रतापवान् ॥ २१ ॥
विधुन्वन्कार्मुकं चित्रं भारघ्नं वेगवत्तरम् ।
रथप्रवरमास्थाय सैन्धवाश्वं महारथः ॥ २२ ॥

करो राजा युधिष्ठिरने शल्यको और भीमसेनने दुर्योधनको कैसे मारा॥१२-१४

सञ्जय बोले, हे राजन्! आप स्थिर होकर हमसे मनुष्य हाथी और घोडोंके नाश होने और घोर संग्रामका वर्णन सुनो, हे शत्रुनाशन! भीष्म, द्रोणाचार्य और कर्णके मरनेके पश्चात् तुम्हारे पुत्रोंको यह ठीक निश्चय होगया कि राजा शल्य सब पाण्डवोंको मार डालेंगे। हे महाराज! इस आशासे तुम्हारे सब पुत्र राजा शल्यको आगे करके और उनकी प्रशंसा करके युद्ध करनेको चले, अपने को स्वामी सहित माना, तब पाण्डवोंके योद्धा भी सिंहके समान गर्जने लगे। (१८-१९)

हे महाराज! जब कर्ण मरे थे, तब तुम्हारे सब वीरोंको अपनी जीतकी आशा नहीं थी, परन्तु प्रतापी मद्रराज शल्यने उन सबको सावधान किया और आप भी युद्ध करनेको चले तब प्रतापी शल्यने घोर सर्वतोभद्र व्यूह बना, फिर सिंधुदेशके घोडोंसे युक्त रथपर बैठकर शत्रुओंको नाश करनेवाले, घोर और विचित्र धनुषको घुमाते

तस्य सूतो महाराज रथस्थोऽशोभयद्रथम् ।
स तेन संवृतो वीरो रथेनामित्रकर्षणः ॥ २३ ॥
तस्थौ शूरो महाराज पुत्राणां ते भयप्रणुत् ।
प्रयाणे मद्रराजोऽभून्मुखं व्यूहस्य दंशितः ॥ २४ ॥
मद्रकैः सहितो वीरैः कर्णपुत्रैश्च दुर्जयैः ।
सव्येऽभूत् कृतवर्मा च त्रिगर्त्तैः परिवारितः ॥ २५ ॥
गौतमो दक्षिणे पार्श्वे शकैश्च यवनैः सह ।
अश्वत्थामा पृष्ठतोऽभूत्काम्बोजैः परिवारितः ॥ २६॥
दुर्योधनोऽभवन्मध्ये रक्षितः कुरुपुंगवैः ।
हयानीकेन महता सौबलश्चापि संवृतः ॥ २७ ॥
प्रययौ सर्वसैन्येन कैतव्यश्च महारथः ।
पांडवाश्च महेष्वासा व्यूह्य सैन्यमरिन्दमाः ॥ २८ ॥
त्रिधा भूता महाराज तव सैन्यमुपाद्रवन् ।
धृष्टद्युम्नः शिखंडी च सात्यकिश्च महारथः ॥ २९ ॥
शल्यस्य वाहिनीं हन्तुमभिदुद्रुवुराहवे ।
ततो युधिष्ठिरो राजा स्वेनानीकेन संवृतः ॥ ३० ॥
शल्यमेवाभिदुद्राव जिघांसुर्भरतर्षभः ।

हुए युद्ध करनेको चले । (१९-२२)

हे महाराज ! राजा शल्यके रथमें बैठते ही उनका सारथी भी बैठ गया तब शत्रुनाशन वीर शल्यकी बहुत शोभा बढी, हे राजन् ! आपके पुत्रों के भय नाशक राजा शल्य, महायोद्धा कर्णके बेटे और मद्रदेशके प्रधान क्षत्रियोंके सहित सावधान होकर व्यूह के मुखमें खडे होगये । बाईं ओर त्रिगर्त्त देशके क्षत्रियोंके सहित कृतवर्मा, कृपाचार्य, शक, यवन वीरोंके सहित दहिनो ओर; और अश्वत्थामा काम्बोजदेशी वीरोंके सहित पीछे और राजा दुर्योधन प्रधान कुरुवंशी क्षत्रियोंसे रक्षित होकर व्यूहके बीचमें खडे हुए । सुबलपुत्र जुवारी शकुनि घुडचढी सेनाको लेकर अलग ही पाण्डवोंसे युद्ध करनको चले (२३—२७)

शत्रुनाशन पाण्डवोंने भी अपना व्यूह बनाकर सेनाके तीन टुकडे किये, पहलेमें धृष्टद्युम्न शिखण्डी और महारथ सात्यकि शल्यकी सेनासे युद्ध करनेको खडे हुए । दूसरे भागको लेकर और अपने सब प्रधान वीरोंके सहित महारा-

हार्दिक्यं च महेष्वासमर्जुनः शत्रुसैन्यहा ॥ ३१ ॥
संशप्तकगणांश्चैव वेगितोऽभिविदुद्रुवे ।
गौतमं भीमसेनो वै सोमकाश्च महारथाः ॥ ३२ ॥
अभ्यद्रवन्त राजेन्द्र जिघांसन्तः परान्युधि ।
माद्रीपुत्रौ तु शकुनिमुलूकं च महारथम् ॥ ३३ ॥
ससैन्यौ सह सैन्यौतावुपतस्थतुराहवे ।
तथैवायुतशो योधास्तावकाः पाण्डवान् रणे ॥ ३४ ॥
अभ्यवर्तन्त संक्रुद्धा विविधायुधपाणयः ।

धृतराष्ट्र उवाच— हते भीष्मे महेष्वासे द्रोणे कर्णे महारथे ॥ ३५ ॥
कुरुष्वल्पावशिष्टेषु पाण्डवेषु च संयुगे ।
सुसंरब्धेषु पार्थेषु पराक्रान्तेषु सञ्जय ॥ ३६ ॥
मामकानां परेषां च किं शिष्टमभवद्बलम् ।

संजय उवाच— यथा वयं परे राजन्युद्धाय समुपस्थिताः ॥ ३७ ॥
यावच्चासीद्बलं शिष्टं संग्रामे तन्निबोध मे ।
एकादशसहस्राणि रथानां भरतर्षभ ॥ ३८ ॥
दशदंतिसहस्राणि सप्त चैव शतानि च ।
पूर्णे शतसहस्रे द्वे हयानां तत्र भारत ॥ ३९ ॥

ज युधिष्ठिर शल्यको मारनेके लिये दौडे। अर्जुन, महाधनुषधारी कृतवर्मा, और संशप्तकोंसे युद्ध करनेको गये, गौतम वंशी कृपाचार्यसे लडनेको महारथ पाञ्चालोंके सहित भीमसेन चले। नकुल शकुनिको मारनेको और सहदेव उलूकको, मारनेको चले। इन दोनोंके सङ्ग भारी सेना शकुनि और उलूककी सेनासे युद्ध करनेको चली। इसी प्रकार और भी सहस्रों योद्धा अपने अपने समान वीरोंसे भिड गये। हे राजन्! इस समय दोनों ओरके अनेक शस्त्रधारी वीरोंको घोर क्रोध आगया।२८-३४

महाराज धृतराष्ट्र बोले, हे सञ्जय! हमें ऐसा जान पडता है कि भीम, द्रोणाचार्य, और महारथ कर्णके मरने पर दोनों ओर थोडे ही वीर बचे होंगे। जिस समय पाण्डवोंने आजके युद्ध में चढाई करी तब दोनों ओर कितने वीर शेष रहे? (३५–३६)

सञ्जय बोले, हे राजन्! जिस समय हम लोग और पाण्डव युद्ध करनेको खडे हुए, उस समय जितनी सेना बची थी, उसकी गिन्ती सुनो। हमारी ओर

पत्तिकोट्यस्तथा तिस्रो बलमेतत्तथाभवत् ।
रथानां षट् सहस्राणि षट् सहस्राश्च कुंजराः ॥ ४० ॥
दश चाश्वसहस्राणि पत्तिकोटी च भारत ।
एतद्बलं पाण्डवानामभवच्छेषमाहवे ॥ ४१ ॥
एत एव समाजग्मुर्युद्धाय भरतर्षभ ।
एवं विभज्य राजेन्द्र मद्रराजवशे स्थिताः ॥ ४२ ॥
पाण्डवान्प्रत्युदीयुस्ते जयगृद्धाः प्रमन्यवः ।
तथैव पाण्डवाः शूराः समरे जितकाशिनः ॥ ४३ ॥
उपयाता नरव्याघ्राः पंचालाश्च यशस्विनः ।
इमे ते च बलौघेन परस्परवधैषिणः ॥ ४४ ॥
उपयाता नरव्याघ्राः पूर्वां संध्यां प्रति प्रभो ।
ततः प्रववृते युद्धं घोररूपं भयानकम् ।
तावकानां परेषां च निघ्नतामितरेतरम् ॥ ४५ ॥ [५१०]

इति श्री महाभारते० शल्यपर्वणि व्यूहनिर्माणे अष्टमोऽध्यायः ॥ ८ ॥

संजय उवाच— ततः प्रववृते युद्धं कुरूणां भयवर्धनम् ।
सृंजयैः सहराजेन्द्र घोरं देवासुरोपमम् ॥ १ ॥
नरा रथा गजौघाश्च सादिनश्च सहस्रशः ।

सहस्र रथ, दश हजार सातसौ हाथी, दो लाख घुडचढे और तीन करोड पैदल थे । और पाण्डवोंकी ओर छः सहस्र रथ, छः सहस्र हाथी, दश हजार घुडचढे और केवल एक करोड, पैदल थे, ये सब योद्धा पहले कहे भागोंके अनुसार उपस्थित होगये । तब शल्यने अपनी सब सेनाके वीरोंको आज्ञा दी कि, पाण्डवोंको मारो और अपनी विजय करो, इसी प्रकार विजयी पाण्डवोंने भी यशस्वी और वीर पाञ्चालोंके सहित अपनी सेनाको युद्ध करनेकी आज्ञा दी, तब ये दोनों सेना लडनेके लिये भिड गईं । हे पृथ्वीनाथ ! उस ही समय सूर्य भी आकाशमें उदय हुए तब दोनों ओरके वीर एक दूसरेको मारनेके लिये घोर युद्ध करने लगे ॥ ३६-४५

शल्यपर्वमें आठ अध्याय समाप्त । [५१०]

शल्यपर्वमें नव अध्याय ।

सञ्जय बोले, हे राजेन्द्र ! तब कुरुवंशका नाश करनेवाला सृञ्जय और कौरवोंका घोर युद्ध होने लगा । पैदल, रथी, हाथी और घोडोंपर चढे वीर एक दूसरेको मारने लगे, जैसे वर्षाकालमें

वाजिनश्च पराक्रान्ताः समाजग्मुः परस्परम् ॥ २ ॥
गजानां भीमरूपाणां द्रवतां निःस्वनो महान्।
अश्रूयत यथा काले जलदानां नभस्तले ॥ ३ ॥
नागैरभ्याहताः केचित्सरथा रथिनोऽपतन्।
व्यद्रवन्त रणे वीरा द्राव्यमाणा मदोत्कटैः ॥ ४ ॥
हयौघान्पादरक्षांश्च रथिनस्तत्र शिक्षिताः।
शरैः संप्रेषयामासुः परलोकाय भारत ॥ ५ ॥
सादिनः शिक्षिता राजन्परिवार्य महारथान्।
विचरन्तो रणेऽभ्यघ्नन्प्रासशक्त्यृष्टिभिस्तथा ॥ ६ ॥
धन्विनः पुरुषाः केचित्परिवार्य महारथान्।
एकं बहव आसाद्य प्रेषयुर्यमसादनम् ॥ ७ ॥
नागान् रथवरांश्चान्ये परिवार्य महारथाः।
सान्तरा योधिनं जघ्नुर्द्रवमाणं महारथम् ॥ ८ ॥
तथा च रथिनं क्रुद्धं विकिरंतं शरान् बहून्।
नागा जघ्नुर्महाराज परिवार्य समन्ततः ॥ ९ ॥
नागो नागमभिद्रुत्य रथी च रथिनं रणे।
शक्तितोमरनाराचैर्निजघ्ने तत्र भारत ॥ १० ॥

मेघ गर्जते हैं। तैसे ही भागते हुए भारी हाथियोंका शब्द सुनाई देने लगा, कोई रथ वीरोंके समेत हाथियोंके पैरोंसे पिस गये। कहीं हाथियोंसे डरकर पैदल भागने लगे। अनेक हाथियोंकी रक्षा करनेवाले, रथोंपर बैठे और पैदल वीर बाणों के लगने से परलोकको चले गये। (१—५)

हे राजन्! अनेक घोडोंपर चढे उत्तम शिक्षित वीर रथोंको घेरकर उन में बैठे वीरोंको खड्ग और भालोंसे काट ने लगे ॥ कहीं अनेक पैदल अपने बाणोंसे रथमें बैठे वीरोंको मारकर परलोकको भेजने लगे, कहीं एक ही मनुष्य अनेक वीरोंको मारने लगा। कोई महारथ अपने बाणोंसे काटकर सामग्रीके सहित रथ और हाथियोंको पृथ्वीमें गिराने लगा। कहीं अनेक बाण चलाते हुए रथमें बैठे वीरोंको हाथियोंने मारडाला ॥ (५—८)

हे भरत! कहीं हाथी हाथीकी ओर रथी रथीकी ओर दौडकर बाण और प्रास आदि शस्त्र चलाने लगे। कहीं हाथी, घोडे और रथोंकी झपेटमें आकर

पादातानवमृद्नन्तो रथवारणवाजिनः ।
रणमध्ये व्यदृश्यन्त कुर्वन्तो महदाकुलम् ॥ ११ ॥
हयाश्च पर्यधावंत चामरैरुपशोभिताः ।
हंसा हिमवतः प्रस्थे पिबन्त इव मेदिनीम् ॥ १२ ॥
तेषां तु वाजिनां भूमिः खुरैश्चित्रा विशाम्पते ।
अशोभत यथा नारी करजैः क्षतविक्षता ॥ १३ ॥
वाजिनां खुरशब्देन रथनेमिस्वनेन च ।
पत्तीनां चापि शब्देन नागानां बृंहितेन च ॥ १४ ॥
वादित्राणां च घोषेण शंखानां निनदेन च ।
अभवन्नादिता भूमिर्निर्घातैरिव भारत ॥ १५ ॥
धनुषां कूजमानानां शस्त्रौघानां च दीप्यताम् ।
कवचानां प्रभाभिश्च न प्राज्ञायत किंचन ॥ १६ ॥
बहवो बाहवश्छिन्ना नागराजकरोपमाः ।
उद्वेष्टन्ते विचेष्टन्ते वेगं कुर्वन्ति दारुणम् ॥ १७ ॥
शिरसां च महाराज पततां धरणीतले ।
च्युतानामिव तालेभ्यस्तालानां श्रूयते स्वनः ॥ १८ ॥
शिरोभिः पतितैर्भाति रुधिरार्द्रैर्वसुंधरा ।
तपनीयनिभैः काले नलिनैरिव भारत ॥ १९ ॥

अनेक पदाति मर गये, कहीं चमरोंके युक्त घोडे इस प्रकार दौडने लगे। मानो सब पृथ्वीमें घूम आवेंगे। उनकी शोभा ऐसी दीखती थी, जैसे हिमाचल पर उडते हुए हंसोंकी। हे पृथ्वीनाथ! घोडों के खुरों से खुदी हुई पृथ्वी ऐसी दीखती थी, जैसे नखूनोंके लगनेसे स्त्री। (९-१३)

घोडोंके खुर रथके पहियोंके शब्द पदातियोंके गर्जने हाथियोंके चिंघाडने से सेनाके बाजे और वीरोंके शंख शब्द से पृथ्वी ऐसी जान पडती थी, मानों आज ही प्रलय होगी, खिचती हुई धनुषकी टङ्कार, शस्त्र और कवचोंके चमकनेसे कुछ जान नहीं पडता था, कहीं हाथीके सुंडके समान कटे हुए हाथ तडफ रहे थे। कभी उठते थे, कभी गिर जाते थे, कहीं वीरोंके शिर कटकर इस प्रकार पृथ्वीमें गिरते थे, जैसे ताडके फल वृक्षसे गिरते हैं। कटे हुए रुधिरमें भीगे सोनेके समान रङ्गवाले खुले नेत्र बलहीन शिरोंसे पृथ्वी ऐसी सुन्दर

उद्वृत्तनयनैस्तैस्तु गतसत्त्वैः सुविक्षतैः।
व्यभ्राजत मही राजन्पुण्डरीकैरिवावृता ॥ २० ॥
बाहुभिश्चन्दनादिग्धैः सकेयूरैर्महाधनैः।
पतितैर्भाति राजेन्द्र महाशक्रध्वजैरिव ॥ २१ ॥
ऊरुभिश्च नरेन्द्राणां विनिकृत्तैर्महाहवे।
हस्तिहस्तोपमैरन्यैः संवृतं तद्रणांगणम् ॥ २२ ॥
कबन्धशतसंकीर्णं छत्रचामरसंकुलम्।
सेनावनं तच्छुशुभे वनं पुष्पाचितं यथा ॥ २३ ॥
तत्र योधा महाराज विचरन्तो ह्यभीतवत्।
दृश्यन्ते रुधिराक्तांगाः पुष्पिता इव किंशुकाः ॥ २४ ॥
मातंगाश्चाप्यदृश्यन्त शरतोमरपीडिताः।
पतंतस्तत्रतत्रैव छिन्नाभ्रसदृशा रणे ॥ २५ ॥
गजानीकं महाराज वध्यमानं महात्मभिः।
व्यदीर्यत दिशः सर्वा वातनुन्ना घना इव ॥ २६ ॥
ते गजा घनसंकाशाः पेतुरुर्व्यां समन्ततः।
वज्रनुन्ना इव बभुः पर्वता युगसंक्षये ॥ २७ ॥

दीखने लगी जैसे कमलों से भरा तलाव ॥ (१४—१९)

हे पृथ्वीनाथ! जैसे अनेक इन्द्र धनुषोंसे भरा हुआ आकाश सुन्दर दीखता है, ऐसे ही बाजूबन्द सहित कटे हाथोंसे भरी पृथ्वी दीखने लगी, हे राजन्! इसी प्रकार अनेक राजोंके कटे हुए मध्य शरीरोंसे पृथ्वी भर गई। जैसे अनेक रङ्गोंके फूलोंसे भरा हुआ वन शोभित होता है ऐसे ही कटे हुए शिर और कटे छत्र, चमर आदिसे भरी हुई सेना दिखाई देने लगी; हे राजन्! वहां रुधिरमें भीगे घूमते हुए योद्धा फूले हुए टेसुओंके समान दिखाई देने लगे और बेडर होके घूमने लगे। अनेक हाथी, तोमर और बाण लगनेसे मेघके समान कटकर पृथ्वीमें गिर गये॥ (२०—२५)

जैसे वायु चलनेसे मेघ फट जाते हैं वैसे ही वीरोंके बाण लगनेसे हाथियोंके झुण्ड चारों ओरको भागने लगे। जैसे प्रलयकालमें वज्र लगनेसे पर्वत पृथ्वीमें गिरते हैं तैसे ही बाणों के लगनेसे हाथी पृथ्वीमें गिर गये। चारों ओर चढे हुए वीरोंके सहित मरे हुए घोडोंके पहाडोंके समान ढेर होगये,

हयानां सादिभिः सार्धं पतितानां महीतले।
राशयः स्म प्रदृश्यन्ते गिरिमात्रास्ततस्ततः ॥ २८ ॥
संजज्ञे रणभूमौ तु परलोकवहा नदी।
शोणितोदा रथावर्ता ध्वजवृक्षाऽस्थिशर्करा ॥ २९ ॥
भुजनक्रा धनुःस्रोता हस्तिशैला हयोपला।
मेदोमज्जाकर्दमिनी छत्रहंसा गदोडुपा ॥ ३० ॥
कवचोष्णीषसंछन्ना पताकारुचिरद्रुमा।
चक्रचक्रावलीजुष्टा त्रिवेणुदंडकावृता ॥ ३१ ॥
शूराणां हर्षजननी भीरूणां भयवर्धनी।
प्रावर्त्तत नदी रौद्रा कुरुसृंजयसंकुला ॥ ३२ ॥
तां नदीं परलोकाय वहन्तीमतिभैरवाम्।
तेरुर्वाहननौभिस्ते शूराः परिघबाहवः ॥ ३३ ॥
वर्तमाने तदा युद्धे निर्मर्यादे विशाम्पते।
चतुरंगक्षये घोरे पूर्वदेवासुरोपमे ॥ ३४ ॥
व्याक्रोशन्बान्धवानन्ये तत्र तत्र परन्तप।
क्रोशद्भिर्दयितैरन्ये भयार्ता न निवर्तिरे ॥ ३५ ॥
निर्मर्यादे तथा युद्धे वर्तमाने भयानके।
अर्जुनो भीमसेनश्च मोहयाञ्चक्रतुः परान् ॥ ३६ ॥

तब उस युद्ध भूमिमें परलोकको जानेवाली रुधिरकी नदी बहने लगी उसमें रथ, भौंरे, पताका, टूटे हुए वृक्ष, हड्डियोंका चूरा बालू, हाथ नाक, धनुष सोते, तटपर पडे हुए हाथी पर्वत, घोडे पत्थर, चर्बी कीच, छत्र हंस, गदा डोंगी, पगडी और कवच सिवार, ऊंट वृक्ष, चक्र चकवी चकवाके समान दीखने लगे। (२६—३१)

उस नदीको देखकर वीर प्रसन्न और कायर डरने लगे। उसमें कौरव और सृञ्जयवंशी क्षत्री आनन्द पूर्वक घूमने लगे। इस वैतरणीके समान घोर नदीको बलवान वीर वाहनरूपी नावोंपर बैठकर तैरने लगे। हे पृथ्वीनाथ ! इस समय यह चतुरङ्गिणी सेनाके नाश करनेवाला मर्यादा रहित देवता और राक्षसोंके समान घोर युद्ध होने लगा। कोई अपने बन्धुओंको पुकारने लगा, कोई बन्धुओंका पुकारना सुनकर ही डरके मारे युद्धको न लौटा, उस घोर युद्धमें अर्जुन और भीमसेन तुम्हारी

सा वध्यमाना महती सेना तव नराधिप।
अमुह्यत्तत्र तत्रैव योषिन्मदवशादिव ॥ ३७ ॥
मोहयित्वा च तां सेनां भीमसेनधनञ्जयौ।
दध्मतुर्वारिजौ तत्र सिंहनादांश्च चक्रतुः ॥ ३८ ॥
श्रुत्वैव तु महाशब्दं धृष्टद्युम्नशिखण्डिनौ।
धर्मराजं पुरस्कृत्य मद्रराजमभिद्रुतौ ॥ ३९ ॥
तत्राश्चर्यमपश्याम घोररूपं विशाम्पते।
शल्येन संगताः शूरा यदयुध्यन्त भागशः ॥ ४० ॥
माद्रीपुत्रौ तु रभसौ कृतास्त्रौ युद्धदुर्मदौ।
अभ्ययातां त्वरायुक्तौ जिगीषन्तौ परन्तप ॥ ४१ ॥
ततो न्यवर्तत बलं तावकं भरतर्षभ।
शरैः प्रणुन्नं बहुधा पाण्डवैर्जितकाशिभिः ॥ ४२ ॥
वध्यमाना चमूः सा तु पुत्राणां प्रेक्षतां तव।
भेजे दिशो महाराज प्रणुन्ना शरवृष्टिभिः ॥ ४३ ॥
हाहाकारो महान् जज्ञे योधानां तत्र भारत।
तिष्ठतिष्ठेति चाप्यासीद्द्रावितानां महात्मनाम् ॥४४॥
क्षत्रियाणां सहान्योन्यं संयुगे जयमिच्छताम्।

सेनाका नाश करने लगे; जैसे मतवाली स्त्री कामदेवसे व्याकुल हो जाती है ऐसेही तुम्हारी सेना पाण्डवोंके बाणोंसे व्याकुल हो गई, इस प्रकार उस सेनाको व्याकुल करके भीमसेन और अर्जुन सिंह के समान गर्जने और शङ्ख बजाने लगे। उनके शब्दको सुनकर धृष्टद्युम्न और शिखण्डी धर्मराज युधिष्ठिरकी रक्षा करते हुए शल्यसे युद्ध करनेको चले। ३२–३९

हे महाराज! अनेक वीर एकले शल्यसे युद्ध करने लगे। शल्यभी एकले ही सबसे लडते रहे, यह देखकर हम को बडा आश्चर्य हुआ इसी प्रकार महापराक्रमी महाशस्त्रधारी वीर नकुल और सहदेव भी तुम्हारी सेनाका नाश करते हुए शीघ्रता सहित घूमने लगे। हे राजन्! तब विजयी पाण्डवोंके बाणोंसे व्याकुल होकर तुम्हारी सेना घोर युद्ध करने लगी। तुम्हारी सेना तुम्हारे पुत्रों के देखते ही देखते सेना चारों ओरको भागने लगी। हे राजन्! कोई वीर हा! हा! कर करता हुआ भागता था और कोई खडा रह खडा रह पुकारता था। अनेक तुम्हारी ओरके क्षत्री

प्राद्रवन्नेव संभग्नाः पाण्डवैस्तव सैनिकाः ॥ ४५ ॥
त्यक्त्वा युद्धे प्रियान्पुत्रान् भ्रातॄनथ पितामहान् ।
मातुलान्भागिनेयांश्च वयस्यानपि भारत ॥ ४६ ॥
हयान् द्विपांस्त्वरयन्तो योधा जग्मुः समन्ततः ।
आत्मत्राणकृतोत्साहास्तावका भरतर्षभ ॥ ४७ ॥ [५५७]

इति श्रीमहाभारते० शल्यपर्वणि संकुलयुद्धे नवमोऽध्यायः ॥ ९ ॥

संजय उवाच— तत्प्रभग्नं बलं दृष्ट्वा मद्रराजः प्रतापवान् ।
उवाच सारथिं तूर्णं चोदयाश्वान्महाजवान् ॥ १ ॥
एष तिष्ठति वै राजा पाण्डुपुत्रो युधिष्ठिरः ।
छत्रेण ध्रियमाणेन पाण्डुरेण विराजता ॥ २ ॥
अत्र मां प्रापय क्षिप्रं पश्य मे सारथे बलम् ।
न समर्थो हि मे पार्थः स्थातुमद्य पुरो युधि ॥ ३ ॥
एवमुक्तस्ततः प्रायान्मद्रराजस्य सारथिः ।
यत्र राजा सत्यसन्धो धर्मपुत्रो युधिष्ठिरः ॥ ४ ॥
प्रापतत्तच्च सहसा पाण्डवानां महद्बलम् ।
दधारैको रणे शल्यो वेलोद्वृत्तमिवार्णवम् ॥ ५ ॥

जय चाहने वाले पाण्डवोंके वीरसे डर कर भागने लगे । हे भरत ! वीर अपने प्यारे बेटे, मित्र, दादा, मामा, भानजे और भाइयोंको छोडकर युद्धसे भागे। हे भरतकुलसिंह ! केवल अपने प्राण बचाने के लिये वीर लोग हाथी और घोडों को दौडाते हुए युद्धसे भागे ॥ (४०—४७)

शल्यपर्वमें नव अध्याय समाप्त ।

शल्यपर्वमें दस अध्याय ।

सञ्जय बोले, हे राजन् ! अपनी सेनाको भागते देख महाप्रतापी शल्यने अपने सारथीसे कहा कि, घोडोंको बहुत तेज हांको, यह देखो पाण्डुपुत्र महाराज युधिष्ठिरका सफेद छत्र चमक रहा है तुम हमारे रथको ठीक उन्हींके सामने ले चलो और हमारा बल देखो, युधिष्ठिर हमसे कदापि युद्ध नहीं कर सकते हैं। राजाके ये वचन सुन सारथीने सत्यवादी महाराज युधिष्ठिर की ओर रथ हांका; शल्यको आते देख पाण्डवोंके सैकडों प्रधान योद्धा राजाकी रक्षा और उनसे युद्ध करनेको दौडे परन्तु एकले शल्यने उन सबको इस प्रकार रोक दिया जैसे समुद्रके तटके पर्वत समुद्रकी तरङ्गको । (१—५)

पाण्डवानां बलौघस्तु शल्यमासाद्य मारिष ।
व्यतिष्ठत तदा युद्धे सिंधोर्वेग इवाचलम् ॥ ६ ॥
मद्रराजं तु समरे दृष्ट्वा युद्धाय धिष्ठितम् ।
कुरवः संन्यवर्तन्त मृत्युं कृत्वा निवर्तनम् ॥ ७ ॥
तेषु राजन्निवृत्तेषु व्यूढानीकेषु भागशः ।
प्रावर्तत महारौद्रः संग्रामः शोणितोदकः ॥ ८ ॥
समार्छच्चित्रसेनं तु नकुलो युद्धदुर्मदः ।
तौ परस्परमासाद्य चित्रकार्मुकधारिणौ ॥ ९ ॥
मेघाविव यथोद्धूतौ दक्षिणोत्तरवर्षिणौ ।
शरतोयैः सिषिचतुस्तौ परस्परमाहवे ॥ १० ॥
नान्तरं तत्र पश्यामि पाण्डवस्येतरस्य च ।
उभौ कृतास्त्रौ बलिनौ रथचर्याविशारदौ ॥ ११ ॥
परस्परवधे यत्तौ छिद्रान्वेषणतत्परौ ।
चित्रसेनस्तु भल्लेन पीतेन निशितेन च ॥ १२ ॥
नकुलस्य महाराज मुष्टिदेशेऽच्छिनद्धनुः ।
अथैनं छिन्नधन्वानं रुक्मपुङ्खैः शिलाशितैः ॥ १३ ॥
त्रिभिः शरैरसम्भ्रान्तो ललाटे वै समार्पयत् ।

जैसे पर्वत तक जाकर समुद्रकी तरङ्ग आगे नहीं बढ सक्ती ऐसे ही पाण्डवोंके वीर शल्यके पास जाकर आगे न चल सके। राजा शल्यको घोर युद्ध करते देख तुम्हारे वीर मृत्युका निश्चय करके युद्धको लौटे। हे राजन्! इस सेनाके लौटने पर राजा शल्यने फिर व्यूह बनाया और फिर घोर युद्ध होने लगा। उसी समय नकुल चित्रसेन के ऊपर बाण वर्षाने लगे। दोनों महापराक्रमी वीर विचित्र धनुष लेकर घोर युद्धको उपस्थित हुए, जैसे दक्षिण और उत्तरको वर्षनेवाले दो मेघ जल वर्षाते हैं, तैसेही ये दोनों भी बाण वर्षाने लगे, नकुल और सुषेणकी शस्त्रविद्यामें हमें कुछ भेद नहीं दिखाई देता था। क्यों कि दोनों ही शस्त्रविद्यामें निपुण और महावीर थे। (६—११)

ये दोनों एक दूसरेके मारनेका यत्न करने लगे। तब चित्रसेनने एक विषमें बुझे तेज बाणसे नकुलका धनुष बीचसे काट दिया, और उनके शरीरमें भी अनेक सोनेके पङ्खवाले बाण मारे, फिर तीन तेज बाण माथेमें मारकर चार बा-

हयांश्चास्य शरैस्तीक्ष्णैः प्रेषयामास मृत्यवे ॥ १४ ॥
तथा ध्वजं सारथिं च त्रिभिस्त्रिभिरपातयत् ।
स शत्रुभुजनिर्मुक्तैर्ललाटस्थैस्त्रिभिः शरैः ॥ १५ ॥
नकुलः शुशुभे राजंस्त्रिशृङ्ग इव पर्वतः ।
स छिन्नधन्वा विरथः खड्गमादाय चर्म च ॥ १६ ॥
रथादवातरद्वीरः शैलाग्रादिव केसरी ।
पद्भ्यामापततस्तस्य शरवृष्टिं समासृजत् ॥ १७ ॥
नकुलोऽप्यग्रसत्तां वै चर्मणा लघुविक्रमः ।
चित्रसेनरथं प्राप्य चित्रयोधी जितश्रमः ॥ १८ ॥
आरुरोह महाबाहुः सर्वसैन्यस्य पश्यतः ।
सकुण्डलं समुकुटं सुनसं स्वायतेक्षणम् ॥ १९ ॥
चित्रसेनशिरः कायादपाहरत पाण्डवः ।
स पपात रथोपस्थे दिवाकरसमद्युतिः ॥ २० ॥
चित्रसेनं विशस्तं तु दृष्ट्वा तत्र महारथाः
साधुवादस्वनांश्चक्रुः सिंहनादांश्च पुष्कलान् ॥ २१ ॥
विशस्तं भ्रातरं दृष्ट्वा कर्णपुत्रौ महारथौ ।
सुषेणः सत्यसेनश्च मुञ्चन्तो विविधाञ्शरान् ॥ २२ ॥
ततोऽभ्यधावतां तूर्णं पाण्डवं रथिनां वरम् ।

णोंसे घोडोंको मारडाला, फिर तीन तीन बाणोंसे ध्वजा और सारथीको काट डाला। हे राजन्! उन माथे में लगे तीन बाणोंसे नकुल तीन शिखरवाले पर्वतके समान शोभित होने लगे। फिर खड्ग और ढाल लेकर इस प्रकार रथसे कूदे जैसे पर्वतकी चोटीसे सिंह। उन्हें कूदते देख सुषेण बाण वर्षाने लगे॥ (१२-१७)

नकुलभी उन सब बाणोंको ढालसे चाते हुए और विचित्र युद्ध करते हुए सुषेणके रथतक पहुंच गये और सब वीरोंके देखते देखते रथपर चढ गये, फिर शीघ्रता सहित चित्रसेन के कुण्डल, मुकुट, सुन्दर नाक और बडी बडी आंखोंके सहित शिर काट लिया। जैसे सन्ध्याकी सूर्य अस्त होजाते हैं ऐसे ही नकुलके हाथसे शिर कटकर चित्रसेन रथमें गिर गये। चित्रसेनको मरा देख पाण्डव और पाञ्चाल नकुलकी प्रशंसा करके सिंहके समान गर्जने लगे। तब अपने भाईको मरा देख महारथ सुषेण और सत्यसेन बाण वर्षाते हुए

जिघांसंतौ यथा नागं व्याघ्रौ राजन्महावने ॥ २३ ॥
तावभ्यधावतां तीक्ष्णौ द्वावप्येनं महारथम् ।
शरौघान्सम्यगस्यन्तौ जीमूतौ सलिलं यथा ॥ २४ ॥
स शरैः सर्वतो विद्धः प्रहृष्ट इव पाण्डवः ।
अन्यत्कार्मुकमादाय रथमारुह्य वेगवान् ॥ २५ ॥
अतिष्ठत रणे वीरः क्रुद्धरूप इवान्तकः ।
तस्य तौ भ्रातरौ राजन्शरैः सन्नतपर्वभिः ॥ २६ ॥
रथं विशकली कर्तुं समारब्धौ विशाम्पते ।
ततः प्रहस्य नकुलश्चतुर्भिश्चतुरो रणे ॥ २७ ॥
जघान निशितैर्बाणैः सत्यसेनस्य वाजिनः ।
ततः सन्धाय नाराचं रुक्मपुङ्खं शिलाशितम् ॥ २८ ॥
धनुश्चिच्छेद राजेन्द्र सत्यसेनस्य पाण्डवः ।
अथान्यं रथमास्थाय धनुरादाय चापरम् ॥ २९ ॥
सत्यसेनः सुषेणश्च पाण्डवं पर्यधावताम् ।
अविध्यत्तावसम्भ्रान्तौ माद्रीपुत्रः प्रतापवान् ॥ ३० ॥
द्वाभ्यां द्वाभ्यां महाराज शराभ्यां रणमूर्धनि ।
सुषेणस्तु ततः क्रुद्धः पाण्डवस्य महद्धनुः ॥ ३१ ॥

महारथ नकुलकी ओर इस प्रकार दौडे जैसे वन में एक हाथीके मारनेको दो सिंह दौडे । (१८-२३)

जैसे दो मेघ पानी वर्षाते हुए दौडते हैं । ऐसे ही कर्णके पुत्र महारथ नकुलकी ओर वाण चलाते दौडे । उन बाणोंके लगनेसे पांडुपुत्र नकुल बहुत प्रसन्न हुए,इतनेही में उनका दूसरा रथ आगया, तब रथपर बैठकर नकुलने धनुष धारण किया, उस समय क्रोध भरे नकुलका रूप ऐसा दीखता था मानो साक्षात् यमराज प्रलय करने को आये हैं । तब कर्णके दोनों पुत्र भी अपने तेज बाणोंसे नकुलका रथ काटनेका यत्न करने लगे । तब नकुलने हंसकर चार बाणोंसे सत्यसेनके चारों घोडोंको मार डाला । (२४-२८)

फिर एक शिलापर घिसे सोने के पङ्खवाले बाणसे धनुष भी काट दिया । तब सत्यसेनने दूसरे रथपर बैठ दूसरा धनुष लिया, तब फिर दोनों भाई सावधान होकर नकुलसे घोर युद्ध करने लगे । प्रतापी नकुल भी एकेले ही दोनोंसे लडने लगे, और दो दो बाण

चिच्छेद प्रहसन्युद्धे क्षुरप्रेण महारथः ।
अथान्यद्धनुरादाय नकुलः क्रोधमूर्च्छितः ॥ ३२ ॥
सुषेणं पञ्चभिर्विद्ध्वा ध्वजमेकेन चिच्छिदे ।
सत्यसेनस्य स धनुर्हस्तावापञ्च मारिष ॥ ३३ ॥
चिच्छेद तरसा युद्धे तत उच्चुक्रुशुर्जनाः ।
अथान्यद्धनुरादाय वेगघ्नं भारसाधनम् ॥ ३४ ॥
शरैः सञ्छादयामास समन्तात्पाण्डुनन्दनम् ।
सन्निवार्य तु तान्बाणान्नकुलः परवीरहा ॥ ३५ ॥
सत्यसेनं सुषेणं च द्वाभ्यां द्वाभ्यामविध्यत ।
तावेनं प्रत्यविध्येतां पृथक् पृथगजिह्मगैः ॥ ३६ ॥
सारथिं चास्य राजेन्द्र शितैर्विव्यधतुः शरैः ।
सत्यसेनो रथेषां तु नकुलस्य धनुस्तथा ॥ ३७ ॥
पृथक् शराभ्यां चिच्छेद कृतहस्तः प्रतापवान् ।
सरथेऽतिरथस्तिष्ठन् रथशक्तिं परामृशत् ॥ ३८ ॥
स्वर्णदण्डामकुण्ठाग्रां तैलधौतां सुनिर्मलाम् ।
लेलिहानामिव विभो नागकन्यां महाविषाम् ॥ ३९ ॥
समुद्यम्य च चिक्षेप सत्यसेनस्य संयुगे ।
सा तस्य हृदयं संख्ये बिभेद च तथा नृप ॥ ४० ॥

दोनोंके शरीरमें मारे, तब सुषेणने क्रोध करके एक बाणसे नकुलका धनुष काट दिया, तब नकुलने क्रोधसे व्याकुल होकर दूसरा धनुष लेकर पांच बाण सुषेणके शरीरमें मारे, एकसे ध्वजा काट दी, फिर दो बाणोंसे चित्रसेनका धनुष और तलहत्थी काट दी, नकुलकी इस शीघ्रताको देख पाण्डव गर्जने और कौरव घबडाने लगे, इतने ही समय में सत्यसेनने दूसरा धनुष धारण किया। (२९—३४)

और बाणोंसे नकुलको छिपा दिया परन्तु नकुलने क्षण मात्रमें सब बाणोंको काटकर दोनोंके शरीर में दो दो बाण मारे, उन दोनोंने भी अनेक तेज बाण नकुलके शरीरमें मारे, फिर दोनोंने मिलकर नकुल के सारथीको मार डाला। सुषेणने धनुष और रथके आसनको काट दिया। तब प्रतापवान महारथ नकुलने सोनेके दंडवाली, विष में बुझाई चमकती हुई, तेज धारेवाली, सांपकी जीभके समान लपकती, विष

महावने ॥ ३३ ॥

स पपात रथाद्भूमिं गतसत्त्वोऽल्पचेतनः । ...म् ।

भ्रातरं निहतं दृष्ट्वा सुषेणः क्रोधमूर्छितः ॥ ...३४ ॥

अभ्यवर्षच्छरैस्तूर्णं पादातं पाण्डुनन्दनम् ।

चतुर्भिश्चतुरो वाहान्ध्वजं छित्वा च पञ्चभिः ॥ ४२ ॥

त्रिभिर्वै सारथिं हत्वा कर्णपुत्रो ननाद ह ।

नकुलं विरथं दृष्ट्वा द्रौपदेयो महारथम् ॥ ४३ ॥

सुतसोमोऽभिदुद्राव परीप्सन्पितरं रणे ।

ततोऽधिरुह्य नकुलः सुतसोमस्य तं रथम् ॥ ४४ ॥

शुशुभे भरतश्रेष्ठो गिरिस्थ इव केसरी ।

अन्यत्कार्मुकमादाय सुषेणं समयोधयत् ॥ ४५ ॥

तावुभौ शरवर्षाभ्यां समासाद्य परस्परम् ।

परस्परवधे यत्नं चक्रतुः सुमहारथौ ॥ ४६ ॥

सुषेणस्तु ततः क्रुद्धः पाण्डवं विशिखैस्त्रिभिः ।

सुतसोमं तु विंशत्या बाह्वोरुरसि चार्पयत् ॥ ४७ ॥

ततः क्रुद्धो महाराज नकुलः परवीरहा ।

शरैस्तस्य दिशः सर्वाश्छादयामास वीर्यवान् ॥ ४८ ॥

भरी नाग कन्याके समान भयानक, एक सांग सत्यसेनकी ओर चलाई उस से सत्यसेनकी छाती फट गई। ३५-४०

और मरकर पृथ्वीमें गिर गये, अपने भाईको मरा देख सुषेणको महा क्रोध हुआ, फिर पांच बाणोंसे नकुलकी ध्वजा और चारसे चारों घोडोंको मारडाला। फिर नकुल रथसे नीचे उतरे अपनी विजय देख सुषेण सिंहके समान गर्जने लगा, अपने पिताको रथहीन देख द्रौपदीपुत्र महारथ श्रुतसेन वेगसे दौडे, तब नकुल भी दौडकर उनके रथपर चढ गये। उस समय रथ पर बैठे नकुलकी ऐसी शोभा बढी, जैसे पर्वतकी शिखर पर चढनेसे सिंहकी, तब दूसरा धनुष लेकर सुषेणसे युद्ध करने लगे ॥ (४१-४५)

दोनों महारथ घोर बाण वर्षाते ... एक दूसरेको मारनेका यत्न करने लगे ... तब सुषेणने क्रोध करके नकुलके ... और छातीमें तीन और श्रुतसोमको ... बीस बाण मारे, हे महाराज! तब शत्रुनाशन महापराक्रमी नकुलने मह... करके अपने बाणोंसे सुषेणके ... छिपा दिया। तब एक महातेज ... चन्द्र बाण धनुषपर चढाकर कर्ण...

ततो गृहीत्वा तीक्ष्णाग्रमर्धचन्द्रं सुतेजनम्।
सुवेगवन्तं चिक्षेप कर्णपुत्राय संयुगे ॥ ४९ ॥
तस्य तेन शिरः कायाज्जहार नृपसत्तम।
पश्यतां सर्वसैन्यानां तदद्भुतमिवाभवत् ॥ ५० ॥
स हतः प्रापतद्राजन्नकुलेन महात्मना।
नदीवेगादिवारुग्णस्तीरजः पादपो महान् ॥ ५१ ॥
कर्णपुत्रवधं दृष्ट्वा नकुलस्य च विक्रमम्।
प्रदुद्राव भयात्सेना तावकी भरतर्षभ ॥ ५२ ॥
तां तु सेनां महाराज मद्रराजः प्रतापवान्।
अपालयद्रणे शूरः सेनापतिररिन्दमः ॥ ५३ ॥
विभीस्तस्थौ महाराज व्यवस्थाप्य च वाहिनीम्।
सिंहनादं भृशं कृत्वा धनुः शब्दं च दारुणम् ॥ ५४ ॥
तावकाः समरे राजन् रक्षिता दृढधन्वना।
प्रत्युद्ययुश्च तांस्ते तु समन्ताद्विगतव्यथाः ॥ ५५ ॥
मद्रराजं महेष्वासं परिवार्य समन्ततः।
स्थिता राजन्महा सेना योद्धुकामा समन्ततः ॥ ५६ ॥
सात्यकिर्भीमसेनश्च माद्रीपुत्रौ च पांडवौ।
युधिष्ठिरं पुरस्कृत्य ह्रीनिषेवमरिन्दमम् ॥ ५७ ॥

ओर चलाया, उस बाणसे सुषेणका शिर कटकर गिर पडा। नकुलके इस अद्भुत पराक्रमको देखकर हम सब लोग आश्चर्य करने लगे। जैसे नदीके वेगसे टूटकर वृक्ष गिर पडता है। ऐसे ही नकुलके बाणोंसे कटकर सुषेण पृथ्वी में गिरे॥ (४९—५१)

हे भरतकुलश्रेष्ठ! नकुलके इस पराक्रमको देखकर और कर्णके बेटोंको माराहुआ जानकर, तुम्हारी सेना चारों ओरको भागने लगी, हे महाराज! अपनी सेनाको भागते देख सेनापति शल्यने स्थिर किया, अपनी सेनाको स्थिर करके प्रतापी शल्य बेडर होकर सिंहके समान गर्जने और धनुषको टङ्कारने लगे, शल्यको खडा देख तुम्हारी सब सेना प्रसन्न होकर युद्धको लौटी। (५२—५५)

हे महाराज! तुम्हारे सब प्रधान योद्धा महारथ शल्यकी रक्षा करने लगे। और युद्धको उपस्थित हुए। इसी प्रकार सात्यकि, भीमसेन, नकुल और सहदेव

परिवार्य रणे वीराः सिंहनादं प्रचक्रिरे।
बाणशंखरवांस्तीव्रान् क्ष्वेडाश्च विविधा दधुः ॥ ५८ ॥
तथैव तावकाः सर्वे मद्राधिपतिमंजसा।
परिवार्य सुसंरब्धाः पुनर्युद्धमरोचयन् ॥ ५९ ॥
ततः प्रववृते युद्धं भीरूणां भयवर्धनम्।
तावकानां परेषां च मृत्युं कृत्वा निवर्तनम् ॥ ६० ॥
यथा देवासुरं युद्धं पूर्वमासीद्विशाम्पते।
अभीतानां तथा राजन् यमराष्ट्रविवर्धनम् ॥ ६१ ॥
ततः कपिध्वजो राजन्हत्वा संशप्तकान्रणे।
अभ्यद्रवत तां सेनां कौरवीं पाण्डुनन्दनः ॥ ६२ ॥
तथैव पाण्डवाः सर्वे धृष्टद्युम्नपुरोगमाः।
अभ्यधावन्त तां सेनां विसृजन्तः शितान् शरान् ॥६३॥
पाण्डवैरवकीर्णानां संमोहः समजायत।
न च जज्ञुरनीकानि दिशो वा विदिशस्तथा ॥६४॥
आपूर्यमाणा निशितैः शरैः पाण्डवचोदितैः।
हतप्रवीरा विध्वस्ता वार्यमाणा समन्ततः ॥ ६५ ॥
कौरव्य वध्यत चमूः पाण्डुपुत्रैर्महारथैः।

युधिष्ठिरकी रक्षा करने लगे। और युद्धको उपस्थित होगये। पाण्डवों के सब वीर युधिष्ठिरको घेर कर कूदने और शङ्ख बजाने लगे, इसी प्रकार तुम्हारे सब प्रधान वीर शल्यको घेर कर युद्ध करने लगे। हे महाराज! तब तुम्हारे और पाण्डवोंके वीरोंका घोर युद्ध होने लगा, सबने मृत्युको अवश्य होनेवाली समझ लिया। इस युद्धको देख कायर भागने लगे। जैसे पहले देवता और राक्षसोंका युद्ध हुआ था, ऐसे ही यह भी हुआ। (५६-६१)

उसी समय संशप्तक सेनाका नाश करके अर्जुन भी उसी सेनाकी ओर लौटे। तभी धृष्टद्युम्न और शिखण्डी आदि पाण्डवोंके प्रधान वीर भी अपने अपने कामोंको समाप्त करके उस ही सेनाकी ओर लौटे और घोर बाण वर्षाने लगे, पाण्डवोंके प्रधान वीरोंको आते देख तुम्हारी सब सेना घबडा उठी, किसीको दिशाओंका भी ज्ञान न रहा, पाण्डवों के वीरोंने अपने बाणोंसे तुम्हारी सेना के व्यूहको तोड डाला। और वीरोंको व्याकुल कर दिया। (६१—६५)

तथैव पाण्डवं सैन्यं शरै राजन्समन्ततः ॥ ६६ ॥
रणेऽहन्यत पुत्रैस्ते शतशोऽथ सहस्रशः ।
ते सेने भृश संतप्ते वध्यमाने परस्परम् ॥ ६७ ॥
व्याकुले समपद्येतां वर्षासु सरिताविव ।
आविवेश ततस्तीव्रं तावकानां महद्भयम् ।
पाण्डवानां च राजेन्द्र तथा भूते महाहवे ॥ ६८ ॥ [६२५]

इति श्रीमहाभारते० शल्यपर्वणि संकुलयुद्धे दशमोऽध्यायः ॥ १० ॥

संजय उवाच— तस्मिन्विलुलिते सैन्ये वध्यमाने परस्परम् ।
द्रवमाणेषु योधेषु विद्रवत्सु च दन्तिषु ॥ १ ॥
कूजतां स्तनतां चैव पदातीनां महाहवे ।
निहतेषु महाराज हयेषु बहुधा तदा ॥ २ ॥
प्रक्षये दारुणे घोरे संहारे सर्वदेहिनाम् ।
नानाशस्त्रसमावाये व्यतिषक्तरथद्विपे ॥ ३ ॥
हर्षणे युद्धशौण्डानां भीरूणां भयवर्धने ।
गाहमानेषु योधेषु परस्परवधैषिषु ॥ ४ ॥
प्राणादाने महाघोरे वर्त्तमाने दुरोदरे ।

जिस प्रकार उन वीरोंने तुम्हारी सेनाको व्याकुल किया, ऐसे ही इधरके वीरोंने भी पाण्डवोंकी सेनाको व्याकुल कर दिया; तुम्हारे पुत्रोंने सहस्रों पाण्डवोंके वीरोंको मार डाला, तब दोनों सेना व्याकुल होगई जैसे वर्षा ऋतुमें नदी अपनी मर्यादा छोड कर बहने लगती है वैसे ही ये दोनों सेना टुकडे टुकडे होकर युद्ध करने लगीं। ऐसा होनेसे तुम्हारी ओरके प्रधान वीर और उधर पाण्डवों के भी सब वीर डरने और घबडाने लगे ॥ (६५-६८) [६२५]

शल्यपर्वमें दस अध्याय समाप्त।

शल्यपर्वमें ग्यारह अध्याय।

सञ्जय बोले, हे राजन् धृतराष्ट्र ! ऐसा घोर युद्ध होनेसे किसीको व्यूहका ध्यान न रहा इसलिये हाथी, घोडे और पदाति इधर उधरको भागने लगे, कहीं पडे हुए मनुष्य और पैदलोंके कण्ठसे आह आह का शब्द निकलने लगा, कहीं अनेक प्रकार के शस्त्र चलने लगे। (१—३)

कहीं सहस्रों मनुष्य गिरकर मरने लगे। कहीं रथ और हाथी कटने लगे। ऐसा देखकर वीर प्रसन्न होने लगे। और कायर डरके मारे कांपने लगे, एक वीर

संग्रामे घोररूपे तु यमराष्ट्रविवर्द्धने ॥ ५ ॥
पाण्डवास्तावकं सैन्यं व्यधमन्निशितैः शरैः ।
तथैव तावका योधा जघ्नुः पाण्डवसैनिकान् ॥ ६ ॥
तस्मिंस्तथा वर्त्तमाने युद्धे भीरुभयावहे ।
पूर्वाह्णे चापि सम्प्राप्ते भास्करोदयनं प्रति ॥ ७ ॥
लब्धलक्षाः परे राजन् रक्षितास्तु महात्मना ।
अयोधयंस्तव बलं मृत्युं कृत्वा निवर्त्तनम् ॥ ८ ॥
बलिभिः पाण्डवैर्दृप्तैर्लब्धलक्षैः प्रहारिभिः ।
कौरव्य सीदत्पृतना मृगीवाग्निसमाकुला ॥ ९ ॥
तां दृष्ट्वा सीदतीं सेनां पङ्के गामिव दुर्बलाम् ।
उज्जिहीर्षुस्तदा शल्यः प्रायात्पाण्डुसुतान्प्रति ॥ १० ॥
मद्रराजः सुसंक्रुद्धो गृहीत्वा धनुरुत्तमम् ।
अभ्यद्रवत संग्रामे पाण्डवानाततायिनः ॥ ११ ॥
पाण्डवा अपि भूपाल समरे जितकाशिनः ।
मद्रराजं समासाद्य विभिदुर्निशितैः शरैः ॥ १२ ॥
ततः शरशतैस्तीक्ष्णैर्मद्रराजो महारथः ।
अर्दयामास तां सेनां धर्मराजस्य पश्यतः ॥ १३ ॥

दूसरेके मारनेको घात देखने लगा, वीरोंके जीव शरीरोंको छोडकर यमपुरीको जाने लगे। तब पाण्डवोंके प्रधान वीर तुम्हारी और तुम्हारे वीर पाण्डवोंकी सेनाका नाश करने लगे। इस प्रकार युद्ध होते होते दिनका पहला पहर समाप्त हुआ। (१-७)

हे राजन्! दूसरे पहरमें महात्मा युधिष्ठिरसे रक्षित होकर पाण्डवोंकी सेना तुम्हारी सेनाको मारने लगी, जैसे वनमें आग लगनेसे हरिण घबडाते हैं ऐसे ही चारों ओरसे प्रतापी पाण्डवोंके बाण वर्षनेसे तुम्हारी सेना घबडाने लगी। जैसे कीचडमें फंसी हुई गौकी रक्षा करनेको कोई मनुष्य दौडता है ऐसे ही अपनी सेनाको बचानेको शल्य पाण्डवोंकी ओर दौडे। मद्रराज शल्य क्रोध करके घोर धनुष लेकर बाण वर्षाते हुए सब पाण्डवोंकी ओर एकेले ही दौडे। (७—११)

पाण्डव भी अपने बाणोंसे शल्यको मारने लगे। तब महारथ शल्यने अपने सहस्रों बाणोंसे युधिष्ठिरके देखते देखते इनकी सेनाको व्याकुल कर दिया, उस

प्रादुरासन्निमित्तानि नानारूपाण्यनेकशः ।
चचाल शब्दं कुर्वाणा मही चापि सपर्वता ॥ १४ ॥
सदण्डशूला दीप्ताग्रा दीर्यमाणाः समन्ततः ।
उल्का भूमिं दिवः पेतुराहत्य रविमण्डलम् ॥ १५ ॥
मृगाश्च महिषाश्चापि पक्षिणश्च विशाम्पते ।
अपसव्यं तदा चक्रुः सेनां ते बहुशो नृप ॥ १६ ॥
भृगुसूनुधरापुत्रौ शशिजेनसमन्वितौ ।
चरमं पाण्डुपुत्राणां पुरस्तात्सर्वभूभुजाम् ॥ १७ ॥
शस्त्राग्रेष्वभवज्ज्वाला नेत्राण्याहत्य वर्षती ।
शिरःस्वलीयन्त भृशं काकोलूकाश्च केतुषु ॥ १८ ॥
ततस्तद्युद्धमत्युग्रमभवत्सहचारिणाम् ।
तथा सर्वाण्यनीकानि सन्निपत्य जनाधिप ॥ १९ ॥
अभ्ययुः कौरवा राजन्पाण्डवानामनीकिनीम् ।
शल्यस्तु शरवर्षेण वर्षन्निव सहस्रदृक् ॥ २० ॥
अभ्यवर्षत धर्मात्मा कुन्तीपुत्रं युधिष्ठिरम् ।
भीमसेनं शरैश्चापि रुक्मपुङ्खैः शिलाशितैः ॥ २१ ॥
द्रौपदेयांस्तथा सर्वान्माद्रीपुत्रौ च पाण्डवौ ।
धृष्टद्युम्नं च शैनेयं शिखण्डिनमथापि च ॥ २२ ॥

समय अनेक बुरे शकुन होने लगे, पर्वत और वनों के सहित पृथ्वी हिलने लगी, सूर्यके मण्डलसे विना मेघोंके भाले और दण्डके समान बिजली गिरी। अनेक हरिण और भैंसे तुम्हारी सेनाके दहिनी ओरसे बाईं ओरको जाने लगे, उल्लू आदि पक्षी बोलने लगे, उसी समय सब राजोंके देखते देखते पाण्डवोंकी सेनाकी ओर शुक्र, मङ्गल, बुध उदय हुए। तुम्हारी सेनामें शस्त्रोंसे अग्नि निकलने लगी। कौवे और उल्लू ध्वजा और शिरोंपर बैठने लगे।(१२-१८)

हे पृथ्वीनाथ! तब दोनों ओरके सेनापतियोंने अपनी अपनी सेनाओंको ठीक करके घोर युद्ध करनेकी आज्ञा दी और भयानक युद्ध होने लगा, जैसे इन्द्र अपने बाणोंसे दानवोंको व्याकुल कर देते हैं। ऐसे ही शल्यने भी पाण्डवोंकी सेनाको व्याकुल कर दिया। फिर धर्मात्मा युधिष्ठिर, भीमसेन, नकुल, सहदेव, सात्यकि, द्रौपदीके पाँचौ पुत्र, धृष्टद्युम्न और शिखण्डीके शरीरमें एक एक बाण

एकैकं दशभिर्बाणैर्विव्याध स महाबलः।
ततोऽसृजद्बाणवर्षं घर्मान्ते मघवानिव ॥ २३ ॥
ततः प्रभद्रका राजन्सोमकाश्च सहस्रशः।
पतिताः पात्यमानाश्च दृश्यन्ते शल्यसायकैः ॥ २४ ॥
भ्रमराणामिव व्राताः शलभानामिव व्रजाः।
ह्रादिन्य इव मेघेभ्यः शल्यस्य न्यपतन् शराः॥ २५॥
द्विरदास्तुरगाश्चार्त्ताः पत्तयो रथिनस्तथा।
शल्यस्य बाणैरपतन्बभ्रमुर्व्यनदंस्तदा ॥ २६ ॥
आविष्ट इव मद्रेशो मन्युना पौरुषेण च।
प्राच्छादयदरीन्संख्ये कालसृष्ट इवान्तकः ॥ २७ ॥
विनर्दमानो मद्रेशो मेघह्रादो महाबलः।
सा वध्यमाना शल्येन पाण्डवानामनीकिनी ॥ २८ ॥
अजातशत्रुं कौन्तेयमभ्यधावद्युधिष्ठिरम्।
तां सम्मर्द्यततः संख्ये लघुहस्तः शितैः शरैः ॥ २९ ॥
बाणवर्षेण महता युधिष्ठिरमताडयत्।
तमापतन्तं पत्त्यश्वैः क्रुद्धो राजा युधिष्ठिरः ॥ ३० ॥
अवारयच्छरैस्तीक्ष्णैर्महाद्विपमिवांकुशैः।

मार कर इस प्रकार बाण वर्षाये जैसे मेघ जल वर्षाते हैं। (१९—२३)

उस समय शल्यके बाणोंसे सहस्रों सोमक और प्रभद्रक वंशी क्षत्री गिरते और गिरे हुए दीखते थे, जैसे टीडीदल झुंड भौंरोंके और मेघसे जलकी धारा छूटती हैं ऐसे ही शल्यके बाण चारों ओर दिखाई देने लगे, उनसे हाथी, घोडे और रथोंपर चढे वीर कांपने, घूमने और गिरने लगे, जैसे प्रलय कालमें यमराज अपना बल दिखाते हैं। ऐसे शल्य भी घोर कर्म करके अपना बल दिखाने लगे, और शत्रुओंको बाणोंसे मारने लगे। जैसे वर्षाऋतुमें मेघ गर्जकर जल बरसाता है ऐसेही मद्रराज शल्य भी गर्जते हुए बाण वर्षाने लगे॥ (२४—२८)

उनके बाणोंसे सेनाको व्याकुल होकर पाण्डवोंकी सेना महाराज युधिष्ठिरकी शरण गई। तब शीघ्र बाण चलानेवाले राजा शल्य युधिष्ठिरकी ओर अनेक बाण चलाने लगे। उनको अपनी ओर आते देख राजा युधिष्ठिरको महा क्रोध हुआ और तेज बाणोंसे उनके शरीरमें

तस्य शल्यः शरं घोरं मुमोचाशीविषोपमम् ॥ ३१ ॥
स निर्भिद्य महात्मानं वेगेनाभ्यपतच्च गाम् ।
ततो वृकोदरः क्रुद्धः शल्यं विव्याध सप्तभिः ॥ ३२ ॥
पञ्चभिः सहदेवस्तु नकुलो दशभिः शरैः ।
द्रौपदेयाश्च शत्रुघ्नं शूरमार्तायनिं शरैः ॥ ३३ ॥
अभ्यवर्षन्महाराज मेघा इव महीधरम् ।
ततो दृष्ट्वा वार्यमाणं शल्यं पार्थैः समन्ततः ॥ ३४ ॥
कृतवर्मा कृपश्चैव संक्रुद्धावभ्यधावताम् ।
उलूकश्च महावीर्यः शकुनिश्चापि सौबलः ॥ ३५ ॥
समागम्याथ शनकैरश्वत्थामा महाबलः ।
तव पुत्राश्च कार्त्स्न्येन जुगुपुः शल्यमाहवे ॥ ३६ ॥
भीमसेनं त्रिभिर्विद्ध्वा कृतवर्मा शिलीमुखैः ।
बाणवर्षेण महता क्रुद्धरूपमवारयत् ॥ ३७ ॥
धृष्टद्युम्नं ततः क्रुद्धो बाणवर्षैरपीडयत् ।
द्रौपदेयांश्च शकुनिर्यमौ च द्रौणिरभ्ययात् ॥ ३८ ॥
दुर्योधनो युधां श्रेष्ठ आहवे केशवार्जुनौ ।
समभ्ययादुग्रतेजाः शरैश्चाप्यहनद्बली ॥ ३९ ॥

अनेक बाण मारे । जैसे अंकुश लगनेसे हाथीको क्रोध होता है ऐसे ही युधिष्ठिरके बाण लगनेसे शल्यको क्रोध हुआ अनन्तर एक तेज बाण युधिष्ठिरके शरीरमें मारा, वह महात्मा युधिष्ठिरके शरीर में लगकर पृथ्वीमें घुस गया, तब भीमसेनने क्रोध करके शल्यके सात बाण मारे । (२८—३२)

सहदेवने पांच, नकुलने दश और द्रौपदीके पुत्रोंने अनेक बाण शल्यके ऊपर इस प्रकार वर्षाये जैसे मेघ पर्वत पर जल । तब शल्यको चारों ओरसे पाण्डवोंसे घिरा देख कृतवर्मा, कृपाचार्य, महावीर उलूक, सुबलपुत्र शकुनि, महावीर अश्वत्थामा और तुम्हारे सब पुत्र दौडकर शल्यकी रक्षा करके भीमसेनके शरीरमें तीन बाण मारकर अनेक बाण वर्षाये, शकुनिने क्रोध कर के धृष्टद्युम्न और द्रौपदीके पुत्रोंके ऊपर अनेक बाण चलाये और नकुल सहदेवसे अश्वत्थामा युद्ध करने को दौडे । इसी प्रकार महापराक्रमी वीर दुर्योधन कृष्ण और अर्जुनसे युद्ध करने और अनेक बाण वर्षाने लगे ॥ (३३—३९)

एवं द्वन्द्वशतान्यासंस्त्वदीयानां परैः सह ।
घोररूपाणि चित्राणि तत्र तत्र विशाम्पते ॥ ४० ॥
ऋक्षवर्णाञ्जघानाश्वान्भोजो भीमस्य संयुगे ।
सोऽवतीर्य रथोपस्थाद्धताश्वात्पाण्डुनन्दनः ॥ ४१ ॥
कालो दण्डमिवोद्यम्य गदापाणिरयुध्यत ।
प्रमुखे सहदेवस्य जघानाश्वान्स मद्रराट् ॥ ४२ ॥
ततः शल्यस्य तनयं सहदेवोऽसिनाऽवधीत् ।
गौतमः पुनराचार्यो धृष्टद्युम्नमयोधयत् ॥ ४३ ॥
असम्भ्रान्तमसंभ्रान्तो यत्नवान्यत्नवत्तरम् ।
द्रौपदेयांस्तथा वीरानेकैकं दशभिः शरैः ॥ ४४ ॥
अविध्यदाचार्यसुतो नातिक्रुद्धो हसन्निव ।
पुनश्च भीमसेनस्य जघानाश्वांस्तथाऽऽहवे ॥ ४५ ॥
सोऽवतीर्य रथात्तूर्णं हताश्वः पाण्डुनन्दनः ।
कालो दण्डमिवोद्यम्य गदां क्रुद्धो महाबलः ॥ ४६ ॥
पोथयामास तुरगान्रथञ्च कृतवर्मणः ।
कृतवर्मा त्ववप्लुत्य रथात्तस्मादपाक्रमत् ॥ ४७ ॥
शल्योऽपि राजन्संक्रुद्धो निघ्नन्सोमकपाण्डवान् ।
पुनरेव शितैर्बाणैर्युधिष्ठिरमपीडयत् ॥ ४८ ॥

हे पृथ्वीनाथ ! इस प्रकार दोनों ओरके दो दो वीर मिलकर घोर और विचित्र युद्ध करने लगे। कृतवर्माने अपने बाणोंसे भीमसेनके चारों घोडोंको मारडाला, फिर भीमसेन गदा लेकर रथसे कूदे और दण्डधारी यमराजके समान घोर युद्ध करने लगे। उतने ही समयमें शल्यने सहदेवके घोडे मारडाले। सहदेव भी खड्ग लेकर रथसे नीचे उतरे और शल्यके बेटेका शिर काटडाला। इसी प्रकार सावधान और यत्न करते हुए धृष्टद्युम्नसे कृपाचार्य युद्ध करने लगे। हंसते हुए अश्वत्थामाने भी द्रौपदीके पांचों पुत्रोंको दस दस बाण मारे। भीमसेन गदा लेकर दण्डधारी यमराजके समान कृतवर्माकी ओर दौडे और घोडे तथा रथको चूर करडाला तब कृतवर्मा उस रथसे उतरकर भागे। (४०–४७)

शल्य भी अनेक पाञ्चालोंका नाश करके फिर युधिष्ठिरकी ओर बाण चलाने लगे। तब भीमसेनने युधिष्ठिरको व्याकुल

तस्य भीमो रणे क्रुद्धः सन्दश्य दशनच्छदम् ।
विनाशायाभिसन्धाय गदामादाय वीर्यवान् ॥ ४९ ॥
यमदण्डप्रतीकाशां कालरात्रिमिवोद्यताम् ।
गजवाजिमनुष्याणां देहान्तकरणीमपि ॥ ५० ॥
हेमपट्टपरिक्षिप्तामुल्कां प्रज्वलितामिव ।
शैक्यां व्यालीमिवात्युग्रां वज्रकल्पामयोमयीम् ॥५१॥
चन्दनागुरुपङ्काक्तां प्रमदामीप्सितामिव ।
वसामेदोपदिग्धाङ्गीं जिह्वां वैवस्वतीमिव ॥ ५२ ॥
पटुघण्टाशतरवां वासवीमशनीमिव ।
निर्मुक्ताशीविषाकारां पृक्तां गजमदैरपि ॥ ५३ ॥
त्रासनीं सर्वभूतानां स्वसैन्यपरिहर्षिणीम् ।
मनुष्यलोके विख्यातां गिरिशृङ्गविदारणीम् ॥ ५४ ॥
यया कैलासभवने महेश्वरसखंबली ।
आह्वयामास युद्धाय भीमसेनो महाबलः ॥ ५५ ॥
यया मायामयान्दृप्तान्सुबहून्धनदालये ।
जघान गुह्यकान्क्रुद्धो नदन्पार्थो महाबलः ॥ ५६ ॥
निवार्यमाणो बहुभिर्द्रौपद्याः प्रियमास्थितः ।
तां वज्रमणिरत्नौघकल्माषां वज्रगौरवाम् ॥ ५७ ॥

देखकर दांतोंसे ओठ चबाये और हम इसी समय शल्यको मारेंगे ऐसा विचार कर यमराजके दण्डके समान ऊंची, कालरात्रिके समान भयानक, हाथी, घोडे और मनुष्योंको मारनेवाली, सोने के तारोंसे मढी, जलती हुई मसालके समान चमकती, विष भरी नागिनके समान लहराती, इन्द्रके वज्रके समान भयावनी, चन्दन और अगर लगी, अपनी स्त्रीके समान भीमसेनकी प्यारी, चर्बी और मेदसे भरी, यमराजकी जिह्वाके समान घोर, सैकडों घण्टा लगी, इन्द्रके वज्रके समान सुन्दर, क्रोध भरे सांपके समान भयानक, हस्तिमदसे भरी, शत्रुओंको डरानेवाली, अपनी सेनाको अत्यन्त प्रसन्न करनेवाली, मनुष्य लोकमें प्रसिद्ध, पर्वतोंको तोडनेवाली, गदा लेकर दौडे। (४७-५४)

जिस गदाको लेकर बलवान भीमसेनने क्रोध करके कुवेरको युद्ध करनेको पुकारा था, जिसकी सहायतासे द्रौपदीकी प्रसन्नताके लिये कुवेरके स्था-

समुद्यम्य महाबाहुः शल्यमभ्यपतद्रणे।
गदया युद्धकुशलस्तया दारुणनादया ॥ ५८ ॥
पोथयामास शल्यस्य चतुरोऽश्वान्महाजवान्।
ततः शल्यो रणे क्रुद्धः पीने वक्षसि तोमरम् ॥ ५९ ॥
निचखान नदन्वीरो वर्म भित्वा च सोऽभ्ययात्।
वृकोदरस्त्वसम्भ्रान्तस्तमेवोद्धृत्य तोमरम् ॥ ६० ॥
यन्तारं मद्रराजस्य निर्बिभेद ततो हृदि।
स भिन्नवर्मा रुधिरं वमन्वित्रस्तमानसः ॥ ६१ ॥
पपाताभिमुखो दीनो मद्रराजस्त्वपाक्रमत्।
कृतप्रतिकृतं दृष्ट्वा शल्यो विस्मितमानसः ॥ ६२ ॥
गदामाश्रित्य धर्मात्मा प्रत्यमित्रमवैक्षत।
ततः सुमनसः पार्थो भीमसेनमपूजयन्।
ते दृष्ट्वा कर्मसंग्रामे घोरमक्लिष्टकर्मणः ॥ ६३ ॥ [६८८]

इति श्रीमहाभारते शतसाहस्त्र्यां संहितायां वैयासिक्यां शल्यपर्वणि भीमसेनशल्ययुद्धे एकादशोऽध्यायः ॥ ११ ॥

संजय उवाच— पतितं प्रेक्ष्य यन्तारं शल्यः सर्वायसीं गदाम्।
आदाय तरसा राजंस्तस्थौ गिरिरिवाचलः ॥ १ ॥

नमें अनेक मायावि गुह्यकोंको मारा था उसही मणिजटित वज्रके समान दृढ गदाको लेकर गर्जते हुए गदायुद्धको जाननेवाले भीमसेन शल्यकी ओर वेगसे दौडे और शल्यके चारों घोडोंको मार डाला तब वीर शल्य सिंहके समान गर्जने लगे। (५५—५९)

और क्रोध करके एक तोमर भीमसेनकी छाती में मारा, उस के लगनेसे भीमसेनकी छातीमें घाव हो गया परन्तु भीमसेन कुछ न घबडाये और उसही तोमरको छातीसे निकालकर शल्य के सारथीको मारा, उसके लगनेसे शल्यका सारथी मरकर गिर गया, भीमसेनका पराक्रम देख आश्चर्य करने लगे। तब धर्मात्मा शल्यभी गदा लेकर रथसे कूदे और भीमसेनकी ओर क्रोध करके देखने लगे। भीमसेनका अद्भुत कर्म देखकर पाण्डवोंकी सब सेना गर्जने और बाजे बजाने लगीं। (६०—६३)

शल्यपर्वमें ग्यारह अध्याय समाप्त। [६८८]

शल्यपर्वमें बारह अध्याय।

सञ्जय बोले हे राजन्! अपने सारथीको मरा देख मद्रराज शल्य लोहेकी

तं दीप्तमिव कालाग्निं पाशहस्तमिवान्तकम् ।
सश्रृंगमिव कैलासं सवज्रमिव वासवम् ॥ २ ॥
सशूलमिव हर्यक्षं वने मत्तमिव द्विपम् ।
जवेनाभ्यपतद्भीमः प्रगृह्य महतीं गदाम् ॥ ३ ॥
ततः शंखप्रणादश्च तूर्याणां च सहस्रशः ।
सिंहनादश्च संजज्ञे शूराणां हर्षवर्धनः ॥ ४ ॥
प्रेक्षन्तः सर्वतस्तौ हि योधा योधमहाद्विषौ ।
तावकाश्चापरे चैव साधु साध्वित्यपूजयन् ॥ ५ ॥
न हि मद्राधिपादन्यो रामाद्वा यदुनन्दनात् ।
सोढुमुत्सहते वेगं भीमसेनस्य संयुगे ॥ ६ ॥
तथा मद्राधिपस्यापि गदावेगं महात्मनः ।
सोढुमुत्सहते नान्यो योधो युधि वृकोदरात् ॥ ७ ॥
तौ वृषाविव नर्दन्तौ मण्डलानि विचेरतुः ।
आवर्तितौ गदाहस्तौ मद्रराजवृकोदरौ ॥ ८ ॥
मण्डलावर्त्तमार्गेषु गदाविहरणेषु च ।
निर्विशेषमभूद्युद्धं तयोः पुरुषसिंहयोः ॥ ९ ॥
तप्तहेममयैः शुभ्रैर्बभूव भयवर्धिनी ।
अग्निज्वालैरिवावद्धा पट्टैः शल्यस्य सा गदा ॥ १० ॥

गदा लेकर पर्वतके समान खडे होगये। उनको जलती हुई अग्नि, फांसी लिये काल, शिखरधारी कैलास पर्वत, वज्रधारी इन्द्र और शूलधारी शिवके समान खडा देख भीमसेन गदा लेकर इस प्रकार दौडे, जैसे वनमें सिंह हाथी की ओर दौडता है। तब दोनों ओरसे प्रसन्न करनेके लिये शङ्ख और अनेक बाजे बजने लगे तथा दोनों ओरके वीर गर्जने लगे। (१-४)

दोनोंका गदायुद्ध देखकर दोनों ओरके वीर प्रशंसा करने लगे और युद्ध देखने लगे। तब कहने लगे कि भीमसेनकी गदाको यदुकुल श्रेष्ठ बलराम और शल्यके सिवाय कोई नहीं सह सक्ता। इसी प्रकार भीमसेनके सिवाय शल्यकी गदाको भी कोई नहीं सह सक्ता। वे दोनों मतवाले बैलके समान गर्जने और अनेक गतियोंसे लडने लगे, गदाको चलाने और चलनेमें भीमसेन और शल्य समान ही दीखते थे, उस समय तपे हुए सोनेसे मढी हुई शल्यकी गदा

तथैव चरतो मार्गान्मण्डलेषु महात्मनः।
विद्युदभ्रप्रतीकाशा भीमस्य शुशुभे गदा ॥ ११ ॥
ताडिता मद्रराजेन भीमस्य गदया गदा।
दह्यमानेव खे राजन्साऽसृजत्पावकार्चिषः ॥ १२ ॥
तथा भीमेन शल्यस्य ताडिता गदया गदा।
अंगारवर्षं मुमुचे तदद्भुतमिवाभवत ॥ १३ ॥
दन्तैरिव महानागौ श्रृंगैरिव महर्षभौ।
तोत्रैरिव तदान्योन्यं गदाग्राभ्यां निजघ्नतुः ॥ १४ ॥
तौ गदाभिहतैर्गात्रैः क्षणेन रुधिरोक्षितौ।
प्रेक्षणीयतरावास्तां पुष्पिताविव किंशुकौ ॥ १५ ॥
गदया मद्रराजस्य सव्यदक्षिणमाहतः।
भीमसेनो महाबाहुर्न चचालाचलो यथा ॥ १६ ॥
तथा भीमगदावेगैस्ताड्यमानो मुहुर्मुहुः।
शल्यो न विव्यथे राजन्दन्तिनेव महागिरिः ॥ १७ ॥
शुश्रुवे दिक्षु सर्वासु तयोः पुरुषसिंहयोः।
गदानिपातसंह्रादो वज्रयोरिव निःस्वनः ॥ १८ ॥
निवृत्य तु महावीर्यौ समुच्छ्रितमहागदौ।
पुनरन्तरमार्गस्थौ मण्डलानि विचेरतुः ॥ १९ ॥

जलती मसालके समान दीखने लगी ॥ (९-१०)

इसी प्रकार अनेक गतियोंसे घूमते हुए महात्मा भीमसेनकी गदाभी बिजलीके समान चमकने लगी, भीमसेन और शल्यकी गदा लगनेसे दोनोंमेंसे अग्निके पतङ्ग गिरने लगे। जैसे दांतोंसे दो मतवारे हाथी, और सींगोंसे दो बैल लडते हैं। ऐसे ही भीमसेन और शल्य गदायुद्ध करने लगे। थोडे समयमें दोनों रुधिरसे भीग गये और फूले हुए टेसूके समान सुन्दर दीखने लगे। शल्यकी अनेक गदा लगनेपर भी भीमसेन पर्वतके समान इधर उधरको न हटे। इसी प्रकार भीमसेनकी अनेक गदा लगनेपर शल्य भी न घबडाये, भीमसेनकी गदा शल्यके शरीरमें ऐसी लगती थी जैसे पहाडमें हाथीके दांत ॥ (११-१७)

जैसे बिजली गिरनेका शब्द होता है। ऐसे ही उन दोनोंकी गदाका शब्द चारों ओर सुनायी देने लगा, कभी दोनों पीछेको हटकर और पैतरे बदल

अथाभ्येत्य पदान्यष्टौ सन्निपातोऽभवत्तयोः।
उद्यम्य लोहदंडाभ्यामतिमानुषकर्मणोः ॥ २० ॥
पोथयन्तौ तदान्योन्यं मण्डलानि विचेरतुः।
क्रियाविशेषं कृतिनौ दर्शयामासतुस्तदा ॥ २१ ॥
अथोद्यम्य गदे घोरे सशृंगाविव पर्वतौ।
तावाजघ्नतुरन्योन्यं मण्डलानि विचेरतुः ॥ २२ ॥
क्रियाविशेषकृतिनौ रणभूमितलेऽचलौ।
तौ परस्परसंरंभाद्गदाभ्यां सुभृशाहतौ ॥ २३ ॥
युगपत्पेततुर्वीरावुभाविन्द्रध्वजाविव।
उभयोः सेनयोर्वीरास्तदा हा हा कृतोऽभवन् ॥ २४ ॥
भृशं मर्माण्यभिहतावुभावास्तां सुविह्वलौ।
ततः स्वरथमारोप्य मद्राणामृषभं रणे ॥ २५ ॥
अपोवाह कृपः शल्यं तूर्णमायोधनादथ।
क्षीबवद्विह्वलत्वात्तु निमेषात्पुनरुत्थितः ॥ २६ ॥
भीमसेनो गदापाणिः समाह्वयत मद्रपम्।
ततस्तु तावकाः शूरा नानाशस्त्रसमायुताः ॥ २७ ॥

कर फिर भिड जाते थे, कभी आठ पैर आगे बढकर लोहेकी गदासे एक दूसरेको मारता था। इन दोनोंका यह कर्म मनुष्योंकी शक्तिसे अधिक था, दोनों एक दूसरेका शिर फोडनेका विचार कर रहे थे, दोनों अपनी अपनी घात देखते थे किसी विद्या और बलमें कुछ भेद जान नहीं पडता था। (१८-२१)

कभी गदा उठाकर शिखर सहित पर्वतके समान दौडते थे, और एक दूसरेको मारते थे, कभी गोडी टेककर पर्वतके समान स्थिर होजाते थे, कभी एक दूसरेको बलसे गदा मारता था, एक समय भीमसेनकी गदा शल्यके शिरपर और शल्यकी भीमसेनके शिर जा लगी। तब दोनों एक ही बार मूर्च्छित होकर गिर गये, इन दोनोंको इन्द्रकी पताकाके समान गिरा देख दोनों ओर हाहाकार होने लगा। (२२-२४)

दोनोंके मर्मस्थान गदाओंसे टूट गये, और पीडासे व्याकुल होगये, तब कृपाचार्यने शल्यको उठाकर अपने रथमें डाल दिया, और युद्धसे हटा दिया। उतने ही समयमें भीमसेन चैतन्य हुए और फिर गदा लेकर खडे होगये और शल्यको पुकारने लगे, तब इस शब्दको

नानावादित्रशब्देन पाण्डुसेनामयोधयन्।
भुजावुच्छ्रित्य शस्त्रं च शब्देन महता ततः ॥ २८ ॥
अभ्यद्रवन्महाराज दुर्योधनपुरोगमाः।
तदनीकमभिप्रेक्ष्य ततस्ते पाण्डुनन्दनाः ॥ २९ ॥
प्रययुः सिंहनादेन दुर्योधनपुरोगमान्।
तेषामापततां तूर्णं पुत्रस्ते भरतर्षभ ॥ ३० ॥
प्रासेन चेकितानं वै विव्याध हृदये भृशम्।
स पपात रथोपस्थे तव पुत्रेण ताडितः ॥ ३१ ॥
रुधिरौघपरिक्लिन्नः प्रविश्य विपुलं तमः।
चेकितानं हतं दृष्ट्वा पाण्डवेया महारथाः ॥ ३२ ॥
असक्तमभ्यवर्षन्त शरवर्षाणि भागशः।
तावकानामनीकेषु पाण्डवा जितकाशिनः ॥ ३३ ॥
व्यचरन्त महाराज प्रेक्षणीयाः समन्ततः।
कृपश्च कृतवर्मा च सौबलश्च महारथः ॥ ३४ ॥
अयोधयन्धर्मराजं मद्रराजपुरस्कृताः।
भारद्वाजस्य हन्तारं भूरिवीर्यपराक्रमम् ॥ ३५ ॥
दुर्योधनो महाराज धृष्टद्युम्नमयोधयत्।
त्रिसाहस्रास्तथा राजंस्तव पुत्रेण चोदिताः ॥ ३६ ॥
अयोधयन्त विजयं द्रोणपुत्रपुरस्कृताः।

शल्य न सुनें, इसलिये तुम्हारी सेनामें अनेक बाजे बजने लगे, और वीर गर्जने लगे। तब फिर घोर युद्ध होने लगा, तब दुर्योधन आदि वीर पाण्डवोंसे युद्ध करनेको चले। उस सेनाको आते देख पाण्डव भी सिंह के समान गर्जते हुए दौडे। तब दुर्योधनने चेकितानकी छातीमें एक प्रास मारा, उसके लगनेसे वे रथमें गिर पडे, तब चेकितानको मरा देख पाण्डवों की ओर के सब महारथ तुम्हारी सेनापर बाण वर्षाने लगे॥ (२५—३३)

इधरसे भी कृपाचार्य, कृतवर्मा सुबलपुत्र शकुनि आदि वीर शल्यको आगे, करके फिर युधिष्ठिरसे युद्ध करने लगे। राजा दुर्योधन महापराक्रमी द्रोणाचार्यके मारनेवाले, धृष्टद्युम्नसे युद्ध करनेको चले, इसी प्रकार तीन सहस्र वीरोंको सङ्ग लेकर प्राणोंकी आशा छोडकर अपनी विजयके लिये अश्वत्थामा अर्जु-

विजये धृतसंकल्पाः समरे त्यक्तजीविताः ॥ ३७ ॥
प्राविशंस्तावका राजन्हंसा इव महत्सरः ।
ततो युद्धमभूद्धोरं परस्परवधैषिणाम् ॥ ३८ ॥
अन्योन्यवधसंयुक्तमन्योन्यप्रीतिवर्धनम् ।
तस्मिन्प्रवृत्ते संग्रामे राजन्वीरवरक्षये ॥ ३९ ॥
अनिलेनेरितं घोरमुत्तस्थौ पार्थिवं रजः ।
श्रवणान्नामधेयानां पाण्डवानां च कीर्तनात् ॥ ४० ॥
परस्परं विजानीमो यद्युद्धयन्नभीतवत् ।
तद्रजः पुरुषव्याघ्र शोणितेन प्रशामितम् ॥ ४१ ॥
दिशश्च विमला जातास्तस्मिंस्तमसि नाशिते ।
तथा प्रवृत्ते संग्रामे घोररूपे भयानके ॥ ४२ ॥
तावकानां परेषां च नासीत्कश्चित्पराङ्मुखः ।
ब्रह्मलोकपरा भूत्वा प्रार्थयन्तो जयं युधि ॥ ४३ ॥
सुयुद्धेन पराक्रान्ता नराः स्वर्गमभीप्सवः ।
भर्तृपिण्डविमोक्षार्थं भर्तृकार्यविनिश्चिताः ॥ ४४ ॥
स्वर्गसंसक्तमनसो योधा युयुधिरे तदा ।
नानारूपाणि शस्त्राणि विसृजन्तो महारथाः ॥ ४५ ॥
अन्योन्यमभिगर्जन्तः प्रहरन्तः परस्परम् ।

नसे युद्ध करने लगे । तुम्हारे वीर इस प्रकार पाण्डवोंकी सेनामें घुसे जैसे तालावमें हंस, तब दोनों ओरसे घोर युद्ध होने लगा । (३४-३८)

हे राजन् ! दोनों ओरके वीर अपने अपने शत्रुओंको मारने लगे, और प्रसन्न होकर युद्ध करने लगे ॥ (३९)

हे महाराज ! पहले एक बार बडी धूल उठी उससे किसीको कुछ नहीं दीखने लगा । उस समय केवल युधिष्ठिर और दुर्योधनका नाम लेनेसे ही शत्रु और मित्रोंका ज्ञान होता था, परन्तु फिर रुधिर बहनेसे धूल पृथ्वीमें जम गई और सब जगह प्रकाश होगया । उस समय दोनों ओरसे कोई वीर नहीं भगा, और सबने स्वर्ग या विजयकी निश्चय कर ली थी, साधारण वीरोंने भी स्वामी के ऋण चुकानेका यही समय पाया और प्राणोंका मोह छोड घोर युद्ध करने लगे । सब वीर स्वर्ग जानेका निश्चय करके अनेक प्रकार के शस्त्र चलाने और युद्ध करने

हत विध्यत गृह्णीत प्रहरध्वं निकृंतत ॥ ४६ ॥
इति स्म वाचः श्रूयन्ते तव तेषां च वै बले।
ततः शल्यो महाराज धर्मपुत्रं युधिष्ठिरम् ॥ ४७ ॥
विव्याध निशितैर्बाणैर्हन्तुकामो महारथम्।
तस्य पार्थो महाराज नाराचान्वै चतुर्दश ॥ ४८ ॥
मर्माण्युद्दिश्य मर्मज्ञो निचखान हसन्निव।
आवार्य पाण्डवं बाणैर्हन्तुकामो महाबलः ॥ ४९ ॥
विव्याध समरे क्रुद्धो बहुभिः कंकपत्रिभिः।
अथ भूयो महाराज शरेणानतपर्वणा ॥ ५० ॥
युधिष्ठिरं समाजघ्ने सर्व सैन्यस्य पश्यतः।
धर्मराजोऽपि संक्रुद्धो मद्रराजं महायशाः ॥ ५१ ॥
विव्याध निशितैर्बाणैः कंकबर्हिणवाजितैः।
चन्द्रसेनं च सप्तत्या सूतं च नवभिः शरैः ॥ ५२ ॥
द्रुमसेनं चतुःषष्ट्या निजघान महारथः।
चक्ररक्षे हते शल्यः पाण्डवेन महात्मना ॥ ५३ ॥
निजघान ततो राजंश्चेदीन्वै पंचविंशतिम्।
सात्यकिं पंचविंशत्या भीमसेनं च पंचभिः ॥ ५४ ॥
माद्रीपुत्रौ शतेनाजौ विव्याध निशितैः शरैः।

लगे। (४०-४५)

चारों ओर वीरोंको काटते हुए वीरोंका यही शब्द सुनाई देने लगा, कि मारो, काटो, पकडो, और बांधो; तब राजा शल्यने धर्मराज युधिष्ठिरकी ओर उन्हें मारनेके लिये अनेक तेज बाण चलाये, तब महारथ युधिष्ठिरने चौदह तेज बाण शल्यके मर्मस्थानमें मारे। तब महापराक्रमी शल्यने उनके सब बाणोंको काटकर उनके शरीरमें अनेक बाण मारे, फिर एक तेज बाण महायशस्वी युधिष्ठिरके शरीरमें मारा, तब राजा युधिष्ठिरको महाक्रोध हुआ। और शल्य के शरीरमें सत्तर बाण मारे, इसी प्रकार द्रुमसेन को चौसठ बाणोंसे मारडाला। (४६—५२)

पहियेकी रक्षा करनेवाले, द्रुमसेनको मरा देख राजा शल्यने पचीस प्रधान क्षत्री चन्देलोंको मारडाला। फिर सात्यकिके शरीरमें पचीस, भीमसेन के पांच, नकुलके सौ और सहदेव के सौ तेज बाण मारे, इस प्रकार युद्धमें घूमते हुए

एवं विचरतस्तस्य संग्रामे राजसत्तम ॥ ५५ ॥
सम्प्रैषयच्छितान्पार्थः शरानाशीविषोपमान् ।
ध्वजाग्रं चास्य समरे कुन्तीपुत्रो युधिष्ठिरः ॥ ५६ ॥
प्रमुखे वर्तमानस्य भल्लेनापाहरद्रथात् ।
पाण्डुपुत्रेण वै तस्य केतुं छिन्नं महात्मना ॥ ५७ ॥
निपतन्तमपश्याम गिरिशृंगमिवाहतम् ।
ध्वजं निपातितं दृष्ट्वा पाण्डवं च व्यवस्थितम् ॥ ५८ ॥
संक्रुद्धो मद्रराजोऽभूच्छरवर्षं मुमोच ह ।
शल्यः सायकवर्षेण पर्जन्य इव वृष्टिमान् ॥ ५९ ॥
अभ्यवर्षदमेयात्मा क्षत्रियान् क्षत्रियर्षभः ।
सात्यकिं भीमसेनं च माद्रीपुत्रौ च पाण्डवौ ॥ ६० ॥
एकैकं पंचभिर्विध्वा युधिष्ठिरमपीडयत् ।
ततो बाणमयं जालं विततं पाण्डवोरसि ॥ ६१ ॥
अपश्याम महाराज मेघजालमिवोद्गतम् ।
तस्य शल्यो रणे क्रुद्धः शरैः सन्नतपर्वभिः ॥ ६२ ॥
दिशः सञ्छादयामास प्रदिशश्च महारथः ।
ततो युधिष्ठिरो राजा बाणजालेन पीडितः ।

शल्यके युधिष्ठिरने अनेक बाण मारे, फिर उनकी ध्वजाको काट दिया, महात्मा युधिष्ठिरके बाणोंसे कटकर शल्यकी ध्वजा इस प्रकार गिरी जैसे पर्वत का शिखर टूटकर गिर पडे । (५३—५८)

अपनी ध्वजाको कटा और युधिष्ठिर को युद्धके लिये, खडा देख शल्यने क्रोध करके इस प्रकार बाण वर्षाये जैसे वर्षाकाल में मेघ जल वरषाता है । (५८-५९)

क्षत्रीयश्रेष्ठ शल्यने केवल युधिष्ठिर-हीकी ओर बाण नहीं चलाये वरन सात्यकि, भीमसेन, नकुल, और सहदेव आदि सब क्षत्रियोंको व्याकुल कर दिया। शल्यने सबके शरीरमें एक एक बाण मारकर युधिष्ठिरकी ओर सहस्रों बाण चलाये, तब धर्मराजकी छातीमें बाणों-का जाल सा दिखाई देने लगा। उस समय युधिष्ठिरका रूप ऐसा दीखता था, जैसे मेघोंके बीचमें सूर्य, तब श-ल्यने सब ओरसे युधिष्ठिरके रथको बा-णोंसे छिपा दिया उस समय राजा युधिष्ठिर शल्यके बाणोंसे ऐसे व्याकुल होगये, जैसे वृत्रासुर के बाणों से

बभूवाद्भुतविक्रान्तो जम्भो वृत्रहणा यथा॥ ६३ ॥ [७५१]

इति श्रीमहाभारते० शल्यपर्वणि संकुलयुद्धे द्वादशोऽध्यायः ॥ १२ ॥

संजय उवाच— पीडिते धर्मराजे तु मद्रराजेन मारिष।
सात्यकिर्भीमसेनश्च माद्रीपुत्रौ च पाण्डवौ ॥ १ ॥
परिवार्य रथैः शल्यं पीडयामासुराहवे।
तमेकं बहुभिर्दृष्ट्वा पीड्यमानं महारथैः ॥ २ ॥
साधुवादो महाञ्जज्ञे सिद्धाश्चासन्प्रहर्षिताः।
आश्चर्यमित्यभाषन्त मुनयश्चापि सङ्गताः ॥ ३ ॥
भीमसेनो रणे शल्यं शल्यभूतं पराक्रमे।
एकेन विध्वा बाणेन पुनर्विव्याध सप्तभिः ॥ ४ ॥
सात्यकिश्च शतेनैनं धर्मपुत्रपरीप्सया।
मद्रेश्वरमवाकीर्य सिंहनादमथानदत् ॥ ५ ॥
नकुलः पञ्चभिश्चैनं सहदेवश्च पञ्चभिः।
विध्द्वा तं तु पुनस्तूर्णं ततो विव्याध सप्तभिः ॥ ६ ॥
स तु शूरो रणे यत्तः पीडितस्तैर्महारथैः।
विकृष्य कार्मुकं घोरं वेगघ्नं भारसाधनम् ॥ ७ ॥
सात्यकिं पञ्चविंशत्या शल्यो विव्याध मारिष।
भीमसेनं तु सप्तत्या नकुलं सप्तभिस्तथा ॥ ८ ॥
ततः सविशिखं चापं सहदेवस्य धन्विनः।

इन्द्र। (६०-६३) [७५१]

शल्यपर्वमें बारह अध्याय समाप्त।

शल्यपर्वमें तेरह अध्याय।

सञ्जय बोले, हे राजन्! युधिष्ठिर को शल्यके बाणोंसे व्याकुल देख सात्यकि, भीमसेन, नकुल और सहदेव शल्यको अपने बाणोंसे व्याकुल करने लगे। अनेक महारथोंसे एकेले शल्यको लडते देख सब सिद्ध, चारण और मुनि आश्चर्य करके धन्य धन्य कहने लगे॥ लगी हुई हृदयकी फांसके समान शल्य को जीता देख भीमसेनने पहले एक, फिर सात; सात्यकिने सौ, सहदेवने पांच और नकुलने धर्मराज युधिष्ठिरकी रक्षा करनेके लिये पांच बाण मारकर फिर सात बाण मारे, और सिंहके समान गर्जने लगे॥ (१-६)

इन सब महारथोंसे पीडित होनेपर भी वीर शल्यने अपने घोर धनुषको खींचकर सात्यकिके सत्तर नकुलके सात

छित्त्वा भल्लेन समरे विव्याधैनं त्रिसप्तभिः ॥ ९ ॥
सहदेवस्तु समरे मातुलं भूरिवर्चसम्।
सज्यमन्यद्धनुः कृत्वा पञ्चभिः समताडयत् ॥ १० ॥
शरैराशीविषाकारैर्ज्वलज्ज्वलनसन्निभैः।
सारथिं चास्य समरे शरेणानतपर्वणा ॥ ११ ॥
विव्याध भृशसंक्रुद्धस्तं वै भूयस्त्रिभिः शरैः।
भीमसेनस्तु सप्तत्या सात्यकिर्नवभिः शरैः ॥ १२ ॥
धर्मराजस्तथा षष्ट्या गात्रे शल्यं समार्पयत्।
ततः शल्यो महाराज निर्विद्धस्तैर्महारथैः ॥ १३ ॥
सुस्राव रुधिरं गात्रैर्गैरिकं पर्वतो यथा।
तांश्च सर्वान्महेष्वासान्पञ्चभिः पञ्चभिः शरैः॥ १४ ॥
विव्याध तरसा राजंस्तदद्भुतमिवाभवत्।
ततोऽपरेण भल्लेन धर्मपुत्रस्य मारिष ॥ १५ ॥
धनुश्चिच्छेद समरे सज्यं स सुमहारथः।
अथान्यद्धनुरादाय धर्मपुत्रो युधिष्ठिरः ॥ १६ ॥
साश्वसूतध्वजरथं शल्यं प्राच्छादयच्छरैः।
स च्छाद्यमानः समरे धर्मपुत्रस्य सायकैः ॥ १७ ॥

बाण मार, फिर एक बाणसे महाधनुषधारी सहदेवका धनुष काटकर उनके शरीरमें इक्कीस बाण मारे, सहदेवने भी क्रोध करके दूसरे धनुषपर रोदा चढाकर शीघ्रतासे तेजस्वी मामाके शरीरमें पांच बाण मारे ॥ (७-१०)

फिर विषभरे सांपके समान घोर तेज बाणसे शल्यके सारथीको मारकर गिरा दिया, फिर क्रोध करके शल्यके शरीरमें भी जलती आगके समान अनेक बाण मारे, फिर भीमसेनने सत्तर, सात्यकिने नौ और धर्मराज युधिष्ठिरने चौसठ बाण मारे। उन बाणोंके लगनेसे शल्यके शरीरसे इस प्रकारसे रुधिर बहने लगा, जैसे पर्वतसे गेरुके झरने ॥ (११-१३)

तब इन सबके शरीरमें फिर पांच पांच बाण मारे, शल्यकी इस शीघ्रताको देख वीर आश्चर्य करने लगे। फिर एक बाणसे रोदा सहित धर्मराजका धनुष काट दिया, तब उन्होंने दूसरे धनुषपर रोदा चढाकर घोडे, सारथी, रथ और ध्वजा सहित शल्यको अपने बाणोंसे छिपा दिया। तब शल्यने क्रोध करके युधिष्ठिरके शरीरमें दश बाण मारे, युधि-

युधिष्ठिरमथाविध्यद्दशाभिर्निशितैः शरैः।
सात्यकिस्तु ततः क्रुद्धो धर्मपुत्रे शरार्दिते ॥ १८ ॥
मद्राणामधिपं शूरं शरैर्विव्याध पञ्चभिः।
स सात्यकेः प्रचिच्छेद क्षुरप्रेण महद्धनुः ॥ १९ ॥
भीमसेनमुखांस्तांश्च त्रिभिस्त्रिभिरताडयत्।
तस्य क्रुद्धो महाराज सात्यकिः सत्यविक्रमः ॥ २० ॥
तोमरं प्रेषयामास स्वर्णदण्डं महाधनम्।
भीमसेनोऽथ नाराचं ज्वलन्तमिव पन्नगम् ॥ २१ ॥
नकुलः समरे शक्तिं सहदेवो गदां शुभाम्।
धर्मराजः शतघ्नीं च जिघांसुः शल्यमाहवे ॥ २२ ॥
तानापतत एवाशु पञ्चानां वै भुजच्युतान्।
वारयामास समरे शस्त्रसङ्घैः स मद्रराट् ॥ २३ ॥
सात्यकिप्रहितं शल्यो भल्लैश्चिच्छेद तोमरम्।
प्रहितं भीमसेनेन शरं कनकभूषणम् ॥ २४ ॥
द्विधा चिच्छेद समरे कृतहस्तः प्रतापवान्।
नकुलप्रेषितां शक्तिं हेमदण्डां भयावहाम् ॥ २५ ॥
गदां च सहदेवेन शरौघैः समवारयत्।
शराभ्यां च शतघ्नीं तां राज्ञश्चिच्छेद भारत ॥ २६ ॥
पश्यतां पाण्डुपुत्राणां सिंहनादं ननाद च।

ष्ठिरको व्याकुल देख सात्यकिको महाक्रोध हुआ तब शल्यके शरीरमें पांच बाण मारे, फिर शल्यने उनका धनुष काट डाला। और भीमसेन आदि सब क्षत्रियोंके शरीरमें तीन तीन बाण मारे, तब सात्यकिने क्रोध करके एक सोनेके दण्डवाला भारी तोमर शल्यके शरीरमें मारा, भीमसेनने एक बाण, नकुलने शक्ति सहदेवने गदा और धर्मराजने शतघ्नी मारी, परन्तु शल्यने उन सब शस्त्रोंको अपने बाणोंसे काट दिया॥ (१४-२३)

हे भारत! प्रतापी वीर शल्यने एक बाणसे सात्यकि के तोमर, भीमसेन के बाण दो से, नकुलकी भयानक शक्ति एकसे सहदेवकी गदा और युधिष्ठिर की शतघ्नीको दोसे काट दिया। पाण्डवोंके आगे, ऐसा घोर कर्म करके शल्य सिंहके समान गर्जने लगे। परन्तु सात्यकि शत्रुकी इस प्रसन्नता और विज-

नामृष्यत्तत्र शैनेयः शत्रोर्विजयमाहवे ॥ २७ ॥
अथान्यद्धनुरादाय सात्यकिः क्रोधमूर्छितः ।
द्वाभ्यां मद्रेश्वरं विद्ध्वा सारथिं च त्रिभिः शरैः॥ २८ ॥
ततः शल्यो रणे राजन्सर्वांस्तान्दशभिः शरैः ।
विव्याध भृशसंक्रुद्धस्तोत्त्रैरिव महाद्विपान् ॥ २९ ॥
ते वार्यमाणाः समरे मद्रराज्ञा महारथाः ।
न शेकुः संमुखे स्थातुं तस्य शत्रुनिषूदनः ॥ ३० ॥
ततो दुर्योधनो राजा दृष्ट्वा शल्यस्य विक्रमम् ।
निहतान्पाण्डवान्मेने पञ्चालानथ सृञ्जयान् ॥ ३१ ॥
ततो राजन्महाबाहुर्भीमसेनः प्रतापवान् ।
सन्त्यज्य मनसा प्राणान्मद्राधिपमयोधयत् ॥ ३२ ॥
नकुलः सहदेवश्च सात्यकिश्च महारथाः ।
परिवार्य तदा शल्यं समन्ताद्व्यकिरन्शरैः ॥ ३३ ॥
स चतुर्भिर्महेष्वासैः पाण्डवानां महारथैः ।
वृतस्तान्योधयामास मद्रराजः प्रतापवान् ॥ ३४ ॥
तस्य धर्मसुतो राजन्क्षुरप्रेण महाहवे ।
चक्ररक्षं जघानाशु मद्रराजस्य पार्थिवः ॥ ३५ ॥
तस्मिंस्तु निहते शूरे चक्ररक्षे महारथे ।

यको क्षमा न कर सकें और दूसरे धनुषपर रोदा चढाकर दो बाण शल्यके और तीन उनके सारथीके मारे; इस समय सात्यकि मारे कोधके कांप रहे थे, तब शल्यने इन पांचों महारथोंके शरीरमें दो दो बाण इस प्रकार मारे, जैसे महा बल हाथीको अंकुश मारता है।(२२-२९)

हे शत्रुनाशन ! उस समय शल्यकी विद्या और बल देखकर किसी महारथको यह शक्ति न रही कि युद्धमें खडा रहे, शल्यका यह पराक्रम देख राजा दुर्योधनने यह निश्चय कर लिया, कि पाण्डव, पाञ्चाल और सब सृञ्जय मारे गये, हे राजन् ! तब महाबाहु प्रतापी भीमसेन प्राणोंका मोह छोडकर शल्यसे युद्ध करने लगे, इसी प्रकार नकुल, सहदेव और महारथ सात्यकिभी सब ओरसे शल्यके ऊपर बाण वर्षाने लगे । परन्तु इन चारों महारथोंसे घोर युद्ध करनेपर भी शल्य कुछ न घबडाये, तब राजा युधिष्ठिरने एक बाणसे उनके पहियेकी रक्षा करनेवालेको मार डाला।(२९-३५)

मद्रराजोऽपि बलवान्सैनिकानावृणोच्छरैः ॥ ३६ ॥
समावृतांस्ततस्तांस्तु राजन्वीक्ष्य स्वसैनिकान्।
चिन्तयामास समरे धर्मपुत्रो युधिष्ठिरः ॥ ३७ ॥
कथं नु समरे शक्यं तन्माधववचो महत्।
न हि क्रुद्धो रणे राजन्क्षपयेत बलं मम ॥ ३८ ॥
ततः सरथनागाश्वाः पाण्डवाः पाण्डुपूर्वज।
मद्रराजं समासेदुः पीडयन्तः समन्ततः ॥ ३९ ॥
नानाशस्त्रौघबहुलां शस्त्रवृष्टिं समुद्यताम्।
व्यधमत्समरे राजा महाभ्राणीव मारुतः ॥ ४० ॥
ततः कनकपुङ्खान्तां शल्यक्षिप्तां वियद्गताम्।
शरवृष्टिमपश्याम शलभानामिवायतिम् ॥ ४१ ॥
ते शरा मद्रराजेन प्रेषिता रणमूर्धनि।
सम्पतन्तः स्म दृश्यन्ते शलभानां व्रजा इव ॥ ४२ ॥
मद्रराजधनुर्मुक्तैः शरैः कनकभूषणैः।
निरन्तरमिवाकाशं सम्बभूव जनाधिप ॥ ४३ ॥
न पाण्डवानां नास्माकं तत्र किञ्चिद्व्यदृश्यत।
बाणान्धकारे महति कृते तत्र महाहवे ॥ ४४ ॥

अपने महारथ चक्ररक्षकको मरा देख शल्यको महाक्रोध हुआ और युधिष्ठिरके प्रधान वीरोंको मारने लगे। अपनी सेनाको व्याकुल देख युधिष्ठिर सोचने लगे, कि कृष्णका वचन किस प्रकार सत्य होगा! हम शल्यको कैसे मार सकेंगे? ये तो हमारी सब सेनाका नाश कर देते हैं, तब युधिष्ठिरने सब हाथी, घोडे, रथ और पैदल सेनाके सहित प्रधान वीरोंको केवल शल्यसे ही युद्ध करनेकी आज्ञा दी और आप भी लडने लगे, तब शल्यके ऊपर इस प्रकार शस्त्र वर्षने लगे जैसे वर्षाकालमें पानी की धारें। परन्तु शल्य कुछ न घबडाये और जिधरको देखते थे, उधर ही युधिष्ठिरकी सेना इस प्रकार फट जाती थी। जैसे आंधीके चलनेसे मेघ। हमें इस समय सोनेके पङ्खवाले, आकाशमें घूमते हुए शल्यके बाण टीडी दलके समान दीखते थे॥ (३६—४१)

हे पृथ्वीनाथ! इस समय युधिष्ठिरकी सेनामें कोई ऐसा स्थान न था जहां शल्यके बाण न दीखते हों। उस समय बाणोंसे अन्धकार होगया था,

मद्रराजेन बलिना लाघवाच्छरवृष्टिभिः।
चाल्यमानं तु तं दृष्ट्वा पाण्डवानां बलार्णवम् ॥ ४५ ॥
विस्मयं परमं जग्मुर्देवगन्धर्वदानवाः।
स तु तान्सर्वतो यत्तान्शरैः सञ्छाद्य मारिष ॥ ४६ ॥
धर्मराजमवच्छाद्य सिंहवन्ननदन्मुहुः।
ते च्छन्नाः समरे तेन पाण्डवानां महारथाः ॥ ४७ ॥
नाशक्नुवंस्तदा युद्धे प्रत्युद्यातुं महारथम्।
धर्मराजपुरोगास्तु भीमसेनमुखा रथाः।
न जहुः समरे शूरं शल्यमाहवशोभिनम् ॥ ४८ ॥ [७९१]

इति श्रीमहाभारते० शल्यपर्वणि शल्ययुद्धे त्रयोदशोऽध्यायः ॥ १३ ॥

सञ्जय उवाच— अर्जुनो द्रौणिना विद्धो युद्धे बहुभिरायसैः।
तस्य चानुचरैः शूरैस्त्रिगर्तानां महारथैः ॥ १ ॥
द्रौणिं विव्याध समरे त्रिभिरेव शिलीमुखैः।
तथेतरान्महेष्वासान्द्वाभ्यां द्वाभ्यां धनञ्जयः ॥ २ ॥
भूयश्चैव महाराज शरवर्षैरवाकिरत्।
शरकंटकितास्ते तु तावका भरतर्षभ ॥ ३ ॥
न जहुः पार्थमासाद्य ताड्यमानाः शितैः शरैः।

इसलिये हम और पाण्डव अपनी ओरके वीरोंको नहीं पहचान सके। हम केवल इतना ही कह सक्ते हैं कि, बलवान शल्यके बाणोंसे पीडित पाण्डवोंकी समुद्र रूपी सेना सब ओर बहती सी दीखती थी; शल्यके इस पराक्रमको देख सब देवता, सिद्ध और गन्धर्व आश्चर्य करने लगे। फिर सब महारथोंको बाणोंसे व्याकुल करके युधिष्ठिरको बाणोंसे छिपा दिया और सिंहके समाय गर्जने लगे। तब युधिष्ठिर और भीमसेन आदि किसी वीरकी यह शक्ति न हुई कि शल्यसे युद्ध कर सके, परन्तु युद्धमें शल्यको छोडकर भागनेकी भी इच्छा न हुई ॥ (४१—४८)

शल्यपर्वमें तेरह अध्याय समाप्त।

शल्यपर्वमें चौदह अध्याय।

सञ्जय बोले, हे राजन्! अश्वत्थामा और त्रिगर्तदेशी अनेक महारथोंने अर्जुनकी ओर अनेक बाण चलाये तब अर्जुनने अश्वत्थामा आदि सब वीरोंको तीन तीन बाण चलाये! और फिर सहस्रों बाण छोडे अर्जुनके बाणोंसे व्याकुल होनेपर भी अश्वत्थामा आदि वी-

अर्जुनं रथवंशेन द्रोणपुत्रपुरोगमाः ॥ ४ ॥
अयोधयन्त समरे परिवार्य महारथाः।
तैस्तु क्षिप्ताः शरा राजन्कार्तस्वरविभूषिताः ॥ ५ ॥
अर्जुनस्य रथोपस्थं पूरयामासुरञ्जसा।
तथा कृष्णौ महेष्वासौ वृषभौ सर्वधन्विनाम् ॥ ६ ॥
शरैर्वीक्ष्य वितुन्नाङ्गौ प्रहृष्टा युद्धदुर्मदाः।
कूबरं रथचक्राणि ईषायोक्त्राणि वा विभो ॥ ७ ॥
युगं चैवानुकर्षं च शरभूतमभूत्तदा।
नैतादृशं दृष्टपूर्वं राजन्नैव च नः श्रुतम् ॥ ८ ॥
यादृशं तत्र पार्थस्य तावकाः संप्रचक्रिरे।
सरथः सर्वतो भाति चित्रपुंखैः शितैः शरैः ॥ ९ ॥
उल्काशतैः संप्रदीप्तं विमानमिव भूतले।
ततोऽर्जुनो महाराज शरैः सन्नतपर्वभिः ॥ १० ॥
अवाकिरत्तां पृतनां मेघो वृष्ट्येव पर्वतम्।
ते वध्यमानाः समरे पार्थनामांकितैः शरैः ॥ ११ ॥
पार्थभूतममन्यन्त प्रेक्षमाणास्तथाविधम्।
कोपोद्धूतशरज्वालो धनुः शब्दानिलो महान् ॥ १२ ॥
सैन्येन्धनं ददाहाशु तावकं पार्थपावकः।

रोंने इन्हें छोडा नहीं और अर्जुनको चारों ओरसे घेरकर बाण बरषाने लगे। इनके छोडे हुए सोनेके पङ्खवाले बाण अर्जुनके रथके चारों ओर दिखाई देने लगे, कृष्ण और अर्जुनके शरीरमें अनेक घाव होगये, छतुरी, जुआ और धुरी बाणोंसे भर गये। हे राजन्! जैसे अर्जुनके ऊपर बाण बरषते उस समय देखे ऐसे पहले कभी न देखे न सुने थे। १-८

हे राजन्! इस समय अर्जुनका रथ अनेक मसालयुक्त विमानके समान दीखता था, जब अर्जुनने इस सेनापर इस प्रकार बाण बरषाये जैसे मेघ पर्वतपर जल बरषाते हैं। अर्जुनके बाणोंसे व्याकुल होकर उस सेनाको चारों ओर अर्जुन ही अर्जुन दीखने लगे। इस समय ऐसा जान पडता था, मानो क्रोधरूपी वायुसे जलता हुआ बाणरूपी ज्वालायुक्त अर्जुनरूपी अग्नि तुम्हारी सेनाको भस्म कर देती है। (९—१२)

कहीं बाणोंसे कटकर पहिये, कहीं धुर तूणीर कहीं झण्डे, कहीं झण्डी, कहीं

चक्राणां पततां चापि युगानां च धरातले ॥ १३ ॥
तूणीराणां पताकानां ध्वजानां च रथैः सह।
ईषाणामनुकर्षाणां त्रिवेणूनां च भारत ॥ १४ ॥
अक्षाणामथ योक्त्राणां प्रतोदानां च सर्वशः।
शिरसां पततां चापि कुंडलोष्णीषधारिणाम् ॥ १५ ॥
भुजानां च महाभाग स्कन्धानां च समंततः।
छत्राणां व्यजनैः सार्धं मुकुटानां च राशयः ॥ १६ ॥
समदृश्यन्त पार्थस्य रथमार्गेषु भारत।
ततः क्रुद्धस्य पार्थस्य रथमार्गे विशाम्पते ॥ १७ ॥
अगम्यरूपा पृथिवी मांसशोणितकर्दमा।
भीरूणां त्रासजननी शूराणां हर्षवर्धिनी ॥ १८ ॥
बभूव भरतश्रेष्ठ रुद्रस्याक्रीडनं यथा।
हत्वा तु समरे पार्थः सहस्रे द्वे परन्तपः ॥ १९ ॥
रथानां सवरूथानां विधूमोऽग्निरिव ज्वलन्।
यथा हि भगवानग्निर्जगद्दग्ध्वा चराचरम् ॥ २० ॥
विधूमो दृश्यते राजंस्तथा पार्थो धनंजयः।
द्रौणिस्तु समरे दृष्ट्वा पाण्डवस्य पराक्रमम् ॥ २१ ॥
रथेनातिपताकेन पाण्डवं प्रत्यवारयत्।
तावुभौ पुरुषव्याघ्रौ तावुभौ धन्विनां वरौ ॥ २२ ॥

रथ, कहीं जुवा, कहीं सैल और कहीं रथके आसन पडे दीखते थे, कहीं पहियेकी नाभि, कहीं ढाल, कहीं घोडेकी लगाम, कहीं जोडे, कहीं कुण्डल पगडी सहित कटे शिर, कहीं हाथ, कहीं छत्र और कहीं कटे हुए मुकुटोंके ढेर पडे थे॥ उस समय जिधरको क्रोधभरे अर्जुनका रथ निकल जाता था, उधरही कायरोंको डरानेवाली और वीरोंका उत्साह बढानेवाली मांस और रुधिरकी कीच होजाती थी। हे राजन्! वह रणभूमि महास्मशानके समान होगयी थी। अर्जुन दो सहस्र वीरोंको मारकर ऐसे प्रकाशित हुए जैसे विना धूंए की अग्नि और प्रलयके समय घोर रूपधारी शिव। (१३-२०)

अर्जुनका यह पराक्रम देख अश्वत्थामा अपनी पताका उडाते हुए युद्ध करने को दौडे। तब इन दोनों पुरुषसिंह महाधनुषधारी वीरोंका घोर युद्ध होने लगा।

समीयतुस्तदाऽन्योन्यं परस्परवधैषिणौ।
तयोरासीन्महाराज बाणवर्षं सुदारुणम् ॥ २३ ॥
जीमूतयोर्यथा वृष्टिस्तपांते भरतर्षभ।
अन्योन्यस्पर्धिनौ तौ तु शरैः सन्नतपर्वभिः ॥ २४ ॥
ततक्षतुस्तदाऽन्योन्यं शृंगाभ्यां वृषभाविव।
तयोर्युद्धं महाराज चिरं सममिवाभवत् ॥ २५ ॥
शस्त्राणां संगमश्चैव घोरस्तत्राभवत्पुनः।
ततोऽर्जुनं द्वादशभी रुक्मपुंखैः सुतेजनैः ॥ २६ ॥
वासुदेवं च दशभिर्द्रौणिर्विव्याध भारत।
ततः प्रहर्षाद्बीभत्सुर्व्याक्षिपद्गांडिवं धनुः ॥ २७ ॥
मानयित्वा मुहूर्तं तु गुरुपुत्रं महाहवे।
व्यश्वसूतरथं चक्रे सव्यसाची परन्तपः ॥ २८ ॥
मृदुपूर्वं ततश्चैनं पुनः पुनरताडयत्।
हताश्वे तु रथे तिष्ठन्द्रोणपुत्रस्त्वयस्मयम् ॥ २९ ॥
मुसलं पाण्डुपुत्राय चिक्षेप परिघोपमम्।
तमापतन्तं सहसा हेमपट्टविभूषितम् ॥ ३० ॥
चिच्छेद सप्तधा वीरः पार्थः शत्रुनिबर्हणः।

हे भरतकुलसिंह! जैसे वर्षाकालमें मेघ वर्षते हैं, तैसे ही ये दोनों वीर बाण बरषाने और युद्ध करने लगे॥ २१-२४

हे महाराज! जैसे दो बैल सींगोंसे युद्ध करते हैं ऐसेही ये दोनों वीर बहुत समयतक लडते रहे। उस युद्धमें अनेक प्रकारके दिव्य शस्त्रभी चले तब अश्वत्थामाने सोनेके पङ्खवाले नौ बाण अर्जुनके शरीरमें और दश कृष्णके शरीरमें मारे। तब अर्जुनने प्रसन्न होकर गाण्डीव धनुषपर टङ्कार दी। अर्जुनने जो इतने समयतक अश्वत्थामाको बाणोंसे व्याकुल नहीं किया इसका कारण केवल गुरुपुत्र का आदरही था, फिर थोडे ही समयमें अश्वत्थामाके घोडे, सारथी और रथको काट डाला। (२५-२८)

फिर धीरे धीरे अनेक बाण उनके शरीरमें भी मारे, अश्वत्थामा भी बिना घोडेके रथमें बैठ रहे और कुछ न घबडाये, फिर एक सोनेके तारोंसे मढा हुआ परिघके समान भारी मूसल अर्जुनकी ओर चलाया, तब शत्रुनाशन अर्जुनने उसे मार्गहीमें बाणोंसे काटकर सात टूकडे कर दिया। अपने मूसलको कटा

स च्छिन्नं मुसलं दृष्ट्वा द्रौणिः परमकोपनः ॥ ३१ ॥
आददे परिघं घोरं नगेन्द्रशिखरोपमम् ।
चिक्षेप चैव पार्थाय द्रौणिर्युद्धविशारदः ॥ ३२ ॥
तमन्तकमिव क्रुद्धं परिघं प्रेक्ष्य पाण्डवः ।
अर्जुनस्त्वरितो जघ्ने पञ्चभिः सायकोत्तमैः ॥ ३३ ॥
स च्छिन्नः पतितो भूमौ पार्थबाणैर्महाहवे ।
दारयन् पृथिवीन्द्राणां मनांसीव च भारत ॥ ३४ ॥
ततोऽपरैस्त्रिभिर्भल्लैर्द्रौणिं विव्याध पाण्डवः ।
सोऽतिविद्धो बलवता पार्थेन सुमहात्मनः ॥ ३५ ॥
नाकंपत तदा द्रौणिः पौरुषे स्वे व्यवस्थितः ।
सुरथं च ततो राजन् भारद्वाजो महारथम् ॥ ३६ ॥
अवाकिरच्छरव्रातैः सर्वक्षत्रस्य पश्यतः ।
ततस्तु सुरथोऽप्याजौ पञ्चालानां महारथः ॥ ३७ ॥
रथेन मेघघोषेण द्रौणिमेवाभ्यधावत ।
विकर्षन्वै धनुः श्रेष्ठं सर्वभारसहं दृढम् ॥ ३८ ॥
ज्वलनाशी विषनिभैः शरैश्चैनमवाकिरत् ।
सुरथं तं ततः क्रुद्धमापतन्तं महारथम् ॥ ३९ ॥

देख युद्धके पण्डित अश्वत्थामाने क्रोध करके एक पर्वतके शिखरके समान भारी परिघ अर्जुनकी ओर चलाया । क्रोध भरे यमराजके दण्डके समान परिघको आते देख अर्जुनने पांच बाणोंसे मार्गहीमें काटडाला। अर्जुनके बाणसे अश्वत्थामाका केवल परिघ ही कटकर नहीं गिरा वरन उसके सङ्ग ही दुर्योधन आदि राजाओंके हृदय भी फट गये । तब फिर महात्मा बलवान अर्जुनने अश्वत्थामाके शरीरमें तीन बाण मारे अनेक बाण लगनेपर भी महात्मा अश्वत्थामा कुछ नहीं डरे ॥ (२९—३५)

अनन्तर उस ही घोडे हीन रथपर बैठे हुए अश्वत्थामाने पाञ्चालदेशी महारथ सुरथके ऊपर अनेक बाण बरषाये। सुरथ भी अपने मेघके समान शब्दवाले रथको दौडाते हुए अश्वत्थामाके पास आये और अत्यन्त दृढ शत्रुओंके नाश करनेवाले धनुषको खींचकर जलती अग्नि और विष भरे सांपके समान बाण छोडने लगे । उस पाञ्चालवंशी महारथके बाण लगनेसे अश्वत्थामा को ऐसा क्रोध हुआ जैसे डण्डा लगनेसे

चुकोप समरे द्रौणिर्दण्डाहत इवोरगः ।
त्रिशिखां भ्रुकुटीं कृत्वा सृक्किणीपरिसंलिहन् ॥ ४० ॥
उद्वीक्ष्य सुरथं रोषाद्धनुर्ज्यामवमृज्य च ।
मुमोच तीक्ष्णं नाराचं यमदण्डोपमद्युतिम् ॥ ४१ ॥
स तस्य हृदयं भित्त्वा प्रविवेशातिवेगितः ।
शक्राशनिरिवोत्सृष्टो विदार्य धरणीतलम् ॥ ४२ ॥
ततः स पतितो भूमौ नाराचेन समाहतः ।
वज्रेण च यथा शृङ्गं पर्वतस्येव दारितः ॥ ४३ ॥
तस्मिन्विनिहते वीरे द्रोणपुत्रः प्रतापवान् ।
आरुरोह रथं तूर्णं तमेव रथिनां वरः ॥ ४४ ॥
ततः सज्जो महाराज द्रौणिराहवदुर्मदः ।
अर्जुनं योधयामास संशप्तकवृतो रणे ॥ ४५ ॥
तत्र युद्धं महच्चासीदर्जुनस्य परैः सह ।
मध्यन्दिनगते सूर्ये यमराष्ट्रविवर्धनम् ॥ ४६ ॥
तत्राश्चर्यमपश्याम दृष्ट्वा तेषां पराक्रमम् ।
यदेको युगपद्वीरान्समयोधयदर्जुनः ॥ ४७ ॥
विमर्दः सुमहानासीदेकस्य बहुभिः सह ।

सांपको । तब भौंह टेढी करके दांत और ओठ चबाने लगे फिर क्रोधसे सुरथकी ओर देखकर और धनुषके रोदेको हाथसे मलकर यमराजके दण्डके समान एक बाण उनकी छातीमें मारा, वह उनकी छाती और रथको काटकर इस प्रकार पृथ्वीमें घुस गया जैसे इन्द्रका वज्र। जैसे वज्र लगनेसे पर्वतका शिखर गिर जाता है, वैसे ही उस बाणके लगनेसे सुरथ पृथ्वीमें गिर पडे ॥ (३९—४३)

सुरथको मारकर अश्वत्थामाने उस ही रथमें दूसरे घोडे जुडवाये और फिर संशप्तकोंके सहित अर्जुन हीसे घोर युद्ध करनेको चले, (४४—४५)

जिस समय यह महाप्रतापी अर्जुन, अश्वत्थामा, और संशप्तकोंका घोर युद्ध होरहा था, तब ही भगवान सूर्यने दिनका दूसरा पहर समाप्त किया। अर्जुन एकले ही सब वीरोंसे युद्ध करते रहे यह देखकर हम सबको आश्चर्य होगया, जैसे पहले समयमें इन्द्रने अनेक दानवोंके सङ्ग घोर युद्ध किया था तैसे ही अर्जुन अनेक वीरोंसे लडते

शतक्रतोर्यथापूर्वं महत्या दैत्यसेनया ॥ ४८ ॥ [८४७]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यपर्वणि संकुलयुद्धे चतुर्दशोऽध्यायः ॥ १४ ॥

सञ्जय उवाच— दुर्योधनो महाराज धृष्टद्युम्नश्च पार्षतः ।
चक्रतुः सुमहद्युद्धं शरशक्तिसमाकुलम् ॥ १ ॥
तयोरासन्महाराज शरधाराः सहस्रशः ।
अम्बुदानां यथा काले जलधाराः समन्ततः ॥ २ ॥
राजा च पार्षतं विद्ध्वा शरैः पञ्चभिराशुगैः ।
द्रोणहन्तारमुग्रेषुं पुनर्विव्याध सप्तभिः ॥ ३ ॥
धृष्टद्युम्नस्तु समरे बलवान्दृढविक्रमः ।
सप्तत्या विशिखानां वै दुर्योधनमपीडयत् ॥ ४ ॥
पीडितं वीक्ष्य राजानं सोदर्या भरतर्षभ ।
महत्या सेनया सार्धं परिवव्रुः स पार्षतम् ॥ ५ ॥
स तैः परिवृतः शूरः सर्वतोऽतिरथैर्भृशम् ।
व्यचरत्समरे राजन्दर्शयन्नस्त्रलाघवम् ॥ ६ ॥
शिखण्डी कृतवर्माणं गौतमं च महारथम् ।
प्रभद्रकैः समायुक्तो योधयामास धन्विनौ ॥ ७ ॥

रहे ॥ (४५—४८) [८४७]

शल्यपर्वमें चौदह अध्याय समाप्त

शल्यपर्वमें पंद्रह अध्याय ।

सञ्जय बोले, हे राजन् ! इसी प्रकार राजा दुर्योधन और धृष्टद्युम्न भी बाण और शक्तियोंसे घोर युद्ध करने लगे । हे राजन् ! उन दोनोंके धनुषसे छूटे हुए बाण ऐसे दिखाई देते थे, मानो वर्षाकालमें दो मेघ वर्ष रहे हैं । राजा दुर्योधनने द्रोणाचार्यके मारनेवाले धृष्टद्युम्नके शरीरमें पांच बाण मारकर फिर सात बाण मारे । (१—३)

महापराक्रमी धृष्टद्युम्नने भी एक ही वार दुर्योधनके शरीरमें अनेक बाण मारे, उन बाणोंके लगनेसे राजा दुर्योधन बहुत व्याकुल होगये, उनको व्याकुल देख उनके भाई बहुत सेनाके सहित धृष्टद्युम्नसे लडने लगे । हे राजन् ! अनेक महारथोंसे घिरनेपर भी वीर धृष्टद्युम्न अपनी शस्त्रविद्याको दिखाते हुए युद्धमें घूमने लगे । इसी प्रकार शिखण्डी, कृतवर्मा और महाधनुषधारी कृपाचार्यसे एकले लडते रहे और सब पाञ्चाल शिखण्डीकी रक्षा करते रहे ॥ (४—७)

तत्रापि सुमहद्युद्धं घोररूपं विशाम्पते ।
प्राणान्सन्त्यजतां युद्धे प्राणद्यूताभिदेवने ॥ ८ ॥
शल्यः सायकवर्षाणि विमुञ्चन्सर्वतो दिशम् ।
पाण्डवान्पीडयामास ससात्यकिवृकोदरान् ॥ ९ ॥
तथा तौ तु यमौ युद्धे यमतुल्यपराक्रमौ ।
योधयामास राजेन्द्र वीर्येणास्त्रबलेन च ॥ १० ॥
शल्यसायकनुन्नानां पाण्डवानां महामृधे ।
त्रातारं नाध्यगच्छन्त केचित्तत्र महारथाः ॥ ११ ॥
ततस्तु नकुलः शूरो धर्मराजे प्रपीडिते ।
अभिदुद्राव वेगेन मातुलं मातृनन्दनः ॥ १२ ॥
सञ्छाद्य समरे वीरं नकुलः परवीरहा ।
विव्याध चैनं दशभिः स्मयमानः स्तनान्तरे ॥ १३ ॥
सर्वपारसवैर्बाणैः कर्मारपरिमार्जितैः ।
स्वर्णपुङ्खैः शिलाधौतैर्धनुर्यन्त्रप्रचोदितैः ॥ १४ ॥
शल्यस्तु पीडितस्तेन स्वस्रीयेण महात्मना ।
नकुलं पीडयामास पत्रिभिर्नतपर्वभिः ॥ १५ ॥
ततो युधिष्ठिरो राजा भीमसेनोऽथ सात्यकिः ।

हे राजन् ! उस समय कृपाचार्य और कृतवर्मा भी अपने प्राणोंका मोह छोडकर शिखण्डीके सङ्ग घोर युद्ध करने लगे ॥ (८)

उधर शल्यभी अपने बाण बर्षाते हुए युधिष्ठिर, भीमसेन, नकुल, सहदेव और सात्यकिसे युद्ध करने लगे ॥ उस समय यमराजके समान वीर नकुल और सहदेव ही केवल अपने बल और बाणों से युद्ध करते रहे । उस समय ऐसा जान पडता था, मानो अब जगतमें पाण्डवोंकी रक्षा करनेवाला कोई नहीं है, अपने बडे भाईको व्याकुल देख महारथ नकुल अपने मामा शल्यको मारनेको वेगसे दौडे और अपने बाणोंसे शल्यके रथको छिपाकर फिर हंसकर दस बाण उनकी छातीमें मारे। सब लोहेके बने विषमें बुझे सोनेके पङ्खवाले नकुलके धनुष और यन्त्र (कलसे) छुटे बाणोंके लगनेसे शल्य बहुत व्याकुल होगये, फिर सावधान होकर अपने भाञ्जेके शरीरमें अनेक तेज बाण मारे। (९-१५)

तब राजा युधिष्ठिर, भीमसेन, माद्री

सहदेवश्च माद्रेयो मद्रराजमुपाद्रवन् ॥ १६ ॥
तानापतत एवाशु पूरयाणान्रथस्वनैः ।
दिशश्च विदिशश्चैव कम्पयानांश्च मेदिनीम् ॥ १७ ॥
प्रतिजग्राह समरे सेनापतिरमित्रजित् ।
युधिष्ठिरं त्रिभिर्विद्ध्वा भीमसेनं च पञ्चभिः ॥१८ ॥
सात्यकिं च शतेनाजौ सहदेवं त्रिभिः शरैः ।
ततस्तु सशरं चापं नकुलस्य महात्मनः ॥ १९ ॥
मद्रेश्वरः क्षुरप्रेण तदा मारिष चिच्छिदे ।
तदशीर्यत विच्छिन्नं धनुः शल्यस्य सायकैः ॥ २० ॥
अथान्यद्धनुरादाय माद्रीपुत्रो महारथः ।
मद्रराजरथं तूर्णं पूरयामास पत्रिभिः ॥ २१ ॥
युधिष्ठिरस्तु मद्रेशं सहदेवश्च मारिष ।
दशभिर्दशभिर्बाणैरुरस्येनमविध्यताम् ॥ २२ ॥
भीमसेनस्तु तं षष्ट्या सात्यकिर्दशभिः शरैः ।
मद्रराजमभिद्रुत्य जघ्नतुः कंकपत्रिभिः ॥ २३ ॥
मद्रराजस्ततः क्रुद्धः सात्यकिं नवभिः शरैः ।
विव्याध भूयः सप्तत्या शराणां नतपर्वणाम् ॥ २४ ॥
अथास्य सशरं चापं मुष्टौ चिच्छेद मारिष ।
हयांश्च चतुरः संख्ये प्रेषयामास मृत्यवे ॥ २५ ॥

पुत्र सहदेव और सात्यकी शल्यकी ओर दौडे। उनके रथोंके शब्द और वेगसे पृथ्वी हिलने लगी। तब हमारे सेनापति शत्रुनाशन शल्य एकले ही उन सबसे लडने लगे। युधिष्ठिरके तीन, भीमसेनके पांच, सहदेवके तीन और सात्यकिके सौ बाण मारे, फिर अनेक तेज बाणोंसे महारथ नकुलका धनुष काट कर पृथ्वीमें गिरा दिया। तब महारथ नकुलने भी शीघ्रतासे दूसरा धनुष लेकर इतने बाण चलाये कि शल्यका रथ भर गया। (१६-२१)

उसी समय सहदेव और युधिष्ठिरने भी शल्यकी छातीमें दश दश बाण मारे। भीमसेनने साठ और सात्यकिने भी दश दस बाण मारे। तब शल्यने क्रोध करके सात्यकिके शरीरमें नौ बाण मार कर फिर सत्तर बाण चलाये। फिर बाण सहित धनुष काट कर चारों घोडोंको मार डाला। इस प्रकार सात्यकिको

विरथं सात्यकिं कृत्वा मद्रराजो महारथः।
विशिखानां शतेनैनमाजघान समंततः ॥ २६ ॥
माद्रीपुत्रौ च संरब्धौ भीमसेनं च पाण्डवम्।
युधिष्ठिरं च कौरव्य विव्याध दशभिः शरैः ॥ २७ ॥
तत्राद्भुतमपश्याम मद्रराजस्य पौरुषम्।
यदेनं सहिताः पार्था नाभ्यवर्त्तंत संयुगे ॥ २८ ॥
अथान्यं रथमास्थाय सात्यकिः सत्यविक्रमः।
पीडितान्पाण्डवान्दृष्ट्वा मद्रराजवशं गतान् ॥ २९ ॥
अभिदुद्राव वेगेन मद्राणामधिपं बलात्।
आपतन्तं रथं तस्य शल्यः समितिशोभनः ॥ ३० ॥
प्रत्युद्ययौ रथेनैव मत्तो मत्तमिव द्विपम्।
स सन्निपातस्तुमुलो बभूवाद्भुतदर्शनः ॥ ३१ ॥
सात्यकेश्चैव शूरस्य मद्राणामधिपस्य च।
यादृशो वै पुरावृत्तः शंबरामरराजयोः ॥ ३२ ॥
सात्यकिः प्रेक्ष्य समरे मद्रराजमवस्थितम्।
विव्याध दशभिर्बाणैस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ ३३ ॥
मद्रराजस्तु सुभृशं विद्धस्तेन महात्मना।
सात्यकिं प्रतिविव्याध चित्रपुंखैः शितैः शरैः ॥३४॥
ततः पार्था महेष्वासाः सात्वताभिसृतं नृपम्।

विरथ करके फिर उनके शरीरमें सा बाण मारे। फिर युधिष्ठिर, भीमसेन, नकुल और सहदेवके भी शरीरमें दश दश बाण मारे। चारों पाण्डव और सात्यकि अकेले शल्यको नहीं जीत सके, यह देखकर हम लोगोंको बहुत आश्चर्य हुआ॥ (२२—२८)

इतने ही समयमें महावीर सात्यकि दूसरे रथपर बैठ गये और पाण्डवोंको शल्यके बाणोंसे व्याकुल देखकर वेगसे दौडे। उनको आते देख महावीर शल्य भी उनकी ओर इस प्रकार दौडे जैसे मतवाला हाथी मतवाले हाथीकी ओर। उस समय वीर सात्यकि और मद्रराज शल्यका ऐसा घोर युद्ध हुआ जैसे शम्बर दैत्य और देवराज इन्द्रका हुआ था। तब सात्यकिने शल्यसे खडारह; ऐसा कह कर उनके शरीरमें दश बाण मारे। तब महात्मा शल्यने भी सात्यकिकी ओर अनेक बाण चलाये। तब

अभ्यवर्तन् रथैस्तूर्णं मातुलं वधकांक्षया ॥ ३५ ॥
तत आसीत्परामर्दस्तुमुलः शोणितोदकः ।
शूराणां युध्यमानानां सिंहानामिव नर्दताम् ॥ ३६ ॥
तेषामासीन्महाराज व्याधिक्षेपः परस्परम् ।
सिंहानामामिषेप्सूनां कूजतामिव संयुगे ॥ ३७ ॥
तेषां बाणसहस्रौघैराकीर्णा वसुधाऽभवत् ।
अंतरिक्षं च सहसा बाणभूतमभूत्तदा ॥ ३८ ॥
शरान्धकारं सहसा कृतं तेन समंततः ।
अभ्रच्छायेव संजज्ञे शरैर्मुक्तैर्महात्मभिः ॥ ३९ ॥
तत्र राजन् शरैर्मुक्तैर्निर्मुक्तैरिव पन्नगैः ।
स्वर्णपुंखैः प्रकाशद्भिर्व्यरोचन्त दिशस्तदा ॥ ४० ॥
तत्राद्भुतं परं चक्रे शल्यः शत्रुनिबर्हणः ।
यदेकः समरे शूरो योधयामास वै बहून् ॥ ४१ ॥
मद्रराजभुजोत्सृष्टैः कंकबर्हिणवाजितैः ।
सम्पतद्भिः शरैर्घोरैरवाकीर्यत मेदिनी ॥ ४२ ॥
तत्र शल्यरथं राजन्विचरन्तं महाहवे ।
अपश्याम यथा पूर्वं शक्रस्यासुरसंक्षये ॥ ४३ ॥ [८९०]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यपर्वणि संकुलयुद्धे पंचदशोऽध्यायः ॥ १५ ॥

चारों पाण्डवभी अपने मामाको मारनेके लिये विशेष यत्न करने लगे। (२८-३५)

उस समय युद्ध भूमिमें रुधिर बहने लगा और लडते हुए वीर ऐसे दीखने लगे, जैसे नाचते हुए सिंह। ये सब वीर इस प्रकार युद्ध करने लगे। जैसे मांसके लिये गर्जकर बाज युद्ध करते हैं। उस समय पृथ्वी और आकाशमें केवल बाण-ही बाण दीखते थे। महात्मा वीरोंके बाण आकाशमें ऐसे छागये थे, जैसे वर्षाकालमें मेघ। बाणोंके मारे सब युद्धभूमिमें अन्धेरा होगया था। उस अन्धेरेमें सोनेके पङ्खवाले घूमते हुए बाण चमकते थे। एकले शत्रुनाशन शल्य अनेक वीरोंसे लडते रहे यह बहुत अद्भुत कर्म हुआ। शल्यके हाथोंसे छूटे मोर और कौवेके पङ्खलगे, बाणोंका शब्द सब ओर सुनायी देता था। उस समय युद्धमें घूमते शल्यका रथ ऐसा दिखाई देता था, जैसे दानवोंके नाश करते समय इन्द्रका ॥ (३६—४३)

शल्यपर्वमें पन्द्रह अध्याय समाप्त। [८९०]

सञ्जय उवाच— ततः सैन्यास्तव विभो मद्रराजपुरस्कृताः।
पुनरभ्यद्रवन्पार्थान् वेगेन महता रणे ॥ १ ॥
पीडितास्तावकाः सर्वे प्रधावन्तो रणोत्कटाः।
क्षणेन चैव पार्थांस्ते बहुत्वात्समलोडयन् ॥ २ ॥
ते वध्यमानाः समरे पाण्डवा नावतस्थिरे।
निवार्यमाणा भीमेन पश्यतोः कृष्णयोस्तदा ॥ ३ ॥
ततो धनञ्जयः क्रुद्धः कृपं सह पदानुगैः।
अवाकिरच्छरौघेण कृतवर्माणमेव च ॥ ४ ॥
शकुनिं सहदेवस्तु सहसैन्यमवाकिरत्।
नकुलः पार्श्वतः स्थित्वा मद्रराजमवैक्षत ॥ ५ ॥
द्रौपदेया नरेन्द्रांश्च भूयिष्ठान्समवारयन्।
द्रोणपुत्रं च पाञ्चाल्यः शिखण्डी समवारयत् ॥ ६ ॥
भीमसेनस्तु राजानं गदापाणिरवारयत्।
शल्यं तु सह सैन्येन कुन्तीपुत्रो युधिष्ठिरः ॥ ७ ॥
ततः समभवत्सैन्यं संसक्तं तत्र तत्र ह।
तावकानां परेषां च संग्रामेष्वनिवर्तिनाम् ॥ ८ ॥
तत्र पश्याम्यहं कर्म शल्यस्यातिमहद्रणे।

शल्यपर्वमें सोलह अध्याय।

तुम्हारे सब वीर व्याकुल होनेपर भी पाण्डवोंकी सेनासे युद्ध करने लगे। और बहुत होनेके कारण उन्होंने पाण्डवोंकी सेनाको व्याकुल कर दिया। यद्यपि भीमसेनने बहुत रोका तो भी पाण्डवोंकी सेना खडी न हो सकी और कृष्ण तथा अर्जुनके देखते देखते भागने लगी॥ (१-३)

तब अर्जुनने महाक्रोध करके कृतवर्मा और कृपाचार्यके ऊपर बाण वर्षाने आरम्भ करे, सहदेव सेना सहित शकुनिसे युद्ध करने लगे। नकुलने शल्यके पास जाकर क्रोधसे उनकी ओर देखा द्रौपदीके पांचों बेटोंने अनेक राजोंको युद्धमें रोक दिया, शिखण्डीने अश्वत्थामाको व्याकुल कर दिया, भीमसेन भी गदा लेकर रथमे उतरे और राजा दुर्योधनसे लडने लगे, और एकले महाराज युधिष्ठिर शल्यसे घोर युद्ध करने लगे, तब दोनों ओरकी सेना भी जहां तहां घोर युद्ध करने लगी, हमने उस समय भी शल्यके कर्मको अद्भुत देखा कि एकले ही सेना सहित युधिष्ठिरसे लडते

यदेकः सर्वसैन्यानि पाण्डवानामयोधयत् ॥ ९ ॥
व्यदृश्यत तदा शल्यो युधिष्ठिरसमीपतः ।
रणे चन्द्रमसोऽभ्याशे शनैश्चर इव ग्रहः ॥ १० ॥
पीडयित्वा तु राजानं शरैराशीविषोपमैः ।
अभ्यधावत्पुनर्भीमं शरवर्षैरवाकिरत् ॥ ११ ॥
तस्य तल्लाघवं दृष्ट्वा तथैव च कृतास्त्रताम् ।
अपूजयन्ननीकानि परेषां तावकानि च ॥ १२ ॥
पीड्यमानास्तु शल्येन पाण्डवा भृशविक्षताः ।
प्राद्रवन्त रणं हित्वा क्रोशमाने युधिष्ठिरे ॥ १३ ॥
वध्यमानेष्वनीकेषु मद्रराजेन पाण्डवः ।
अमर्षवशमापन्नो धर्मराजो युधिष्ठिरः ॥ १४ ॥
ततः पौरुषमास्थाय मद्रराजमताडयत् ।
जयो वास्तु वधो वाऽस्तु कृतबुद्धिर्महारथः ॥ १५ ॥
समाहूयाब्रवीत्सर्वान् भ्रातॄन् कृष्णं च माधवम् ।
भीष्मो द्रोणश्च कर्णश्च ये चान्ये पृथिवीक्षितः ॥ १६॥
कौरवार्थे पराक्रांताः संग्रामे निधनं गताः ।
यथाभागं यथोत्साहं भवंतः कृतपौरुषाः ॥ १७ ॥

रहे, उस समय गोरे रङ्गवाले, युधिष्ठिर के आगे खडे काले शल्य चन्द्रमाके पास शनैश्चरसे दीखते थे । (४-१०)

युधिष्ठिरको बाणोंसे व्याकुल करके फिर शल्य बाण वर्षाते हुए भीमसेनकी ओर दौडे, शल्यकी इस शस्त्र विद्या और अभ्यासको देख दोनों ओरके वीर धन्य धन्य कहने लगे, युधिष्ठिरको व्याकुल देखकर उनकी ओरके प्रधान वीर शल्यके बाणोंसे बहुत व्याकुल होने पर भी युद्ध करनेको दौडे । अपनी सेनाको व्याकुल देख महाराज युधिष्ठिरको शल्य के ऊपर महाक्रोध आया, तब महारथ युधिष्ठिरने यह निश्चय कर लिया कि या तो शल्यको मारेंगे या मर ही जायंगे। तब उनके ऊपर अनेक बाण वर्षाने लगे। (१०=१५)

फिर अपने सब भाई, सेनापति मन्त्री और कृष्ण आदि मित्रोंको बुलाकर कहने लगे, तुम सब लोगोंने अपने अपने भाग और सम्बन्धके अनुसार भीष्म और द्रोणाचार्य आदि सब दुर्योधनकी ओरके राजोंको मारा। अब केवल हमारा ही भाग शेष रह गया है।

भागोऽवशिष्ट एकोऽयं मम शल्यो महारथः।
सोऽहमद्य युधा जेतुमाशंसे मद्रकाधिपम् ॥ १८ ॥
तत्र यन्मानसं मह्यं तत्सर्वं निगदामि वः।
चक्ररक्षाविमौ वीरौ मम माद्रवतीसुतौ ॥ १९ ॥
अजेयौ वासवेनापि समरे शूरसम्मतौ।
साध्विमौ मातुलं युद्धे क्षत्रधर्मपुरस्कृतौ ॥ २० ॥
मदर्थं प्रतियुध्येतां मानार्हौ सत्यसङ्गरौ।
मां वा शल्यो रणे हन्ता तं वाऽहं भद्रमस्तु वः ॥२१॥
इति सत्यामिमां वाणीं लोकवीरा निबोधत।
योत्स्येऽहं मातुलेनाद्य क्षात्रधर्मेण पार्थिवाः ॥ २२ ॥
स्वसंशमभिसन्धाय विजयायेतराय वा।
तस्य मेऽप्यधिकं शस्त्रं सर्वोपकरणानि च ॥ २३ ॥
संसज्जंतु रथे क्षिप्रं शास्त्रवद्रथयोजकाः।
शैनेयो दक्षिणं चक्रं धृष्टद्युम्नस्तथोत्तरम् ॥ २४ ॥
पृष्ठगोपो भवत्वद्य मम पार्थो धनञ्जयः।

उसमें राजा शल्य ही आगये इसलिये तुम लोगोंके आगे हम इसके मारनेकी प्रतिज्ञा करते हैं अब हम जो कहते हैं, सो तुम लोग सुनो, हमारी यह मनकी इच्छा है कि वीर नकुल और सहदेव हमारे रथके पहियोंकी रक्षा करें क्यों कि, हमें यह निश्चय है, कि इन दोनोंको युद्धमें साक्षात् इन्द्र भी नहीं जीत सक्ते; इनके बल, पराक्रम, शस्त्र विद्या और क्षत्रिय धर्मको सब कोई जानते हैं, इन दोनोंको जगत्के महायोद्धा पराक्रमी महावीर क्षत्री कहते हैं, ये शल्यको जीतनेमें समर्थ हैं हम इन दोनों आदर पाने योग्य वीरोंको अपना सहायक बनाते हैं, और तुम लोगोंको आशीर्वाद देते हैं कि ईश्वर सबका कल्याण करें। अब या तो हम शल्यको मारेंगे, या वे ही हमें मारेंगे, तुम सब अपने अपने स्थानपर जाओ। (१५-२१)

हे जगत् प्रसिद्ध वीर! और राजों! तुम हमारी एक और सत्य प्रतिज्ञा सुनों, आज हम क्षत्रियोंका धर्मधारण करके अपने मामासे भी युद्ध करेंगे। आज हम मृत्यु या जीतका निश्चय करके मामासे लडेंगे, परन्तु उनके पास अस्त्र आदि युद्धकी सामग्री हमसे अधिक हैं, अब सब वीर हमारी आज्ञासे शस्त्र भरे रथोंमें बैठो और इस प्रकार हमारे सङ्ग

पुरःसरो ममाद्यास्तु भीमः शस्त्रभृतां वरः ॥ २५ ॥
एवमभ्यधिकः शल्याद्भविष्यामि महामृधे ।
एवमुक्तास्तथा चक्रुस्तदा राज्ञः प्रियैषिणः ॥ २६ ॥
ततः प्रहर्षः सैन्यानां पुनरासीत्तदा मृधे ।
पञ्चालानां सोमकानां मत्स्यानां च विशेषतः॥ २७ ॥
प्रतिज्ञां तां तदा राजा कृत्वा मद्रेशमभ्ययात् ।
ततः शङ्खांश्च भेरीश्च शतशश्चैव पुष्कलान् ॥ २८ ॥
अवादयन्त पञ्चालाः सिंहनादांश्च नेदिरे ।
तेऽभ्यधावन्त संरब्धा मद्रराजं तरस्विनम् ॥ २९ ॥
महता हर्षजेनाथ नादेन कुरुपुङ्गवाः ।
ह्रादेन गजघंटानां शंखानां निनदेन च ॥ ३० ॥
तूर्यशब्देन महता नादयन्तश्च मेदिनीम् ।
तान्प्रत्यगृह्णात्पुत्रस्ते मद्रराजश्च वीर्यवान् ॥ ३१ ॥
महामेघानिव बहूञ्छैलावस्तोदयावुभौ ।

रहो। अगाडीके दोनों पहियोंकी रक्षा करनेको नकुल और सहदेव, पिछले दहने पहियेकी रक्षाको सात्यकि, बांये की सेनापति धृष्टद्युम्न पीछेसे हमारे रथ की रक्षाके लिये अर्जुन और रथके आगे सब अस्त्र धारियोंमें श्रेष्ठ भीमसेन रहे। (२१—२५)

ऐसा होनेसे हम शल्यसे अधिक बलवान् होजायंगे, राजाकी ऐसी आज्ञा सुन सब प्रसन्न होकर बहुत अच्छा बहुत अच्छा कहने लगे और उसी प्रकार खडे होगये तब पाण्डवोंकी सेनामें फिर अत्यानन्द होने लगे, विशेषकर पाञ्चाल, सृञ्जय, सोमक और मत्य देशी क्षत्री बहुत प्रसन्न हुए॥ जिस समय राजा युधिष्ठिरने शल्यके मारनेकी प्रतिज्ञा की, तब पाञ्चाल वीर गर्जने और कूदने लगे, सेनामें शंख, भेर और नगारे बजाने लगे। (२६—२९)

सञ्जय बोले, हे राजन्! फिर तुम्हारे सब वीर शल्यको प्रधान बना कर सब वेगसे शल्यकी ओर चले; उस समय पाण्डवोंके गर्जने, हाथियोंकी चिंघाड, घोडोंके शब्द और शङ्ख आदिके शब्दसे ऐसा जान पडता था। मानो पृथ्वी फट जायगी। उन सबको आते देख राजा शल्य और दुर्योधन भी युद्ध करनेको चले, ये दोनों इस प्रकार युद्ध करने लगे। (३०—३१)

जैसे उदयाचल और अस्ताचल मेघों

शल्यस्तु समरश्लाघी धर्मराजमरिन्दमम् ॥ ३२ ॥
ववर्ष शरवर्षेण शम्बरं मघवा इव ।
तथैव कुरुराजोऽपि प्रगृह्य रुचिरं धनुः ॥ ३३ ॥
द्रोणोपदेशान्विविधान्दर्शयानो महामनाः ।
ववर्ष शरवर्षाणि चित्रं लघु च सुष्ठु च ॥ ३४ ॥
न चास्य विवरं कश्चिद्ददर्श चरतो रणे ।
तावुभौ विविधैर्बाणैस्ततक्षाते परस्परम् ॥ ३५ ॥
शार्दूलावामिषप्रेप्सू पराक्रान्ताविवाहवे ।
भीमस्तु तव पुत्रेण युद्धशौण्डेन सङ्गतः ॥ ३६ ॥
पाञ्चाल्यः सात्यकिश्चैव माद्रीपुत्रौ च पाण्डवौ ।
शकुनिप्रमुखान्वीरान्प्रत्यगृह्णन्समन्ततः ॥ ३७ ॥
तदासीत्तुमुलं युद्धं पुनरेव जयैषिणाम् ।
तावकानां परेषां च राजन्दुर्मन्त्रिते तव ॥ ३८ ॥
दुर्योधनस्तु भीमस्य शरेणानतपर्वणा ।
चिच्छेदादिश्य संग्रामे ध्वजं हेमपरिष्कृतम् ॥ ३९ ॥
स किङ्किणीकजालेन महता चारुदर्शनः ।

की जलधाराको सहते हैं। तब महावीर शल्य शत्रुनाशन युधिष्ठिरके ऊपर इस प्रकार बाण वर्षाने लगे। जैसे इन्द्रने शम्बरके ऊपर वर्षाये थे, राजा युधिष्ठिर ने भी विचित्र धनुष लेकर शीघ्रता सहित विचित्र और अद्भुत बाण वर्षाने आरम्भ करे; उस समय यह जान पडता था कि, युधिष्ठिर भी द्रोणाचार्यके एक प्रधान शिष्योंमें हैं, उस समय किसी वीरकी यह शक्ति नहीं थी कि, इस बातको जान सके कि युधिष्ठिर कब बाण निकालते हैं, कब चढाते हैं, कब धनुष खींचते हैं और कब छोडते हैं, राजा शल्य भी उस समय इसी प्रकार बाण छोडते थे, उस समय ये दोनों राजा ऐसे दिखाई देते थे मानों दो शार्दूल मांसके लिये लडरहे हैं। तब भीमसेन भी वीर दुर्योधनसे लडने लगे। धृष्टद्युम्न, सात्यकि, नकुल और सहदेव आदि वीर शकुनि आदि क्षत्रियोंसे लडने लगे। (३२-३७)

हे राजन्! तब फिर दोनों ओरके वीर अपनी अपनी विजयके लिये घोर युद्ध करने लगे। यह केवल आपकी उस बुरी सम्मतिहीका फल हुआ। तब दुर्योधनने एक बाणसे सोनेके दण्डवाली

पपात रुचिरः संख्ये भीमसेनस्य पश्यतः ॥ ४० ॥
पुनश्चास्य धनुश्चित्रं गजराजकरोपमम् ।
क्षुरेण शितधारेण प्रचकर्त्त नराधिपः ॥ ४१ ॥
स च्छिन्नधन्वा तेजस्वी रथशक्त्या सुतं तव ।
बिभेदोरसि विक्रम्य स रथोपस्थ आविशत् ॥ ४२ ॥
तस्मिन्मोहमनुप्राप्ते पुनरेव वृकोदरः ।
यन्तुरेव शिरः कायात्क्षुरप्रेणाहरत्तदा ॥ ४३ ॥
हतसूता हयास्तस्य रथमादाय भारत ।
व्यद्रवन्त दिशो राजन्हाहाकारस्तदाऽभवत् ॥ ४४ ॥
तमभ्यधावत्त्राणार्थं द्रोणपुत्रो महारथः ।
कृपश्च कृतवर्मा च पुत्रं तेऽपि परीप्सवः ॥ ४५ ॥
तस्मिन्विलुलिते सैन्ये त्रस्तास्तस्य पदानुगाः ।
गाण्डीवधन्वा विस्फार्य धनुस्तानहनच्छरैः ॥ ४६ ॥
युधिष्ठिरस्तु मद्रेशमभ्यधावदमर्षितः ।
स्वयं सन्नोदयन्नश्वान्दन्तवर्णान्मनोजवान् ॥ ४७ ॥
तत्राश्चर्यमपश्याम कुन्तीपुत्रे युधिष्ठिरे ।
पुरा भूत्वा मृदुर्दान्तो यत्तदा दारुणोऽभवत् ॥ ४८ ॥

भीमसेनकी ध्वजा काट दी। वह अनेक घण्टाओंसे युक्त सुन्दर ध्वजा भीमसेनके देखते देखते कटकर पृथ्वीपर गिर गई। हे पृथ्वीनाथ! फिर एक तेज बाणसे हाथीके सूंडके समान भीमसेनका धनुष काट दिया। तेजस्वी भीमसेनने एक तेज शक्ति दुर्योधनके हृदयमें मारी, तब राजा दुर्योधन मूर्च्छा खाकर रथमें गिर पडे। राजाको मूर्च्छित करके फिर भीमसेनने एक तेज बाणसे सारथीका शिर काट लिया, सारथीके मरनेसे दुर्योधनके घोडे रथ लेकर इधर उधरको भागने लगे। तब उनकी सेनामें हाहाकार होने लगा। (३८—४४)

उनकी रक्षा करनेको महारथ अश्वत्थामा, कृतवर्मा और कृपाचार्य दौडे जब भीमसेनसे डरकर यह सेना इधर उधरको भागने लगी, तब अर्जुनने अपने धनुषपर टङ्कार दी और बाणोंसे उन्हें मारने लगे। राजा युधिष्ठिर भी निर्मल दांतोंके समान सफेद घोडोंको शीघ्र दौडाते हुए क्रोधमें भरकर राजा शल्यकी ओर दौडे। (४४-४७)

उस समय राजा युधिष्ठिरका स्वरूप

विवृताक्षश्च कौन्तेयो वेपमानश्च मन्युना।
चिच्छेद योधान्निशितैः शरैः शतसहस्रशः ॥ ४९ ॥
यां यां प्रत्युद्ययौ सेनां तां तां ज्येष्ठः स पाण्डवः।
शरैरपातयद्राजन् गिरीन्वज्रैरिवोत्तमैः ॥ ५० ॥
साश्वसूतध्वजरथान्रथिनः पातयन्बहून्।
अक्रीडदेको बलवान्पवनस्तोयदानिव ॥ ५१ ॥
साश्वारोहांश्च तुरगान्पत्तींश्चैव सहस्रधा।
व्यपोथयत संग्रामे क्रुद्धो रुद्रः पशूनिव ॥ ५२ ॥
शून्यमायोधनं कृत्वा शरवर्षैः समन्ततः।
अभ्यद्रवत मद्रेशं तिष्ठ शल्येति चाब्रवीत् ॥ ५३ ॥
तस्य तच्चरितं दृष्ट्वा संग्रामे भीमकर्मणः।
वित्रेसुस्तावकाः सर्वे शल्यस्त्वेनं समभ्ययात्॥ ५४ ॥
ततस्तौ भृशसंक्रुद्धौ प्रध्माय सलिलोद्भवौ।
समाहूय तदान्योन्यं भर्त्सयन्तौ समीयतुः ॥ ५५ ॥
शल्यस्तु शरवर्षेण पीडयामास पाण्डवम्।

हमने अद्भुत देखा, क्यों कि पहले वे परम शान्त और इस समय महातेज होगये थे, उस समय कुंतीपुत्र राजा युधिष्ठिर लाल होरहे थे, शरीर कांप रहा था, तब उन्होंने अपने बाणोंसे सैकडों और सहस्रों वीरोंको मारडाला। उस समय महाराज जिस सेनाकी ओर चले जाते थे, उसको बाणोंसे इस प्रकार काटडालते थे, जैसे इन्द्र अपने वज्रसे पर्वतोंको। जैसे एकला वायु अनेक मेघोंको उडा देता है। ऐसे ही एकले बलवान महाराजने रथ, ध्वजा, पताका, सारथी और घोडोंके सहित अनेक महारथोंको मारकर पृथ्वीमें गिरा दिया। (४८-५१

जैसे भगवान शिव प्रलयकालमें क्रोध करके जगत्का नाश करते हैं। ऐसे ही महाराजने घोडोंके सहित वीर और सहस्रों घोडोंको मारडाला। इस प्रकार सेनाको मारकर राजा शल्यकी ओर दौडे और ऊंचे स्वरसे बोले कि, रे शल्य! खडा रह महावीर युधिष्ठिरके इस अद्भुत कर्मको देखकर तुम्हारी ओरके सब वीर डरने लगे। परन्तु शल्य वेडर होकर इनसे लडनेको चले, तब ये दोनों राजा क्रोधमें भरकर अपने अपने शङ्ख बजाने लगे और एक दूसरेको ललकारके डराने और युद्ध करनेको पुकारने लगे। शल्यने युधिष्ठिरके ऊपर

REGISTERED NO. B. 1819

[शल्यपर्व २]

महाभारत ।

भाषा--भाष्य--समेत

संपादक — श्रीपाद दामोदर सातवळेकर,
स्वाध्याय मंडल, औंध जि. सातारा

१२ अंकोंका मूल्य म. आ. से. ६) और वी. पी. से ७) विदेशके लिये ८)

मद्रराजं तु कौन्तेयः शरवर्षैरवाकिरत् ॥ ५६ ॥
अदृश्येतां तदा राजन्कङ्कपत्रिभिराचितौ ।
उद्भिन्नरुधिरौ शूरौ मद्रराजयुधिष्ठिरौ ॥ ५७ ॥
पुष्पितौ शुशुभाते वै वसन्ते किंशुकौ यथा ।
दीप्यमानौ महात्मानौ प्राणद्यूतेन दुर्मदौ ॥ ५८ ॥
दृष्ट्वा सर्वाणि सैन्यानि नाध्यवस्यंस्तयोर्जयम् ।
हत्वा मद्राधिपं पार्थो भोक्ष्यतेऽद्य वसुन्धराम्॥ ५९ ॥
शल्यो वा पाण्डवं हत्वा दद्याद्दुर्योधनाय गाम् ।
इतीव निश्चयो नाभूद्योधानां तत्र भारत ॥ ६० ॥
प्रदक्षिणमभूत्सर्वं धर्मराजस्य युध्यतः ।
ततः शरशतं शल्यो मुमोचाथ युधिष्ठिरे ॥ ६१ ॥
धनुश्चास्य शिताग्रेण बाणेन निरकृन्तत ।
सोऽन्यत्कार्मुकमादाय शल्यं शरशतैस्त्रिभिः॥ ६२ ॥
अविध्यत्कार्मुकं चास्य क्षुरेण निरकृंतत ।
अथास्य निजघानाश्वांश्चतुरो नतपर्वभिः ॥ ६३ ॥
द्वाभ्यामतिशिताग्राभ्यामुभौ तत्पार्ष्णिसारथी ।

और युधिष्ठिरने शल्यकी ओर सहस्रों बाण चलाये और शल्य युधिष्ठिरसे युद्ध करनेको चले । (५२-५६)

तब दोनों राजोंके शरीरसे रुधिर बहने लगे । सब शरीरोंमें बाण लग गये उस समय प्राणका मोह छोडनेवाले दोनों महात्मा राजोंकी ऐसी शोभा बढी जैसी वसन्त ऋतुमें फले हुए कचनारोंकी । (५७--५८)

हे भारत ! उस समय दोनों ओरके वीरोंमेंसे किसीको यह निश्चय नहीं था कि कौन जीतेगा ? कोई कहेगा कि आज शल्यको मारकर महाराज युधिष्ठिर चक्रवर्ती राजा होंगे और कोई विचार रहा था, कि आज राजा शल्य युधिष्ठिरको मारकर दुर्योधनको महाराज बनावेंगे, तब युधिष्ठिरके सारथीने अपना रथ शल्यके दहनी ओर लगा दिया तब, राजा शल्यने युधिष्ठिरके शरीरमें सौ बाण मारे और फिर एक तेज बाणसे उनका धनुष काट दिया तब युधिष्ठिरने शीघ्र दूसरा धनुष लेकर शल्यके शरीरमें तीन बाण मारे, फिर एक बाणसे उनका धनुष काटकर चार बाणोंसे चारों घोडोंको मारडाला । (५९-६३)

फिर एक तेज बाणसे सारथी और

ततोस्य दीप्यमानेन पीतेन निशितेन च ॥ ६४ ॥
प्रमुखे वर्त्तमानस्य भल्लेनापाहरद्ध्वजम् ।
ततः प्रभग्नं तत्सैन्यं दौर्योधनमरिन्दम ॥ ६५ ॥
ततो मद्राधिपं द्रौणिरभ्यधावत्तथा कृतम् ।
आरोप्य चैनं स्वरथे त्वरमाणः प्रदुद्रुवे ॥ ६६ ॥
मुहूर्त्तमिव तौ गत्वा नर्दमाने युधिष्ठिरे ।
स्थित्वा ततो मद्रपतिरन्यं स्यन्दनमास्थितः ॥ ६७ ॥
विधिवत्कल्पितं शुभ्रं महाम्बुदनिनादिनम् ।
सज्जयन्त्रोपकरणं द्विषतां लोमहर्षणम् ॥ ६८ ॥ [९५८]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यपर्वणि शल्ययुधिष्ठिरयुद्धे षोडशोऽध्यायः॥१६॥

सञ्जय उवाच— अथान्यद्धनुरादाय बलवान्वेगवत्तरम् ।
युधिष्ठिरं मद्रपतिर्भित्त्वा सिंह इवानदत् ॥ १ ॥
ततः स शरवर्षेण पर्जन्य इव वृष्टिमान् ।
अभ्यवर्षदमेयात्मा क्षत्रियं क्षत्रियर्षभः ॥ २ ॥
सात्यकिं दशभिर्विद्ध्वा भीमसेनं त्रिभिः शरैः ।
सहदेवं त्रिभिर्विद्ध्वा युधिष्ठिरमपीडयत् ॥ ३ ॥

एकसे रक्षा करनेवालेको मार डाला। फिर एक महातेज बाणसे उनकी ध्वजा भी काट दी, तब दुर्योधनकी सेना इधर उधरको भागने लगी तब इनकी रक्षा करनेको अश्वत्थामा दौडे और उन्हें अपने रथमें बिठाकर युद्धसे भाग गये, तब राजा युधिष्ठिर सिंहके समान गर्जने लगे। थोडी ही दूर जानेपर राजा शल्यका दूसरा रथ आगया, तब राजा शल्य अश्वत्थामाके रथसे उतरकर उस मेघके समान शब्दवाले शत्रुओंको कपानेवाले सब युद्धकी सामग्रीसे भरे उत्तम घोडे और सारथीसे युक्त रथ पर बैठे ॥ (६४—६८) [९५८]

शल्यपर्वमें सोलह अध्याय समाप्त।

शल्यपर्वमें सतरह अध्याय।

सञ्जय बोले, हे राजन् धृतराष्ट्र! तब दूसरा धनुष लेकर शल्यने युधिष्ठिरके शरीरमें बाण मारे, और सिंहके समान गर्जने लगे। तब क्षत्रियश्रेष्ठ पराक्रमी शल्य वीर युधिष्ठिरके ऊपर इस प्रकार बाण वर्षाने लगे। जैसे मेघ जल वर्षाते हैं। फिर सात्यकिके दश, भीमसेनके तीन और सहदेवको तीन बाण मारकर युधिष्ठिरके अनेक बाण मारे। (१-३)

तांस्तानन्यान्महेष्वासान्साश्वान्सरथकूबरान्।
अर्दयामास विशिखैरुल्काभिरिव कुञ्जरान् ॥ ४ ॥
कुञ्जरान्कुञ्जरारोहानश्वानश्वप्रयायिनः।
रथांश्च रथिनः सार्धं जघान रथिनां वरः ॥ ५ ॥
बाहूंश्चिच्छेद तरसा सायुधान्केतनानि च।
चकार च महीं योधैस्तीर्णां वेदीं कुशैरिव ॥ ६ ॥
तथा तमरिसैन्यानि घ्नन्तं मृत्युमिवान्तकम्।
परिवव्रुर्भृशं क्रुद्धाः पाण्डुपञ्चालसोमकाः ॥ ७ ॥
तं भीमसेनश्च शिनेश्च नप्ता माद्र्याश्च पुत्रौ पुरुषप्रवीरौ।
समागतं भीमबलेन राज्ञा पर्याप्तमन्योन्यमथाह्वयन्त ॥ ८ ॥
ततस्तु शूराः समरे नरेन्द्र नरेश्वरं प्राप्य युधां वरिष्ठम्।
आवार्य चैनं समरे नृवीरा जघ्नुः शरैः पत्रिभिरुग्रवेगैः ॥ ९ ॥
संरक्षितो भीमसेनेन राजा माद्रीसुताभ्यामथ माधवेन।
मद्राधिपं पत्रिभिरुग्रवेगैः स्तनान्तरे धर्मसुतो निजघ्ने ॥ १० ॥
ततो रणे तावकानां रथौघाः समीक्ष्य मद्राधिपतिं शरार्तम्।
पर्यावव्रुः प्रवरास्ते सुसज्जा दुर्योधनस्यानुमते पुरस्तात् ॥ ११ ॥
ततो द्रुतं मद्रजनाधिपो रणे युधिष्ठिरं सप्तभिरभ्यविद्ध्यत्।

फिर सब वीरोंको घोडे, सारथी और रथोंके सहित इस प्रकार व्याकुल कर दिया, जैसे मनुष्य मसालोंसे हाथी को भगाते हैं। महारथ शल्यने अपने बाणोंसे हाथी, रथ और घोडोंपर चढे वीरोंके हाथ काट डाले, और मरे हुए शरीरोंसे पृथ्वी इस प्रकार भर दी, जैसे होम करनेवाले, ब्राह्मण वेदीपर कुशा बिछाते हैं। तब पाण्डव, पाञ्चाल और सोमकवंशी प्रधान वीर उनकी ओर इस प्रकार दौडे जैसे यमराज मृत्युकी ओर दौडते हैं। तब महाराक्रमी युधिष्ठिरसे लडते हुए शल्यको भीमसेन, वीर नकुल, सहदेव और सात्यकि अपनी अपनी ओर पुकारने लगे। हे महाराज! तब ये सब वीर अपने तेज बाणोंसे वीर शल्यको युद्धमें रोककर बाण चलाने लगे, अनन्तर भीमसेन, नकुल और सहदेव आदि सब वीर युद्ध छोडकर केवल राजाकी रक्षा करने लगे। तब राजा युधिष्ठिरने शल्यकी छातीमें तीन बाण मारे। (४-१०)

इनके लगनेसे राजा शल्य व्याकुल होगये, तब दुर्योधनकी आज्ञासे अनेक

तं चापि पार्थो नवभिः पृषत्कै र्विव्याध राजंस्तुमुले महात्मा॥ १२ ॥
आकर्णपूर्णायतसम्प्रयुक्तैः शरैस्तदा संयति तैलधौतैः।
अन्योन्यमाच्छादयतां महारथौ मद्राधिपश्चापि युधिष्ठिरश्च ॥ १३ ॥
ततस्तु तूर्ण समरे महारथौ परस्परस्यान्तरमीक्षमाणौ।
शरैर्भृशं विव्यधतुर्नृपोत्तमौ महाबलौ शत्रुभिरप्रधृष्यौ ॥ १४ ॥
तयोर्धनुर्ज्यातलनिःस्वनो महान्महेन्द्रवज्राशनितुल्यनिःस्वनः।
परस्परं बाणगणैर्महात्मनोः प्रवर्षतोर्मद्रपपाण्डुवीरयोः ॥ १५ ॥
तौ चेरतुर्व्याघ्रशिशुप्रकाशौ महावनेष्वामिषगृद्धिनाविव।
विषाणिनौ नागवराविवोभौ ततक्षतुः संयति जातदर्पौ ॥ १६ ॥
ततस्तु मद्राधिपतिर्महात्मा युधिष्ठिरं भीमबलं प्रसह्य।
विव्याध वीरं हृदयेऽतिवेगं शरेण सूर्याग्निसमप्रभेण ॥ १७ ॥
ततोऽतिविद्धोऽथ युधिष्ठिरोऽपि सुसम्प्रयुक्तेन शरेण राजन्।
जघान मद्राधिपतिं महात्मा मुदं च लेभे ऋषभः कुरूणाम् ॥ १८ ॥
ततो मुहूर्त्तादिव पार्थिवेन्द्रो लब्ध्वा संज्ञां क्रोधसंरक्तनेत्रः।
शतेन पार्थं त्वरितो जघान सहस्रनेत्रप्रतिमप्रभावः ॥ १९ ॥
त्वरंस्ततो धर्मसुतो महात्मा शल्यस्य कोपान्नवभिः पृषत्कैः।

वीर राजा शल्यकी रक्षा करनेको दौडे, तब राजा शल्यने शीघ्र सात बाण युधिष्ठिरके मारे, महाराज युधिष्ठिरने भी उस समय नौ बाण मारे, तब ये दोनों महारथ राजा एक दूसरेकी ओर तेज बाण चलाने लगे। दोनों महापराक्रमी शत्रुनाशन राजा एक दूसरेके मारनेकी वेला देखने लगे, और तेज बाण वर्षाने लगे, मद्रदेशके राजा और महावीर महाराज युधिष्ठिरके उस युद्धमें चारों ओर धनुष और तालका ऐसा शब्द सुनाई देता था, जैसे बिजली गिरनेका।११-१५

उस समय ये दोनों वीर युद्धमें इस प्रकार लड रहे थे, जैसे मांसके लिये दो सिंह लडते हैं। जैसे एक मतवाला हाथी दूसरे मतवाले हाथीके शरीरमें दांत मारता है, ऐसे ही ये दोनोंभी बाण चला रहे थे। तब महात्मा शल्यने महावीर युधिष्ठिरके हृदयमें एक अग्नि और सूर्यके समान तेज बाण मारा। तव कुरुकुलश्रेष्ठ महापराक्रमी महात्मा युधिष्ठिरने भी उनकी छातीमें एक वैसा ही बाण मारा और बहुत प्रसन्न हुए। उसके लगनेसे शल्यको मूर्च्छा होगई, तब फिर चेतन्य होकर इन्द्रके समान वीर शल्यने युधिष्ठिरकी ओर बाण च-

भित्त्वाशुरस्तपनीयं च वर्म जघान षड्भिस्त्वपरैः पृषत्कैः॥ २० ॥
ततस्तु मद्राधिपतिः प्रकृष्टं धनुर्विकृष्य व्यसृजन्पृषत्कान्।
द्वाभ्यां शराभ्यां च तथैव राज्ञश्चिच्छेद चापं कुरुपुङ्गवस्य॥ २१ ॥
नवं ततोऽन्यत्समरे प्रगृह्य राजा धनुर्घोरतरं महात्मा।
शल्यं तु विव्याध शरैः समन्ताद्यथा महेन्द्रो नमुचिं शिताग्रैः॥ २२ ॥
ततस्तु शल्यो नवभिः पृषत्कैर्भीमस्य राज्ञश्च युधिष्ठिरस्य।
निकृत्य रौक्मे पटुवर्मणी तयोर्विदारयामास भुजौ महात्मा॥ २३ ॥
ततोऽपरेण ज्वलनार्कतेजसा क्षुरेण राज्ञो धनुरुन्ममाथ।
कृपश्च तस्यैव जघान सूतं षड्भिः शरैः सोऽभिमुखः पपात॥ २४ ॥
मद्राधिपश्चापि युधिष्ठिरस्य शरैश्चतुर्भिर्निजघान वाहान्।
वाहांश्च हत्वा व्यकरोन्महात्मा योधक्षयं धर्मसुतस्य राज्ञः॥ २५ ॥
तथा कृते राजनि भीमसेनो मद्राधिपस्याथ ततो महात्मा।
छित्त्वा धनुर्वेगवता शरेण द्वाभ्यामविध्यत्सुभृशं नरेन्द्रम्॥ २६ ॥
तथाऽपरेणास्य जहार यन्तुः कायाच्छिरः संहननीयमध्यात्।
जघान चाश्वांश्चतुरः सुशीघ्रं तथा भृशं कुपितो भीमसेनः॥ २७ ॥
तमग्रणीः सर्वधनुर्धराणामेकं चरन्तं समरेऽतिवेगम्।

लाये, तब राजा युधिष्ठिरने क्रोध करके सोनेके बने राजा शल्यके कवचको काटकर छः तेज बाण उनकी छातीमें मारे। (१५—२०)

तब राजा शल्यने क्रोध करके अपना धनुष खींचा और दो बाणोंसे कुरुकुल-श्रेष्ठ युधिष्ठिरका धनुष काट दिया। तब महात्मा युधिष्ठिरने एक दूसरा घोर धनुष लेकर शल्यको अपने बाणोंसे इस प्रकार व्याकुल कर दिया, जैसे इन्द्रने नमुचिको व्याकुल किया था, तब महात्मा शल्यने अपने नऊ तेज बाणोंसे भीमसेन और राजा युधिष्ठिरके सोनेके कवचोंको काटकर दोनोंके हाथोंमें अनेक बाण मारे, और फिर एक तेज बाणसे महाराज युधिष्ठिरका धनुष काट दिया उसी समय कृपाचार्यने उनके सारथीको मारकर गिरा दिया, तब राजा शल्यने चार बाणोंसे घोडे भी मारडाले, और अनेक वीरोंको भी मारडाला। २१—२५

तब राजाको व्याकुल देख महात्मा भीमसेनने एक तेज बाणसे शल्यका धनुष काटकर दो बाण उनकी छातीमें मारे, फिर क्रोध करके एक बाणसे सारथी और चारसे चारों घोडोंको मार डाला, तब सब धनुषधारियोंमें श्रेष्ठ

भीमः शतेन व्यकिरच्छराणां माद्रीपुत्रः सहदेवस्तथैव ॥ २८ ॥
तैः सायकैर्मोहितं वीक्ष्य शल्यं भीमः शरैरस्य चकर्त्त वर्म ।
स भीमसेनेन निकृत्तवर्मा मद्राधिपश्चर्मसहस्रतारम् ॥ २९ ॥
प्रगृह्य खड्गं च रथान्महात्मा प्रस्कंद्य कुन्तीसुतमभ्यधावत् ।
छित्त्वा रथेषां नकुलस्य सोऽथ युधिष्ठिरं भीमबलोऽभ्यधावत् ॥ ३० ॥
तं चापि राजानमथोत्पतन्तं क्रुद्धं यथैवान्तकमापतन्तम् ।
धृष्टद्युम्नो द्रौपदेयाः शिखण्डी शिनेश्च नप्ता सहसा परीयुः ॥ ३१ ॥
अथास्य चर्माप्रतिमं न्यकृन्तद्भीमो महात्मा नवभिः पृषत्कैः ।
खड्गं च भल्लैर्निचकर्त्त मुष्टौ नदन्प्रहृष्टस्तव सैन्यमध्ये ॥ ३२ ॥
तत्कर्म भीमस्य समीक्ष्य हृष्टास्ते पाण्डवानां प्रवरा रथौघाः ।
नादं च चक्रुर्भृशमुत्स्मयन्तः शंखांश्च दध्मुः शशिसन्निकाशान् ॥३३॥
तेनाथ शब्देन विभीषणेन तथाऽभितप्तं बलमप्रधृष्यम् ।
कां-दिग्भूतं रुधिरेणोक्षिताङ्गं विसंज्ञकल्पं च तदा विषण्णम् ॥ ३४ ॥
स मद्रराजः सहसा विकीर्णो भीमाग्रगैः पाण्डवयोधमुख्यैः ।
युधिष्ठिरस्याभिमुखं जवेन सिंहो यथा मृगहेतोः प्रयातः ॥ ३५ ॥
स धर्मराजो निहताश्वसूतः क्रोधेन दीप्तो ज्वलनप्रकाशः ।

अनेक वीरोंसे एकले युद्ध करते हुए वीर शल्यके शरीरमें भीमसेन और सहदेवने सो सौ बाण मारे, उनसे राजा शल्यका कवच कटकर पृथ्वीमें गिर पडा, तब राजा शल्य घबडाकर सहस्रों फूलवाली ढाल और खड्ग लेकर रथसे उतरे और युधिष्ठिरकी ओर दौडे, तब नकुलको अपनी ओर आते देख उनके रथका जुआ काट दिया, राजा शल्यको क्रोध भरे यमराजके समान युधिष्ठिरकी ओर दौडते देख धृष्टद्युम्न अपने भानजोंके सहित रथसे उतर कर राजाकी रक्षा करनेको दौडे। (२९-३१)

इतनेही समयमें भीमसेनने नौ बाणोंसे शल्यके खड्ग और ढालको काट दिया और गर्जने लगे, भीमसेनकी जीत और शल्यकी हार देखकर उधरके वीर प्रसन्न होकर चन्द्रमाके समान सफेद शंख बजाने लगे। उस शब्दसे और बाणोंसे व्याकुल होकर तुम्हारी सेना इधर उधरको भागने लगी। उन भीमसेन आदि वीरोंके बाणोंको सहते हुए टूटा खड्ग लिये राजा शल्य युधिष्ठिर की ओर इस प्रकार दौडे जैसे बडा सिंह छोटे हरिणपर दौडता है। राजा युधिष्ठिर सारथी और घोडोंके मरनेसे

दृष्ट्वा च मद्राधिपतिं स तूर्णं समभ्यधावत्तमरिं बलेन ॥ ३६ ॥
गोविंदवाक्यं त्वरितं विचिन्त्य दध्रे मतिं शल्यविनाशनाय ।
स धर्मराजो निहताश्वसूतो रथे तिष्ठन् शक्तिमेवाभ्यकांक्षत् ॥ ३७ ॥
तच्चापि शल्यस्य निशम्य कर्म महात्मनो भागमथावशिष्टम् ।
कृत्वा मनः शल्यवधे महात्मा यथोक्तमिन्द्रावरजस्य चक्रे ॥ ३८ ॥
स धर्मराजो मणिहेमदण्डां जग्राह शक्तिं कनकप्रकाशाम् ।
नेत्रे च दीप्ते सहसा विवृत्य मद्राधिपं क्रुद्धमना निरैक्षत् ॥ ३९ ॥
निरीक्षितोऽसौ नरदेवराज्ञा पूतात्मना निर्हृतकल्मषेण ।
आसीन्नयद्भस्मसान्मद्रराजस्तदद्भुतं मे प्रतिभाति राजन् ॥ ४० ॥
ततस्तु शक्तिं रुचिरोग्रदण्डां मणिप्रवेकोज्ज्वलितां प्रदीप्ताम् ।
चिक्षेप वेगात्सुभृशं महात्मा मद्राधिपाय प्रवरः कुरूणाम् ॥ ४१ ॥
दीप्तामथैनां प्रहितां बलेन सविस्फुलिंगां सहसाऽऽपतंतीम् ।
प्रैक्षन्त सर्वे कुरवः समेता दिवो युगान्ते महतीमिवोल्काम् ॥४२॥
तां कालरात्रीमिव पाशहस्तां यमस्य धात्रीमिव चोग्ररूपाम् ।
स ब्रह्मदण्डप्रतिमाममोघां ससर्ज यत्तो युधि धर्मराजः ॥ ४३ ॥
गन्धस्रगग्र्यासनपानभोजनैरभ्यर्चितां पाण्डुसुतैः प्रयत्नात् ।

क्रोधमें भरकर अग्निके समान प्रकाशित होने लगे। शल्यको अपनी ओर आते देख और यदुकुलश्रेष्ठ श्रीकृष्णके वचनको स्मरण करके शल्यके मारनेका विचार करने लगे। फिर महात्मा शल्यके पराक्रमको विचारकर श्रीकृष्णका वचन सत्य करनेके लिये साङ्गी चलाने की इच्छाकी तब युधिष्ठिरने उस सोनेके दण्डवाली, रत्नोंसे जडी, साङ्गीको हाथमें लेकर और क्रोधसे आंख फैलाकर शल्यकी ओर देखा। (३२–३९)

हे राजन्! पापरहित राजोंके महाराज महावीर राजा युधिष्ठिरके क्रोध भरे नेत्रोंके देखनेसे राजा शल्य भस्म न होगये, यही देखकर हम सब आश्चर्य करने लगे, तब कुरुकुलश्रेष्ठ महात्मा युधिष्ठिरने वह रत्न जडे सोनेके दण्डवाली साङ्गी बलसे शल्यकी ओर चलाई उस जलती हुई, वेगसे दौडती हुई साङ्गिको आते देख सब वीरोंने यह जाना कि यह प्रलय कालकी बिजली आकाशसे चली आती है, वह हाथमें लिये कालरात्रिके समान घोर, यमराजकी माताके समान भयानक, ब्रह्माके दण्डके समान घोर और जलती हुई आगके समान सांगि युधिष्ठिरके हाथसे छूटी,

सांवर्त्तकाग्निप्रतिमां ज्वलन्तीं कृत्यामथर्वाङ्गिरसीमिवोग्राम् ॥ ४४ ॥
ईशानहेतोः प्रतिनिर्मितां तां त्वष्ट्रा रिपूणामसुदेहभक्ष्याम् ।
भूम्यन्तरिक्षादिजलाशयानि प्रसह्य भूतानि निहन्तुमीशाम् ॥४५॥
घण्टापताकां मणिवज्रनीलां वैदूर्यचित्रां तपनीयदण्डाम् ।
त्वष्ट्रा प्रयत्नान्नियमेन क्लृप्तां ब्रह्मद्विषामन्तकरीममोघाम् ॥ ४६ ॥
बलप्रयत्नादधिरूढवेगां मन्त्रैश्च घोरैरभिमन्त्र्य यत्नात् ।
ससर्ज मार्गेण च तां परेण वधाय मद्राधिपतेस्तदानीम् ॥ ४७ ॥
हतोऽसि पापेत्यभिगर्जमानो रुद्रोऽन्धकायान्तकरं यथेषुम् ।
प्रसार्य बाहुं सुदृढं सुपाणिं क्रोधेन नृत्यन्निव धर्मराजः ॥ ४८ ॥
तां सर्वशक्त्या प्रहितां सुशक्तिं युधिष्ठिरेणाप्रतिवार्यवीर्याम् ।
प्रतिग्रहायाभिननर्द शल्यः सम्यग्घुतामग्निरिवाज्यधाराम् ॥ ४९ ॥
सा तस्य मर्माणि विदार्य शुभ्रमुरो विशालं च तथैव भित्त्वा ।
विवेश गां तोयमिवाप्रसक्ता यशो विशालं नृपतेर्दहन्ती ॥ ५० ॥

युधिष्ठिरने जिसे अनेक वर्षोंसे सुगन्ध माला और भोजनोंसे पूजा था जो बहुत दिनसे पाण्डवोंके घरमें थी, उसी सांगिको अथर्वा और अङ्गिरा मुनिकी बनाई हुई मायाके समान छोडा वह शक्ति प्रलयकालकी जलती हुई आग्निके समान चली। इस शक्तिको विश्वकर्माने शिवके लिये बनाया था, यह सब शत्रुओंका मांस खानेवाली तथा आकाश, पाताल और भूमिके सब वीरोंको मारनेमें समर्थ थी, यह राक्षसोंके मारनेवाली अत्यन्त यत्नसे विश्वकर्माकी बनाई घोर शक्तियुक्त सोनेके दण्डवाली घण्टा जडी और मणियोंसे भरी थी, इसीको महाराज युधिष्ठिरने घोर मन्त्रोंसे मन्त्रित करके अत्यन्त बल और यत्नसे शल्यके मारनेको छोडा। (४०-४७)

धर्मराजने उस शक्तिको इस प्रकार चलाया जैसे शिवने अन्धक दानवसे मारनेको बाण छोडा था। फिर क्रोधसे नाचते हुए धर्मराज दोनों हाथ उठाकर शल्यसे बोले, रे पापी ! तू मारा गया! जैसे घी पडनेसे आग बढती है ऐसे ही उस युधिष्ठिरके बलसे भरी हुई निवारण करने अयोग्य साङ्गीको अपनी ओर आते देख राजा शल्यका क्रोध भडक उठा और उसे बचानेको उन्होंने बहुत यत्न किये, परन्तु कुछ न होसका। वह शक्ति महाराज शल्यके मर्मस्थान और हृदयको काटती हुई उनके यशके सहित इस प्रकार पृथ्वीमें घुस गई। जैसे कोई लकडी जलमें घुस जाती है तब राजा

नासाक्षिकर्णास्यविनिःसृतेन प्रस्यन्दता च व्रणसंभवेन ।
संसिक्तगात्रो रुधिरेण सोऽभूत्क्रौञ्चो यथा स्कन्दहतो महाद्रिः ॥५१॥
प्रसार्य बाहू च रथाद्गतो गां संछिन्नवर्मा कुरुनन्दनेन ।
महेन्द्रवाहप्रतिमो महात्मा वज्राहतं शृंगमिवाचलस्य ॥ ५२ ॥
बाहू प्रसार्याभिमुखो धर्मराजस्य मद्रराट् ।
ततो निपतितो भूमाविंद्रध्वज इवोच्छ्रितः ॥ ५३ ॥
स तथा भिन्नसर्वांगो रुधिरेण समुक्षितः ।
प्रत्युद्गत इव प्रेम्णा भूम्या स नरपुङ्गवः ॥ ५४ ॥
प्रियया कान्तया कांतः पतमान इवोरसि ।
चिरं भुक्त्वा वसुमतीं प्रियां कांतामिव प्रभुः ॥ ५५ ॥
सर्वैरंगैः समाश्लिष्य प्रसुप्त इव चाभवत् ।
धर्म्ये धर्मात्मना युद्धे निहते धर्मसूनुना ॥ ५६ ॥
सम्यग्घुत इव स्विष्टः प्रशान्तोऽग्निरिवाध्वरे ।
शक्त्या विभिन्नहृदयं विप्रविद्धायुधध्वजम् ॥ ५७ ॥
संशांतमपि मद्रेशं लक्ष्मीर्नैव विमुंचति ।

शल्यके आंख, नाक, कान और हृदयसे रुधिर बहने लगा और इस प्रकार पृथ्वीमें गिर पडे जैसे जड कटनेसे बडा वृक्ष। (४८–५१)

पर्वत और इन्द्रके हाथीके समान पराक्रमी महात्मा शल्य वज्रसे कटे पर्वतके शिखरके समान पृथ्वीपर हाथ फैलाकर गिर गये। राजा शल्य मरते हुए भी दोनों हाथ फैलाकर इन्द्रकी ध्वजाके समान राजा युधिष्ठिरके आगे हीको गिरे, मनुष्योंमें श्रेष्ठ राजा शल्य सब शरीर कटनेपर पृथ्वीमें पडे ऐसे दीखते थे, मानों अभी बहुत प्रसन्न हैं, जैसे अपनी प्यारी स्त्रीसे बहुत दिन भोग करके विदेश चलते समय पति अपने हृदयसे उसे लगाता है ऐसे ही बहुत दिन भूमिको भोग करके पृथ्वीमें पडे राजा शल्य दीखते थे, मानों इसे अपने हृदयसे लगा रहे हैं। (५१–५५)

उस समय धर्मात्मा युधिष्ठिरकी शक्तिसे धर्मयुद्धमें मरे हुए राजा शल्य ऐसे दीखते थे मानो सब शरीरोंसे अपनी प्यारी स्त्रीसे लपटे हुए सोते हैं। जैसे अनेक आहुति पाई यज्ञकी अग्नि शान्त होजाती है ऐसे ही राजा शल्य भी शान्त होगये। ध्वजा और शस्त्र नाश होनेपर भी राजा शल्यका तेज नाश नहीं हुआ। (५६—५८)

ततो युधिष्ठिरश्चापमादायेन्द्रधनुष्प्रभम् ॥ ५८ ॥
व्यधमद्द्विषतः संख्ये खगराडिव पन्नगान् ।
देहान्सुनिशितैर्भल्लै रिपूणां नाशयन् क्षणात् ॥ ५९ ॥
ततः पार्थस्य बाणौघैरावृताः सैनिकास्तव ।
निमीलिताक्षाः क्षिण्वन्तो भृशमन्योन्यमर्दिताः ॥६०॥
क्षरन्तो रुधिरं देहैर्विपन्नायुधजीविताः ।
ततः शल्ये निपतिते मद्रराजानुजो युवा ॥ ६१ ॥
भ्रातुस्तुल्यो गुणैः सर्वैं रथी पाण्डवमभ्ययात् ।
विव्याध च नरश्रेष्ठो नाराचैर्बहुभिस्त्वरन् ॥ ६२ ॥
हतस्यापचितिं भ्रातुश्चिकीर्षुर्युद्धदुर्मदः ।
तं विव्याधाशुगैः षड्भिर्धर्मराजस्त्वरन्निव ॥ ६३ ॥
कार्मुकं चास्य चिच्छेद क्षुराभ्यां ध्वजमेव च ।
ततोऽस्य दीप्यमानेन सुदृढेन शितेन च ॥ ६४ ॥
प्रमुखे वर्त्तमानस्य भल्लेनापाहरच्छिरः ।
सकुण्डलं तद्ददृशे पतमानं शिरो रथात् ॥ ६५ ॥
पुण्यक्षयमनुप्राप्य पतन् स्वर्गादिव च्युतः ।
तस्यापकृत्तशीर्षं तु शरीरं पतितं रथात् ॥ ६६ ॥

तब राजा युधिष्ठिर इन्द्रकी धनुषके समान धनुष लेकर शत्रुओंको इस प्रकार मारने लगे। जैसे गरुड सांपको मारे, तब राजा युधिष्ठिरके बाण तुम्हारी सब सेनामें दीखने लगे और योद्धा आंख बन्द करके इधर उधरको भागने लगे। उनके भागनेसे उन्हींकी सेनाका नाश होने लगा, तुम्हारी सेनाके सब वीरोंके शरीरसे रुधिर बहने लगा। राजा शल्य के मरनेके पश्चात् उनका छोटा भाई रथमें बैठकर युधिष्ठिरसे युद्ध करनेको आया और अनेक बाण चलाने लगा। (५८—६२)

ये भी राजा शल्यहीके समान सब गुणोंसे भरा था उसकी यह इच्छा थी कि अपने मरे हुए भाईका बदला लूं। तब धर्मराजने शीघ्रता सहित उसके शरीरमें छः बाण मारे फिर एक बाणसे धनुष और एकसे ध्वजा काट दी, फिर एक तेजबाणसे कुण्डल और मुकुट सहित उसका शिर काटकर पृथ्वीमें गिरा दिया। रथसे गिरता हुआ उसका शिर ऐसा दीखा जैसे पुण्य नाश होनेपर आकाशसे तारा टूटता है। जब रुधिरमें

रुधिरेणावसिक्ताङ्गं दृष्ट्वा सैन्यमभज्यत ।
विचित्रकवचे तस्मिन्हते मद्रनृपानुजे ॥ ६७ ॥
हाहाकारं त्वकुर्वाणाः कुरवोऽभिप्रदुद्रुवुः ।
शल्यानुजं हतं दृष्ट्वा तावकास्त्यक्तजीविताः ॥ ६८ ॥
वित्रेसुः पाण्डवभयाद्रजोध्वस्तास्तदा भृशम् ।
तांस्तथा भज्यमानांस्तु कौरवान् भरतर्षभ ॥ ६९ ॥
शिनेर्नप्ता किरन् बाणैरभ्यवर्तत सात्यकिः ।
तमायान्तं महेष्वासं दुष्प्रसह्यं दुरासदम् ॥ ७० ॥
हार्दिक्यस्त्वरितो राजन्प्रत्यगृह्णाद्भीतवत् ।
तौ समेतौ महात्मानौ वार्ष्णेयौ वरवाजिनौ ॥ ७१ ॥
हार्दिक्यः सात्यकिश्चैव सिंहाविव बलोत्कटौ ।
इषुभिर्विमलाभासैश्छादयन्तौ परस्परम् ॥ ७२ ॥
अर्चिभिरिव सूर्यस्य दिवाकरसमप्रभौ ।
चापमार्गबलोद्धूतान्मार्गणान्वृष्णिसिंहयोः ॥ ७३ ॥
आकाशगानपश्याम पतङ्गानिव शीघ्रगान् ।
सात्यकिं दशभिर्विद्ध्वा हयांश्चास्य त्रिभिः शरैः ॥ ७४ ॥
चापमेकेन चिच्छेद हार्दिक्यो नतपर्वणा ।
तन्निकृत्तं धनुः श्रेष्ठमपास्य शिनिपुङ्गवः ॥ ७५ ॥

भीगा शिर रहित उसका शरीर पृथ्वीमें गिरा तब उसके सङ्गके सब वीर इधर उधरको भागने लगे। शल्यके भाईको मरा देख तुम्हारी सेनामें हाहाकार होने लगा और सब लोग प्राणोंकी आशा छोड रोते और चिल्लाते इधर उधरको भागने लगे। तुम्हारी सेनाकी यह दशा देख महारथ महाधनुषधारी सात्यकी बाण वर्षाते दौडे। उनको आते देख कृतवर्मा बेडर होकर युद्ध करे लगे। ये दोनों वृष्णिवंशी वीर उत्तम घोडेयुक्त रथोंपर बैठकर मतवाले सिंहोंके समान लडने लगे। ६३-७२

ये दोनों सूर्यके समान तेज वृष्णिकुलसिंह वीर तरुण सूर्यकी किरणके समान तेज बाण चलाने लगे। हमने उस समय इनके बाण वेगसे उडते हुए पक्षियोंके समान आकाशमें देखे तब कृतवर्माने सात्यकी के शरीरमें दश और घोडोंके तीन बाण मारा। फिर एक बाणसे उन का धनुष काट दिया। सात्यकीने उस धनुषको फेंककर शीघ्रतासे एक दूसरा

अन्यदादत्त वेगेन वेगवत्तरमायुधम् ।
तदादाय धनुः श्रेष्ठं वरिष्ठः सर्वधन्विनाम् ॥ ७६ ॥
हार्दिक्यं दशभिर्बाणैः प्रत्यविध्यत्स्तनान्तरे ।
ततो रथं युगेषां च छित्वा भल्लैः सुसंयतैः ॥ ७७ ॥
अश्वांस्तस्यावधीत्तूर्णमुभौ च पार्ष्णिसारथी ।
ततस्तं विरथं दृष्ट्वा कृपः शारद्वतः प्रभो ॥ ७८ ॥
अपोवाह ततः क्षिप्रं रथमारोप्य वीर्यवान् ।
मद्रराजे हते राजन्विरथे कृतवर्मणि ॥ ७९ ॥
दुर्योधनबलं सर्वं पुनरासीत्पराङ्मुखम् ।
स्वे परे नान्वबुध्यन्त सैन्येन रजसाऽऽवृते ॥ ८० ॥
बलं तु हतभूयिष्ठं तत्तदासीत्पराङ्मुखम् ।
ततो मुहूर्तात्तेऽपश्यन् रजो भौमं समुत्थितम् ॥ ८१ ॥
विविधैः शोणितस्रावैः प्रशान्तं पुरुषर्षभ ।
ततो दुर्योधनो दृष्ट्वा भग्नं स्वबलमन्तिकात् ॥ ८२ ॥
जवेनापततः पार्थानेकः सर्वानवारयत् ।
पाण्डवान्सरथान्दृष्ट्वा धृष्टद्युम्नं च पार्षतम् ॥ ८३ ॥
आनर्तं च दुराधर्षं शितैर्बाणैरवारयत् ।
तं परे नाभ्यवर्त्तन्त मर्त्या मृत्युमिवागतम् ॥ ८४ ॥
अथान्यं रथमास्थाय हार्दिक्योऽपि न्यवर्तत ।

श्रेष्ठ धनुष लिया और कृतवर्माकी छातीमें दस बाण मारकर रथ काट दिया और रक्षकोंको भी मारडाला; उनका रथ कटा देखकर बलवान कृपाचार्य दौडे और अपने रथमें बिठाकर युद्धसे उन्हें हटा दिया (७३—७९)

शल्यके मारे जाने और कृतवर्माके भागनेपर दुर्योधनकी सब सेना इधर उधरको भाग गई परन्तु उस समय इतनी धूल उठी कि, पाण्डवोंको कोई भागता हुआ न दीखा। जब यह दुर्योधनकी सब सेना भाग गई और भूमि शान्त होगई तब सबने युद्धभूमि में किसीको न देखा। दुर्योधन अपनी सेनाको भागते देख तथा पाण्डव और धृष्टद्युम्नकी रथपर चढे अपनी ओर आते देख एकले ही सबसे युद्ध करने लगे, उनको लडते देख तुम्हारी ओरके और वीर भी लौटे। तब कृतवर्मा दूसरे रथमें बैठकर फिर युद्ध करनेको आये, तब महारथ महा-

ततो युधिष्ठिरो राजा त्वरमाणो महारथः ॥ ८५ ॥
चतुर्भिर्निजघानाश्वान्पत्रिभिः कृतवर्मणः ।
विव्याध गौतमं चापि षड्भिर्भल्लैः सुतेजनैः ॥ ८६ ॥
अश्वत्थामा ततो राज्ञा हताश्वं विरथीकृतम् ।
समपोवाह हार्दिक्यं स्वरथेन युधिष्ठिरात् ॥ ८७ ॥
ततः शारद्वतः षड्भिः प्रत्यविद्ध्यद्युधिष्ठिरम् ।
विव्याध चाश्वान्निशितैस्तस्याष्टाभिः शिलीमुखैः ॥८८॥
एवमेतन्महाराज युद्धशेषमवर्त्तत ।
तव दुर्मन्त्रिते राजन्सहपुत्रस्य भारत ॥ ८९ ॥
तस्मिन्महेष्वासधरे विशस्ते संग्राममध्ये कुरुपुङ्गवेन ।
पार्थाः समेताः परमप्रहृष्टाः शङ्खान्प्रदध्मुर्हतमीक्ष्य शल्यम् ॥९०॥
युधिष्ठिरं च प्रशशंसुराजौ पुराकृते वृत्रवधे यथेन्द्रम् ।
चक्रुश्च नानाविधवाद्यशब्दान्निनादयन्तो वसुधां समेताः ॥९१॥ [१०४९]

इति श्रीमहाभारते शतसाहस्त्र्यां संहितायां वैयासिक्यां शल्यपर्वणि शल्यवधे सप्तदशोऽध्यायः॥ १७ ॥

सञ्जय उवाच— शल्येऽथ निहते राजन्मद्रराजपदानुगाः ।
रथाः सप्तशता वीर निर्ययुर्महतो बलात् ॥ १ ॥

राजा युधिष्ठिर बहुत शीघ्रतासे इनके चारों घोडोंको मारडाला । और कृपाचार्य के शरीरमें छः बाण मारे, तब अश्वत्थामाने कृतवर्माको अपने रथपर बिठलाकर युधिष्ठिरके आगेसे हटा दिया । (८०-८७)

तब कृपाचार्यने युधिष्ठिरके शरीरमें छः बाण मारकर इनके घोडोंको आठ बाणोंसे मारडाला । हे भारत ! हे महाराज ! इस प्रकार यह अन्त समयमें घोर युद्ध हुआ । इसका कारण केवल आपकी और आपके पुत्रोंकी दुष्टता है। युधिष्ठिरकी सांगीसे महाधनुषधारी शल्यको मरा हुआ देख पाण्डवोंके प्रधान वीर सब अपने अपने शङ्ख बजाने और प्रसन्न होकर गर्जने लगे । युधिष्ठिरकी सेनामें चारों ओर बाजे बजने लगे। तब सब वीर उनके पास आकर इस प्रकार प्रशंसा करने लगे, जैसे वृत्रासुरको मारने पर देवतोंने इन्द्रकी स्तुति की थी ॥ (८८—९१) [१०४९]

शल्यपर्वमें सतरह अध्याय समाप्त ।

शल्यपर्वमें अठारह अध्याय ।

सञ्जय बोले हे राजन् ! मद्रराज शल्यके मरनेपर उनकी सेनाके सात सौ, महारथ अपनी सब सेनाके सहित अपने

दुर्योधनस्तु द्विरदमारुह्याचलसन्निभम् ।
छत्रेण ध्रियमाणेन वीज्यमानश्च चामरैः ॥ २ ॥
न गन्तव्यं न गन्तव्यमिति मद्रानवारयत् ।
दुर्योधनेन ते वीरा वार्यमाणाः पुनः पुनः ॥ ३ ॥
युधिष्ठिरं जिघांसन्तः पाण्डूनां प्राविशन्बलम् ।
ते तु शूरा महाराज कृतचित्ताश्च योधने ॥ ४ ॥
धनुःशब्दं महत्कृत्वा सहायुध्यन्त पाण्डवैः ।
श्रुत्वा च विहतं शल्यं धर्मपुत्रं च पीडितम् ॥ ५ ॥
मद्रराजप्रिये युक्तैर्मद्रकाणां महारथैः ।
आजगाम ततः पार्थो गाण्डीवं विक्षिपन्धनुः ॥ ६ ॥
पूरयन्रथघोषेण दिशः सर्वा महारथः ।
ततोऽर्जुनश्च भीमश्च माद्रीपुत्रौ च पाण्डवौ ॥ ७ ॥
सात्यकिश्च नरव्याघ्रो द्रौपदेयाश्च सर्वशः ।
धृष्टद्युम्नः शिखण्डी च पाञ्चालाः सहसोमकैः ॥ ८ ॥
युधिष्ठिरं परीप्सन्तः समन्तात्पर्यवारयन् ।
ते समन्तात्परिवृताः पाण्डवाः पुरुषर्षभाः ॥ ९ ॥
क्षोभयन्ति स्म तां सेनां मकराः सागरं यथा ।

देशको चले, तब राजा दुर्योधन एक मतवाले हाथी पर चढके उन्हें लौटानेको चले और जाकर कहने लगे। कि आपलोगोंको युद्ध छोडकर जाना उचित नहीं, राजा दुर्योधनकी बहुत प्रार्थना सुनकर मद्रदेशी सेना फिर लौटी और पाण्डवोंकी सेनासे फिर घोर युद्ध करने लगी और उन सब वीरोंने यह निश्चय कर लिया कि, केवल युधिष्ठिरहीको मारेंगे। (१—४)

उनके धनुषोंके शब्दसे पृथ्वी कांपने लगी, और युधिष्ठिरके सङ्ग घोर युद्ध करने लगे, राजा शल्यको मरा और युधिष्ठिरको उनकी सेनासे घिरा सुनकर गाण्डीव धनुषपर टङ्कार देते हुए अर्जुन दौडे, उनके रथके शब्दसे सब दिशा पूरित होगई तब भीमसेन, अर्जुन, नकुल, सहदेव, पुरुषसिंह सात्यकि, द्रौपदीके पांचो पुत्र, धृष्टद्युम्न और शिखण्डी आदि पाञ्चाल और सोमकवंशी प्रधान वीर युधिष्ठिरको चारों ओरसे घेरकर तुम्हारी सेनासे घोर युद्ध करने लगे। (५—९)

उस समय तुम्हारी सेना इस प्रकार व्याकुल होगई जैसे बडे मगरके आनेसे

वृक्षानिव महावाताः कम्पयन्ति स्म तावकान् ॥ १० ॥
पुरो वातेन गङ्गेव क्षोभ्यमाणा महानदी ।
अक्षोभ्यत तदा राजन्पाण्डूनां ध्वजिनी ततः॥ ११ ॥
प्रस्कन्द्य सेनां महतीं महात्मानो महारथाः ।
बहवश्चुक्रुशुस्तत्र क स राजा युधिष्ठिरः ॥ १२ ॥
भ्रातरो वाऽस्य ते शूरा दृश्यन्ते नेह केनच ।
धृष्टद्युम्नोऽथ शैनेयो द्रौपदेयाश्च सर्वशः ॥ १३ ॥
पञ्चालाश्च महावीर्याः शिखण्डी च महारथः ।
एवं तान्वादिनः शूरान्द्रौपदेया महारथाः ॥ १४ ॥
अभ्यघ्नन्युयुधानश्च मद्रराजपदानुगान् ।
चक्रैर्विमथितैः केचित्केचिच्छिन्नैर्महाध्वजैः ॥ १५ ॥
ते दृश्यन्तेऽपि समरे तावका निहताः परैः ।
आलोक्य पाण्डवान्युद्धे योधा राजन्समन्ततः ॥ १६ ॥
वार्यमाणा ययुर्वेगात्पुत्रेण तव भारत ।
दुर्योधनश्च तान्वीरान्वारयामास सांत्वयन् ॥ १७ ॥
न चास्य शासनं केचित्तत्र चक्रुर्महारथाः ।
ततो गान्धारराजस्य पुत्रः शकुनिरब्रवीत् ॥ १८ ॥
दुर्योधनं महाराज वचनं वचनक्षमः ।

समुद्र, उस समय दुर्योधनकी ओरके वीर ऐसे कांपते थे, जैसे आंधीके चलनेसे वृक्ष; जैसे कोई छोटी नदी गङ्गाका जल आनेसे इधर उधरको बहने लगती है। ऐसे ही मद्रदेशी सेना घुसनेसे पाण्डवोंकी सेना व्याकुल होगई, थोडे समयके पश्चात् पाण्डवोंको व्याकुल करके मद्रदेशी महात्मा योद्धा चारों ओरसे पुकारने लगे, कि जिनने हमारे राजाको मारा था, वह राजा युधिष्ठिर इस समय कहां है? उनके वीर चारों भाई, धृष्टद्युम्न, महारथ शिखण्डी, सात्यकि आदि कोई वीर यहां दीखता नहीं। तब युयुधान और महारथ द्रौपदीके पुत्र उनसे युद्ध करनेको दौडे। (१०-१४)

हे राजन्! उन्होंने किसीके रथका पहिया और किसीकी ध्वजा काट डाली। तब अपनी सेनाको भागते देख राजा दुर्योधन शान्तिपूर्वक लौटाने लगे। परन्तु उस समय इनकी आज्ञा किसीने न सुनी। तब सुबलपुत्र शकुनि बोले, हे दुर्योधन! बहुत शोककी बात है। कि

किं नः सम्प्रेक्षमाणानां मद्राणां हन्यते बलम्॥ १९ ॥
न युक्तमेतत्समरे त्वयि तिष्ठति भारत।
सहितैश्चापि योद्धव्यमित्येष समयः कृतः ॥ २० ॥
अथ कस्मात्परानेव घ्नतो मर्षयसे नृप।
दुर्योधन उवाच—वार्यमाणा मया पूर्वं नैते चक्रुर्वचो मम ॥ २१ ॥
एते विनिहताः सर्वे प्रस्कन्नाः पाण्डुवाहिनीम्।
शकुनिरुवाच— न भर्तुः शासनं वीरा रणे कुर्वन्त्यमर्षिताः ॥ २२ ॥
अलं क्रोद्धुमथैतेषां नायं काल उपेक्षितुम्।
यामः सर्वे च सम्भूय सवाजिरथकुञ्जराः ॥ २३ ॥
परित्रातुं महेष्वासान्मद्रराजपदानुगान्।
अन्योन्यं परिरक्षामो यत्नेन महता नृप ॥ २४ ॥
एवं सर्वेऽनुसञ्चिन्त्य प्रययुर्यत्र सैनिकाः
सञ्जय उवाच— एवमुक्तस्तदा राजा बलेन महता वृतः ॥ २५ ॥
प्रययौ सिंहनादेन कम्पयन्निव मेदिनीम्।
हत विध्यत गृह्णीत प्रहरध्वं निकृन्तत ॥ २६ ॥
इत्यासीत्तुमुलः शब्दस्तव सैन्यस्य भारत।

हमारे देखते देखते मद्रदेशी योद्धा मरे जाते हैं। हे राजन्! तुम्हारे बैठे हुए ऐसा होना उचित नहीं इस लिये हम सब इकट्ठे होकर युद्ध करेंगे, ऐसा हम लोगोंने पहले विचार किया था, तब अब बैठे हुए क्यों देखते हो? (१५-२१)

दुर्योधन बोले, हमने पहले इस भागती हुई सेनाको बहुत लौटाया परन्तु किसीने हमारी बात नहीं सुनी इसीसे सब सेनाका नाश होरहा है॥ २१-२२

शकुनि बोले, युद्धमें यह नियम है, कि क्रोध भरे वीर राजाकी आज्ञाको नहीं सुनते हैं। इस लिये आप इनपर क्रोध मत कीजिये, क्यों कि यह समय क्रोध करनेका नहीं है। चलिये हम सब लोग; हाथी, घोडे और रथोंको इकट्ठा करके घोर युद्ध करेंगे, हे राजन्! हम इन मद्रदेशी वीरोंकी अवश्य रक्षा करेंगे और वे हमारी भी रक्षा करेंगे। सब लोग इसी बातको स्वीकार कर के अपनी सेना के पास युद्ध करने को गये। (२२—२५)

सञ्जय बोले, शकुनिका वचन सुनकर राजा दुर्योधन अपने सङ्ग बहुत सेना लेकर पृथ्वीको कपांते हुए युद्ध करनेको चले, तब तुम्हारी सेना के

पाण्डवास्तु रणे दृष्ट्वा मद्रराजपदानुगान् ॥ २७ ॥
सहितानभ्यवर्तन्त गुल्ममास्थाय मध्यमम् ।
ते मुहूर्ताद्रणे वीरा हस्ताहस्ति विशाम्पते ॥ २८ ॥
निहताः प्रत्यदृश्यन्त मद्रराजपदानुगाः ।
ततो नः सम्प्रयातानां हता मद्रास्तरस्विनः ॥ २९ ॥
हृष्टाः किलकिलाशब्दमकुर्वन्सहिताः परे ।
उत्थितानि कबन्धानि समदृश्यन्त सर्वशः ॥ ३० ॥
पपात महती चोल्का मध्येनादित्यमण्डलम् ।
रथैर्भग्नैर्युगाक्षैश्च निहतैश्च महारथैः ॥ ३१ ॥
अश्वैर्निपतितैश्चैव सञ्छन्नाऽभूद्वसुन्धरा ।
वातायमानैस्तुरगैर्युगासक्तैस्ततस्ततः ॥ ३२ ॥
अदृश्यन्त महाराज योधास्तत्र रणाजिरे ।
भग्नचक्रान्रथान्केचिदहरंस्तुरगा रणे ॥ ३३ ॥
रथार्धं केचिदादाय दिशो दश विबभ्रमुः ।
तत्र तत्र व्यदृश्यन्त योक्त्रैः श्लिष्टाः स्म वाजिनः॥ ३४ ॥
रथिनः पतमानाश्च दृश्यन्ते स्म नरोत्तमाः ।
गगनात्प्रच्युताः सिद्धाः पुण्यानामिव संक्षये ॥ ३५ ॥
निहतेषु च शूरेषु मद्रराजानुगेषु वै ।

वीर सिंहके समान गर्जते हुए मारो, बांधो, पकडो, काटो ऐसा शब्द पुकारने लगे। मद्र देशकी सेनाको आते देखकर धृष्टद्युम्नने अपनी सब सेनाका व्यूह बनाया और राजाको बीच में करके लडने चले, तब क्षणभरमें चारों ओर कटे हुए मद्र देशी वीर दिखाई देने लगे। तब हमारी सेना भी घोर युद्ध करने लगी। पाण्डवोंकी सेना में प्रसन्नताका शब्द होने लगा; सहस्रों कबन्ध नाचने लगे। (२६—३०)

सूर्यके मण्डलसे बिजली गिरी, चारों ओर टूटे हुए रथ और पहिये दीखने लगें। कहीं मरे हुए घोडे पडे थे और कहीं खाली पहिये ही लिये घोडे दौडे फिरते थे, कोई टूटे हुवे रथके घोडेको सम्भाल रहा था, कहीं आधे रथको और कहीं पूरे रथको और कहीं केवल बम लिये ही घोडे दौड रहे थे। कहीं महारथ वीर इस प्रकार रथोंसे गिरते थे जैसे पुण्य नाश होनेसे तारे टूटते हैं। (३१-३५)

मद्रदेशी वीरोंको मारकर हमारी

अस्मानापततश्चापि दृष्ट्वा पार्था महारथाः ॥ ३६ ॥
अभ्यवर्त्तन्त वेगेन जयगृद्धाः प्रहारिणः।
बाणशब्दरवान् कृत्वा विमिश्रान् शङ्खनिःस्वनैः ॥ ३७ ॥
अस्मांस्तु पुनरासाद्य लब्धलक्षाः प्रहारिणः।
शरासनानि धुन्वानाः सिंहनादान्प्रचुक्रुशुः ॥ ३८ ॥
ततो हतमभिप्रेक्ष्य मद्रराजबलं महत्।
मद्रराजं च समरे दृष्ट्वा शूरं निपातितम् ॥ ३९ ॥
दुर्योधनबलं सर्वं पुनरासीत्पराङ्मुखम्।
वध्यमानं महाराज पाण्डवैर्जितकाशिभिः ॥
दिशो भेजेऽथ संभ्रान्तं भ्रामितं दृढधन्विभिः ॥४०॥[१०८९]

इति श्रीमहाभारते० शल्यपर्वणि संकुलयुद्धे अष्टादशोऽध्यायः॥ १८ ॥

संजय उवाच— पातिते युधि दुर्धर्षे मद्रराजे महारथे।
तावकास्तवपुत्राश्च प्रायशो विमुखाऽभवन् ॥ १ ॥
वणिजो नावि भिन्नायां यथाऽगाधे प्लवेऽर्णवे।
अपारे पारमिच्छन्तो हते शूरे महात्मना ॥
मद्रराजे महाराज वित्रस्ताः शरविक्षताः ॥ २ ॥
अनाथा नाथमिच्छन्तो मृगाः सिंहार्दिता इव।
वृषा यथा भग्नशृङ्गाः शीर्णदंता यथा गजाः ॥ ३ ॥

आती हुई सेनाको पाण्डवोंने देखा, तब धनुष टङ्कारते, शंख बजाते और बाण चलाते हुए दौडे हमारी सेनाके पास आकर वे सब वीर धनुष टङ्कारते हुए बाण चलाने और गर्जने लगे, वीर शल्य और उनकी सब सेनाको मरा देख पाण्डवोंके बाणोंसे व्याकुल होकर सब सेना फिर भागने लगी, यह सेना महा धनुषधारी पाण्डवों के बाणोंसे बहुत ही व्याकुल होगई। (३६-४०)

शल्यपर्वमें अठराह अध्याय समाप्त। [१०८९]

शल्यपर्वमें उन्निसह अध्याय।

सञ्जय बोले, हे राजन्! जब महापराक्रमी वीर शल्य मारे गये, तब तुम्हारे सब पुत्र और बची हुई सेना इधर उधर भागने लगी, जैसे समुद्रमें टूटी नाव पर बैठे बनिये डूबनेके समय घबडाते हैं और अपार समुद्रके पार जानेकी इच्छा करते हैं, ऐसे ही वीर शल्यके मरने पर तुम्हारी सेनाकी दशा होगई। जैसे सींग टूटे बैल, दांत टूटे हाथी और सिंहसे डरे हरिण अनाथ होकर किसी-

मध्याह्ने प्रत्यपायाम निर्जिताऽजातशत्रुणा ।
न संधातुमनीकानि न च राजन्पराक्रमे ॥ ४ ॥
आसीद् बुद्धिर्हते शल्ये भूयो योधस्य कस्यचित् ।
भीष्मे द्रोणे च निहते सूतपुत्रे च भारत ॥ ५ ॥
यद् दुःखं तव योधानां भयं चासीद्विशाम्पते ।
तद्भयं स च नः शोको भूय एवाभ्यवर्तत ॥ ६ ॥
निराशाश्च जये तस्मिन्हते शल्ये महारथे ।
हतप्रवीरा विध्वस्ता निकृत्ताश्च शितैः शरैः ॥ ७ ॥
मद्रराजे हते राजन् योधास्ते प्राद्रवन्भयात् ।
अश्वानन्ये गजानन्ये रथानन्ये महारथाः ॥ ८ ॥
आरुह्य जवसंपन्नाः पादाताः प्राद्रवंस्तथा ।
द्विसाहस्राश्च मातंगा गिरिरूपाः प्रहारिणः ॥ ९ ॥
संप्राद्रवन्हते शल्ये अंकुशांगुष्ठनोदिताः ।
ते रणाद्भरतश्रेष्ठ तावकाः प्राद्रवन्दिशः ॥ १० ॥
धावतश्चाप्यपश्याम श्वसमानान् शराहतान् ।
तान्प्रभग्नान् द्रुतान्दृष्ट्वा हतोत्साहान्पराजितान् ॥११॥
अभ्यवर्त्तन्त पञ्चालाः पाण्डवाश्च जयैषिणः ।

की शरण जाना चाहते हैं, ऐसे ही तुम्हारी सेना भी व्याकुल होगई, उस समय हमारी ओरके प्रधान वीरोंने दो पहरमें महात्मा युधिष्ठिरसे हार कर सेनाका प्रबन्ध करना विचारा और किसीने युद्ध करनेकी इच्छा न की। (१-४)

हे राजन् ! भीष्म, द्रोणाचार्य और कर्णके मरनेसे हमारी ओरके वीरोंको जो भय हुआ था और जैसी उनकी इच्छा हुई थी, शल्यके मरनेसे भी वैसी ही हुई परन्तु इतना विशेष हुआ कि महारथ वीर शल्यके मरनेसे किसीको अपनी जीतकी आशा न रही, क्यों कि सब बडे बडे वीर मारे गये, और बचे हुए वीर पाण्डवोंके बाणोंसे व्याकुल हो रहे थे, तब कोई हाथी, कोई घोडे और कोई रथोंपर चढकर इधर उधरको भागे कोई पैरों ही भागने लगे, शल्यके मरनेके पीछे पर्वतोंके समान दो सहस्र हाथी वेगसे भाग गये। उस समय हमें चारों ओरसे तुम्हारी सेना भागती ही दीखती थी, उनको उत्साह रहित और भागते देख पाञ्चाल, सोमक, सृञ्जय और पाण्डव सिंहके समान गर्जते बाण वर्षाते

वाणशब्दरवाश्चापि सिंहनादाश्च पुष्कलाः ॥ १२ ॥
शंखशब्दश्च शूराणां दारुणः समपद्यत ।
दृष्ट्वा तु कौरवं सैन्यं भयत्रस्तं प्रविद्रुतम् ॥ १३ ॥
अन्योन्यं समभाषन्त पञ्चालाः पाण्डवैः सह ।
अद्य राजा सत्यधृतिर्हतामित्रो युधिष्ठिरः ॥ १४ ॥
अद्य दुर्योधनो हीनो दीप्तया नृपतिश्रियः ।
अद्य श्रुत्वा हतं पुत्रं धृतराष्ट्रो जनेश्वरः ॥ १५ ॥
विह्वलः पतितो भूमौ किल्बिषं प्रतिपद्यताम् ।
अद्य जानातु कौन्तेयं समर्थं सर्वधन्विनाम् ॥ १६ ॥
अद्यात्मानं च दुर्मेधा गर्हयिष्यति पापकृत् ।
अद्य क्षत्तुर्वचः सत्यं स्मरतां ब्रुवतो हि तम् ॥ १७ ॥
अद्य प्रभृति पार्थं च प्रेष्यभूत इवाचरन् ।
विजानातु नृपो दुःखं यत्प्राप्तं पाण्डुनन्दनैः ॥ १८ ॥
अद्य कृष्णस्य माहात्म्यं विजानातु महीपतिः ।
अद्यार्जुनधनुर्घोषं घोरं जानातु संयुगे ॥ १९ ॥
अस्त्राणां च बलं सर्वं बाह्वोश्च बलमाहवे ।
अद्य ज्ञास्यति भीमस्य बलं घोरं महात्मनः ॥ २० ॥
हते दुर्योधने युद्धे शक्रेणेवासुरे बले ।

और शङ्ख बजाते दौडे । (५—१३)

भयसे व्याकुल और भागती हुई तुम्हारी सेनाको देखकर पाण्डवोंकी ओरके वीर प्रसन्न होने लगे, सब पाञ्चाल पुकार उठे कि अब जगत्में सत्यवादी महाराज युधिष्ठिरका कोई शत्रु जीता नहीं रहा । आज राजा दुर्योधन राज लक्ष्मीसे हीन होगये । अब राजा धृतराष्ट्र दुर्योधनको मरा हुआ सुन मूर्च्छित होंगे, अब सब जगत् महाराज युधिष्ठिरके बल, धनुष और प्रतापको जानेगा, आज मूर्ख धृतराष्ट्र अपने कपटको स्मरण करे, दुर्बुद्धि धृतराष्ट्र विदुरके वचनोंको स्मरण करें, आजसे राजा धृतराष्ट्र महाराज युधिष्ठिरके सेवक होकर रहें और उन दुःखोंको भोगें जो पहले पाण्डवोंने भोगे थे, आज कृष्णकी सम्मतिका फल, अर्जुनके धनुषकी टङ्कार, अस्त्र और बाहुबलको राजा धृतराष्ट्र जाने; आज दुर्योधनके मरने पर राक्षसोंको मारनेके समय इन्द्र जो कर्म करते हैं वैसे ही दुःशासनके मारनेमें

यत्कृतं भीमसेनेन दुःशासनवधे तदा ॥ २१ ॥
नान्यः कर्ताऽस्ति लोकेऽस्मिन्नृते भीमान्महाबलात् ।
अद्य ज्येष्ठस्य जानीतां पाण्डवस्य पराक्रमम् ॥ २२ ॥
मद्रराजं हतं श्रुत्वा देवैरपि सुदुःसहम् ।
अद्य ज्ञास्यति संग्रामे माद्रीपुत्रौ सुदुःसहौ ॥ २३ ॥
निहते सौबले वीरे प्रवीरेषु च सर्वशः ।
कथं जयो न तेषां स्याद्येषां योद्धा धनंजयः ॥ २४ ॥
सात्यकिर्भीमसेनश्च धृष्टद्युम्नश्च पार्षतः ।
द्रौपद्यास्तनयाः पंच माद्रीपुत्रौ च पाण्डवौ ॥ २५ ॥
शिखण्डी च महेष्वासो राजा चैव युधिष्ठिरः ।
येषां च जगतो नाथो नाथः कृष्णो जनार्दनः॥ २६ ॥
कथं तेषां जयो न स्याद्येषां धर्मो व्यपाश्रयः ।
भीष्मं द्रोणं च कर्णं च मद्रराजानमेव च ॥ २७ ॥
तथाऽन्यान्नृपतीन्वीरान् शतशोऽथ सहस्रशः ।
कोऽन्यः शक्तो रणे जेतुमृते पार्थाद्युधिष्ठिरात् ॥ २८ ॥
यस्य नाथो हृषीकेशः सदा सत्ययशोनिधिः ।
इत्येवं वदमानास्ते हर्षेण महता युताः ॥ २९ ॥

महात्मा भीमसेनने जो कर्म किया था, उसको स्मरण करें। (१४—२१)

आज शल्यको मरा सुनकर महाराज युधिष्ठिरके बलको जाने, युधिष्ठिरने ऐसा महाघोर कर्म किया है, जो देवतोंसे भी नहीं होसक्ता, भीमसेनने इस युद्धमें जो कर्म किया सो दूसरेमें करनेकी सामर्थ नहीं थी, आज सब वीरोंके सहित वीर शकुनिको मरा सुन राजा धृतराष्ट्र जानेंगे कि नकुल और सहदेव कैसे बलवान हैं ? जहां राजा तो साक्षात् युधिष्ठिर, सेनापति साक्षात् धृष्टद्युम्न, आज्ञा करनेवाले साक्षात् जगत् स्वामी श्रीकृष्ण, आश्रय देनेवाले, धर्मयुद्ध करनेवाले, अर्जुन, भीमसेन, नकुल, सहदेव, सात्यकि, द्रोपदीके पांचों पुत्र और महारथ शिखण्डी ही तहांपर विजय क्यों न हो। (२१-२६)

साक्षात् भीष्म, द्रोणाचार्य, कर्ण, मद्रराज शल्य आदि सैकडों सहस्रों महाबलवान राजा और वीरोंको महाराज युधिष्ठिरको छोड और कौन जीत सक्ता है ? जो सदा ही श्रीकृष्णकी आज्ञामें रहते हैं, उनके सिवाय सत्य और यशका

प्रभग्नांस्तावकान्योधान्संहृष्टाः पृष्ठतोऽन्वयुः।
धनंजयो रथानीकमभ्यवर्तत वीर्यवान् ॥ ३० ॥
माद्रीपुत्रौ च शकुनिं सात्यकिश्च महारथः।
तान्प्रेक्ष्य द्रवतः सर्वान् भीमसेनभयार्दितान् ॥ ३१ ॥
दुर्योधनस्तदा सूतमब्रवीद्विजयाय च।
मामतिक्रमते पार्थो धनुष्पाणिमवस्थितम् ॥ ३२ ॥
जघने सर्वसैन्यानां ममाश्वान्प्रतिपादय।
जघने युध्यमानं हि कौन्तेयो मां समन्ततः ॥ ३३ ॥
नोत्सहेदभ्यतिक्रान्तुं वेलामिव महोदधिः।
पश्य सैन्यं महत्सूत पांडवैः समभिद्रुतम् ॥ ३४ ॥
सैन्यरेणुं समुद्भूतं पश्यस्वैनं समन्ततः।
सिंहनादांश्च बहुशः शृणु घोरान् भयावहान् ॥ ३५ ॥
तस्माद्याहि शनैः सूत जघनं परिपालय।
मयि स्थिते च समरे निरुद्धेषु च पाण्डुषु ॥ ३६ ॥
पुनरावर्त्तते तूर्णं मामकं बलमोजसा।
तच्छ्रुत्वा तव पुत्रस्य शूरार्यसदृशं वचः ॥ ३७ ॥
सारथिर्हेमसञ्छन्नान् शनैरश्वानचोदयत्।
गजाश्च रथिभिर्हीनास्त्यक्तात्मानः पदातयः ॥ ३८ ॥

समुद्र कौन हो सक्ता है? ऐसा कहते हुए ये सब वीर प्रसन्न होकर तुम्हारी सेनाके पीछे दौडे। वीर अर्जुन रथ सेनाकी ओर महारथ नकुल, सहदेव और सात्यकी शकुनिकी ओर चले, अपनी सेनाको भीमसेनके डरसे भागती देख राजा दुर्योधन अपने सारथीसे बोले, जैसे समुद्र तटके पर्वतको नहीं नांघ सक्ता ऐसे ही जब मैं धनुष लेकर युद्ध करूंगा। तब भीमसेन जीत नहीं सकेंगे, इसलिये हमारे रथको सेनाके आगे खडाकर दो देखो। हमारी सेना चारों ओर भागी चली जाती है। ये देखो कैसी धूल उड रही है, ये पाण्डवोंकी ओरके वीर कैसे गरज रहे हैं। इसलिये तुम व्यूहकी जङ्घाकी रक्षा करते हुए धीरे धीरे हमारे घोडोंको हांको। हम जब युद्ध करेंगे, तब पाण्डव रुक जांयगे और हमारी सेना फिर युद्ध करनेको लौटेगी। (२७-३७)

राजाके वीर और महात्माओंके समान वचन सुन सारथीने सोनेके जाल-

एकविंशतिसाहस्राः संयुगायावतस्थिरे ।
नानादेशसमुद्भूता नानानगरवासिनः ॥ ३९ ॥
अवस्थितास्तदा योधाः प्रार्थयन्तो महद्यशः ।
तेषामापततां तत्र संहृष्टानां परस्परम् ॥ ४० ॥
संमर्दः सुमहान् जज्ञे घोररूपो भयानकः ।
भीमसेनस्तदा राजन् धृष्टद्युम्नश्च पार्षतः ॥ ४१ ॥
बलेन चतुरंगेण नानादेश्यानवारयत् ।
भीममेवाभ्यवर्तन्त रणेऽन्ये तु पदातयः ॥ ४२ ॥
प्रक्ष्वेड्यास्फोट्य संहृष्टा वीरलोकं यियासवः ।
आसाद्य भीमसेनं तु संरब्धा युद्धदुर्मदाः ॥ ४३ ॥
धार्तराष्ट्रा विनेदुर्हि नान्यामकथयन्कथाम् ।
परिवार्य रणे भीमं निजघ्नुस्ते समंततः ॥ ४४ ॥
स वध्यमानः समरे पदातिगणसंवृतः ।
न चचाल ततः स्थानान्मैनाक इव पर्वतः ॥ ४५ ॥
ते तु क्रुद्धा महाराज पाण्डवस्य महारथम् ।
निगृहीतुं प्रवृत्ता हि योधांश्चान्यानवारयन् ॥ ४६ ॥
अक्रुध्यत रणे भीमस्तैस्तदा पर्यवस्थितैः ।

वाले, घोडोंको धीरे धीरे हांका। राजाको चलते देख अनेक देश और अनेक नगरोंमें रहनेवाले इक्कीस सहस्र पैदल युद्धको लौटे, इन सबकी यह इच्छा थी कि हमारा यश जगत्में फैले; उस समय दोनोंके वीर फिर घोर और भयानक युद्ध करने लगे। तब पराक्रमी भीमसेन और धृष्टद्युम्न चतुरङ्गिणी सेना लेकर उस सेनासे युद्ध करनेको चले और सबको मारने लगे। तुम्हारी ओरके अनेक महावीर केवल भीमसेन हीसे लडने लगे। कोई स्वर्ग जानेके लिये कूदते, गर्जते और उछलते योद्धा भीमसेनसे युद्ध करने लगे। (३८-४३)

सब तुम्हारे पुत्र भीमसेनको मारनेके लिये केवल उन्हींसे लडने लगे। जैसे मैनाक पर्वत चारों ओरसे समुद्रकी तरङ्ग लगनेसे भी अपने स्थानसे नहीं चलता ऐसे ही चारों ओरसे पैदलोंसे घिरने और अनेक शस्त्र लगनेसे भी भीमसेन अपने स्थानसे नहीं हटे। तब अनेक वीरोंने महात्मा भीमसेनको जीते पकडनेका विचार किया। तब भीमसेनको महाक्रोध हुआ और गदा लेकर रथसे

सोऽवतीर्य रथात्तूर्णं पदातिः समवस्थितः ॥ ४७ ॥
जातरूपप्रतिच्छन्नां प्रगृह्य महतीं गदाम्।
अवधीत्तावकान्योधान्दण्डपाणिरिवान्तकः ॥ ४८ ॥
विप्रहीणरथाश्वांस्तानवधीत्पुरुषर्षभः।
एकविंशति साहस्रान्पदातीन्समपोथयत् ॥ ४९ ॥
हत्वा तत्पुरुषानीकं भीमः सत्यपराक्रमः।
धृष्टद्युम्नं पुरस्कृत्य न चिरात्प्रत्यदृश्यत ॥ ५० ॥
पादाता निहता भूमौ शिश्यिरे रुधिरोक्षिताः।
संभग्ना इव वातेन कर्णिकाराः सुपुष्पिताः ॥ ५१ ॥
नानाशस्त्रसमायुक्ता नानाकुण्डलधारिणः।
नानाजात्या हतास्तत्र नानादेशसमागताः ॥ ५२ ॥
पताकाध्वजसंछन्नं पदातीनां महद्बलम्।
निकृत्तं विबभौ रौद्रं घोररूपं भयावहम् ॥ ५३ ॥
युधिष्ठिरपुरोगाश्च सहसैन्या महारथाः।
अभ्यधावन्महात्मानं पुत्रं दुर्योधनं तव ॥ ५४ ॥
ते सर्वे तावकान् दृष्ट्वा महेष्वासान्पराङ्मुखान्।
नात्यवर्तन्त ते पुत्रं वेलेव मकरालयम् ॥ ५५ ॥
तदद्भुतमपश्याम तव पुत्रस्य पौरुषम्।
यदेकं सहिताः पार्था न शेकुरतिवर्तितुम् ॥ ५६ ॥

नीचे उतरे और सोनेके तारोंसे जडी गदासे तुम्हारी सेनाका इस प्रकार नाश करने लगे। जैसे यमराज अपने दण्डसे प्रजाका नाश करते हैं। (४४-४८)

इस प्रकार थोडे ही समयमें पुरुष-सिंह भीमसेन और धृष्टद्युम्नने इकीस सहस्र पैदलोंको मारडाला। रुधिरमें भीगे पृथ्वीमें पडे मरे पैदल ऐसे दीखने लगे जैसे आंधीसे टूटे हुए कचनारके वृक्ष, ये सब अनेक प्रकारके भूषण और शस्त्रधारी वीर अनेक जाति और अनेक देशोंके थे, उनके मरनेसे उनके झण्डे और पताका सब टूट गए, तब वह सेना बहुत भयानक दीखने लगी। (४८-५३)

उधर युधिष्ठिरभी प्रधान सेना सङ्ग लेकर दुर्योधनसे युद्ध करने चले, जैसे समुद्र पर्वतको नहीं नांघ सक्ता ऐसे ही पाण्डवोंका कोई महारथ दुर्योधनको न जीत सका, सब पाण्डव इकठे होनेपर

नातिदूरापयातं तु कृतबुद्धिं पलायने।
दुर्योधनः स्वकं सैन्यमब्रवीद्भृशविक्षतम् ॥ ५७ ॥
न तं देशं प्रपश्यामि पृथिव्यां पर्वतेषु च।
यत्र यातान्न वा हन्युः पाण्डवाः किं सृतेन वः॥५८ ॥
अल्पं च बलमेतेषां कृष्णौ च भृशविक्षतौ।
यदि सर्वेऽत्र तिष्ठामो ध्रुवं नो विजयो भवेत् ॥ ५९ ॥
विप्रयातांस्तु वो भिन्नान्पाण्डवाः कृतविप्रियाः।
अनुसृत्य हनिष्यन्ति श्रेयान्नः समरे वधः ॥ ६० ॥
शृण्वन्तु क्षत्रियाः सर्वे यावन्तोऽत्र समागताः।
यदा शूरं च भीरुं च मारयत्यंतकः सदा ॥ ६१ ॥
को न मूढो न युध्येत पुरुषः क्षत्रियो ध्रुवम्।
श्रेयो नो भीमसेनस्य क्रुद्धस्याभिमुखे स्थितम् ॥६२ ॥
सुखः सांग्रामिको मृत्युः क्षत्रधर्मेण युध्यताम्।
मर्त्येनावश्यमर्तव्यं गृहेष्वपि कदाचन ॥ ६३ ॥
युध्यतः क्षत्रधर्मेण मृत्युरेष सनातनः।

भी दुर्योधनको न जीत सके यह देखकर हम लोग आश्चर्य करने लगे। अपनी भागती हुई और बाणोंसे व्याकुल थोडी दूर गई हुई सेनासे दुर्योधन बोले, हमें ऐसा कोई देश या पर्वत नहीं दीखता जहां भागकर तुम लोग पाण्डवोंके हाथसे बच जाओगे, इसलिये भागनेसे क्या होगा ? (५४-५८)

अब पाण्डवोंकी सेना बहुत थोडी रह गई है, तथा कृष्ण और अर्जुन घावोंसे व्याकुल होगये हैं। यदि इस समय हम लोग मिलकर युद्ध करें तो अवश्यही हमारी विजय होगी, यदि तुम लोग भाग जाओगे तो तुम्हारे वैरी पाण्डव वहां भी तुमको मारेंगेही, इस लिये, युद्धमें मरना ही अच्छा है। जितने क्षत्री यहां हैं सो सब हमारे वचनोंको सुनें। "यमराज" कादर और वीर सबहीको मारता है ऐसा विचारकर ऐसा कौन मूर्ख क्षत्री होगा जो युद्धमें मरनेकी इच्छा न करे ? हम लोगोंका यही अच्छा होगा कि क्रोध भरे भीमसेनके आगे खडे होकर युद्ध करें। ५९-६२

मनुष्यका घरमें पडकर भी अवश्यही मरना होगा, इससे क्षत्रियोंको युद्धहीमें मरना अच्छा है सो तुम लोग क्षत्रियों के धर्मानुसार युद्ध करो। क्षत्रियोंका यही धर्म है, कि युद्धमें मरे, क्यों कि यु…

हत्वेह सुखमाप्नोति हतः प्रेत्य महत्फलम् ॥ ६४ ॥
न युद्धधर्माच्छ्रेयान्वै पंथाः स्वर्गस्य कौरवाः ।
अचिरेणैव ताँल्लोकान्हतो युद्धे समश्नुते ॥ ६५ ॥
श्रुत्वा तद्वचनं तस्य पूजयित्वा च पार्थिवाः ।
पुनरेवाभ्यवर्त्तन्त पाण्डवानाततायिनः ॥ ६६ ॥
तानापतत एवाशु व्यूढानीकाः प्रहारिणः ।
प्रत्युद्ययुस्तदा पार्था जयगृद्धाः प्रमन्यवः ॥ ६७ ॥
धनंजयो रथेनाजावभ्यवर्त्तत वीर्यवान् ।
विश्रुतं त्रिषु लोकेषु व्याक्षिपन्गांडिवं धनुः ॥ ६८ ॥
माद्रीपुत्रौ च शकुनिं सात्यकिश्च महाबलः ।
जवेनाभ्यपतन्हृष्टा यत्ता वै तावकं बलम् ॥ ६९ ॥ [११५८]

इति श्रीमहाभारते शतसाहस्त्र्यां संहितायां वैयासिक्यां शल्यपर्वणि संकुलयुद्धे एकोनविंशोऽध्यायः॥ १९ ॥

सञ्जय उवाच— सन्निवृत्ते जनौघे तु शाल्वो म्लेच्छगणाधिपः ।
अभ्यवर्त्तत संक्रुद्धः पाण्डवानां महद्बलम् ॥ १ ॥
आस्थाय सुमहानागं प्रभिन्नं पर्वतोपमम् ।
दृप्तमैरावतप्रख्यममित्रगणमर्दनम् ॥ २ ॥
योऽसौ महान्भद्रकुलप्रसूतः सुपूजितो धार्त्तराष्ट्रेण नित्यम् ।

शत्रुको मारनेसे राज्य और मरनेसे स्वर्ग मिलता है। क्षत्रियोंके लिये युद्धमें मरनेके सिवाय और कोई सुख नहीं है, राजाके वचन सुन उनकी प्रशंसा करके सब क्षत्री फिर पाण्डवोंसे युद्ध करनेको लौटे। पाण्डवलोग भी उनको आते देख अपनी सेनाको व्यूह बनाकर विजयके लिये क्रोधमें भरकर दौडे। अर्जुन भी तीनलोकोंमें विख्यात गांडीव धनुषपर टङ्कार देते हुए युद्ध करनेको चले। नकुल, सहदेव और महारथ सात्यकि बहुत प्रसन्न हो कर शकुनिकी सेनाकी ओर चले॥ (६४-६९) [११५८]

शल्यपर्वमें उन्नीस अध्याय समाप्त।

शल्यपर्वमें बीस अध्याय।

सञ्जय बोले, हे राजन्! जब यह सब सेना लडनेको उपस्थित होगई तब म्लेच्छदेशका राजा महापराक्रमी शाल्व पांडवोंकी सेनासे युद्ध करनेको खडा हुआ। राजा शाल्व पर्वतके समान भारी और ऐरावतके समान मतवाले शत्रुनाशक हाथी पर बैठकर युद्ध करनेको आये। जो हाथी भद्रक वंशमें उत्पन्न हुआ था, राजा दुर्योधन सदा ही जिस

सुकल्पितः शास्त्रविनिश्चयज्ञैः सदोपवाह्यः समरेषु राजन् ॥ ३ ॥
तमास्थितो राजवरो बभूव यथोदयस्थः सविता क्षपान्ते ।
स तेन नागप्रवरेण राजन्नभ्युद्ययौ पाण्डुसुतान्समेतान् ॥ ४ ॥
सितैः पृषत्कैर्विददार वेगैर्महेन्द्रवज्रप्रतिमैः सुघोरैः ।
ततः शरान्वै सृजतो महारणे योधांश्च राजन्नयतो यमालयम् ॥ ५ ॥
नास्यान्तरं ददृशुः स्वे परे वा यथा पुरा वज्रधरस्य दैत्याः ।
ऐरावणस्थस्य चमू विमर्दे दैत्याः पुरा वासवस्येव राजन् ॥ ६ ॥
ते पाण्डवाः सोमकाः सृञ्जयाश्च तमेकनागं ददृशुः समंतात् ।
सहस्रशो वै विचरंतमेकं यथा महेन्द्रस्य गजं समीपे ॥ ७ ॥
संद्राव्यमाणं तु बलं परेषां परीतकल्पं विबभौ समन्ततः ।
नैवावतस्थे समरे भृशं भयाद्विमृद्यमानं तु परस्परं तदा ॥ ८ ॥
ततः प्रभग्ना सहसा महाचमूः सा पाण्डवी तेन नराधिपेन ।
दिशश्चतस्रः सहसा विधाविता गजेन्द्रवेगं तमपारयन्ती ॥ ९ ॥

की सेवा करते थे, जो सदा युद्ध करनेवाले, हाथियोंके आगे रहता था, उस ही शास्त्र जाननेवाले, सेवकोंसे कसे हुए हाथीपर चढकर राजा शल्य युद्ध करनेको आया। उस हाथीपर चढे राजा शल्य ऐसे दीखते थे, जैसे उदयाचल पर प्रातःकालके सूर्य। तब वह हाथी राजा शल्यके सहित पाण्डवोंकी ओर चला। राजा शल्य अपने वज्रके समान बाणोंसे पाण्डवोंके वीरोंको मारने लगे। (१-५)

हे राजन्! उस समय पाण्डवोंके योद्धा राजा शल्यके बाणोंमें अन्तर नहीं देखते थे, अर्थात् किसीको यह नहीं जान पडता था, कि ये कब बाण चढाते, कब खींचते और कब छोडते हैं। जैसे ऐरावत पर चढे इन्द्रके बाणोंसे दानव व्याकुल होगये थे, ऐसे ही पाण्डवोंके वीर राजा शल्यसे व्याकुल होगये। उस समय शल्यका एक हाथी पाण्डव, सोमक और सृञ्जय वंशी क्षत्रियोंको अनेक रूपसे दिखाई देने लगा। अर्थात् जिधर जो देखता था, उसे चारों ओर ऐरावतके समान घूमता हुआ शल्यका हाथी ही दीखता था, उस समय हमारे शत्रुओंकी सेना चारों ओर भयसे व्याकुल भागती ही दीखती थी, कोई युद्धमें खडा होनेकी इच्छा नहीं करता था। उस समय राजा शाल्वने पाण्डवोंकी सेनाके वीरोंको भगा दिया, और अपने हाथीको चारों ओर घुमाने लगे। पाण्डवोंकी सेनाका भा-

दृष्ट्वा च तां वेगवतीं प्रभग्नां सर्वे त्वदीया युधि योधमुख्याः।
अपूजयंस्ते तु नराधिपं तं दध्मुश्च शंखान् शशिसन्निकाशान् ॥१०॥
श्रुत्वा निनादं त्वथ कौरवाणां हर्षाद्विमुक्तं सह शङ्खशब्दैः।
सेनापतिः पाण्डवसृञ्जयानां पाञ्चालपुत्रो ममृषे न कोपात् ॥ ११ ॥
ततस्तु तं वै द्विरदं महात्मा प्रत्युद्ययौ त्वरमाणो जयाय।
जम्भो यथा शक्रसमागमे वै नागेन्द्रमैरावणमिन्द्रवाह्यम् ॥ १२ ॥
तमापतन्तं सहसा तु दृष्ट्वा पाञ्चालपुत्रं युधि राजसिंहः।
तं वै द्विपं प्रेषयामास तूर्णं वधाय राजन् द्रुपदात्मजस्य ॥ १३ ॥
स तं द्विपेन्द्रं सहसाऽऽपतंतमविध्यदग्निप्रतिमैः पृषत्कैः।
कर्मारधौतैर्निशितैर्ज्वलद्भिर्नाराचमुख्यैस्त्रिभिरुग्रवेगैः ॥ १४ ॥
ततोऽपरान्पञ्चशतान्महात्मा नाराचमुख्यान्विससर्ज कुम्भे।
स तैस्तु विद्धः परमद्विपो रणे तदा परावृत्य भृशं प्रदुद्रुवे॥ १५ ॥
तं नागराजं सहसा प्रणुन्नं विद्राव्यमाणं विनिवर्त्य शाल्वः।
तोत्त्राङ्कुशैः प्रेषयामास तूर्णं पञ्चालराजस्य रथं प्रदिश्य ॥ १६ ॥
दृष्ट्वाऽऽपतन्तं सहसा तु नागं धृष्टद्युम्नः स्वरथाच्छीघ्रमेव।
गदां प्रगृह्योग्रजवेन वीरो भूमिं प्रपन्नो भयविह्वलांगः ॥ १७ ॥

गते देख तुम्हारे सब प्रधान वीर राजा शाल्वकी प्रशंसा करने लगे। और चन्द्रमाके समान निर्मल शङ्ख बजाने लगे। (६-१०)

इस कौरवोंके प्रसन्न शब्दको सुनकर पाण्डवोंके प्रधान सेनापति पाञ्चालदेशके राजपुत्र वीर धृष्टद्युम्नको ऐसा क्रोध हुआ कि क्षमा न कर सके। तब वीर धृष्टद्युम्न शीघ्रता सहित शाल्वके हाथीकी ओर इस प्रकार दौडे जैसे जम्भासुर इन्द्र सहित ऐरावतकी ओर दौडा था, राजा द्रुपदके बेटे और पाण्डवोंके सेनापतिको अपनी ओर आते देख वीर शाल्वने अपना हाथी उनकी ओर दौडाया, सेनापतिने उस हाथीको अपनी ओर आते देख जलती अग्निके समान तेज विषमें बुझे अत्यन्त तेज तीन बाण मारे, फिर महात्मा धृष्टद्युम्नने पांच सौ तेज बाण हाथीके शिरमें मारे, तब वह हाथी बाणोंसे व्याकुल होकर युद्धसे भागा। (११—१५)

परन्तु राजा शाल्वने कोडे और अंकुशोंसे अपने भागते हुए हाथीको फिर पाञ्चालदेशके स्वामी धृष्टद्युम्नकी ओर लौटाया। वीर धृष्टद्युम्न अपने रथकी ओर उसे आते देख शीघ्रतासहित

स तं रथं हेमविभूषितांगं साश्वं ससूतं सहसा विमृद्य।
उत्क्षिप्य हस्तेन नदन्महाद्विपो विपोथयामास वसुंधरातले ॥ १८ ॥
पाञ्चालराजस्य सुतं च दृष्ट्वा तदार्दितं नागवरेण तेन।
तमभ्यधावत्सहसा जवेन भीमः शिखण्डी च शिनेश्च नप्ता ॥१९॥
शरैश्च वेगं सहसा निगृह्य तस्याभितो व्यापततो गजस्य।
स संगृहीतो रथिभिर्गजो वै चचाल तैर्वार्यमाणश्च संख्ये ॥ २० ॥
ततः पृषत्कान्प्रववर्ष राजा सूर्यो यथा रश्मिजालं समन्तात्।
तैराशुगैर्वध्यमाना रथौघाः प्रदुद्रुवुः सहितास्तत्र तत्र ॥ २१ ॥
तत्कर्म शाल्वस्य समीक्ष्य सर्वे पाञ्चालपुत्रो नृप सृञ्जयाश्च।
हाहाकारैर्नादयन्ति स्म युद्धे द्विपं समन्ताद्रुरुधुर्नराग्र्याः ॥ २२ ॥
पाञ्चालपुत्रस्त्वरितस्तु शूरो गदां प्रगृह्याचलशृंगकल्पाम्।
ससंभ्रमं भारत शत्रुघाती जवेन वीरोऽनुससार नागम् ॥ २३ ॥
ततस्तु नागं धरणीधराभं मदं स्रवन्तं जलदप्रकाशम्।
गदां समाविध्य भृशं जघान पञ्चालराजस्य सुतस्तरस्वी ॥ २४ ॥
स भिन्नकुंभः सहसा विनद्य मुखात्प्रभूतं क्षतजं विमुञ्चन्।
पपात नागो धरणीधराभः क्षितिप्रकंपाच्चलितं यथाद्रिः ॥ २५ ॥

डरसे घबडाकर गदा लेकर रथसे कूदे। उस हाथीने धृष्टद्युम्नके रथको सारथी और घोडोंके सहित सूंडसे उठाकर फेंक दिया और पैरोंसे चूरा कर दिया। धृष्टद्युम्नको रथहीन और हाथीके डरसे व्याकुल देख भीमसेन, सात्यकी और शिखण्डी वेगसे दौडे। उन सब वीरोंने उस हाथीकी ओर अनेक बाण चलाये तब वह व्याकुल होकर चक्कर खाने लगा। (१९—२०)

तब राजा शल्व इस प्रकार बाण चलाने लगे जैसे सूर्य अपनी किरणोंको जगत्में फैला देता है। तब पाण्डवोंकी ओरके अनेक वीर मरने लगे। तब सेनापति धृष्टद्युम्नके सहित सब वीर शाल्वका पराक्रम देख घबडाने लगे। और हाथीके रोकनेका उपाय करने लगे। तब महापराक्रमी शत्रुनाशन वीर धृष्टद्युम्न पर्वतके शिखरके समान भारी गदा लेकर और सावधान होकर वेगसे हाथीकी ओर लौटे, तब काले मेघके समान मद बरसते और पर्वतके समान भारी शरीरवाले हाथीके वीर धृष्टद्युम्नने एक गदा मारी, उस गदाके लगनेसे हाथीका शिर फट गया मुहसे रुधिर बहने लगा और इस प्रकार पृथ्वीमें गिरा जैसे

निपात्यमाने तु तदा गजेन्द्रे हाहाकृते तव पुत्रस्य सैन्ये।
स शाल्वराजस्य शिनिप्रवीरो जहार भल्लेन शिरः शितेन ॥ २६ ॥
हृतोत्तमांगो युधि सात्वतेन पपात भूमौ सह नागराज्ञा।
यथाद्रिशृङ्गं सुमहत्प्रणुन्नं वज्रेण देवाधिपचोदितेन ॥ २७ ॥ [११८५]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यपर्वणि शाल्ववधे विंशतितमोऽध्यायः॥ २० ॥

सञ्जय उवाच— तस्मिंस्तु निहते शूरे शाल्वे समितिशोभने।
तवाभज्यद्बलं वेगाद्वातेनेव महाद्रुमः ॥ १ ॥
तत्प्रभग्नं बलं दृष्ट्वा कृतवर्मा महारथः।
दधार समरे शूरः शत्रुसैन्यं महाबलः ॥ २ ॥
सन्निवृत्तास्तु ते शूरा दृष्ट्वा सात्वतमाहवे।
शैलोपमं स्थिरं राजन् कीर्यमाणं शरैर्युधि ॥ ३ ॥
ततः प्रववृते युद्धं कुरूणां पाण्डवैः सह।
निवृत्तानां महाराज मृत्युं कृत्वा निवर्तनम् ॥ ४ ॥
तत्राश्चर्यमभूद्युद्धं सात्वतस्य परैः सह।
यदेको वारयामास पाण्डुसेनां दुरासदम् ॥ ५ ॥
तेषामन्योन्यसुहृदां कृते कर्मणि दुष्करे।

भूकम्प होनेसे पर्वत टूटकर गिर पडता है। उस हाथीके गिरते ही तुम्हारी सेनामें हाहाकार होगया, उसी समय सात्यकीके बाणसे राजा शाल्वका शिर· भी कटकर गिर गया, वह हाथी, राजा शाल्वके सहित इस प्रकार पृथ्वीमें गिरा जैसे इन्द्रका वज्र लगनेसे पर्वत टूट पडता है। (२१—२७)[११८५]

शल्यपर्वमें बीस अध्याय समाप्त।

शल्यपर्वमें इक्कीस अध्याय।

सञ्जय बोले, हे राजन्! वीर राजा शाल्वके मरनेपर तुम्हारी सेना भागने लगी। और इस प्रकार कांपने लगी, जैसे आंधी चलनेसे वृक्ष। अपनी सेना· को भागते देख महावीर महाबलवान् कृतवर्मा पाण्डवोंसे युद्ध करनेको चले, कृतवर्माको बाण चलाते और पर्वतके समान खडा देख तुम्हारी सेना फिर लौटी, हे महाराज! तब कौरव और पाण्डवोंका फिर घोर युद्ध होने लगा। और दोनोंने मृत्युको आगे कर लिया, इस समय कृतवर्माने विचित्र युद्ध किया। क्यों कि एकलेनेही पाण्डवोंकी सब भारी सेनाको रोक दिया। (१-५)

तब दोनों ओरके वीर प्रसन्न होकर

सिंहनादः प्रहृष्टानां दिविस्पृक्सुमहानभूत् ॥ ६ ॥
तेन शब्देन वित्रस्तान्पञ्चालान् भरतर्षभ ।
शिनेर्नप्ता महाबाहुरन्वपद्यत सात्यकिः ॥ ७ ॥
स समासाद्य राजानं क्षेमधूर्तिं महाबलम् ।
सप्तभिर्निशितैर्बाणैरनयद्यमसादनम् ॥ ८ ॥
तमायान्तं महाबाहुं प्रवपन्तं शितान् शरान् ।
जवेनाभ्यपतद्धीमान्हार्दिक्यः शिनिपुंगवम् ॥ ९ ॥
सात्वतौ च महावीर्यौ धन्विनौ रथिनां वरौ ।
अन्योन्यमभिधावेतां शस्त्रप्रवरधारिणौ ॥ १० ॥
पाण्डवाः सहपञ्चाला योधाश्चान्ये नृपोत्तमाः ।
प्रेक्षकाः समपद्यन्त तयोर्घोरे समागमे ॥ ११ ॥
नाराचैर्वत्सदन्तैश्च वृष्ण्यंधकमहारथौ ।
अभिजघ्नतुरन्योन्यं प्रहृष्टाविव कुञ्जरौ ॥ १२ ॥
चरन्तौ विविधान्मार्गान्हार्दिक्यशिनिपुङ्गवौ ।
मुहुरन्तर्दधाते तौ बाणवृष्ट्या परस्परम् ॥ १३ ॥
चापवेगबलोद्धूतान्मार्गणान् वृष्णिसिंहयोः ।
आकाशे समपश्याम पतंगानिव शीघ्रगान् ॥ १४ ॥
तमेकं सत्यकर्माणमासाद्य हृदिकात्मजः ।
अविध्यन्निशितैर्बाणैश्चतुर्भिश्चतुरो हयान् ॥ १५ ॥

गर्जने और युद्ध करने लगे। उनके गर्जनेका शब्द आकाशतक फैल गया, अपनी सेनाको व्याकुल देख सिनीके पोते सात्यकी दौडे। उन्होंने आते ही अपने सात बाणोंसे महा बलवान् क्षेमधूर्त्तिको मारडाला। उनको अपनी ओर आते और बाण वर्षाते देख कृत-वर्मा वेगसे दौडे, तब ये दोनों वृष्णि-वंशी वीर तेज बाण चलाते हुए घोर युद्ध करने लगे॥ (६-१०)

तब पाण्डव और पाञ्चाल आदि सब वीर इन दोनोंका युद्ध देखने लगे। तब वे दोनों मतवाले हाथियोंके समान प्रसन्न होकर बाण वर्षाने लगे। दोनों अपने अपने रथोंकी अनेक प्रकारकी गतियोंसे घूमते थे, कभी बाणोंमें छिप जाते थे और कभी प्रकट होजाते थे, उस समय हमने दोनों यदुवंशी वीरोंके बाण आकाशमें टीडीदलके समान घूम-ते देखे, तब कृतवर्माने सात्यकीके शरी-

स दीर्घबाहुः संक्रुद्धस्तोत्रार्दित इव द्विपः ।
अष्टभिः कृतवर्माणमविध्यत्परमेषुभिः ॥ १६ ॥
ततः पूर्णायतोत्सृष्टैः कृतवर्मा शिलाशितैः ।
सात्यकिं त्रिभिराहत्य धनुरेकेन चिच्छिदे ॥ १७ ॥
निकृत्तं तद्धनुः श्रेष्ठमपास्य शिनिपुंगवः ।
अन्यदादत्त वेगेन शैनेयः सशरं धनुः ॥ १८ ॥
तदादाय धनुः श्रेष्ठं वरिष्ठः सर्वधन्विनाम् ।
आरोप्य च धनुः शीघ्रं महावीर्यो महाबलः ॥ १९ ॥
अमृष्यमाणो धनुषश्छेदनं कृतवर्मणा ।
कुपितोऽतिरथः शीघ्रं कृतवर्माणमभ्ययात् ॥ २० ॥
ततः सुनिशितैर्बाणैर्दशभिः शिनिपुंगवः ।
जघान सूतं चाश्वांश्च ध्वजं च कृतवर्मणः ॥ २१ ॥
ततो राजन्महेष्वासः कृतवर्मा महारथः ।
हताश्वसूतं सम्प्रेक्ष्य रथं हेमपरिष्कृतम् ॥ २२ ॥
रोषेण महताऽऽविष्टः शूलमुद्यम्य मारिष ।
चिक्षेप भुजवेगेन जिघांसुः शिनिपुंगवम् ॥ २३ ॥
तच्छूलं सात्वतो ह्याजौ निर्भिद्य निशितैः शरैः ।
चूर्णितं पातयामास मोहयन्निव माधवम् ॥ २४ ॥
ततोऽपरेण भल्लेन हृद्येनं समताडयत् ।

रमें एक बाण मारा और चार बाणोंसे चारों घोडोंको मारडाला । (११-१५)

उस बाणके लगनेसे सात्यकीको ऐसा क्रोध हुआ जैसे अंगुल लगनेसे हाथीको । तब उन्होंने कृतवर्माके आठ बाण मारे, तब कृतवर्माने भी कानतक धनुष खींचकर तीन बाण सात्यकीको मार एकसे धनुष काट दिया । तब सात्यकीने उस धनुषको फेंककर शीघ्र दूसरा धनुष लेकर बाण चढाया, तब महाबलवान् महापराक्रमी सात्यकीने अपने धनुष कटनेसे महाक्रोध करके कृतवर्माकी ओर दौडे, तब दश तेज बाणोंसे कृतवर्माके सारथी और घोडोंको मरा देख, कृतवर्माने सात्यकीके मारनेके लिये भाला चलाया। तब सात्यकीने उस भालेको मार्गहीमें काटकर चूर कर दिया, तब कृतवर्मा घबडाने लगे।१६-२४

तब सारथी और घोडे रहित रथपर बैठे कृतवर्माकी छातीमें एक तेज बाण

युयुधे युयुधानेन हताश्वो हतसारथिः ॥ २५ ॥
कृतवर्मा कृतस्तेन धरणीमन्वपद्यत ।
तस्मिन्सात्यकिना वीरे द्वैरथे विरथिकृते ॥ २६ ॥
समपद्यत सर्वेषां सैन्यानां सुमहद्भयम् ।
पुत्रस्य तव चात्यर्थं विषादः समजायत ॥ २७ ॥
हतसूते हताश्वे तु विरथे कृतवर्मणि ।
हताश्वं च समालक्ष्य हतसूतमरिन्दम ॥ २८ ॥
अभ्यधावत्कृपो राजन् जिघांसुः शिनिपुंगवम् ।
तमारोप्य रथोपस्थे मिषतां सर्वधन्विनाम् ॥ २९ ॥
अपोवाह महाबाहुं तूर्णमायोधनादपि ।
शैनेयेऽधिष्ठिते राजन्विरथे कृतवर्मणि ॥ ३० ॥
दुर्योधनबलं सर्वं पुनरासीत्पराङ्मुखम् ।
तत्परे नान्वबुध्यन्त सैन्येन रजसाऽऽवृताः ॥ ३१ ॥
तावकाः प्रद्रुता राजन्दुर्योधनमृते नृपम् ।
दुर्योधनस्तु सम्प्रेक्ष्य भग्नं स्वबलमन्तिकात् ॥ ३२ ॥
जवेनाभ्यपतत्तूर्णं सर्वांश्चैको न्यवारयत् ।
पाण्डूंश्च सर्वान्संक्रुद्धो धृष्टद्युम्नं च पार्षतम् ॥ ३३ ॥
शिखण्डिनं द्रौपदेयान्पश्चालानां च ये गणाः ।
केकयान्सोमकांश्चैव सृञ्जयांश्चैव मारिष ॥ ३४ ॥

मारा। उस बाणके लगते ही कृतवर्मा रथसे नीचे उतरे, उनको रथहीन और सात्यकीसे हारा हुआ देख तुम्हारे सब वीर डरने लगे। विशेष कर राजा दुर्योधन घबडा गये, कृतवर्माको रथहीन देखकर कृपाचार्य दौडे और उन्हें अपने रथपर बिठलाकर सब धनुषधारियोंके देखते देखते युद्धसे हटा ले गये, कृतवर्माको भागते और सात्यकीको युद्धमें खडा देख तुम्हारी सेना फिर भागने लगी; परन्तु ऐसी धूल उडी कि पाश्चाल सेना तुम्हारी भागती सेनाको देख न सकी दुर्योधनको छोड और सब सेना भागने लगी। (२५-३२)

अपनी सेनाको भागते देख राजा दुर्योधनको महाक्रोध हुआ और उन एकलेहीने पांचों पाण्डव, धृष्टद्युम्न, शिखण्डी, द्रौपदीके पांचों पुत्र, सब पाञ्चाल, सब सृञ्जय, सब सोमक और सब केकयोंको रोक दिया। उस समय

असम्भ्रमं दुराधर्षः शितैर्बाणैरवाकिरत्।
अतिष्ठदाहवे यत्तः पुत्रस्तव महाबलः ॥ ३५ ॥
यथा यज्ञे महानग्निर्मन्त्रपूतः प्रकाशवान्।
तथा दुर्योधनो राजा संग्रामे सर्वतोऽभवत् ॥ ३६ ॥
तं परे नाभ्यवर्त्तन्त मर्त्या मृत्युमिवाहवे।
अथान्यं रथमास्थाय हार्दिक्यः समपद्यत ॥ ३७ ॥ [१२२२]

इति श्रीमहाभारते० शल्यपर्वणि सात्यकिकृतवर्मयुद्धे एकविंशोऽध्यायः ॥ २१ ॥

सञ्जय उवाच— पुत्रस्तु ते महाराज रथस्थो रथिनां वरः।
दुरुत्सहो बभौ युद्धे यथा रुद्रः प्रतापवान् ॥ १ ॥
तस्य बाणसहस्रैस्तु प्रच्छन्ना ह्यभवन्मही।
परांश्च सिषिचे बाणैर्धाराभिरिव पर्वतान् ॥ २ ॥
न च सोऽस्ति पुमान्कश्चित्पाण्डवानां बलार्णवे।
हयो गजो रथो वाऽपि यः स्याद्बाणैरविक्षतः ॥ ३ ॥
यं यं हि समरे योधं प्रपश्यामि विशाम्पते।
स स बाणैश्चितोऽभूद्वै पुत्रेण तव भारत ॥ ४ ॥
यथा सैन्येन रजसा समुद्भूतेन वाहिनी।
प्रत्यदृश्यन सञ्छन्ना तथा बाणैर्महात्मनः ॥ ५ ॥

एकले महापराक्रमी दुर्योधन सावधान होकर घोर युद्ध करने लगे। जैसे यज्ञशालामें मन्त्रोंसे दी हुई आहुति जलाती हुई अग्नि चारों ओर प्रकाशित दीखती है, ऐसे ही उस युद्धमें राजा दुर्योधन दीखने लगे। उस समय उनके आगे कोई वीर इस प्रकार नहीं ठहरता था जैसे यमराजके आगे मनुष्य। तब थोडे ही समयमें कृतवर्मा दूसरे रथमें बैठकर युद्धमें आगये॥ (३२-३७) [१२२२]

शल्यपर्वमें इक्कीस अध्याय समाप्त।

शल्यपर्वमें बाईस अध्याय।

सञ्जय बोले, हे राजन्! उस समय महावीर दुर्योधन रथमें बैठे ऐसे दीखते थे, जैसे शिव; राजा दुर्योधन शत्रुओंपर इस प्रकार बाण चला रहे थे, जैसे मेघ पर्वतोंपर जल बरसाते हैं, सब युद्धभूमिमें दुर्योधनके बाण ही बाण दीखने लगे उस समय पाण्डवोंकी सेनामें कोई हाथी, घोडा, रथ, मनुष्य ऐसा न बचा था जिसके शरीरमें दुर्योधनका बाण न लगा हो। उस समय हम जिस योद्धाको देखते थे उसे ही दुर्योधनके बाणोंसे

बाणभूतामपश्याम पृथिवीं पृथिवीपते ।
दुर्योधनेन प्रकृतां क्षिप्रहस्तेन धन्विना ॥ ६ ॥
तेषु योधसहस्रेषु तावकेषु परेषु च ।
एको दुर्योधनो ह्यासीत्पुमानिति मतिर्मम ॥ ७ ॥
तत्राद्भुतमपश्याम तव पुत्रस्य विक्रमम् ।
यदेकं सहिताः पार्था नाभ्यवर्त्तन्त भारत ॥ ८ ॥
युधिष्ठिरं शतेनाजौ विव्याध भरतर्षभ ।
भीमसेनं च सप्तत्या सहदेवं च पञ्चभिः ॥ ९ ॥
नकुलं च चतुःषष्ट्या धृष्टद्युम्नं च पञ्चभिः ।
सप्तभिर्द्रौपदेयांश्च त्रिभिर्विव्याध सात्यकिम् ॥ १० ॥
धनुश्चिच्छेद भल्लेन सहदेवस्य मारिष ।
तदपास्य धनुश्छिन्नं माद्रीपुत्रः प्रतापवान् ॥ ११ ॥
अभ्यद्रवत राजानं प्रगृह्यान्यन्महद्धनुः ।
ततो दुर्योधनं संख्ये विव्याध दशभिः शरैः ॥ १२ ॥
नकुलस्तु ततो वीरो राजानं नवभिः शरैः ।
घोररूपैर्महेष्वासो विव्याध च ननाद च ॥ १३ ॥
सात्यकिश्चैव राजानं शरेणानतपर्वणा ।
द्रौपदेयास्त्रिसप्तत्या धर्मराजश्च पञ्चभिः ॥ १४ ॥
अशीत्या भीमसेनश्च शरै राजानमार्पयन् ।

व्याकुल पाते थे, जैसे चलती हुई सेनाकी धूलसे मनुष्य छा जाते हैं तैसेही दुर्योधनके बाणोंसे छागये थे, उस समय महाधनुषधारी शीघ्र बाण चलानेवाले राजा दुर्योधनके बाणोंसे पृथ्वी भर गई ॥ (१-६)

राजा दुर्योधन एकले ही सबसे लडते रहे यह देखकर हम सब लोग आश्चर्य करने लगे, दुर्योधनने युधिष्ठिरके सौ, भीमसेनके सत्तर, सहदेवके पांच, नकुलके चौंसठ, धृष्टद्युम्नके पांच, द्रौपदीके पुत्रोंके सात सात और सात्यकिके तीन बाण मारे। फिर एक बाणसे सहदेवका धनुष काट दिया, तब प्रतापी सहदेवने उस धनुषको फेंक कर शीघ्रता सहित दूसरा धनुष लेकर दुर्योधनके शरीरमें दश तेज बाण मारे। ऐसे ही नकुल भी राजा दुर्योधनके शरीरमें नौ बाण मार सिंहके समान गर्जने लगे। सात्यकिने एक, द्रौपदीके पुत्रोंने तिहत्तर, धर्मराज युधिष्ठिरने पांच और अस्सी बाण भीम

समन्तात्कीर्यमाणस्तु बाणसङ्घैर्महात्मभिः ॥ १५ ॥
न चचाल महाराज सर्वसैन्यस्य पश्यतः ।
लाघवं सौष्ठवं चापि वीर्यं चापि महात्मनः ॥ १६ ॥
अतिसर्वाणि भूतानि ददृशुः सर्वमानवाः ।
धार्तराष्ट्रा हि राजेन्द्र योधास्तु स्वल्पमन्तरम् ॥ १७ ॥
अपश्यमाना राजानं पर्यवर्त्तन्त दंशिताः ।
तेषामापततां घोरस्तुमुलः समपद्यत ॥ १८ ॥
क्षुब्धस्य हि समुद्रस्य प्रावृट्काले यथा स्वनः ।
समासाद्य रणे ते तु राजानमपराजितम् ॥ १९ ॥
प्रत्युद्ययुर्महेष्वासाः पाण्डवानाततायिनः ।
भीमसेनं रणे क्रुद्धो द्रोणपुत्रो न्यवारयत् ॥ २० ॥
नानाबाणैर्महाराज प्रमुक्तैः सर्वतो दिशम् ।
नाज्ञायन्त रणे वीरा न दिशः प्रदिशः कुतः ॥ २१ ॥
तावुभौ क्रूरकर्माणावुभौ भारत दुःसहौ ।
घोररूपमयुध्येतां कृतप्रतिकृतैषिणौ ॥ २२ ॥
त्रासयन्तौ दिशः सर्वा ज्याक्षेपकठिनत्वचौ ।
शकुनिस्तु रणे वीरो युधिष्ठिरमपीडयत् ॥ २३ ॥

सेनने मारे और भी अनेक वीरोंने चारों ओरसे दुर्योधनको बाणोंसे छा दिया। परन्तु दुर्योधन कुछ न घबडाये और शीघ्रता सहित सावधान होकर बाण चलाते रहे। उस समय राजा दुर्योधन ऐसा काम कर रहे थे, जैसा कोई मनुष्य नहीं कर सक्ता, किसीकी यह शक्ति नहीं थी, कि उनकी ओरको देख सके। (७—१७)

तब पाण्डवोंके वीर भी सावधान होकर राजा दुर्योधनकी ओर दौडे। तब दोनों ओरसे महाघोर शब्द होने लगा, जैसे वर्षाकालमें बढते हुए समुद्रका होता है, ऐसे ही सेनाका शब्द होने लगा, तब इधरसेभी अनेक वीर विजयी पाण्डवोंसे युद्ध करनेको चले। अश्वत्थामाने भीमसेनको रोक दिया, उस समय बाणोंके मारे हमें यह नहीं जान पडता था, कि पूर्व, पश्चिम किधर है दोनों महापराक्रमी दोनों महावीर दोनों महा योद्धा भीमसेन और अश्वत्थामा एक दूसरेके मारनेका यत्न करने लगे, दोनोंकी धनुषके शब्दसे सब मनुष्य डरने लगे, उसी समय शकुनि युधिष्ठिर

तस्याश्वांश्चतुरो हत्वा सुबलस्य सुतो विभो।
नादं चकार बलवत्सर्वसैन्यानि कोपयन् ॥ २४ ॥
एतस्मिन्नन्तरे वीरं राजानमपराजितम्।
अपोवाह रथेनाजौ सहदेवः प्रतापवान् ॥ २५ ॥
अथान्यं रथमास्थाय धर्मपुत्रो युधिष्ठिरः।
शकुनिं नवभिर्विद्ध्वा पुनर्विव्याध पञ्चभिः ॥ २६ ॥
ननाद च महानादं प्रवरः सर्वधन्विनाम्।
तद्युद्धमभवच्चित्रं घोररूपं च मारिष ॥ २७ ॥
प्रेक्षतां प्रीतिजननं सिद्धचारणसेवितम्।
उलूकस्तु महेष्वासं नकुलं युद्धदुर्मदम् ॥ २८ ॥
अभ्यद्रवदमेयात्मा शरवर्षैः समन्ततः।
तथैव नकुलः शूरः सौबलस्य सुतं रणे ॥ २९ ॥
शरवर्षेण महता समन्तात्पर्यवारयत्।
तौ तत्र समरे वीरौ कुलपुत्रौ महारथौ ॥ ३० ॥
योधयन्तावपश्येतां कृतप्रतिकृतैषिणौ।
तथैव कृतवर्माणं शैनेयः शत्रुतापनः ॥ ३१ ॥
योधयन् शुशुभे राजन्बलिं शक्र इवाहवे।
दुर्योधनो धनुश्छित्त्वा धृष्टद्युम्नस्य संयुगे ॥ ३२ ॥

की ओर बाण चलाने लगे और महाराजके चारों घोडोंको मारकर सब सेनाका उत्साह बढानेके लिये सिंह के समान गर्जे, तब राजा सहदेवके रथपर बैठकर युद्धसे चले गये, फिर दूसरे रथमें बैठकर महाराजने शकुनिके शरीरमें नौ बाण मारकर पांच और मारे, और सिंहके समान गर्जने लगे, तब शकुनि और युधिष्ठिरका घोर युद्ध होने लगा। (१८–२७)

उस युद्धको देखकर सिद्ध, चारण और गन्धर्व दोनोंकी प्रशंसा करने लगे। महावीर शकुनिके पुत्र उलूक महापराक्रमी नकुलकी ओर दौडे और नकुलभी उनकी ओर दौडे, दोनों उत्तम कुलमें उत्पन्न हुए महारथ क्षत्री घोर युद्ध करने लगे। वे दोनों एक दूसरेके बाणोंको काटकर अपनी अपनी विजयका यत्न करने लगे, उधर सात्यकि और कृतवर्मा भी बली और इन्द्रके समान युद्ध करने लगे। दुर्योधनने एक बाणसे धृष्टद्युम्नका धनुष काट दिया, और उन-

अथैनं छिन्नधन्वानं विव्याध निशितैः शरैः।
धृष्टद्युम्नोऽपि समरे प्रगृह्य परमायुधम् ॥ ३३ ॥
राजानं योधयामास पश्यतां सर्वधन्विनाम्।
तयोर्युद्धं महच्चासीत्संग्रामे भरतर्षभ ॥ ३४ ॥
प्रभिन्नयोर्यथासक्तं मत्तयोर्वरहस्तिनोः।
गौतमस्तु रणे क्रुद्धो द्रौपदेयान्महाबलान् ॥ ३५ ॥
विव्याध बहुभिः शूरः शरैः सन्नतपर्वभिः।
तस्य तैरभवद्युद्धमिंद्रियैरिव देहिनः ॥ ३६ ॥
घोररूपमसंवार्यं निर्मर्यादमवर्त्तत।
ते च संपीडयामासुरिन्द्रियाणीव बालिशम् ॥ ३७ ॥
स च तान्प्रतिसंरब्धः प्रत्ययोधयदाहवे।
एवं चित्रमभूद्युद्धं तस्य तैः सह भारत ॥ ३८ ॥
उत्थायोत्थाय हि यथा देहिनामिन्द्रियैर्विभो।
नराश्चैव नरैः सार्धं दन्तिनो दन्तिभिस्तथा ॥ ३९ ॥
हया हयैः समासक्ता रथिनो रथिभिः सह।
संकुलं चाभवद्भूयो घोररूपं विशाम्पते ॥ ४० ॥
इदं चित्रमिदं घोरमिदं रौद्रमिति प्रभो।
युद्धान्यासन्महाराज घोराणि च बहूनि च ॥ ४१ ॥

के शरीरमें अनेक बाण मारे, धृष्टद्युम्नने भी दूसरा धनुष लेकर दुर्योधनसे घोर युद्ध किया, जैसे दो मतवाले हाथी घोर युद्ध करते हैं। ऐसे ही इन दोनों-का भयानक युद्ध हुआ। (२८-३४)

जैसे इन्द्रियोंके सङ्ग जीव लडता है। ऐसे ही कृपाचार्य और द्रौपदीके पुत्रों-का महाघोर युद्ध हुआ, उस युद्धमें कुछ मर्यादा न रही। जैसे मूर्खको इन्द्री व्या-कुल कर देती है। तैसे ही उन पांचोंने कृपाचार्यको व्याकुल कर दिया, परन्तु कृपाचार्य भी एकलेही उस पांचोंके सङ्ग विचित्र युद्ध करते रहे, जैसे जीव इन्द्रियोंको जीतनेका उपाय करता है, तैसे ही कृपाचार्य भी उनके जीतनेका उपाय करने लगे। पैदल पैदलोंसे रथी रथियोंसे, हाथीपर चढे हाथी पर चढों-से और घुडचढे घुडचढोंसे घोर युद्ध करने लगे। (३५-४०)

हे राजन्! इस प्रकार सब रीतिसे घोर और विचित्र युद्ध हुआ, कोई वीर शत्रुके पास जाकर गर्जने लगा और

ते समासाद्य समरे परस्परमरिन्दमाः ।
व्यनदंश्चैव जघ्नुश्च समासाद्य महाहवे ॥ ४२ ॥
तेषां पत्रसमुद्भूतं रजस्तीव्रमदृश्यत ।
वातेन चोद्धतं राजन्धावद्भिश्चाश्वसादिभिः ॥ ४३ ॥
रथनेमिसमुद्भूतं निःश्वासैश्चापि दन्तिनाम् ।
रजः सन्ध्याभ्रकलिलं दिवाकरपथं ययौ ॥ ४४ ॥
रजसा तेन सम्पृक्तो भास्करो निष्प्रभः कृतः ।
सञ्छादिताऽभवद्भूमिस्ते च शूरा महारथाः ॥ ४५ ॥
मुहूर्त्तादिव संवृत्तं नीरजस्कं समन्ततः ।
वीरशोणितसिक्तायां भूमौ भरतसत्तम ॥ ४६ ॥
उपाशाम्यत्ततस्तीव्रं तद्रजो घोरदर्शनम् ।
ततोऽपश्यमहं भूयो द्वंद्वयुद्धानि भारत ॥ ४७ ॥
यथा प्राणं यथा श्रेष्ठं मध्याह्ने वै सुदारुणम् ।
वर्मणां तत्र राजेन्द्र व्यदृश्यन्तोज्ज्वलाः प्रभाः ॥ ४८ ॥
शब्दश्च तुमुलः संख्ये शराणां पततामभूत् ।
महावेणुवनस्येव दह्यमानस्य पर्वते ॥ ४९ ॥ [१२७१]

इति श्रीमहाभारते० शल्यपर्वणि संकुलयुद्धे द्वाविंशोऽध्यायः ॥ २२ ॥

सञ्जय उवाच— वर्त्तमाने तदा युद्धे घोररूपे भयानके ।
अभज्यत बलं तत्र तव पुत्रस्य पाण्डवैः ॥ १ ॥

कोई किसीको मारने लगा। घोडों और पैदलोंके दौडनेसे ऐसी धूल उडी कि दिनहीमें रात्रिसी दीखने लगी। रथोंके पहियोंके वायु और हाथियोंके स्वाससे उडकर धूल सूर्यतक पहुंच गई, उस धूलसे सूर्यका तेज घट गया, सब भूमि और वीर भी छागये। फिर थोडे समयके पश्चात् वीरोंका रुधिर बहनेसे सब धूल बैठ गई, जब यह घोर धूल शान्त हुई, तब मैंने फिर देखा कि चारों ओर घोर युद्ध हो रहा है। हे राजेन्द्र! उस दो पहरके समयमें चारों ओर वीरोंके कवच ही पडे दीखते थे, जैसे जलते हुए वनमें बांस चटकनेका शब्द होता है। ऐसे ही बाणोंके चलनेका शब्द सुनाई देता था। (४१—४९)

शल्यपर्वमें बाईस अध्याय समाप्त ।

शल्यपर्वमें तेईस अध्याय ।

सञ्जय बोले हे राजन्! ऐसा घोर युद्ध होनेसे तुम्हारी सेना इधर उधर

तांस्तु यत्नेन महता सन्निवार्य महारथान् ।
पुत्रस्ते योधयामास पाण्डवानामनीकिनीम् ॥ २ ॥
निवृत्ताः सहसा योधास्तव पुत्रजयैषिणः ।
सन्निवृत्तेषु तेष्वेवं युद्धमासीत्सुदारुणम् ॥ ३ ॥
तावकानां परेषां च देवासुररणोपमम् ।
परेषां तव सैन्ये वा नासीत्कश्चित्पराङ्मुखः ॥ ४ ॥
अनुमानेन युध्यन्ते संज्ञाभिश्च परस्परम् ।
तेषां क्षयो महानासीद्युध्यतामितरेतरम् ॥ ५ ॥
ततो युधिष्ठिरो राजा क्रोधेन महता युतः ।
जिगीषमाणः संग्रामे धार्त्तराष्ट्रान्सराजकान् ॥ ६ ॥
त्रिभिः शारद्वतं विद्ध्वा रुक्मपुङ्खैः शिलाशितैः ।
चतुर्भिर्निजघानाश्वान्नाराचैः कृतवर्मणः ॥ ७ ॥
अश्वत्थामा तु हार्दिक्यमपोवाह यशस्विनम् ।
अथ शारद्वतोऽष्टाभिः प्रत्यविध्यद्युधिष्ठिरम् ॥ ८ ॥
ततो दुर्योधनो राजा रथान्सप्तशतान्रणे ।
प्रैषयद्यत्र राजाऽसौ धर्मपुत्रो युधिष्ठिरः ॥ ९ ॥
ते रथा रथिभिर्युक्ता मनोमारुतरंहसः ।
अभ्यद्रवन्त संग्रामे कौन्तेयस्य रथं प्रति ॥ १० ॥

भागने लगी। तब राजा दुर्योधन बहुत यत्नसे उनको रोक कर पाण्डवोंकी सेनासे युद्ध करने लगे। तब तुम्हारी ओरके और भी वीर लौटे और घोर युद्ध करने लगे। यह युद्ध देवासुर संग्रामके समान हुआ। उस समय दोनों ओरसे कोई भागा नहीं, उस समय दोनों ओरके वीर केवल अनुमान और चिन्होंसे युद्ध कर रहे थे, अर्थात् कोई किसीको पहचान नहीं सक्ता था, तब राजा युधिष्ठिरको महाक्रोध हुआ, और राजोंके समेत तुम्हारे पुत्रोंको जीतनेके लिये, कृपाचार्यके शरीरमें तीन बाण मार कर चार बाणसे कृतवर्माके चारों घोडोंको मारडाला। (१—७)

तब यशस्वी कृतवर्माको अश्वत्थामाने अपने रथपर चढा लिया और कृपाचार्यने भी युधिष्ठिरके आठ बाण मारे, तब राजा दुर्योधनने युधिष्ठिरसे लडनेके लिये सात सौ रथ भेजे, वे वायु और मनके समान तेज चलनेवाले रथ वीरोंके सहित युधिष्ठिरकी ओर दौडे तब

ते समन्तान्महाराज परिवार्य युधिष्ठिरम् ।
अदृश्यं सायकैश्चक्रुर्मेघा इव दिवाकरम् ॥ ११ ॥
ते दृष्ट्वा धर्मराजानं कौरवेयैस्तथाकृतम् ।
नामृष्यन्त सुसंरब्धाः शिखण्डीप्रमुखा रथाः॥ १२ ॥
रथैरश्ववरैर्युक्तैः किङ्किणीजालसंवृतैः ।
आजग्मुरथ रक्षन्तः कुन्तीपुत्रं युधिष्ठिरम् ॥ १३ ॥
ततः प्रववृते रौद्रः संग्रामः शोणितोदकः ।
पाण्डवानां कुरूणां च यमराष्ट्रविवर्धनः ॥ १४ ॥
रथान्सप्तशतान्हत्वा कुरूणामाततायिनाम् ।
पाण्डवाः सह पश्चालैः पुनरेवाभ्यवारयन् ॥ १५ ॥
तत्र युद्धं महच्चासीत्तव पुत्रस्य पाण्डवैः ।
न च तत्तादृशं दृष्टं नैव चापि परिश्रुतम् ॥ १६ ॥
वर्तमाने तदा युद्धे निर्मर्यादे समन्ततः ।
वध्यमानेषु योधेषु तावकेष्वितरेषु च ॥ १७ ॥
विनदत्सु च योधेषु शङ्खवर्यैश्च पूरितैः ।
उत्कुष्टैः सिंहनादैश्च गर्जितैश्चैव धन्विनाम् ॥ १८ ॥
अतिप्रवृत्ते युद्धे च छिद्यमानेषु मर्मसु ।
धावमानेषु योधेषु जयगृद्धिषु मारिष ॥ १९ ॥
संहारे सर्वतो जाते पृथिव्यां शोकसम्भवे ।
बह्वीनामुत्तमस्त्रीणां सीमन्तोद्धरणे तथा ॥ २० ॥

उनमें बैठे वीर युधिष्ठिरको घेरकर बाण चलाने लगे। राजा युधिष्ठिर उनके बीचमें ऐसे छिप गये, जैसे सूर्य मेघोंमें। राजाको घिरा देख शिखण्डी राजाकी रक्षाके लिये दौडे तब फिर पाञ्चाल और कौरवोंका घोर युद्ध होने लगा। रुधिर बह चला, पाञ्चाल और पाण्डवों-ने थोडे ही समयमें उस सात सौ रथों-का नाश कर दिया, और तुम्हारी सेनाकी ओर दौडे जैसा उस समय कौरव और पाण्डवोंका युद्ध हुआ ऐसा न सुना था और न देखा था, इस मर्यादा रहित घोर युद्धमें दोनों ओरके वीरोंका नाश होने लगा, दोनों ओरसे धनुषधारी गर्जने लगे। शङ्ख बजाने लगे और धनुषोंपर टङ्कार देने लगे। कहीं वीरोंके शरीर कटने लगे। अपनी अपनी विजयके लिये वीर दौडने लगे।

निर्मर्यादे महायुद्धे वर्त्तमाने सुदारुणे ।
प्रादुरासन्विनाशाय तदोत्पाताः सुदारुणाः ॥ २१ ॥
चचाल शब्दं कुर्वाणा सपर्वतवना मही ।
सदण्डाः सोल्मुका राजन्कीर्यमाणाः समन्ततः ॥२२॥
उल्काः पेतुर्दिवो भूमावाहत्य रविमण्डलम् ।
विष्वग्वाताः प्रादुरासन्नीचैः शर्करवर्षिणः ॥ २३ ॥
अश्रूणि मुमुचुर्नागा वेपथुश्चास्पृशन्भृशम् ।
एतान्घोराननादृत्य समुत्पातान्सुदारुणान् ॥ २४ ॥
पुनर्युद्धाय संयत्ताः क्षत्रियास्तस्थुरव्यथाः ।
रमणीये कुरुक्षेत्रे पुण्ये स्वर्गं यियासवः ॥ २५ ॥
ततो गान्धारराजस्य पुत्रः शकुनिरब्रवीत् ।
युद्ध्यध्वमग्रतो यावत्पृष्ठतो हन्मि पाण्डवान् ॥ २६ ॥
ततो नः सम्प्रयातानां मद्रयोधास्तरस्विनः ।
हृष्टाः किलकिलाशब्दमकुर्वन्त परे तथा ॥ २७ ॥
अस्मांस्तु पुनरासाद्य लब्धलक्षा दुरासदाः ।
शरासनानि धुन्वन्तः शरवर्षैरवाकिरन् ॥ २८ ॥

इस घोर युद्धमें पृथ्वी भरकी अनेक युवती स्त्री विधवा हुई, तब जगत्का नाश करनेवाले अनेक घोर उत्पात हुए फिर उस पवित्र कुरुक्षेत्रमें क्षत्रीलोग सावधान होकर युद्ध करने लगे ।(८-२१)

हे राजन् ! स्वर्गमें जानेकी इच्छावाले, क्षत्री चारों ओर गर्जने लगे। उस समय वन और पर्वतोंके सहित भूमि हिलने लगी; आकाशसे जलती हुई दण्डके समान बिजली गिरी। आकाशसे सूर्यके मण्डलकी ओरको बिजली गिरने लगी। भयानक वायु चलने लगा, वालू वर्षने हाथियोंकी आंसू बहने लगीं। और सब कांपने लगे। इन सब शकुनोंका निरादर करके वीर क्षत्री फिर भी युद्ध करने लगे और सावधान होकर शत्रुओंको मारने लगे। उस रमणीय कुरुक्षेत्रमें स्वर्ग जानेकी इच्छावाले क्षत्री घोर युद्ध करने लगे। (२२–२५)

तब गान्धारराज सुबलके पुत्र अपने प्रधान वीरोंसे बोले, तुम लोग पाण्डवोंके आगे खडे हुए युद्ध किये जाओ और मैं पीछेसे जाकर नाश किये देता हूं। शकुनिके ऐसे वचन सुन हमारी ओरके मद्रदेशीय योद्धा प्रसन्न होकर गर्जने और हंसने लगे। तब पाण्डवोंकी

ततो हतं परैस्तत्र मद्रराजबलं तदा।
दुर्योधनबलं दृष्ट्वा पुनरासीत्पराङ्मुखम् ॥ २९ ॥
गान्धारराजस्तु पुनर्वाक्यमाह ततो बली।
निवर्तध्वमधर्मज्ञा युध्यध्वं किं सृतेन वः ॥ ३० ॥
अनीकं दशसाहस्रमश्वानां भरतर्षभ।
आसीद्गान्धारराजस्य विशालप्रासयोधिनाम् ॥ ३१ ॥
बलेन तेन विक्रम्य वर्तमाने जनक्षये।
पृष्ठतः पाण्डवानीकमभ्यघ्नन्निशितैः शरैः ॥ ३२ ॥
तदभ्रमिव वातेन क्षिप्यमाणं समन्ततः।
अभज्यत महाराज पाण्डूनां सुमहद्बलम् ॥ ३३ ॥
ततो युधिष्ठिरः प्रेक्ष्य भग्नं स्वबलमन्तिकात्।
अभ्यनोदयदव्यग्रः सहदेवं महाबलम् ॥ ३४ ॥
असौ सुबलपुत्रो नो जघनं पीड्य दंशितः।
सैन्यानि सूदयत्येष पश्य पाण्डव दुर्मतिम् ॥ ३५ ॥
गच्छ त्वं द्रौपदेयैश्च शकुनिं सौबलं जहि।
रथानीकमहं धक्ष्ये पञ्चालसहितोऽनघ ॥ ३६ ॥
गच्छन्तु कुञ्जराः सर्वे वाजिनश्च सह त्वया।

ओरके योद्धा भी मद्रदेशीय वीरोंके ऊपर घोर बाण वर्षाने लगे। तब वे सब इधर उधरको भाग चले। अपनी सेनाको भागते देख बलवान् शकुनि क्रोधकर बोले, अरे अधर्मियों! तुम लोग युद्ध छोडकर कहां भागे जाते हो? युद्ध करो भागनेसे क्या होगा? (२९–३०)

हे महाराज! उस समय घोर प्राससे युद्ध करनेवाले दस सहस्र वीर शकुनिके सङ्गमें थे, उसी सेनाको सङ्गमें लेकर वीर शकुनि पाण्डवोंके पीछेसे जाकर बाण वर्षाने लगे। तब वह पाण्डवोंकी सेना इस प्रकार फट गई जैसे वायु लगनेसे मेघ फट जाते हैं, तब राजा युधिष्ठिर चारों ओरको देखने लगे। फिर महाबलवान सहदेवसे बोले, हे पाण्डव! यह दुर्बुद्धि सुबलपुत्र सावधान होकर हमारी सेनाको पीछेसे मार रहा है, तुम बहुत शीघ्र द्रौपदीके पुत्रोंके सहित दौडो और इसको मारडालो। मैं पाञ्चाल वीरोंके सहित इस रथ सेना-को नाश कर दूंगा, हमारी आज्ञासे तुम्हारे सङ्ग सब हाथी, सब घोडे, और तीन सहस्र पैदल जाय और

पादाताश्च त्रिसाहस्राः शकुनिं तैर्वृतो जहि ॥ ३७ ॥
ततो गजाः सप्तशताश्चापपाणिभिरास्थिताः।
पञ्च चाश्वसहस्राणि सहदेवश्च वीर्यवान् ॥ ३८ ॥
पादाताश्च त्रिसाहस्रा द्रौपदेयाश्च सर्वशः।
रणे ह्यभ्यद्रवंस्ते तु शकुनिं युद्धदुर्मदम् ॥ ३९ ॥
ततस्तु सौबलो राजन्नभ्यतिक्रम्य तान् रथान्।
जघान पृष्ठतः सेनां जयगृद्धः प्रतापवान् ॥ ४० ॥
अश्वारोहास्तु संरब्धाः पाण्डवानां तरस्विनाम्।
प्राविशन्सौबलानीकमभ्यतिक्रम्य तान् रथान् ॥ ४१ ॥
ते तत्र सादिनः शूराः सौबलस्य महद्बलम्।
रणमध्ये व्यतिष्ठन्त शरवर्षैरवाकिरन् ॥ ४२ ॥
तदुद्यतगदाप्रासमकापुरुषसेवितम्।
प्रावर्त्तत महद्युद्धं राजन्दुर्मन्त्रिते तव ॥ ४३ ॥
उपारमन्त ज्याशब्दाः प्रेक्षका रथिनोऽभवन्।
नहि स्वेषां परेषां वा विशेषः प्रत्यदृश्यत ॥ ४४ ॥
शूरबाहुविसृष्टानां शक्तीनां भरतर्षभ।
जोतिषामिव सम्पातमपश्यन्कुरुपाण्डवाः ॥ ४५ ॥

तुम हमारी आज्ञासे शकुनिको मारो ॥ (३१—३७)

महाराजकी आज्ञा सुनते ही धनुषधारी वीरोंके सहित सात सौ हाथी, पांच सहस्र घोडे, तीन सहस्र पैदल, पांचों द्रौपदीके पुत्र और बलवान् सहदेव महायोद्धा शकुनिसे युद्ध करनेको चले। इनको आते देख प्रतापवान शकुनि भी पाण्डवोंके सामनेसे हटकर पीछेसे सहदेवकी सेनाका नाश करने लगा। तब पाण्डवोंके वीर घुडचढे योद्धा हठसे शकुनिकी सेनामें घुसे और भी सब वीर शकुनिकी सेनापर सहस्रों बाण वर्षाने लगे। (३८-४२)

हे राजन्! उस युद्धमें महावीर गदा और प्रास आदि शस्त्र चलाने लगे। हे महाराज! यह घोर युद्ध आपकी उस कपट सम्मतिहीका फल हुआ। दोनों ओरसे धनुषके रोदोंके शब्द होने लगे, एक वीर दूसरेको मारने लगा, उस समय कोई और परायेको नहीं पहचानता था। भरतकुलसिंह! वीरोंके हाथसे छूटी हुई साङ्गी आकाशमें इस प्रकार छूटती थी, मानों सहस्रों बिजली गिर रहीं

ऋष्टिभिर्विमलाभिश्च तत्र तत्र विशाम्पते ।
सम्पतन्तीभिराकाशमावृतं बह्वशोभत ॥ ४६ ॥
प्रासानां पततां राजन्रूपमासीत्समन्ततः ।
शलभानामिवाकाशे तदा भरतसत्तम ॥ ४७ ॥
रुधिरोक्षितसर्वाङ्गा विप्रविद्धैर्नियन्तृभिः ।
हयाः परिपतन्ति स्म शतशोऽथ सहस्रशः ॥ ४८ ॥
अन्योन्यं परिपिष्टाश्च समासाद्य परस्परम् ।
आविक्षताः स्म दृश्यन्ते वमन्तो रुधिरं मुखैः ॥ ४९ ॥
ततोऽभवत्तमो घोरं सैन्येन रजसाऽऽवृते ।
तानपाक्रमतोऽद्राक्षं तस्माद्देशादरिन्दम ॥ ५० ॥
अश्वान् राजन्मनुष्यांश्च रजसा संवृते सति ।
भूमौ निपतिताश्चान्ये वमन्तो रुधिरं बहु ॥ ५१ ॥
केशाकेशि समालग्ना न शेकुश्चेष्टितुं नराः ।
अन्योन्यमश्वपृष्ठेभ्यो विकर्षन्तो महाबलाः ॥ ५२ ॥
मल्ला इव समासाद्य निजघ्नुरितरेतरम् ।
अश्वैश्च व्यपकृष्यन्त बहवोऽत्र गतासवः ॥ ५३ ॥
भूमौ निपतिताश्चान्ये बहवो विजयैषिणः ।
तत्र तत्र व्यदृश्यन्त पुरुषाः शूरमानिनः ॥ ५४ ॥
रक्तोक्षितैश्छिन्नभुजैरवकृष्टशिरोरुहैः ।

हैं, चमकते और गिरते हुए सहस्रों खड्गोंसे आकाशकी अद्भुत शोभा दीखती थी, हे भरतकुलसिंह ! आकाशमें चलते हुए प्रास ऐसे जान पडते थे मानो सहस्रों जुगुनूं चमक रहे हैं, सहस्रों घोडे रुधिरमें भींगे वीरोंके सहित पृथ्वीमें गिरने लगे, किसीके मुखसे रुधिर गिरने लगा और कोई पिसकर मर गये ॥ (४६-४९)

हे महाराज ! उस समय दोनों सेना धूलसे भर गई और चारों ओर वीर इधर उधरको घबडाकर भागने लगे । कोई वीर पृथ्वीमें गिरा और किसीके मुखसे रुधिर बहने लगा, कोई महापराक्रमी वीर दूसरे वीरको बाल पकडकर घोडेपरसे खींचने लगा, कोई मल्लयुद्ध करने लगा, कोई घोडोंसे गिरकर मर गया, कोई अभिमानी वीर पृथ्वीमें गिरकर मर गया, उस समय कटे हुए शिर और रुधिरसे भींगे हाथोंसे पृथ्वी

व्यदृश्यत मही कीर्णा शतशोऽथ सहस्रशः ॥ ५५ ॥
दूरं न शक्यं तत्रासीद्गन्तुमश्वेन केनचित्।
साश्वारोहैर्हतैरश्वैरावृते वसुधातले ॥ ५६ ॥
रुधिरोक्षितसन्नाहैरात्तशस्त्रैरुदायुधैः।
नाना प्रहरणैर्घोरैः परस्परवधैषिभिः ॥ ५७ ॥
सुसन्निकृष्टैः संग्रामे हतभूयिष्ठसैनिकैः।
समुहूर्त्तं ततो युद्ध्वा सौबलोऽथ विशाम्पते ॥ ५८ ॥
षट्साहस्रैर्हयैः शिष्टैरपायाच्छकुनिस्ततः।
तथैव पाण्डवानीकं रुधिरेण समुक्षितम् ॥ ५९ ॥
षट्साहस्रैर्हयैः शिष्टैरपायाच्छ्रान्तवाहनम्।
अश्वारोहाश्च पाण्डूनामब्रुवन् रुधिरोक्षिताः ॥ ६० ॥
सुसन्निकृष्टे संग्रामे भूयिष्ठे त्यक्तजीविताः।
न हि शक्यं रथैर्योद्धुं कुत एव महागजैः ॥ ६१ ॥
रथानेव रथा यांतु कुञ्जराः कुञ्जरानपि।
प्रतियातो हि शकुनिः स्वमनीकमवस्थितः ॥ ६२ ॥
न पुनः सौबलो राजा युद्धमभ्यागमिष्यति।
ततस्तु द्रौपदेयाश्च ते च मत्ता महाद्विपाः ॥ ६३ ॥
प्रययुर्यत्र पाञ्चाल्यो धृष्टद्युम्नो महारथः।
सहदेवोऽपि कौरव्य रजो मेघे समुत्थिते ॥ ६४ ॥

भर गई, तब किसी तेज घोडेकी भी यह शक्ति न हुई कि थोडी दूर भी चल सके, सब शस्त्रधारी रुधिरसे भीग गये, यह घोर युद्ध थोडे समय तक होता रहा तब शकुनि बचे हुए छः सहस्र घुडचढोंको लेकर युद्धसे भाग गये, तब पाण्डवोंके भी छः सहस्र घुडचढे थकी हुई शकुनिकी सेनाके पीछे दौडे; तब रुधिरमें भीगे प्राणकी आशा छोडे अपने वीरोंको दौडते देख सहदेव बोले, इस समय रथोंपर बैठे वीर युद्ध नहीं कर सक्ते और हाथी सेनाकी तो कथाही क्या है? (५०—६१)

राजा शकुनि युद्ध छोडकर भाग गये, अब लौटकर नहीं आवेंगे इसलिये हमारे सङ्गके रथ रथ सेनामें और हाथी हाथी सेनामें मिल जांय, सहदेवके वचन सुन द्रौपदीके पांचों पुत्र मतवाले हाथियोंकी सेनाको लेकर महारथ पाञ्चाल राजा धृष्टद्युम्नकी ओरके चले गये।

एकाकी प्रययौ तत्र यत्र राजा युधिष्ठिरः ।
ततस्तेषु प्रयातेषु शकुनिः सौबलः पुनः ॥ ६५ ॥
पार्श्वतोऽभ्यहनत्क्रुद्धो धृष्टद्युम्नस्य वाहिनीम् ।
तत्पुनस्तुमुलं युद्धं प्राणांस्त्यक्त्वाऽभ्यवर्त्तत ॥ ६६ ॥
तावकानां परेषां च परस्परवधैषिणाम् ।
ते चान्योन्यमवैक्षन्त तस्मिन्वीरसमागमे ॥ ६७ ॥
योधाः पर्यपतन् राजन् शतशोऽथ सहस्रशः ।
असिभिश्छिद्यमानानां शिरसां लोकसंक्षये ॥ ६८ ॥
प्रादुरासीन्महाञ्शब्दस्तालानां पततामिव ।
विमुक्तानां शरीराणां छिन्नानां पततां भुवि ॥ ६९ ॥
सायुधानां च बाहूनामूरूणां च विशाम्पते ।
आसीत्कटकटाशब्दः सुमहाँल्लोमहर्षणः ॥ ७० ॥
निघ्नन्तो निशितैः शस्त्रैर्भ्रातॄन्पुत्रान्सखीनपि ।
योधाः परिपतन्ति स्म यथाऽऽमिषकृते खगाः ॥ ७१ ॥
अन्योन्यं प्रति संरब्धाः समासाद्य परस्परम् ।
अहं पूर्वमहं पूर्वमिति निघ्नन्सहस्रशः ॥ ७२ ॥
संघातेनासनभ्रष्टैरश्वारोहैर्गतासुभिः ।
हयाः परिपतन्ति स्म शतशोऽथ सहस्रशः ॥ ७३ ॥

सहदेव भी शकुनिकी सेनाको धूलसे भरी देख एकले राजा युधिष्ठिरके पास चले गये। सब वीरोंको गया हुआ देख शकुनि क्रोध करके धृष्टद्युम्नकी सेनाको बाईं ओरसे काटने लगे, तब धृष्टद्युम्नकी सेनासे घोर युद्ध होने लगा, दोनों ओरसे खड्ग चलने लगे, और वीरोंके शिर कट कटकर गिरने लगे और धनुषोंसे बाण छूटनेका ऐसा शब्द होने लगा, जैसे तालके वृक्ष टूटनेसे होता है, शस्त्रोंके साथ कहीं हाथ और कहीं पैर कटकर गिरने लगे और कहीं ऐसा घोर शब्द होने लगा कि, सुनकर रोए खडे होने लगे। (६२—७०)

जैसे मांसके लिये एक पक्षी दूसरेको मारता है, ऐसे ही वीर लोग भाई, पुत्र और मित्रोंको मारने लगे, कहीं परस्पर लडते हुए वीर हम पहले तुझे मारेंगे हम पहले तुझे मारेंगे; ऐसा शब्द करने लगे, कहीं सहस्रों वीर मरकर घोडोंसे गिरने लगे और कहीं घोडेही गिरने लगे। कहीं अत्यन्त तेज चलनेवाले घोडे पृथ्वी-

स्फुरतां प्रतिपिष्टानामश्वानां शीघ्रगामिनाम् ।
स्तनतां च मनुष्याणां सन्नद्धानां विशाम्पते ॥ ७४ ॥
शक्त्यृष्टिप्रासशब्दश्च तुमुलः समपद्यत ।
भिन्दतां परमर्माणि राजन् दुर्मन्त्रिते तव ॥ ७५ ॥
श्रमाभिभूताः संरब्धाः श्रान्तवाहाः पिपासवः ।
विक्षताश्च शितैः शस्त्रैरभ्यवर्तन्त तावकाः ॥ ७६ ॥
मत्ता रुधिरगन्धेन बहवोऽत्र विचेतसः ।
जघ्नुः परान्स्वकांश्चैव प्राप्तान्प्राप्ताननन्तरान् ॥ ७७ ॥
बहवश्च गतप्राणाः क्षत्रिया जयगृद्धिनः ।
भूमावभ्यपतन् राजन् शरवृष्टिभिरावृताः ॥ ७८ ॥
वृकगृध्रशृगालानां तुमुले मोदनेऽहनि ।
आसीद्बलक्षयो घोरस्तव पुत्रस्य पश्यतः ॥ ७९ ॥
नराश्वकायैः सञ्छन्ना भूमिरासीद्विशाम्पते ।
रुधिरोदकचित्रा च भीरूणां भयवर्धिनी ॥ ८० ॥
असिभिः पट्टिशैः शूलैस्तक्षमाणाः पुनः पुनः ।
तावकाः पाण्डवेयाश्च न न्यवर्तन्त भारत ॥ ८१ ॥
प्रहरन्तो यथाशक्ति यावत्प्राणस्य धारणम् ।

में गिर कर तडफने लगे । कहीं हाहाकार करते हुए मनुष्य गिर गये, कहीं वीरोंके मर्मस्थानोंको काटते हुए शक्ति और खड्गोंके घोर शब्द होने लगे । यह नाश तुम्हारी दुष्ट बुद्धिसे हुआ । (७१-७५)

हे राजन् ! ऐसे तुम्हारी ओरके सब वीर शस्त्रोंके घाव और प्याससे व्याकुल होकर इधर उधरको भागने लगे । अनेक वीर रुधिरकी गन्धिसे मतवाले होकर अपने और परायेको भी मारने लगे । उस समय जो जिसके आगे आगया, उसने उसीको मारडाला । हे राजन् ! उस समय अनेक विजय चाहनेवाले क्षत्री, शस्त्रोंसे मरकर पृथ्वीपर गिर गये । स्यार, गिद्ध और भेडिये बहुत प्रसन्न हुए । उस दिन तुम्हारे पुत्रके देखते देखते तुम्हारी सेनाका बहुत नाश हुआ । उस रुधिरसे भीगे और मरे हुए शरीरोंसे ढकी पृथ्वीको देखकर कादर लोग डरने लगे, दोनों ओरकी सेना खड्ग, पट्टिश और परिघोंसे कटकर पृथ्वीमें गिर गई, तो भी योद्धा लोग बलके अनुसार शस्त्र चलाते रहे और कहते रहे कि जबतक हमारा प्राण

योधाः परिपतन्ति स्म वमन्तो रुधिरं व्रणैः ॥ ८२ ॥
शिरो गृहीत्वा केशेषु कबंधः स्म प्रदृश्यते ।
उद्यम्य च शितं खड्गं रुधिरेण परिप्लुतम् ॥ ८३ ॥
तथोत्थितेषु बहुषु कबन्धेषु नराधिप ।
तथा रुधिरगन्धेन योधाः कश्मलमाविशन् ॥ ८४ ॥
मंदीभूते ततः शब्दे पाण्डवानां महद्बलम् ।
अल्पावशिष्टैस्तुरगैरभ्यवर्त्तत सौबलः ॥ ८५ ॥
ततोऽभ्यधावंस्त्वरिताः पाण्डवा जयगृद्धिनः ।
पदातयश्च नागाश्च सादिनश्चोद्यतायुधाः ॥ ८६ ॥
कोष्ठकीकृत्य चाप्येनं परिक्षिप्य च सर्वशः ।
शस्त्रैर्नानाविधैर्जघ्नुर्युद्धपारं तितीर्षवः ॥ ८७ ॥
त्वदीयास्तांस्तु सम्प्रेक्ष्य सर्वतः समभिद्रुतान् ।
रथाश्वपत्तिद्विरदाः पाण्डवानभिदुद्रुवुः ॥ ८८ ॥
केचित्पदातयः पद्भिर्मुष्टिभिश्च परस्परम् ।
निजघ्नुः समरे शूराः क्षीणशस्त्रास्ततोऽपतन् ॥ ८९ ॥
रथेभ्यो रथिनः पेतुर्द्विपेभ्यो हस्तिसादिनः ।
विमानेभ्यो दिवो भ्रष्टाः सिद्धाः पुण्यक्षयादिव ॥९०॥

रहेगा तबतक शक्ति भर युद्ध करेंगे। वीरोंके घावसे रुधिर बहने लगा, कहीं कबन्ध (रुण्ड) चमकता खड्ग हाथमें लिये हुए, रुधिरमें भीगे कटे शिरको हाथमें लिये घूमने लगे। (७६—८३)

इस प्रकार सहस्रों कबन्ध होगये, तब रुधिरकी गन्धिसे वीर भी घबडाने लगे। जब मार काटका शब्द कम हुआ, तब शकुनिने देखा कि मेरे सङ्ग बहुत थोडे घुडचढे रह गये। परन्तु शकुनि उतने ही वीरोंको लेकर धृष्टद्युम्नकी भारी सेनाकी ओरको चले पाण्डवोंके वीर भी हाथी, घोडे और रथोंपर चढ-कर और पैदल भी शकुनिकी ओर दौडे। धृष्टद्युम्नने शकुनिकी सब सेना-को अपनी सेनाके बीचमें लेलिया और युद्ध समाप्त करनेके लिये, तुम्हारी सेना-को काटने लगे। तुम्हारे वीर भी अपने चारों ओर पाण्डवोंकी सेनाको देख रथ, घोडे और हाथियोंपर चढकर अनेक प्रकारके शस्त्र चलाने लगे। कोई कोई पैदल मुक्के और दांतोंसे शत्रुओंको मारने लगा। कोई शस्त्र नष्ट होनेसे आप भी मर गया, जैसे पुण्य नाश होनेसे विमा-

एवमन्योन्यमायत्ता योधा जघ्नुर्महाहवे ।
पितॄन्भ्रातॄन्वयस्यांश्च पुत्रानपि तथाऽपरे ॥ ९१ ॥
एवमासीदमर्यादं युद्धं भरतसत्तम ।
प्रासासिबाणकलिलं वर्तमाने सुदारुणे ॥ ९२ ॥ [१३३३]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यपर्वणि संकुलयुद्धे त्रयोविंशोऽध्यायः ॥ २३ ॥

सञ्जय उवाच— तस्मिन् शब्दे मृदौ जाते पाण्डवैर्निहते बले ।
अश्वैः सप्तशतैः शिष्टैरुपावर्त्तत सौबलः ॥ १ ॥
स यात्वा वाहिनीं तूर्णमब्रवीत्त्वरयन्युधि ।
युध्यध्वमिति संहृष्टाः पुनः पुनररिन्दमाः ॥ २ ॥
अपृच्छत्क्षत्रियांस्तत्र क्व नु राजा महाबलः ।
शकुनेस्तद्वचः श्रुत्वा तमूचुर्भरतर्षभ ॥ ३ ॥
असौ तिष्ठति कौरव्यो रणमध्ये महाबलः ।
यत्रैतत्सुमहच्छत्रं पूर्णचन्द्रसमप्रभम् ॥ ४ ॥
यत्र ते सतनुत्राणा रथास्तिष्ठंति दंशिताः ।
यत्रैष तुमुलः शब्दः पर्जन्यनिनदोपमः ॥ ५ ॥
तत्र गच्छ द्रुतं राजंस्ततो द्रक्ष्यसि कौरवम् ।
एवमुक्तस्तु तैर्योधैः शकुनिः सौबलस्तदा ॥ ६ ॥

जैसे देवता गिरते हैं वैसे ही हाथी, घोडे और रथोंसे वीर गिरने लगे, इस समय वीरोंको भाई, पुत्र और पिता कुछ नहीं जान पडता था, तब प्रासादिसे मर्यादा रहित युद्ध होगया। (८३-९२)

शल्यपर्वमें तेइस अध्याय समाप्त।

शल्यपर्वमें चौबीस अध्याय।

सञ्जय बोले, जब वह घोर शब्द कुछ कम हुआ और पाण्डवोंने तुम्हारी उस सेनाका भी नाश कर दिया, तब शकुनि सात सौ घुडचढोंको सङ्ग लेकर लौट गये और सेनामें जाकर कहने लगे कि, हे शत्रुनाशन क्षत्रियों घोर युद्ध करो! फिर सबसे बोले, महाबलवान् राजा दुर्योधन कहां हैं? शकुनिके वचन सुन सब क्षत्री बोले, जहां यह पूरे चन्द्रमाके समान छत्र शोभित हो रहा है, जहां ये कवच पहने रथोंपर चढे अनेक वीर खडे हैं, जहां वह मेघके समान घोर शब्द होरहा है। वहीं महाबली राजा दुर्योधन युद्ध कर रहे हैं। आप शीघ्र वहां जांय तो अवश्य दर्शन होगा। (१-६)

क्षत्रियोंके ऐसे वचन सुनकर राजा शकुनि तुम्हारे पुत्रके पास गये, राजा

प्रययौ तत्र यत्रासौ पुत्रस्तव नराधिप।
सर्वतः संवृतो वीरैः समरे चित्रयोधिभिः ॥ ७ ॥
ततो दुर्योधनं दृष्ट्वा रथानीके व्यवस्थितम्।
सरथांस्तावकान्सर्वान्हर्षयन् शकुनिस्ततः ॥ ८ ॥
दुर्योधनमिदं वाक्यं हृष्टरूपो विशाम्पते।
कृतकार्यमिवात्मानं मन्यमानोऽब्रवीन्नृपम् ॥ ९ ॥
जहि राजन् रथानीकमश्वाः सर्वे जिता मया।
नात्यक्त्वा जीवितं संख्ये शक्यो जेतुं युधिष्ठिरः ॥१०॥
हते तस्मिन् रथानीके पाण्डवेनाभिपालिते।
गजानेतान्हनिष्यामः पदातींश्चेतरांस्तथा ॥ ११ ॥
श्रुत्वा तु वचनं तस्य तावका जयगृद्धिनः।
जवेनाभ्यपतन्हृष्टाः पाण्डवानामनीकिनीम् ॥ १२ ॥
सर्वे विवृततूणीराः प्रगृहीतशरासनाः।
शरासनानि धुन्वानाः सिंहनादान्प्रणेदिरे ॥ १३ ॥
ततो ज्यातलनिर्घोषः पुनरासीद्विशाम्पते।
प्रादुरासीच्छराणां च सुमुक्तानां सुदारुणः ॥ १४ ॥
तान्समीपगतान्दृष्ट्वा जवेनोद्यतकार्मुकः।
उवाच देवकीपुत्रं कुन्तीपुत्रो धनञ्जयः ॥ १५ ॥
चोदयाश्वानसंभ्रान्तः प्रविशैतद्बलार्णवम्।

दुर्योधनको रथ सेनाके बीचमें खडे देख सब क्षत्रियोंको प्रसन्न करते हुए ऐसे बोले, मानो युधिष्ठिरको जीतकर ही आये हैं। हे राजन् दुर्योधन! तुम इन सब रथ सेनाको जीत लो, मैंने पाण्डवोंके सब घुडचढे वीरोंको मारडाला, जब तुम इस युधिष्ठिरसे रक्षित रथ सेनाको जीत लोगे तब मैं हाथीसेना और पदातियोंका नाश कर दूंगा। शकुनिके ऐसे वचन सुन तुम्हारे ओरके सब वीर प्रसन्न होकर युधिष्ठिरकी सेनाकी ओर दौडे; सब क्षत्री धनुषोंपर बाण चलाने लगे, सिंहके समान गर्जने लगे। (६-१३)

तब चारों ओरसे बाण छूटने और धनुषकी टङ्कारका शब्द होने लगा, इन सब क्षत्रियोंको अपने पास आया हुआ देख अर्जुन श्रीकृष्णचन्द्रसे बोले, हे कृष्ण! आप सावधान होकर घोडे हांकिये और इस समुद्रके समान सेनामें प्रवेश कीजिये, अब मैं अपने तेज बाणोंसे

अन्तमद्य गमिष्यामि शत्रूणां निशितैः शरैः ॥ १६ ॥
अष्टादशदिनान्यद्य युद्धस्यास्य जनार्दन ।
वर्त्तमानस्य महतः समासाद्य परस्परम् ॥ १७ ॥
अनन्तकल्पा ध्वजिनी भूत्वा ह्येषां महात्मनाम् ।
क्षयमद्य गता युद्धे पश्य दैवं यथाविधम् ॥ १८ ॥
समुद्रकल्पं च बलं धार्त्तराष्ट्रस्य माधव ।
अस्मानासाद्य सञ्जातं गोष्पदोपममच्युत ॥ १९ ॥
हते भीष्मे तु सन्दध्याच्छिवं स्यादिह माधव ।
न च तत्कृतवान्मूढो धार्त्तराष्ट्रः सुबालिशः ॥ २० ॥
उक्तं भीष्मेण यद्वाक्यं हितं तथ्यं च माधव ।
तच्चापि नासौ कृतवान्वीतबुद्धिः सुयोधनः ॥ २१ ॥
तस्मिंस्तु तुमुले भीष्मे प्रच्युते धरणीतले ।
न जाने कारणं किं तु येन युद्धमवर्त्तत ॥ २२ ॥
मूढांस्तु सर्वथा मन्ये धार्त्तराष्ट्रान्सुबालिशान् ।
पतिते शान्तनोः पुत्रे येऽकार्षुः संयुगं पुनः ॥ २३ ॥
अनन्तरं च निहते द्रोणे ब्रह्मविदां वरे ।
राधेये च विकर्णे च नैवाशाम्यत वैशसम् ॥ २४ ॥
अल्पावशिष्टे सैन्येऽस्मिन् सूतपुत्रे च पातिते ।

सबको नाश कर दूंगा । आज हम लोगोंको परस्पर युद्ध करते हुए अठारह दिन बीत गये, देखो प्रारब्धही बलवान् है । पहले दिन इन महात्मा क्षत्रियोंकी सेना अनन्त जान पडती थी परन्तु आज सब ही नष्ट होगयी, वह समुद्रके समान दुर्योधनकी सेना हम लोगोंसे युद्ध करते करते आज गौके चरणके समान रह गई है; जब भीष्म मरे थे, तब हम लोगोंने जाना था कि अब मूर्ख दुर्योधन सन्धि कर लेगा तो सबका कल्याण ही होगा परन्तु उस मूर्खने ऐसा नहीं किया, भीष्मने जो कहा था, वही उसके लिये अच्छा था। परन्तु बुद्धिहीन दुर्योधनने वह भी न माना, जब उस महाघोर युद्धमें भीष्म मरकर पृथ्वीमें गिरे थे, तब न जाने फिर किस लिये युद्ध होता रहा ? (१४--२१)

भीष्मके मरनेपर भी युद्ध होता रहा, इससे हम जानते हैं कि धृतराष्ट्रके पुत्र महामूर्ख हैं । फिर वेद जाननेवालोंमें श्रेष्ठ गुरु द्रोणाचार्य, कर्ण और विक-

सपुत्रे वै नरव्याघ्रे नैवाशाम्यत वैशसम् ॥ २५ ॥
श्रुतायुषि हते वीरे जलसन्धे च पौरवे।
श्रुतायुधे च नृपतौ नैवाशाम्यत वैशसम् ॥ २६ ॥
भूरिश्रवसि शल्ये च शाल्वे चैव जनार्दन।
आवन्त्येषु च वीरेषु नैवाशाम्यत वैशसम् ॥ २७ ॥
जयद्रथे च निहते राक्षसे चाप्यलायुधे।
बाल्हिके सोमदत्ते च नैवाश्याम्यत वैशसम् ॥ २८ ॥
भगदत्ते हते शूरे काम्बोजे च सुदारुणे।
दुःशासने च निहते नैवाशाम्यत वैशसम् ॥ २९ ॥
दृष्ट्वा विनिहतान् शूरान् पृथङ्माण्डलिकान्नृपान्।
बलिनश्च रणे कृष्ण नैवाशाम्यत वैशसम् ॥ ३० ॥
अक्षौहिणीपतीन् दृष्ट्वा भीमसेननिपातितान्।
मोहाद्वा यदि वा लोभान्नैवाशाम्यत वैशसम् ॥ ३१ ॥
को नु राजकुले जातः कौरवेयो विशेषतः।
निरर्थकं महद्वैरं कुर्यादन्यः सुयोधनात् ॥ ३२ ॥
गुणतोऽभ्यधिकान् ज्ञात्वा बलतः शौर्यतोपि वा।

र्णके मरनेपर भी युद्ध समाप्त न हुआ, जब पुत्रोंके सहित पुरुषसिंह कर्ण मारे गये और सेना बहुत थोडी रह गई थी तब भी युद्ध समाप्त न हुआ। जब वीर युद्धश्रवा, कुरुवंशी जलसन्ध और राजा श्रुतायुध मारे गये तब भी वह युद्ध समाप्त न हुआ। जब भूरिश्रवा शल्य, शाल्व और उज्जैन के प्रधान वीर मारे गये तो भी युद्ध समाप्त न हुआ। जब जयद्रथ, अलायुद्ध राक्षस, बाह्लिक और सोमदत्त मारे गये तब भी युद्ध समाप्त न हुआ। (२३—२८)

जब वीर भगदत्त, काम्बोजदेशी महावीर और दुःशासन मारे गये तब भी युद्ध समाप्त न हुआ। इन अनेक देशोंके प्रधान, बलवान और वीर राजोंको मरा हुआ देख भी युद्ध समाप्त न हुआ। अनेक अक्षोहिणीपति राजोंको भीमसेनके हाथसे मरा देखकर भी दुर्योधनने मूर्खता और लोभसे युद्धको समाप्त न किया। दुर्योधनको छोडकर राजकुलमें उत्पन्न हुआ ऐसा कौन क्षत्री होगा जो वृथा ऐसा घोर वैर करे? (२९-३२)

जिनमें भी कुरुवंशी ऐसा कौन मूर्ख होगा जो शत्रुको अपनेसे अधिक बल-

असूढ़ः को नु युद्धेन जानन्प्राज्ञो हिताहितम्॥ ३३ ॥
यन्न तस्य मनो ह्यासीत्त्वयोक्तस्य हितं वचः।
प्रशमे पाण्डवैः सार्धं सोऽन्यस्य शृणुयात्कथम् ॥३४॥
येन शान्तनवो वीरो द्रोणो विदुर एव च।
प्रत्याख्याताः शमस्यार्थे किं नु तस्याद्य भेषजम् ॥३५॥
मौर्ख्याद्येन पिता वृद्धः प्रत्याख्यातो जनार्दन।
तथा माता हितं वाक्यं भाषमाणा हितैषिणी॥ ३६ ॥
प्रत्याख्याता ह्यसत्कृत्य स कस्मै रोचयेद्वदन्।
कुलान्तकरणो व्यक्तं जात एष जनार्दन ॥ ३७ ॥
तथाऽस्य दृश्यते चेष्टा नीतिश्चैव विशाम्पते।
नैष दास्यति नो राज्यमिति मे मतिरच्युत ॥ ३८ ॥
उक्तोऽहं बहुशस्तात विदुरेण महात्मना।
न जीवन्दास्यते भागं धार्त्तराष्ट्रस्तु मानद ॥ ३९ ॥
यावत्प्राणा धरिष्यन्ति धार्त्तराष्ट्रस्य दुर्मतेः।
तावद्युष्मास्वपापेषु प्रचरिष्यति पापकम् ॥ ४० ॥
न च युक्तोऽन्यथा जेतुमृते युद्धेन माधव।
इत्यब्रवीत्सदा मां हि विदुरः सत्यदर्शनः ॥ ४१ ॥
तत्सर्वमद्य जानामि व्यवसायं दुरात्मनः।

वान्, गुणवान् और तेजवान् जान कर युद्ध करे? जिसने सन्धिके लिये तुम्हारे ही वचन न सुने वह दूसरेके क्या सुनता? जिसने शान्तिके लिये अनेक यत्न करते हुए भीष्म, विदुर और द्रोणाचार्यके वचन न सुने उसकी औषधि क्या है? हे जनार्दन! जिसने अपने पिताके वचन न सुने और कल्याण वचन कहती हुई माताका जिसने निरादर कर दिया, वह निश्चय ही वंशका नाश करनेको उत्पन्न हुआ था। हमको अभी भी इसकी नीति और चेष्टासे यही मालुम देता है कि यह हमें जीता हुआ राज्य न देगा, विदुरने हमसे पहले ही कहा था कि, दुर्योधन जीते जी तुम्हारा राज्य तुमको न देगा। (३३—३९)

जबतक इस दुर्बुद्धिके शरीरमें प्राण रहेंगे तबतक पापरहित पाण्डवोंके साथ पाप ही करता रहेगा, सत्यवादी विदुर सदा यही कहा करते थे, कि यह मूर्ख विना युद्ध किये बसमें नहीं आवेगा, महात्मा विदुरने जो कुछ कहा था दुष्ट

यदुक्तं वचनं तेन विदुरेण महात्मना ॥ ४२ ॥
यो हि श्रुत्वा वचः पथ्यं जामदग्न्याद्यथातथम् ।
अवामन्यत दुर्बुद्धिर्ध्रुवं नाशमुखे स्थितः ॥ ४३ ॥
उक्तं हि बहुशः सिद्धैर्जातमात्रे सुयोधने ।
एनं प्राप्य दुरात्मानं क्षयं क्षत्रं गमिष्यति ॥ ४४ ॥
तदिदं वचनं तेषां निरुक्तं वै जनार्दन ।
क्षयं याता हि राजानो दुर्योधनकृते भृशम् ॥ ४५ ॥
सोऽद्य सर्वान्रणे योधान्निहनिष्यामि माधव ।
क्षत्रियेषु हतेष्वाशु शून्ये च शिबिरे कृते ॥ ४६ ॥
वधाय चात्मनोऽस्माभिः संयुगं रोचयिष्यति ।
तदन्तं हि भवेद्वैरमनुमानेन माधव ॥ ४७ ॥
एवं पश्यामि वार्ष्णेय चिन्तयन्प्रज्ञया स्वया ।
विदुरस्य च वाक्येन चेष्टया च दुरात्मनः ॥ ४८ ॥
तस्माद्याहि चमूं वीर यावद्धन्मि शितैः शरैः ।
दुर्योधनं महाबाहो वाहिनीं चास्य संयुगे ॥ ४९ ॥
क्षेममद्य करिष्यामि धर्मराजस्य माधव ।
हत्वैतद्दुर्बलं सैन्यं धार्त्तराष्ट्रस्य पश्यतः ॥ ५० ॥

सञ्जय उवाच— अभीशुहस्तो दाशार्हस्तथोक्तः सव्यसाचिना ।

दुर्योधनके वैसे ही लक्षण जान पडते हैं। जिस मूर्खने परशुरामके कल्याण भरे वचन न माने वह निश्चय ही नाशके मुखमें बैठा है। जब यह उत्पन्न हुआ था तब ही अनेक सिद्धोंने कहा था कि यह दुष्ट सब क्षत्रियोंका नाश करेगा, आज उन सब सिद्धोंका वचन ठीक हुआ अर्थात् दुर्योधनके कारणसे सब क्षत्रियोंका नाश होगया। ४०-४५

आज हम बचे हुए क्षत्रियोंको भी मार डालेंगे। जिस समय डेरे शून्य हो जायंगे और कोई क्षत्री न रहेगा तब ये मूर्ख दुर्योधन अपने मरनेका उपाय करेगा, सब इसके मरनेहीसे यह वैर समाप्त होजायगा। हे वृष्णिकुलश्रेष्ठ! मैं अपनी बुद्धि और विदुरके वचनसे और इस दुष्टकी चेष्टासे ऐसेही समझता हूं। इसलिये आप इसी सेनाके आगे हमारे रथको ले चलिये। मैं इन सबको दुर्योधन के सहित मारूंगा। हे माधव! आज इन दुर्बल सेनाको दुर्योधनके देखते मार धर्मराजका कल्याण करूंगा। (४६-५०)

तद्बलौघममित्राणामभीतः प्राविशद्बलात् ॥ ५१ ॥
कुन्तखड्गशरैर्घोरं शक्तिकंटकसंकुलम् ।
गदापरिघपन्थानं रथनागमहाद्रुमम् ॥ ५२ ॥
हयपत्तिलताकीर्णं गाहमानो महायशाः ।
व्यचरत्तत्र गोविन्दो रथेनातिपताकिना ॥ ५३ ॥
ते हयाः पाण्डुरा राजन्वहतोऽर्जुनमाहवे ।
दिक्षु सर्वास्वदृश्यन्त दाशार्हेण प्रचोदिताः ॥ ५४ ॥
ततः प्रायाद्रथेनाजौ सव्यसाची परन्तपः ।
किरन् शरशतांस्तीक्ष्णान्वारिधारा घनो यथा॥ ५५ ॥
प्रादुरासीन्महान्शब्दः शराणां नतपर्वणाम् ।
इषुभिश्छाद्यमानानां समरे सव्यसाचिना ॥ ५६ ॥
असज्जन्तस्तनुत्रेषु शरौघाः प्रापतन् भुवि ।
इन्द्राशनिसमस्पर्शा गाण्डीवप्रेषिताः शराः ॥ ५७ ॥
नरान्नागान्समाहत्य हयांश्चापि विशाम्पते ।
अपतन्त रणे बाणाः पतङ्गा इव घोषिणः ॥ ५८ ॥
आसीत्सर्वमवच्छन्नं गाण्डीवप्रेषितैः शरैः ।

सञ्जय बोले, अर्जुनके वचनको स्वीकार कर श्रीकृष्णने बेडर होकर उस घोर सेनाकी ओरको घोडोंकी सान उठाई और सेना प्रवेश किया । कुन्त, खड्ग और बाणोंसे भयानक साङ्गरूपी कांटोंसे भरे, गदा और परिघ रूपी मार्गवाले रथ और हाथीरूपी वृक्षोंसे भरे घोडे, और पदातिरूपी लताओं से पूर्ण, उस सेनारूपी वनमें महायशस्वी कृष्ण उस ऊंची पताकावाले रथको घुमाने लगे । वे सफेद घोडे अर्जुनके समेत कृष्णसे प्रेरित होकर चारों सेनामें दीखने लगे । तब शत्रुनाशन अर्जुन उस सेनापर इस प्रकार बाण बरसाने लगे जैसे मेघ जल वर्षाता है। उस समय अर्जुनकी धनुषसे छूटे हुए अर्जुनके बाणोंका चारों ओर घोर शब्द होने लगा, अर्जुनके धनुषसे छूटे हुए वज्रके समान बाण चारों ओर क्षत्रियोंके कवचोंमें लगने लगे। उन बाणोंके लगनेसे सब वीर, हाथी, घोडे और रथोंसे मर मर कर गिरने लगे । बाण भी इस प्रकार पृथ्वीमें गिरते थे, जैसे शब्द करते हुए पक्षी । (५१—५८)

उस समय गाण्डीव धनुषसे छूटे हुए बाण ही चारों ओर दीखते थे,

न प्राज्ञायन्त समरे दिशो वा प्रदिशोऽपि वा ॥ ५९ ॥
सर्वमासीज्जगत्पूर्णं पार्थनामाङ्कितैः शरैः ।
रुक्मपुङ्खैस्तैलधौतैः कर्मारपरिमार्जितैः ॥ ६० ॥
ते दह्यमानाः पार्थेन पावकेनेव कुञ्जराः ।
पार्थं न प्रजहुर्घोरा वध्यमानाः शितैः शरैः ॥ ६१ ॥
शरचापधरः पार्थः प्रज्वलन्निव भास्करः ।
ददाह समरे योधान्कक्षमग्निरिव ज्वलन् ॥ ६२ ॥
यथा वनान्ते वनपैर्विसृष्टः कक्षं दहत्कृष्णगतिः सुघोषः ।
भूरिद्रुमं शुष्कलतावितानं भृशं समृद्धो ज्वलनः प्रतापी ॥ ६३ ॥
एवं स नाराचगणप्रतापी शरार्चिरुच्चावचतिग्मतेजाः ।
ददाह सर्वां तव पुत्रसेनाममृष्यमाणस्तरसा तरस्वी ॥ ६४ ॥
तस्येषवः प्राणहराः सुमुक्ता नासज्जन्वै वर्मसु रुक्मपुङ्खाः ।
न च द्वितीयं प्रमुमोच बाणं नरे हये वा परमद्विपे वा ॥ ६५ ॥
अनेकरूपाकृतिभिर्हि बाणैर्महारथानीकमनुप्रविश्य ।
स एव एकस्तव पुत्रस्य सेनां जघान दैत्यानिव वज्रपाणिः ॥६६॥[१४२९]

इति श्रीमहाभारते० शल्यपर्वणि संकुलयुद्धे चतुर्विंशोऽध्यायः ॥ २४ ॥

सञ्जय उवाच-पश्यतां यतमानानां शूराणामनिवर्तिनाम् ।

उस समय कोई दिशा नहीं दिखलाई देती थी, तौभी वीर अर्जुनके आगेसे भागते नहीं थे। जैसे अग्नि काठको जला देती है ऐसे ही सूर्यके समान तेजस्वी धनुषबाणधारी अर्जुन उस सेनाको जलाने लगे। जैसे सूखे वृक्ष और लतावाले बनको अग्नि भस्म कर देता है ऐसे ही प्रतापी अर्जुनने उस सेनाको भस्म कर दिया। तेज बाणरूपी ज्वालावाले अर्जुनरूपी तेजस्वी अग्निने तुम्हारे पुत्रकी सेनाको क्षणभरमें नाश कर दिया, अर्जुनके सोनेके पङ्खवाले एक बाणको भी कोई न सह सका अर्थात् सब एक ही एक बाणसे मर गये, अर्जुनने भी हाथी, घोडे, या मनुष्य के मारनेको दूसरा बाण नहीं चलाया। एकले अर्जुनने उस घोर सेनामें प्रवेश करके बाणोंसे उस सेनाका इस प्रकार से नाश किया जैसे इन्द्र दानवोंका नाश करते हैं। (५९-६६)

शल्यपर्वमें चोवीस अध्याय समाप्त।[१४२९]

शल्यपर्वमें पचीस अध्याय ।

सञ्जय बोले, वीरोंको विजयके लिये अनेक यत्न करते और पीछेको न हटते

सङ्कल्पमकरोन्मोघं गाण्डीवेन धनञ्जयः ॥ १ ॥
इन्द्राशनिसमस्पर्शानविषह्यान्महौजसः ।
विसृजन् दृश्यते बाणान्धारा मुञ्चन्निवाम्बुदः ॥ २ ॥
तत्सैन्यं भरतश्रेष्ठ वध्यमानं किरीटिना ।
सम्प्रदुद्राव संग्रामात्तव पुत्रस्य पश्यतः ॥ ३ ॥
पितॄन् भ्रातॄन्परित्यज्य वयस्यानपि चापरे ।
हतधुर्या रथाः केचिद्धतसूतास्तथाऽपरे ॥ ४ ॥
भग्नाक्षयुगचक्रेषाः केचिदासन्विशाम्पते ।
अन्येषां सायकाः क्षीणास्तथाऽन्ये बाणपीडिताः॥ ५ ॥
अक्षता युगपत्केचित्प्राद्रवन् भयपीडिताः ।
केचित्पुत्रानुपादाय हतभूयिष्ठबान्धवाः ॥ ६ ॥
विचुक्रुशुः पितॄंस्त्वन्ये सहायानपरे पुनः ।
बान्धवांश्च नरव्याघ्र भ्रातॄन्सम्बन्धिनस्तथा ॥ ७ ॥
दुद्रुवुः केचिदुत्सृज्य तत्र तत्र विशाम्पते ।
बहवोऽत्र भृशं विद्धा मुह्यमाना महारथाः ॥ ८ ॥
निःश्वसन्ति स्म दृश्यन्ते पार्थबाणहता नराः ।
तानन्ये रथमारोप्य ह्याश्वास्य च मुहूर्त्तकम् ॥ ९ ॥

देख अर्जुन भी इनके मारनेका यत्न करने लगे। उस समय अर्जुन बाण चलाते हुए ऐसे दीखते थे, जैसे पानी बरसाता हुआ मेघ। (१—२)

हे भरतकुलश्रेष्ठ! तब तुम्हारी सेनाके वीर अर्जुनके बाणोंसे व्याकुल होकर भाई, पिता और मित्रोंको छोडकर तुम्हारे पुत्रके देखते देखते युद्धसे भागे, किसी रथकी धुरी टूट गई, किसीका सारथी मर गया, किसीके पहिये टूट गये, किसीकी पहियोंकी नाभी टूट गई, किसी वीरके पास चलानेको बाण न रहे और कोई भयसे व्याकुल होकर भाग गया। (३–५)

कोई बिना घाव लगे ही डरकर भाग गये, कोई अपने बान्धवोंको मरा देख अपने पुत्रोंको लेकर भागे, कोई बापको, कोई सहायकोंको कोई बन्धुओंको और कोई भाइयोंको रोने लगे, हे पुरुषसिंह! कोई सब छोडकर युद्धसे भागे, कोई बाण लगनेसे वहीं मूर्च्छा खाकर गिर गये, कोई अर्जुन के बाण लगनेसे ऊंचे स्वांस लेने लगे, कोई उन को अपने रथोंपर बिठलाकर धीर बढा-

विश्रान्ताश्च वितृष्णाश्च पुनर्युद्धाय जग्मिरे ।
तानपास्य गताः केचित्पुनरेव युयुत्सवः ॥ १० ॥
कुर्वन्तस्तव पुत्रस्य शासनं युद्धदुर्मदाः ।
पानीयमपरे पीत्वा पर्याश्वास्य च वाहनम् ॥ ११ ॥
वर्माणि च समारोप्य केचिद्भरतसत्तम ।
समाश्वास्यापरे भ्रातॄन्निक्षिप्य शिबिरेऽपि च ॥ १२ ॥
पुत्रानन्ये पितॄनन्ये पुनर्युद्धमरोचयन् ।
सज्जयित्वा रथान्केचिद्यथा मुख्यं विशाम्पते ॥ १३ ॥
आप्लुत्य पाण्डवानीकं पुनर्युद्धमरोचयन् ।
ते शूराः किंकिणीजालैः समाच्छन्ना बभासिरे ॥ १४ ॥
त्रैलोक्यविजये युक्ता यथा दैतेयदानवाः ।
आगम्य सहसा केचिद्रथैः स्वर्णविभूषितैः ॥ १५ ॥
पाण्डवानामनीकेषु धृष्टद्युम्नमयोधयन् ।
धृष्टद्युम्नोऽपि पाञ्चाल्यः शिखण्डी च महारथः ॥१६॥
नाकुलिस्तु शतानीको रथानीकमयोधयन् ।
पाञ्चाल्यस्तु ततः क्रुद्धः सैन्येन महता वृतः ॥ १७ ॥
अभ्यद्रवत्सुसंक्रुद्धस्तावकान्हन्तुमुद्यतः ।
ततस्त्वापततस्तस्य तव पुत्रो जनाधिप ॥ १८ ॥
बाणसंघाननेकान्वै प्रेषयामास भारत ।

ने लगे और फिर प्याससे व्याकुल होकर युद्ध करनेको चले, कोई महापराक्रमी वीर तुम्हारे पुत्रकी आज्ञा पालन करने के लिये पानी पीकर और घोडोंको शान्त करके फिर युद्ध करनेको चले। (९-११)

कोई अपने भाई, बाप और बेटोंको डेरोंमें लिटाकर और शान्त करके कवच पहनकर फिर युद्ध करनेको चले, कोई दूसरे रथोंको सजाकर उनपर बैठ घण्टे बजाते हुए धृष्टद्युम्नकी ओर इस प्रकार दौडे जैसे तीनों लोक विजय करनेके समय दैत्य और दानव दौडे थे, कोई सोनेके रथपर बैठकर धृष्टद्युम्नसे युद्ध करने लगा, तब वीर धृष्टद्युम्न, महारथ शिखण्डी महा क्रोध करके उस रथ सेनासे घोर युद्ध करने लगे, तब सेनापति धृष्टद्युम्नको महाक्रोध हुआ और बहुत सेना अपने सङ्गमें लेकर तुम्हारे पुत्रोंको मारने चले। १२-१८

धृष्टद्युम्नस्ततो राजंस्तव पुत्रेण धन्विना ॥ १९ ॥
नाराचैरर्धनाराचैर्बहुभिः क्षिप्रकारिभिः।
वत्सदन्तैश्च बाणैश्च कर्मारपरिमार्जितैः ॥ २० ॥
अश्वांश्च चतुरो हत्वा बाह्वोरुरसि चार्पयत्।
सोऽतिविद्धो महेष्वासस्तोत्रार्दित इव द्विपः ॥ २१ ॥
तस्याश्वांश्चतुरो बाणैः प्रेषयामास मृत्यवे।
सारथेश्चास्य भल्लेन शिरः कायादपाहरत् ॥ २२ ॥
ततो दुर्योधनो राजा पृष्ठमारुह्य वाजिनः।
अपाक्रामद्धतरथो नातिदूरमरिन्दमः ॥ २३ ॥
दृष्ट्वा तु हतविक्रान्तं स्वमनीकं महाबलः।
तव पुत्रो महाराज प्रययौ यत्र सौबलः ॥ २४ ॥
ततो रथेषु भग्नेषु त्रिसाहस्रा महाद्विपाः।
पाण्डवान् रथिनः सर्वान्समन्तात्पर्यवारयन् ॥ २५ ॥
ते वृताः समरे पञ्च गजानीकेन भारत।
अशोभन्त महाराज ग्रहा व्याप्ता घनैरिव ॥ २६ ॥
ततोऽर्जुनो महाराज लब्धलक्षो महाभुजः।

हे महाराज! उनको आते देख तुह्मारे पुत्र दुर्योधन उनके ऊपर अनेक प्रकार बाण वर्षाने लगे, तुम्हारे धनुषधारी पुत्रने नाराच, अर्द्ध नाराच और वत्सदन्त आदि विष में बुझे बाणोंसे धृष्टद्युम्नको व्याकुल कर दिया और चार बाणोंसे उनके घोडे भी मार डाले महाधनुषधारी धृष्टद्युम्नको उन बाणोंके लगनेसे ऐसा क्रोध हुआ जैसे अंकुश लगनेसे हाथीको। तब चार बाणोंसे दुर्योधनके चारों घोडोंको मार कर एक बाणसे सारथीका शिर काट कर गिरा दिया; तब राजा दुर्योधन रथसे उतर कर एक घोडे पर चढ और सेनासे थोडी दूर जाकर खडे होगये, शत्रुनाशन महाबलवान् दुर्योधन अपनी सेनाका नाश देखकर उसी घोडेपर चढकर शकुनिके पास चले गये। (१९–२४)

जब यह रथसेना नष्ट हो चुकी और बचे हुए वीर भाग गये, तब तीन सहस्र हाथियोंने पाण्डवोंकी सेनाको घेर लिया, उस समय पांचों पाण्डव उन हाथियोंके बीच में ऐसे शोभित होने लगे, जैसे मेघोंके बीचमें पांच ग्रह। तब महाबलवान् अर्जुन कृष्ण सारथी और सफेद घोडोंके रथपर बैठकर उस

विनिर्ययौ रथेनैव श्वेताश्वः कृष्णसारथिः ॥ २७ ॥
तैः समन्तात्परिवृतः कुञ्जरैः पर्वतोपमैः ।
नाराचैर्विमलैस्तीक्ष्णैर्गजानीकमयोधयत् ॥ २८ ॥
तत्रैकबाणनिहतानपश्याम महागजान् ।
पतितान्पात्यमानांश्च निर्भिन्नान्सव्यसाचिना ॥ २९ ॥
भीमसेनस्तु तान्दृष्ट्वा नागान्मत्तगजोपमः ।
करेणादाय महतीं गदामभ्यपतद्बली ॥ ३० ॥
अथाप्लुत्य रथात्तूर्णं दण्डपाणिरिवान्तकः ।
तमुद्यतगदं दृष्ट्वा पाण्डवानां महारथम् ॥ ३१ ॥
वित्रेसुस्तावकाः सैन्याः शकृन्मूत्रे च सुस्रुवुः ।
आविग्नं च बलं सर्वं गदाहस्ते वृकोदरे ॥ ३२ ॥
गदया भीमसेनेन भिन्नकुंभान् रजस्वलान् ।
धावमानानपश्याम कुंजरान्पर्वतोपमान् ॥ ३३ ॥
प्राद्रवन्कुञ्जरास्ते तु भीमसेनगदाहताः ।
पेतुरार्त्तस्वरं कृत्वा छिन्नपक्षा इवाद्रयः ॥ ३४ ॥
प्रभिन्नकुम्भांस्तु बहून्द्रवमाणानितस्ततः ।
पतमानांश्च सम्प्रेक्ष्य वित्रेसुस्तव सैनिकाः ॥ ३५ ॥
युधिष्ठिरोपिऽपि संक्रुद्धो माद्रीपुत्रौ च पाण्डवौ ।

पर्वत के समान हाथियोंकी सेनामें घुस कर तेज और तीक्ष्ण बाण चलाने और उस सेनाका नाश करने लगे, हमने उस समय यह देखा कि अर्जुन के एक एक ही बाणसे अनेक हाथी मर कर गिर गये, भीमसेन भी मतवाले हाथीके समान उस सेनाको देखकर हाथमें गदा लेकर दण्डधारी यमराजके समान रथसे उतरे। उन महारथ भीमसेनको रथसे उतरते देख तुम्हारी सब सेना डरने लगी। भीमसेनको गदा धारण किये देख हाथी और घोडे भी विष्टा और मूत्र करने लगे। (२५-३२)

उस समय भीमसेनकी गदासे पर्वतके समान शिर टूटे और रुधिरमें भीगे हाथी इधर उधरको भागते दीखते थे, कहीं भीमसेनकी गदाके लगनेसे कहीं चिल्लाते हुए हाथी इस प्रकार पृथ्वी पर गिरते थे। इधर उधर भागते हुए हाथियोंको देखकर तुम्हारी सब सेना भयसे व्याकुल होगई, तब राजा युधिष्ठिर, नकुल और सहदेव भी क्रोध कर

गार्ध्रपत्रैः शितैर्बाणैर्निन्युर्वै यमसादनम् ॥ ३६ ॥
धृष्टद्युम्नस्तु समरे पराजित्य नराधिपम्।
अपक्रान्ते तव सुते हयपृष्ठं समाश्रिते ॥ ३७ ॥
दृष्ट्वा च पाण्डवान्सर्वान्कुञ्जरैः परिवारितान्।
धृष्टद्युम्नो महाराज सहसा समुपाद्रवत् ॥ ३८ ॥
पुत्रः पञ्चालराजस्य जिघांसुः कुञ्जरान्ययौ।
अदृष्ट्वा तु रथानीके दुर्योधनमरिन्दमम् ॥ ३९ ॥
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः।
अपृच्छन्क्षत्रियांस्तत्र क नु दुर्योधनो गतः ॥ ४० ॥
तेऽपश्यमाना राजानं वर्त्तमाने जनक्षये।
मन्वाना निहतं तत्र तव पुत्रं महारथाः ॥ ४१ ॥
विवर्णवदना भूत्वा पर्यपृच्छन्त ते सुतम्।
आहुः केचिद्धते सूते प्रयातो यत्र सौबलः ॥ ४२ ॥
हित्वा पञ्चालराजस्य तदनीकं दुरुत्सहम्।
अपरेत्वब्रुवंस्तत्र क्षत्रिया भृशविक्षताः ॥ ४३ ॥
दुर्योधनेन किं कार्यं द्रक्ष्यध्वं यदि जीवति।

के अपने तेज बाणोंसे हाथियोंको मारने लगे, द्रुपदपुत्र धृष्टद्युम्न भी राजा दुर्योधनको जीत कर उनको घोडे पर चढ कर भागते देख और पाण्डवोंको हाथियोंसे घिरा हुआ जान उधरहीके हाथियोंको मारनेकी इच्छासे युद्ध करनेके लिये चले गये। (३३—३९)

इधर रथसेना में शत्रुनाशन दुर्योधनको न देखकर अश्वत्थामा, कृपाचार्य और कृतवर्मा क्षत्रियोंसे पूछने लगे कि राजा दुर्योधन कहां हैं ? किसीने जब उनके वचनका उत्तर न दिया, तब इन तीनों महारथोंने जान लिया कि महाराज आजके युद्धमें मारे गये, उस समय उन तीनोंके मुखोंका रङ्ग उड गया। तब फिर घबडाकर क्षत्रियोंसे पूछने लगे कि, महाराज कहां हैं ? तब किसी क्षत्रीने कहा कि पाञ्चाल राजा धृष्टद्युम्नकी घोर सेनासे हारकर राजा दुर्योधन शकुनिके पास चले गये हैं, कोई कोई बाणोंसे व्याकुल क्षत्री क्रोधसे भरकर कहने लगे कि, दुर्योधनसे क्या काम है ? कहीं जीता हो तो ढूंढनेहीसे क्या ? चलो सब मिलकर पाण्डवोंसे युद्ध करें, अब राजासे क्या काम है ? (४०-४४)

युध्यध्वं सहिताः सर्वे किं वो राजा करिष्यति ॥ ४४ ॥
ते क्षत्रियाः क्षतैर्गात्रैर्हतभूयिष्ठवाहनाः ।
शरैः संपीड्यमानास्तु नातिव्यक्तमथाऽब्रुवन् ॥ ४५ ॥
इदं सर्वं बलं हन्मो येन स्म परिवारिताः ।
एते सर्वे गजान्हत्वा उपयांति स्म पाण्डवाः ॥ ४६ ॥
श्रुत्वा तु वचनं तेषामश्वत्थामा महाबलः ।
भित्त्वा पाञ्चालराजस्य तदनीकं दुरुत्सहम् ॥ ४७ ॥
कृपश्च कृतवर्मा च प्रययौ यत्र सौबलः ।
रथानीकं परित्यज्य शूराः सुदृढधन्विनः ॥ ४८ ॥
ततस्तेषु प्रयातेषु धृष्टद्युम्नपुरस्कृताः ।
आययुः पाण्डवा राजन्विनिघ्नन्तः स्म तावकान् ॥ ४९ ॥
दृष्ट्वा तु तानापततः सम्प्रहृष्टान्महारथान् ।
पराक्रान्तास्ततो वीरा निराशा जीविते तदा ॥ ५० ॥
विवर्णमुखभूयिष्ठमभवत्तावकं बलम् ।
परिक्षीणायुधान्दृष्ट्वा तानहं परिवारितान् ॥ ५१ ॥
राजन्बलेन व्यंगेन त्यक्त्वा जीवितमात्मनः ।
आत्मना पंचमोऽयुद्ध्यं पाञ्चालस्य बलेन ह ॥ ५२ ॥
तस्मिन्देशे व्यवस्थाय यत्र शारद्वतः स्थितः ।

वे सब वाहन रहित, बाणोंके घावोंसे पीडित क्षत्री दुर्योधनके ठीक पता न लगा सके और सब चिल्लाने लगे कि, हम जिस पाण्डवोंकी सेनासे घिरे हुए हैं, आज उसका सर्वनाश करेंगे। ये हमारी ओरके हाथियोंको मारकर पाण्डव लोग निकले जाते हैं। उनके वचन सुनकर महापराक्रमी अश्वत्थामा, कृपाचार्य और महाधनुषधारी कृतवर्मा अपनी रथसेनाको छोडकर धृष्टद्युम्नकी सेनाको काटते हुए शकुनिके पास पहुंच गये, उनके चले जानेके पश्चात् धृष्टद्युम्न और पाण्डव भी तुम्हारी सेनाका नाश करते करते मिल गये। उन वीरोंको अपनी ओर आते हुए देखकर तुम्हारी ओरके वीरोंको जीनेकी आशा छूट गई, सबके मुखोंके रङ्ग उड गये; हम अपनी सेनाको शस्त्र रहित और भागती हुई देखकर घबडाने लगे, और धृष्टद्युम्नसे आप ही युद्ध करने लगे, उस समय हमारी ओरके पांच महारथ अर्जुन और धृष्टद्युम्नसे व्याकुल होकर कृपाचार्यके पास

सम्प्रद्रुता वयं पञ्च किरीटिशरपीडिताः ॥ ५३ ॥
धृष्टद्युम्नं महारौद्रं तत्र नाभूद्रणो महान्।
जितास्तेन वयं सर्वे व्यपयाम रणात्ततः ॥ ५४ ॥
अथापश्यं सात्यकिं तमुपायान्तं महारथम्।
रथैश्चतुःशतैर्वीरो मामभ्यद्रवदाहवे ॥ ५५ ॥
धृष्टद्युम्नादहं मुक्तः कथंचिच्छ्रान्तवाहनात्।
पतितो माधवानीकं दुष्कृती नरकं यथा ॥ ५६ ॥
तत्र युद्धमभूद्घोरं मुहूर्त्तमतिदारुणम्।
सात्यकिस्तु महाबाहुर्मम हत्वा परिच्छदम् ॥ ५७ ॥
जीवग्राहमगृह्णान्मां मूर्छितं पतितं भुवि।
ततो मुहूर्त्तादिव तद्गजानीकमविध्यत ॥ ५८ ॥
गदया भीमसेनेन नाराचैरर्जुनेन च।
अभिपिष्टैर्महानागैः समन्तात्पर्वतोपमैः ॥ ५९ ॥
नातिप्रसिद्धेवगतिः पाण्डवानामजायत।
रथमार्गं ततश्चक्रे भीमसेनो महाबलः ॥ ६० ॥
पाण्डवानां महाराज व्यपाकर्षन्महागजान्।
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ॥ ६१ ॥

भाग गये, वहां भी महापराक्रमी धृष्टद्युम्न पहुंच गए और थोडा ही युद्ध करके उन्होंने उन पांचोंको जीत लिया। (४५-५४)

तब हम फिर भागे और थोडी दूर जाकर देखा कि चार सौ रथोंके समेत महारथ सात्यकि युद्ध करनेको चले जाते हैं। उस समय धृष्टद्युम्नके घोडे कुछ थक गये थे, इसलिये वह हमको पकड न सके, तब मैं उनसे छूटकर सात्यकिकी सेनाकी ओर इस प्रकार भागा, जैसे पापी नरककी ओरको दौडता है। तब वहां भी क्षणमात्र घोर युद्ध होता रहा। महारथ सात्यकिने मेरी सब सामग्री काट डाली, तब मुझे पृथ्वीमें मूर्च्छित पडा देख जीता ही पकड लिया, तब हमने थोडे ही समयमें देखा कि भीमसेनकी गदा और अर्जुनके बाणोंसे हमारी सब गजसेना नष्ट होगयी। उस समय पर्वतोंके समान हाथियोंके गिरनेसे पाण्डवोंके रथोंकी गति बन्द होगई तब महाबलवान् भीमसेनने उन हाथियोंको खींच खींचकर अपने रथोंका मार्ग बना लिया, तब अश्वत्थामा, कृ-

अपश्यन्तो रथानीके दुर्योधनमरिन्दमम् ।
राजानं मृगयामासुस्तव पुत्रं महारथम् ॥ ६२ ॥
परित्यज्य च पाञ्चाल्यं प्रयाता यत्र सौबलः ।
राज्ञोऽदर्शनसंविग्ना वर्त्तमाने जनक्षये ॥ ६३ ॥ [१४९२]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यपर्वणि दुर्योधनापयाने पञ्चविंशोऽध्यायः ॥ २५ ॥

सञ्जय उवाच— गजानीके हते तस्मिन्पाण्डुपुत्रेण भारत ।
वध्यमाने बले चैव भीमसेनेन संयुगे ॥ १ ॥
चरन्तं च तथा दृष्ट्वा भीमसेनमरिन्दमम् ।
दण्डहस्तं यथा क्रुद्धमन्तकं प्राणहारिणम् ॥ २ ॥
समेत्य समरे राजन्हतशेषाः सुतास्तव ।
अदृश्यमाने कौरव्ये पुत्रे दुर्योधने तव ॥ ३ ॥
सोदर्याः सहिता भूत्वा भीमसेनमुपाद्रवन् ।
दुर्मर्षणः श्रुतान्तश्च जैत्रो भूरिबलो रविः ॥ ४ ॥
जयत्सेनः सुजातश्च तथा दुर्विषहोऽरिहा ।
दुर्विमोचननामा च दुष्प्रधर्षस्तथैव च ॥ ५ ॥
श्रुतर्वा च महाबाहुः सर्वे युद्धविशारदाः ।
इत्येते सहिता भूत्वा तव पुत्राः समन्ततः ॥ ६ ॥
भीमसेनमभिद्रुत्य रुरुधुः सर्वतो दिशम् ।
ततो भीमो महाराज स्वरथं पुनरास्थितः ॥ ७ ॥

कृपाचार्य और कृतवर्मा उस रथसेनामें भी शत्रुनाशन महारथ दुर्योधनको न पाकर बहुत घबडाये और धृष्टद्युम्नको वैसे ही युद्ध करते खडे तथा अपनी सेनाको वैसे ही नष्ट होते छोड राजाको ढूंढनेके लिये शकुनिकी ओर चले गये। (५५-६३) [१४९२]

शल्यपर्वमें पचीस अध्याय समाप्त।

शल्यपर्वमें छवीस अध्याय।

सञ्जय बोले, हे राजन् धृतराष्ट्र ! जब महाबलवान् भीमसेनने उस गजसेनाका नाश कर दिया, और प्राण नाशक दण्डधारी यमराजके समान घूमने लगे। और जब राजा दुर्योधनका कहीं पता न लगा, तब तुम्हारे सब बचे हुए पुत्र भीमसेनसे युद्ध करनेको चले। (१-३)

दुर्मर्षण, श्रुतान्त, जैत्र, भूरिबल, रवि, जयत्सेन सुजात, दुर्विषह, अरिहा, श्रुतर्वा और महाबाहु इन सब महावीर तुम्हारे पुत्रोंने चारों ओरसे भीमसेनको

मुमोच निशितान्बाणान्पुत्राणां तव मर्मसु ।
ते कीर्यमाणा भीमेन पुत्रास्तव महारणे ॥ ८ ॥
भीमसेनमुपासेदुः प्रवणादिव कुञ्जरम् ।
ततः क्रुद्धो रणे भीमः शिरो दुर्मर्षणस्य ह ॥ ९ ॥
क्षुरप्रेण प्रमथ्याशु पातयामास भूतले ।
ततोऽपरेण भल्लेन सर्वावरणभेदिना ॥ १० ॥
श्रुतान्तमवधीद्भीमस्तव पुत्रं महारथः ।
जयत्सेनं ततो विद्ध्वा नाराचेन हसन्निव ॥ ११ ॥
पातयामास कौरव्यं रथोपस्थादरिन्दमः ।
स पपात रथाद्राजन् भूमौ तूर्णं ममार च ॥ १२ ॥
श्रुतर्वा तु ततो भीमं क्रुद्धो विव्याध मारिष ।
शतेन गृध्रवाजानां शराणां नतपर्वणाम् ॥ १३ ॥
ततः क्रुद्धो रणे भीमो जैत्रं भूरिबलं रविम् ।
त्रीनेतांस्त्रिभिरानर्च्छद्विषाग्निप्रतिमैः शरैः ॥ १४ ॥
ते हता न्यपतन् भूमौ स्यन्दनेभ्यो महारथाः ।
वसन्ते पुष्पशबला निकृत्ता इव किंशुकाः ॥ १५ ॥
ततोऽपरेण भल्लेन तीक्ष्णेन च परन्तपः ।
दुर्विमोचनमाहत्य प्रेषयामास मृत्यवे ॥ १६ ॥

घेर लिया। हे महाराज! तब महारथ भीमसेन भी अपने रथपर चढकर तुम्हारे पुत्रोंके मर्मस्थानोंमें बाण मारने लगे। (४-८)

तब तुम्हारे पुत्र भी उनकी ओर दौडे, तब भीमसेनने हंसकर और क्रोध करके एक बाणसे दुर्मर्षणका शिर कट-कर पृथ्वीपर गिरा दिया। दूसरे सब शरीर काटने योग्य बाणसे श्रुतान्तको और तीसरेसे जगत्सेनको मारडाला। शत्रु नाशन जगत्सेन उस बाणके लगते ही पृथ्वीपर गिर गया। (९—१२)

तब श्रुतर्वाने महाक्रोध करके गिद्धके पङ्ख लगे, अत्यन्त तेज सौ बाण भीम-सेनके शरीरमें मारे, तब भीमसेनने क्रोध करके विष और अग्निके समान एक तेज बाणसे जैत्र, भूरिबल और रविको मारडाला। ये तीनों भाई कट कर रथसे इस प्रकार पृथ्वीमें गिरे जैसे वसन्त कालमें फूला हुआ, टेसू कटकर गिरता है। (१३—१५)

तब भीमसेनने एक अत्यन्त तेज

स हतः प्रापतद्भूमौ स्वरथाद्रथिनां वरः ।
गिरेस्तु कूटजो भग्नो मारुतेनेव पादपः ॥ १७ ॥
दुष्प्रधर्षं ततश्चैव सुजातं च सुतं तव ।
एकैकं न्यहनत्संख्ये द्वाभ्यां द्वाभ्यां चमूमुखे ॥ १८ ॥
तौ शिलीमुखविद्धाङ्गौ पेततू रथसत्तमौ ।
ततः पतन्तं समरे अभिवीक्ष्य सुतं तव ॥ १९ ॥
भल्लेन पातयामास भीमो दुर्विषहं रणे ।
स पपात हतो वाहात्पश्यतां सर्वधन्विनाम् ॥ २० ॥
दृष्ट्वा तु निहतान् भ्रातॄन्बहूनेकेन संयुगे ।
अमर्षवशमापन्नः श्रुतर्वा भीममभ्ययात् ॥ २१ ॥
विक्षिपन्सुमहच्चापं कार्तस्वरविभूषितम् ।
विसृजन्सायकांश्चैव विषाग्निप्रतिमान्बहून् ॥ २२ ॥
स तु राजन्धनुश्छित्त्वा पाण्डवस्य महामृधे ।
अथैनं छिन्नधन्वानं विंशत्या समवाकिरत् ॥ २३ ॥
ततोऽन्यद्धनुरादाय भीमसेनो महाबलः ।
अवाकिरत्तव सुतं तिष्ठ तिष्ठेति चाब्रवीत् ॥ २४ ॥
महदासीत्तयोर्युद्धं चित्ररूपं भयानकम् ।

बाणसे दुर्विमोचनको मारकर गिरा दिया, दुर्विमोचन मरकर इस प्रकार पृथ्वीमें गिरे, जैसे कोई बडा वृक्ष पर्वतके शिखरसे टूटकर पृथ्वीमें गिरता है। फिर भीमसेनने दो दो बाणोंसे दुर्द्धर्ष और सुजातको मारडाला; ये दोनों मरकर पृथ्वीमें गिर गये। तब दुर्विषहको अपनी ओर आते देख उसे भी एक बाणसे मारडाला; वह भी सब धनुषधारियोंके आगे पृथ्वीमें गिर गया। (१५-२०)

अपने अनेक भाइयोंको एकले भीमसेनसे मारा देख श्रुतर्वाको महाक्रोध हुआ, वे अपनी सुवर्ण भूषित धनुषको घुमाते हुए विष और अग्निके समान बाण छोडते हुए भीमसेनकी ओर दौडे और भीमसेनका धनुष काटकर बीस बाण उनके शरीरमें मारे, महाबलवान् भीमसेनने शीघ्रता सहित दूसरा धनुष लेकर अनेक बाण चलाये, और श्रुतर्वासे कहने लगे, कि खडारह खडारह। उस समय उन दोनोंका ऐसा घोर भयानक और अद्भुत युद्ध हुआ, जैसा जंभासुर और इन्द्रका हुआ था। इन

यादृशं समरे पूर्वं जम्भवासवयोर्युधि ॥ २५ ॥
तयोस्तत्र शितैर्मुक्तैर्यमदण्डनिभैः शरैः ।
समाच्छन्ना धरा सर्वा खं दिशो विदिशस्तथा ॥२६ ॥
ततः श्रुतर्वा संक्रुद्धो धनुरादाय सायकैः ।
भीमसेनं रणे राजन्बाह्वोरुरसि चार्पयत् ॥ २७ ॥
सोऽतिविद्धो महाराज तव पुत्रेण धन्विना ।
भीमः संचुक्षुभे क्रुद्धः पर्वणीव महोदधिः ॥ २८ ॥
ततो भीमो रुषाऽऽविष्टः पुत्रस्य तव मारिष ।
सारथिं चतुरश्चाश्वान् शरैर्निन्ये यमक्षयम् ॥ २९ ॥
विरथं तं समालक्ष्य विशिखैर्लोमवाहिभिः ।
अवाकिरदमेयात्मा दर्शयन्पाणिलाघवम् ॥ ३० ॥
श्रुतर्वा विरथो राजन्नाददे खड्गचर्मणी ।
अथास्याददतः खड्गं शतचन्द्रं च भानुमत् ॥ ३१ ॥
क्षुरप्रेण शिरः कायात्पातयामास पाण्डवः ।
छिन्नोत्तमाङ्गस्य ततः क्षुरप्रेण महात्मना ॥ ३२ ॥
पपात कायः स रथाद्वसुधामनुनादयन् ।
तस्मिन्निपतिते वीरे तावका भयमोहिताः ॥ ३३ ॥
अभ्यद्रवन्त संग्रामे भीमसेनं युयुत्सवः ।

दोनोंके यमराजके दण्डके समान तेज बाणोंसे आकाश, पृथ्वी, दिशा और सब कोने भर गये। (२१-२६)

तब श्रुतर्वाने क्रोध करके भीमसेनके हृदय और हाथोंमें अनेक बाण मारे, तब उन बाणोंसे व्याकुल होकर भीमसेनका क्रोध ऐसा बढा जैसे पूर्णमासीके दिन समुद्र बढता है। तब भीमसेनने अपने बाणोंसे उनके घोडे और सारथी को मार डाला ॥ (२७—२९)

श्रुतर्वाको रथहीन देखकर भीमसेनने बहुत तेज बाणोंसे व्याकुल कर दिया और अपनी बाणविद्याकी शीघ्रता दिखलाई। तब श्रुतर्वा भी खड्ग और ढाल लेकर रथसे उतरने लगे। परन्तु भीमसेनने शीघ्रता सहित तेज बाणोंसे उसका शिर काटकर पृथ्वीमें डाल दिया, तब शिर काटनेसे उसका शरीर भी पृथ्वीमें गिर गया, वीर श्रुतर्वाको मरा हुआ देख तुम्हारी सेना भयसे व्याकुल होगई ॥ (३०-३३)

और बचे हुए वीर उनसे युद्ध करने

तानापतत एवाशु हतशेषाद्बलार्णवात् ॥ ३४ ॥
दंशितान्प्रतिजग्राह भीमसेनः प्रतापवान् ।
ते तु तं वै समासाद्य परिवव्रुः समन्ततः ॥ ३५ ॥
ततस्तु संवृतो भीमस्तावकान्निशितैः शरैः ।
पीडयामास तान्सर्वान्सहस्राक्ष इवासुरान् ॥ ३६ ॥
ततः पञ्चशतान्हत्वा सवरूथान्महारथान् ।
जघान कुञ्जरानीकं पुनः सप्तशतं युधि ॥ ३७ ॥
हत्वा शतसहस्राणि पत्तीनां परमेषुभिः ।
वाजिनां च शतान्यष्टौ पाण्डवः स विराजते॥ ३८ ॥
भीमसेनस्तु कौन्तेयो हत्वा युद्धे सुतांस्तव ।
मेने कृतार्थमात्मानं सफलं जन्म च प्रभो ॥ ३९ ॥
तं तथा युद्ध्यमानं च विनिघ्नन्तं च तावकान् ।
ईक्षितुं नोत्सहन्ते स्म तव सैन्या नराधिप ॥ ४० ॥
विद्राव्य च कुरून्सर्वांस्तांश्च हत्वा पदानुगान् ।
दोर्भ्यां शब्दं ततश्चक्रे त्रासयानो महाद्विपान्॥ ४१ ॥
हतभूयिष्ठयोधा तु तव सेना विशाम्पते ।
किञ्चिच्छेषा महाराज कृपणं समपद्यत ॥ ४२ ॥ [१५३४]

इति श्रीमहाभारते० शल्यपर्वणि एकादशधार्तराष्ट्रवधे षड्विंशोऽध्यायः ॥ २६ ॥

को दौडे, उनको अपनी ओर आते देख प्रतापवान् भीमसेन भी युद्ध करनेको चले, उन्होंने चारों ओरसे भीमसेनको घेर लिया, तब भीमसेनने अपने तेज बाणोंसे उन सबको इस प्रकार व्याकुल कर दिया, जैसे इन्द्र राक्षसोंको व्याकुल कर देता है। भीमसेनने रथोंमें बैठे पांच सौ वीर, घोडों पर चढे सात सौ वीर, आठ सौ घोडे और सहस्रों पैदल मारडाले। (३४—३८)

इस प्रकार तुम्हारे पुत्रोंका नाश करके भीमसेनने अपनेको कृतकृत्य और अपने जन्मको सफल जाना, उनको इस प्रकार युद्ध करते देख तुम्हारी सेनाके किसी वीरकी यह शक्ति न देख पडी कि उनकी ओर दृष्टि कर सके। इस प्रकार अनेक वीरोंको भगाकर भीमसेन ताल ठोकने लगे। उस तालके शब्दसे हाथी डरने लगे। हे महाराज! उस समय तुम्हारी जो सेना मरनेसे बची थी सो भयसे व्याकुल होगई। (३९-४२)

शल्यपर्वमें छवीस अध्याय समाप्त। [१५३४]

सञ्जय उवाच— दुर्योधनो महाराज सुदर्शश्चापि ते सुतः ।
हतशेषौ तदा संख्ये वाजिमध्ये व्यवस्थितौ ॥ १ ॥
ततो दुर्योधनं दृष्ट्वा वाजिमध्ये व्यवस्थितम् ।
उवाच देवकीपुत्रः कुन्तीपुत्रं धनञ्जयम् ॥ २ ॥
शत्रवो हतभूयिष्ठा ज्ञातयः परिपालिताः ।
गृहीत्वा सञ्जयं चासौ निवृत्तः शिनिपुङ्गवः ॥ ३ ॥
परिश्रान्तश्च नकुलः सहदेवश्च भारत ।
योधयित्वा रणे पापान्धार्त्तराष्ट्रान्सहानुगान् ॥ ४ ॥
दुर्योधनमभित्यज्य यत्र एते व्यवस्थिताः ।
कृपश्च कृतवर्मा च द्रौणिश्चैव महारथः ॥ ५ ॥
असौ तिष्ठति पाञ्चाल्यः श्रिया परमया युतः ।
दुर्योधनबलं हत्वा सह सर्वैः प्रभद्रकैः ॥ ६ ॥
असौ दुर्योधनः पार्थ वाजिमध्ये व्यवस्थितः ।
छत्रेण ध्रियमाणेन प्रेक्षमाणो मुहुर्मुहुः ॥ ७ ॥
प्रतिव्यूह्य बलं सर्वं रणमध्ये व्यवस्थितः ।
एनं हत्वा शितैर्बाणैः कृतकृत्यो भविष्यसि ॥ ८ ॥
गजानीकं हतं दृष्ट्वा त्वां च प्राप्तमरिन्दम ।

शल्यपर्वमें सत्ताइस अध्याय ।

सञ्जय बोले, हे महाराज ! उस समय तुम्हारे पुत्रोंमेंसे केवल दुर्योधन और सुदर्शन ही मरनेसे बचे थे, ये दोनों अश्वसेनामें खडे थे, उनको देख श्रीकृष्ण अर्जुनसे बोले। हे अर्जुन ! शत्रु मरनेसे थोडे शेष हैं, तुम अपनी जातिकी रक्षा करो। ये देखो सञ्जयको पकडे हुए सात्यकी युद्धसे लौटे आते है, देखो पापी धृतराष्ट्रके पुत्रोंसे लडते लडते नकुल और सहदेव भी थक गये हैं। यह देखो दुर्योधनको छोडकर कृतवर्मा, कृपाचार्य और महारथ अश्वत्थामा खडे हैं। (१—५)

यह देखो हमारे प्रधान सेनापति महातेजस्वी धृष्टद्युम्न सब दुर्योधनकी सेनाका नाश करके प्रभद्रकवंशी क्षत्रियोंके सहित युद्धभूमिमें खडे हैं। यह देखो जिनके शिरपर छत्र लगा है, जो बार बार चारों ओर देख रहे हैं, जो व्यूह बनाये घुडचढी सेनाके बीचमें खडे हैं वही महाराज दुर्योधन हैं। तुम तेज बाणोंसे इनका नाश करके कृतकृत्य होंगे। (६—८)

यावन्न विद्रवन्त्येते तावज्जहि सुयोधनम् ॥ ९ ॥
यातु कश्चित्तु पाञ्चाल्यं क्षिप्रमागम्यतामिति ।
परिश्रान्तबलस्तात नैष मुच्येत किल्बिषी ॥ १० ॥
हत्वा तव बलं सर्वं संग्रामे धृतराष्ट्रजः ।
जितान्पाण्डुसुतान्मत्वा रूपं धारयते महत् ॥ ११ ॥
निहतं स्वबलं दृष्ट्वा पीडितं चापि पाण्डवैः ।
ध्रुवमेष्यति संग्रामे वधायैवात्मनो नृप ॥ १२ ॥
एवमुक्तः फाल्गुनस्तु कृष्णं वचनमब्रवीत् ।
धृतराष्ट्रसुताः सर्वे हता भीमेन माधव ॥ १३ ॥
यावेतावास्थितौ कृष्ण तावद्य न भविष्यति ।
हतो भीष्मो हतो द्रोणः कर्णो वैकर्तनो हतः ॥ १४ ॥
मद्रराजो हतः शल्यो हतः कृष्ण जयद्रथः ।
हयाः पञ्चशताः शिष्टाः शकुनेः सौबलस्य च ॥ १५ ॥
रथानां तु शते शिष्टे द्वे एव तु जनार्दन ।
दंतिनां च शतं साग्रं त्रिसाहस्राः पदातयः ॥ १६ ॥
अश्वत्थामा कृपश्चैव त्रिगर्ताधिपतिस्तथा ।
उलूकः शकुनिश्चैव कृतवर्मा च सात्वतः ॥ १७ ॥

हे तात ! जबतक हाथी सेनाको मरा देख और तुमको आया देख यह सेना न भाग जाय, तभीतक तुम दुर्योधनको जीत लो, तुम अपनी सहायताके लिये शीघ्र एक मनुष्य भेजकर धृष्टद्युम्नको अपने पास बुला लो, इस समय पापी दुर्योधन बहुत थक गया है, इस लिये इसे मार ही डालना चाहिये। यह पाण्डवोंकी सेनाका नाश करके पाण्डवोंको जीत लिया यह समझकर कैसा प्रसन्नतासे खडा है। जब इसकी सब सेना मारी जायगी और पाण्डवोंके बाणोंसे व्याकुल होगा तब आप ही मरनेके लिये युद्धमें आवेगा। (९—१२)

श्रीकृष्णके ऐसे वचन सुन अर्जुन बोले, हे कृष्ण ! धृतराष्ट्रके सब पुत्रोंको भीमसेनने मारा है, ये जो दोनों खडे हैं सो भी अब नहीं बचेंगे। भीष्म मारे गये, द्रोणाचार्य मारे गए, कर्ण मारे गए, मद्रराज शल्य मारे गए, जयद्रथ मारे गए, अब सुबलपुत्र शकुनीके सङ्गवाले पांच सौ घुडचढे, दो सौ रथ, एक सौ हाथी और तीन सहस्र पैदल शेष हैं। प्रधानोंमें अश्वत्थामा,

एतद्बलमभूच्छेषं धार्त्तराष्ट्रस्य माधव।
मोक्षो न नूनं कालात्तु विद्यते भुवि कस्यचित्॥१८॥
तथा विनिहते सैन्ये पश्य दुर्योधनं स्थितम्।
अद्याह्ना हि महाराजो हतामित्रो भविष्यति॥१९॥
न हि मे मोक्ष्यते कश्चित्परेषामिह चिन्तये।
ये त्वद्य समरं कृष्ण न हास्यन्ति मदोत्कटाः॥२०॥
तान्वै सर्वान्हनिष्यामि यद्यपि स्युर्न मानुषाः।
अद्य युद्धे सुसंक्रुद्धो दीर्घं राज्ञः प्रजागरम्॥२१॥
अपनेष्यामि गान्धारं घातयित्वा शितैः शरैः।
निकृत्या वै दुराचारो यानि रत्नानि सौवलः॥२२॥
सभायामहरद्यूते पुनस्तान्याहराम्यहम्।
अद्य ता अपि रोत्स्यंति सर्वा नागपुरे स्त्रियः॥२३॥
श्रुत्वा पतींश्च पुत्रांश्च पाण्डवैर्निहतान्युधि।
समाप्तमद्य वै कर्म सर्वं कृष्ण भविष्यति॥२४॥
अद्य दुर्योधनो दीप्तां श्रियं प्राणांश्च मोक्ष्यति।
नापयाति भयात्कृष्ण संग्रामाद्यदि चेन्मम॥२५॥
निहतं विद्धि वार्ष्णेय धार्त्तराष्ट्रं सुबालिशम्।

कृपाचार्य, त्रिगर्त्तदेशके राजा सुशर्मा, उलूक, शकुनी और कृतवर्मा शेष रह गये हैं। अब दुर्योधनकी सब इतनी ही सेना है, परन्तु जगत् में कालसे कोई नहीं बचता इस लिये यह भी नहीं बचेंगे। देखो सेना नाश होनेसे दुर्योधनका तेज कैसा कम होगया है? हमें निश्चय है, कि आज ही महाराजके शत्रुओंका सर्व नाश होगया। (१२-१९)

यदि युद्ध छोडकर न भागे तो आज कोई वीर हमसे नहीं बचेगा, जो आज हमसे युद्ध करनेको आवेंगे, वे चाहे साक्षात् देवता ही क्यों न हों। तोभी जीते नहीं बचेंगे। आज तेज बाणोंसे दुष्ट शकुनीको मारकर महाराजका पुराना शोक दूर करूंगा। जिस शकुनिने उस सभामें जुआ खेलकर हमारे रत्न छीन लिये थे, सो आज मैं सब लेलूंगा। पाण्डवोंके हाथसे पति और पुत्रोंको मरा हुआ सुन आज हस्तिनापुरकी स्त्री रोवेंगे। हे कृष्ण! आज यह कर्म समाप्त होजायगा। हमारे धनुषकी टङ्कारको यह घुडचढी सेना नहीं सह सक्ती, अब तुम चलो हम इसका नाश करेंगे। (२०-२५)

समम छोतदशक्तं वै वाजिवृन्दमरिन्दम ॥ २६ ॥
सोढुं ज्यातलनिर्घोषं याहि यावन्निहन्म्यहम् ।
एवमुक्तस्तु दाशार्हः पाण्डवेन यशस्विना ॥ २७ ॥
अचोदयद्धयान् राजन् दुर्योधनबलं प्रति ।
तदनीकमभिप्रेक्ष्य त्रयः सज्जा महारथाः ॥ २८ ॥
भीमसेनोऽर्जुनश्चैव सहदेवश्च मारिष ।
प्रययुः सिंहनादेन दुर्योधनजिघांसया ॥ २९ ॥
तान्प्रेक्ष्य सहितान्सर्वान् जवेनोद्यतकार्मुकान् ।
सौबलोऽभ्यद्रवद्युद्धे पाण्डवानाततायिनः ॥ ३० ॥
सुदर्शनस्तव सुतो भीमसेनं समभ्ययात् ।
सुशर्मा शकुनिश्चैव युयुधाते किरीटिना ॥ ३१ ॥
सहदेवं तव सुतो हयपृष्ठगतोऽभ्ययात् ।
ततो हि यत्नतः क्षिप्रं तव पुत्रो जनाधिप ॥ ३२ ॥
प्रासेन सहदेवस्य शिरसि प्राहरद्भृशम् ।
सोऽपाविशद्रथोपस्थे तव पुत्रेण ताडितः ॥ ३३ ॥
रुधिराप्लुतसर्वाङ्ग आशीविष इव श्वसन् ।
प्रतिलभ्य ततः संज्ञां सहदेवो विशाम्पते ॥ ३४ ॥
दुर्योधनं शरैस्तीक्ष्णैः संक्रुद्धः समवाकिरत् ।
पार्थोऽपि युधि विक्रम्य कुन्तीपुत्रो धनञ्जयः ॥ ३५ ॥

यशस्वी अर्जुनके वचन सुन कृष्णने दुर्योधनकी सेनाकी ओर घोडे हांके, महारथ अर्जुन, महारथ भीम और महारथ सहदेव दुर्योधनको मारनेके लिये सिंहके समान गर्जते हुए चले । उनको धनुष धारण किये वेगसे आते देख महारथ सुबलपुत्र शकुनि युद्ध करनेको चले, तुम्हारे पुत्र सुदर्शन भीमसेनसे, सुशर्मा और शकुनी अर्जुनसे और घोडे पर चढे दुर्योधन सहदेवसे युद्ध करने लगे। (२६-३२)

तब दुर्योधनने एक प्रास सहदेवके शिरमें मारा, उसके लगनेसे सहदेव रुधिरमें भीग गए और विषीले सांपके समान स्वांस लेते हुए मूर्च्छित होकर रथपर गिर गये, फिर थोडे समयमें चैतन्य होकर महाक्रोध करके दुर्योधनको अपने तेज बाणोंसे व्याकुल कर दिया, महापराक्रमी अर्जुन भी अपने तेज बाणोंसे अनेक घुडचढे वीरोंके सिर

शूराणामश्वपृष्ठेभ्यः शिरांसि निचकर्त ह ।
तदनीकं तदा पार्थो व्यधमद्बहुभिः शरैः ॥ ३६ ॥
पातयित्वा हयान्सर्वांस्त्रिगर्तानां रथान्ययौ ।
ततस्ते सहिता भूत्वा त्रिगर्तानां महारथाः ॥ ३७ ॥
अर्जुनं वासुदेवं च शरवर्षैरवाकिरन् ।
सत्यकर्माणमाक्षिप्य क्षुरप्रेण महायशाः ॥ ३८ ॥
ततोऽस्य स्यन्दनस्येषां चिच्छिदे पाण्डुनन्दनः ।
शिलाशितेन च विभो क्षुरप्रेण महायशाः ॥ ३९ ॥
शिरश्चिच्छेद सहसा तप्तकुण्डलभूषणम् ।
सत्येषुमथ चादत्त योधानां मिषतां ततः ॥ ४० ॥
यथा सिंहो वने राजन्मृगं परिबुभुक्षितः ।
तं निहत्य ततः पार्थः सुशर्माणं त्रिभिः शरैः॥ ४१ ॥
विद्ध्वा तानहनत्सर्वान् रथान् रुक्मविभूषितान् ।
ततः प्रायात्त्वरन्पार्थो दीर्घकालं सुसंवृतम् ॥ ४२ ॥
मुञ्चन् क्रोधविषं तीक्ष्णं प्रस्थलाधिपतिं प्रति ।
तमर्जुनः पृषत्कानां शतेन भरतर्षभ ॥ ४३ ॥
पूरयित्वा ततो वाहान्प्राहरत्तस्य धन्विनः ।
ततः शरं समादाय यमदण्डोपमं तदा ॥ ४४ ॥
सुशर्माणं समुद्दिश्य चिक्षेपाशु हसन्निव ।

काटने लगे। इस सेनाका नाश करके अर्जुन त्रिगर्त्तदेशकी रथसेनाकी ओर चले गये। त्रिगर्त्तदेशीय महारथ भी अर्जुन और कृष्णके ऊपर बाण वर्षाने लगे। फिर अर्जुन सत्यकर्मासे युद्ध करनेको गये, उसकी एक धुरी काटकर महायशस्वी अर्जुनने शिलापर घिसे तेज बाणोंसे चमकते हुए सोनेके कुण्डल सहित उसका शिर काट दिया। ३३-३९

हे राजन्! तब महापराक्रमी अर्जुन इस प्रकार युद्धमें घूमने लगे जैसे हरिनोंके झुण्डमें भूखा सिंह घूमता है। (४०-४१)

सत्यकर्माको मारकर फिर अर्जुनने तीन बाण सुशर्माके शरीरमें मारे। अनन्तर सोनेके रथोंमें बैठे वीरोंका नाश करके शीघ्रता सहित क्रोधरूपी तेज विषको छोडते हुए प्रस्थलदेशके राजाकी ओर दौडे और उनकी ओर सौ बाण छोडे फिर घोडोंको बाणोंसे पूरित करके एक यमराजके दण्डके समान बाण सुशर्माके

स शरः प्रेषितस्तेन क्रोधदीप्तेन धन्विना ॥ ४५ ॥
सुशर्माणं समासाद्य बिभेद हृदयं रणे ।
स गतासुर्महाराज पपात धरणीतले ॥ ४६ ॥
नन्दयन्पाण्डवान्सर्वान् व्यथयंश्चापि तावकान् ।
सुशर्माणं रणे हत्वा पुत्रानस्य महारथान् ॥ ४७ ॥
सप्त चाष्टौ च त्रिंशच्च सायकैरनयत् क्षयम् ।
ततोऽस्य निशितैर्बाणैः सर्वान्हत्वा पदानुगान् ॥ ४८ ॥
अभ्यगाद्भारतीं सेनां हतशेषां महारथः ।
भीमस्तु समरे क्रुद्धः पुत्रं तव जनाधिप ॥ ४९ ॥
सुदर्शनमदृश्यन्तं शरैश्चक्रे हसन्निव ।
ततोऽस्य प्रहसन् क्रुद्धः शिरः कायादपाहरत् ॥ ५० ॥
क्षुरप्रेण सुतीक्ष्णेन स हतः प्रापतद्भुवि ।
तस्मिंस्तु निहते वीरे ततस्तस्य पदानुगाः ॥ ५१ ॥
परिवव्रू रणे भीमं किरन्तो विविधान् शरान् ।
ततस्तु निशितैर्बाणैस्तवानीकं वृकोदरः ॥ ५२ ॥
इन्द्राशनिसमस्पर्शैः समन्तात्पर्यवाकिरत् ।
ततः क्षणेन तद्भीमो न्यहनद्भरतर्षभ ॥ ५३ ॥
तेषु तूत्साद्यमानेषु सेनाध्यक्षा महारथाः ।
भीमसेनं समासाद्य ततोऽयुद्ध्यन्त भारत ॥ ५४ ॥

हृदयमें हंसकर मारा, उस बाणके लगनेसे सुशर्माका हृदय फट गया। और वह मरकर पृथ्वीमें गिर गया; तब पाण्डवोंकी सेना बहुत प्रसन्न और तुम्हारी सेना बहुत दुःखी होगई। फिर अपने तेज बाणोंसे उसके पैंतालीस महारथ पुत्रोंको मारडाला, फिर त्रिगर्त्तदेशीय सब सेनाका नाश कर दिया। (४२—४९)

हे महाराज! उस ही समय महारथ भीमसेन भी क्रोध करके तुम्हारे पुत्र सुदर्शनसे युद्ध करने लगे। तब हंसकर उसे बाणोंसे छिपा दिया, फिर एक बाणसे शिर काटकर पृथ्वीमें गिरा दिया। जब महावीर सुदर्शन मरकर पृथ्वीमें गिरे, तब उनके सङ्गी भीमसेनसे युद्ध करने लगे और अनेक प्रकारके बाण वर्षाने लगे। तब भीमसेनने वज्रके समान घोर बाणोंसे उस सब सेनाका नाश कर दिया। अनन्तर अनेक सेनाके

स तान्सर्वान् शरैर्घोरैरवाकिरत पाण्डवः ।
तथैव तावका राजन्पाण्डवेयान्महारथान् ॥ ५५ ॥
शरवर्षेण महता समन्तात्पर्यवारयन् ।
व्याकुलं तदभूत्सर्वं पाण्डवानां परैः सह ॥ ५६ ॥
तावकानां च समरे पाण्डवेयैर्युयुत्सताम् ।
तत्र योधास्तदा पेतुः परस्परसमाहताः ।
उभयोः सेनयो राजन्संशोचन्तः स्म बान्धवान्॥५७॥१५९१

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यपर्वणि सुशर्मवधे सप्तविंशोऽध्यायः ॥ २७ ॥

सञ्जय उवाच— तस्मिन्प्रवृत्ते संग्रामे गजवाजिनरक्षये ।
शकुनिः सौबलो राजन्सहदेवं समभ्ययात् ॥ १ ॥
ततोऽस्यापततस्तूर्णं सहदेवः प्रतापवान् ।
शरौघान्प्रेषयामास पतङ्गानिव शीघ्रगान् ॥ २ ॥
उलूकश्च रणे भीमं विव्याध दशभिः शरैः ।
शकुनिश्च महाराज भीमं विद्ध्वा त्रिभिः शरैः ॥३ ॥
सायकानां नवत्या वै सहदेवमवाकिरत् ।
ते शूराः समरे राजन्समासाद्य परस्परम् ॥ ४ ॥
विव्यधुर्निशितैर्बाणैः कङ्कबर्हिणवाजितैः ।

प्रधान वीर भीमसेनसे युद्ध करनेको आये । भीमसेनने अपने तेज बाणोंसे उनका भी नाश कर दिया ।(५०-५५)

इसी प्रकार तुम्हारी ओरके वीरोंसे भी पाण्डवोंके महारथोंको बाणोंसे व्याकुल कर दिया । दोनों ओरके वीर बाणोंसे मर मर सोचते हुए पृथ्वीमें गिर गये ॥ (५६-५७) [१५९१]

शल्यपर्वमें सत्ताइस अध्याय समाप्त ।

शल्यपर्वमें अट्ठाइस अध्याय ।

सञ्जय बोले, हे महाराज धृतराष्ट्र ! जब यह हाथी, घोडे और मनुष्योंका नाश करनेवाला घोर युद्ध होने लगा, तब सुबलपुत्र शकुनी सहदेवसे युद्ध करनेको आये, प्रतापवान् सहदेवने उनको अपनी ओर आते देख पक्षियोंके समान शीघ्र चलनेवाले अनेक बाण शकुनिकी ओर छोडे ॥ (१—२)

उलूकने भीमसेनके शरीरमें दश और शकुनिने भी तीन बाण मारे, फिर शकुनीने सहदेवकी ओर नव्वे बाण चलाये, ये चारों वीर युद्धमें क्रोध करके पक्षियोंके पङ्ख लगे सोनेके तारोंसे मढे शिलापर घिसे बाण कानोंतक खींच

स्वर्णपुङ्खैः शिलाधौतैराकर्णप्रहितैः शरैः ॥ ५ ॥
तेषां चापभुजोत्सृष्टा शरवृष्टिर्विशाम्पते ।
आच्छादयद्दिशः सर्वा धारा इव पयोमुचः ॥ ६ ॥
ततः क्रुद्धो रणे भीमः सहदेवश्च भारत ।
चेरतुः कदनं संख्ये कुर्वन्तौ सुमहाबलौ ॥ ७ ॥
ताभ्यां शरशतैश्छन्नं तद्बलं तव भारत ।
सान्धकारमिवाकाशमभवत्तत्र तत्र ह ॥ ८ ॥
अश्वैर्विपरिधावद्भिः शरच्छन्नैर्विशाम्पते ।
तत्र तत्र वृतो मार्गो विकर्षद्भिर्हतान्बहून् ॥ ९ ॥
निहतानां हयानां च सहैव हयसादिभिः ।
वर्मभिर्विनिकृत्तैश्च प्रासैश्छिन्नैश्च मारिष ॥ १० ॥
ऋष्टिभिः शक्तिभिश्चैव सासिप्रासपरश्वधैः ।
सञ्छन्ना पृथिवी जज्ञे कुसुमैः शबला इव ॥ ११ ॥
योधास्तत्र महाराज समासाद्य परस्परम् ।
व्यचरन्त रणे क्रुद्धा विनिघ्नन्तः परस्परम् ॥ १२ ॥
उद्वृत्तनयनै रोषात्सन्दष्टौष्ठपुटैर्मुखैः ।
सकुण्डलैर्मही च्छन्ना पद्मकिञ्जल्कसन्निभैः ॥ १३ ॥

खींचकर छोडने लगे। उस समय इन चारोंकी धनुषोंकी बाण वर्षा ऐसी दीखती थी जैसे मेघसे जल वर्षता हो। (३—६)

हे महाराज ! तब भीमसेन और महाबलवान सहदेवने महाक्रोध करके तुम्हारी सेनाका नाश करना विचारा। तब इन दोनोंने इतने बाण छोडे कि तुम्हारी सब सेना पूरित होगई और आकाशमें महा अन्धकार दीखने लगा। अनेक घोडे बाणोंसे व्याकुल होकर इधर उधर भागने लगे, अनेक मरे हुए वीर उनके पैरोंमें आकर इधर उधरको खिचने लगे, अनेक घोडोंपर चढे वीर उन घोडोंके सहित मरकर मार्ग ही में गिर गये। किसीका कवच कट गया और किसीका प्रास टूट गया, गिरते हुए खड्ग, साङ्गी, प्रास और परश्वधोंसे पृथ्वी ऐसी पूरित होगई जैसी वसन्तकालमें फूलोंसे। (७-११)

हे महाराज ! दोनों ओरके वीर क्रोध करके सेनामें घूमने और शत्रुओंको मारने लगे, हे पृथ्वीनाथ ! कुण्डल पहिने कमलके समान सुन्दर कटे हुए

भुजैश्छिन्नैर्महाराज नागराजकरोपमैः ।
साङ्गदैः सतनुत्रैश्च सासिप्रासपरश्वधैः ॥ १४ ॥
कबन्धैरुत्थितैश्छिन्नैर्नृत्यद्भिश्चापरैर्युधि ।
क्रव्यादगणसञ्छन्ना घोराऽभूत्पृथिवी विभो ॥ १५ ॥
अल्पावशिष्टे सैन्ये तु कौरवेयान्महाहवे ।
प्रहृष्टाः पाण्डवा भूत्वा निन्यिरे यमसादनम् ॥ १६ ॥
एतस्मिन्नन्तरे शूरः सौबलेयः प्रतापवान् ।
प्रासेन सहदेवस्य शिरसि प्राहरद् भृशम् ॥ १७ ॥
स विह्वलो महाराज रथोपस्थ उपाविशत् ।
सहदेवं तथा दृष्ट्वा भीमसेनः प्रतापवान् ॥ १८ ॥
सर्वसैन्यानि संक्रुद्धो वारयामास भारत ।
निर्बिभेद च नाराचैः शतशोऽथ सहस्रशः ॥ १९ ॥
विनिर्भिद्याकरोच्चैव सिंहनादमरिन्दमः ।
तेन शब्देन वित्रस्ताः सर्वे सहयवारणाः ॥ २० ॥
प्राद्रवन्सहसा भीताः शकुनेश्च पदानुगाः ।
प्रभग्नानथ तान्दृष्ट्वा राजा दुर्योधनोऽब्रवीत् ॥ २१ ॥
निवर्त्तध्वमधर्मज्ञा युध्यध्वं किं सृतेन वः ।
इह कीर्तिं समाधाय प्रेत्य लोकान्समश्नुते ॥ २२ ॥

मुखोंसे पृथ्वी भर गई, कवच और बाजूबन्द पहिने, खड्ग, प्रास और परश्वध लिये हाथीके सूंडके समान कटे हुए हाथ पृथ्वीमें चारों ओर दीखने लगे, अनेक कबन्ध उठ कर नाचने लगे, और मांस खानेवाले, जन्तु चारों ओर घूमने लगे, कौरवोंकी थोडी सेना देखकर पाण्डवोंके वीर बहुत प्रसन्न हुए और शत्रुओंका नाश करने लगे।(१२-१६)

उस ही समय प्रतापवान शकुनीने एक प्रास सहदेवके शिरमें मारा, उसके लगनेसे सहदेव गिरते ही व्याकुल हो· कर रथमें गिर गये तब प्रतापवान भीमसेनने क्रोध करके अपने बाणोंसे सब सेनाको रोक दिया और अनेक वीरोंको मारकर सिंहके समान गर्जने लगे, उस शब्दसे हाथी, घोडे और मनुष्य व्याकुल होकर इधर उधर भागने लगे।(१७ २०)

शकुनीके साङ्गियोंको भागते देख राजा दुर्योधन बोले, अरे अधर्मियों ! लौटो और युद्ध करो भागनेसे क्या होगा ? युद्ध करनेसे यश और मरनेसे

प्राणान् जहाति यो धीरो युद्धे पृष्ठमदर्शयन् ।
एवमुक्तास्तु ते राज्ञा सौबलस्य पदानुगाः ॥ २३ ॥
पाण्डवानभ्यवर्त्तन्त मृत्युं कृत्वा निवर्त्तनम् ।
द्रवद्भिस्तत्र राजेन्द्र कृतः शब्दोऽतिदारुणः ॥ २४ ॥
क्षुब्धसागरसङ्काशाः क्षुभिताः सर्वतोऽभवन् ।
तांस्ततः पुरतो दृष्ट्वा सौबलस्य पदानुगान् ॥ २५ ॥
प्रत्युद्ययुर्महाराज पाण्डवा विजयोद्यताः ।
प्रत्याश्वस्य च दुर्धर्षः सहदेवो विशाम्पते ॥ २६ ॥
शकुनिं दशभिर्विद्ध्वा हयांश्चास्य त्रिभिः शरैः ।
धनुश्चिच्छेद च शरैः सौबलस्य हसन्निव ॥ २७ ॥
अथान्यद्धनुरादाय शकुनिर्युद्धदुर्मदः ।
विव्याध नकुलं षष्ट्या भीमसेनं च सप्तभिः ॥ २८ ॥
उलूकोऽपि महाराज भीमं विव्याध सप्तभिः ।
सहदेवं च सप्तत्या परीप्सन्पितरं रणे ॥ २९ ॥
तं भीमसेनः समरे विव्याध नवभिः शरैः ।
शकुनिं च चतुःषष्ट्या पार्श्वस्थांश्च त्रिभिस्त्रिभिः॥३०॥
ते हन्यमाना भीमेन नाराचैस्तैलपायितैः ।

स्वर्ग मिलता है । जो वीर सन्मुख युद्ध में मरता है वह निःसन्देह स्वर्गमें जाता है। राजाके ऐसे वचन सुन मृत्यु अवश्य होगी, यह निश्चयकर वीर लोग लौटे । उनके लौटनेसे घोर शब्द होने लगा । (२२-२४)

उस समय यह सेना ऐसी दीखने लगी, जैसे उबलता हुआ समुद्र। उनसे युद्ध करनेको पाण्डवोंकी सेनाके वीर भी चले । इतने ही समयमें महापराक्रमी सहदेवने सावधान होकर हंसकर शकुनीके शरीरमें दश और घोडोके तीन तीन बाण मारकर शकुनीका धनुष काट दिया। शकुनीने शीघ्रता सहित दूसरा धनुष लेकर नकुलके शरीरमें छः और भीमसेनके शरीरमें सात बाण मारे । (२५—२८)

हे महाराज ! उसी समय पिताकी रक्षा करते हुए उलूकने भीमसेनके शरीरमें सात और सहदेवके शरीरमें सत्तर बाण मारे, भीमसेनने भी क्रोध करके उलूकके आठ, शकुनीके चौसठ और रक्षा करनेवाले वीरोंके तीन तीन बाण मारे, फिर ये सब भीमके द्वारा बाणोंसे

सहदेवं रणे क्रुद्धाश्छादयन् शरवृष्टिभिः ॥ ३१ ॥
पर्वतं वारिधाराभिः सविद्युत इवाम्बुदाः ।
ततोऽस्यापततः शूरः सहदेवः प्रतापवान् ॥ ३२ ॥
उलूकस्य महाराज भल्लेनापाहरच्छिरः ।
स जगाम रथाद्भूमिं सहदेवेन पातितः ॥ ३३ ॥
रुधिराप्लुतसर्वाङ्गो नन्दयन्पाण्डवान्युधि ।
पुत्रं तु निहतं दृष्ट्वा शकुनिस्तत्र भारत ॥ ३४ ॥
साश्रुकण्ठो विनिःश्वस्य क्षत्तुर्वाक्यमनुस्मरन् ।
चिन्तयित्वा मुहूर्तं स बाष्पपूर्णेक्षणः श्वसन् ॥ ३५ ॥
सहदेवं समासाद्य त्रिभिर्विव्याध सायकैः ।
तानपास्य शरान्मुक्तान् शरसंघैः प्रतापवान् ॥ ३६ ॥
सहदेवो महाराज धनुश्चिच्छेद संयुगे ।
छिन्ने धनुषि राजेन्द्र शकुनिः सौबलस्तदा ॥ ३७ ॥
प्रगृह्य विपुलं खड्गं सहदेवाय प्राहिणोत् ।
तमापतन्तं सहसा घोररूपं विशाम्पते ॥ ३८ ॥
द्विधा चिच्छेद समरे सौबलस्य हसन्निव ।
असिं दृष्ट्वा तथा छिन्नं प्रगृह्य महतीं गदाम् ॥ ३९ ॥

मारे जाने वाले वीर इकट्ठे होकर सहदेवके ऊपर इस प्रकार बाण वर्षाने लगे। जैसे बिजलीवाले मेघ पर्वतके ऊपर जल वर्षाते हैं, तब महा प्रतापवान सहदेवने उन सबको अपने बाणोंसे रोककर एक बाणसे उलूकका शिर काट कर पृथ्वीमें गिरा दिया। वह सहदेवके हाथसे मरकर रुधिरमें भीगकर पाण्डवों की प्रसन्नता बढाता हुआ पृथ्वीमें गिरा॥ (२९—३४)

हे महाराज! अपने पुत्रको मरा हुआ देख शकुनीकी आंखमें आंसू भर आई और रुके हुए उनके कण्ठसे सांस लेते हुए क्षणभर तक विदुरके वचनोंको स्मरण करते हुए शान्त होगये, और सोचने लगे। फिर क्रोध करके सहदेव की ओर तीन बाण चलाये, प्रतापी सहदेवने उन्हें अपने बाणोंसे काटकर शकुनीका धनुष काट दिया। तब सुबल पुत्रने क्रोध करके सहदेवकी ओर चमकता हुआ एक खड्ग चलाया। सहदेवने हंसकर एक बाणसे उस खड्गके दो टुकडे कर दिये, तब शकुनीने एक भारी गदा लेकर सहदेवकी ओर फेंकी

प्राहिणोत्सहदेवाय सा मोघा न्यपतद्भुवि ।
ततः शक्तिं महाघोरां कालरात्रीमिवोद्यताम् ॥ ४० ॥
प्रेषयामास संक्रुद्धः पाण्डवं प्रति सौबलः ।
तामापतन्तीं सहसा शरैः कनकभूषणैः ॥ ४१ ॥
त्रिधा चिच्छेद समरे सहदेवो हसन्निव ।
सा पपात त्रिधा छिन्ना भूमौ कनकभूषणा ॥ ४२ ॥
शीर्यमाणा यथा दीप्ता गगनाद्वै शतह्रदा ।
शक्तिं विनिहतां दृष्ट्वा सौबलं च भयार्दितम् ॥ ४३ ॥
दुद्रुवुस्तावकाः सर्वे भये जाते ससौबलाः ।
अथोत्क्रुष्टं महच्चासीत्पाण्डवैर्जितकाशिभिः ॥ ४४ ॥
धार्त्तराष्ट्रास्ततः सर्वे प्रायशो विमुखाऽभवन् ।
तान्वै विमनसो दृष्ट्वा माद्रीपुत्रः प्रतापवान् ॥ ४५ ॥
शरैरनेकसाहस्रैर्वारयामास संयुगे ।
ततो गान्धारकैर्गुप्तं पुष्टैरश्वैर्जये धृतम् ॥ ४६ ॥
आससाद रणे यान्तं सहदेवोऽथ सौबलम् ।
स्वमंशमवशिष्टं तं संस्मृत्य शकुनिं नृप ॥ ४७ ॥
रथेन कांचनांगेन सहदेवः समभ्ययात् ।
अधिज्यं बलवत्कृत्वा व्याक्षिपन्सुमहद्धनुः ॥ ४८ ॥
स सौबलमभिद्रुत्य गार्ध्रपत्रैः शिलाशितैः ।

परन्तु वह रथतक न पहुंचने पाई, बीच हीमें गिर गई, तब शकुनीने क्रोध कर के कालरात्रिके समान भयानक साङ्गी सहदेवकी ओर चलाई। उस सोनेसे मढी शक्तिको सहदेवने बाणोंसे काट कर इस प्रकार पृथ्वीमें गिरा दिया, जैसे चमकती हुई, बिजलीको। (३५-४३)

उस साङ्गीको कटी और शकुनीको भयसे व्याकुल देख शकुनीके सहित सब सेना इधर उधर भाग चली। उस समय सहदेवकी विजय देखकर विजयी पाण्डवोंकी सेनामें घोर शब्द होने लगा। तुम्हारी सब सेना युद्धसे विमुख होगई। उस सेनाको भागते हुए देख प्रतापवान सहदेव सहस्रों बाण वर्षाते हुए सोनेके रथमें बैठे रोदे सहित महाधनुषको घुमाते गान्धार देशीय वीरोंसे रक्षित बडे बडे घोडोंके रथपर बैठे शकुनीको अपना अंश समझकर अर्थात् हमने सभामें इसे मारनेकी प्रति-

भृशमभ्यहनत्क्रुद्धस्तोत्रैरिव महाद्विपम् ॥ ४९ ॥
उवाच चैनं मेधावी विगृह्य स्मारयन्निव ।
क्षत्रधर्मे स्थिरो भूत्वा युध्यस्व पुरुषो भव ॥ ५० ॥
यत्तदा हृष्यसे मूढ ग्लहन्नक्षैः सभातले ।
फलमद्य प्रपश्य स्वकर्मणस्तस्य दुर्मते ॥ ५१ ॥
निहतास्ते दुरात्मानो येऽस्मानवहसन्पुरा ।
दुर्योधनः कुलांगारः शिष्टस्त्वं चास्य मातुलः ॥ ५२ ॥
अद्य ते निहनिष्यामि क्षुरेणोन्मथितं शिरः ।
वृक्षात्फलमिवाविद्धं लगुडेन प्रमाथिना ॥ ५३ ॥
एवमुक्त्वा महाराज सहदेवो महाबलः ।
संक्रुद्धो रणशार्दूलो वेगेनाभिजगाम तम् ॥ ५४ ॥
अभिगम्य सुदुर्धर्षः सहदेवो युधां पतिः ।
विकृष्य बलवच्चापं क्रोधेन प्रज्वलन्निव ॥ ५५ ॥
शकुनिं दशभिर्विध्वा चतुर्भिश्चास्य वाजिनः ।
छत्रं ध्वजं धनुश्चास्य छित्वा सिंह इवानदत् ॥ ५६ ॥
छिन्नध्वजधनुश्छत्रः सहदेवेन सौबलः ।
कृतो विद्धश्च बहुभिः सर्वमर्मसु सायकैः ॥ ५७ ॥
ततो भूयो महाराज सहदेवः प्रतापवान् ।

ज्ञा की थी। यह विचार कर उसके पास जाकर बोले। (४४—४९)

अरे दुर्बुद्धे! मनुष्य बन, क्षत्रियोंका धर्म स्मरण कर युद्ध कर, अरे मूर्ख! तूही सभामें फांसे लेकर हम लोगोंको हंसता था, आज उसका फल भोग, जिन जिन दुरात्माओंने हंस हंसकर हमारा निरादर करा था। वे सब मारे गये, अब केवल एक कुलाङ्गार दुर्योधन और उसका मामा तू शेष है। जैसे कोई मनुष्य जडसे तोड कर वृक्षका फल पृथ्वीमें गिराता है। ऐसे ही इस बाणसे तेरा शिर काट अभी पृथ्वीमें गिरा दूंगा। (५०—५३)

ऐसा कहकर शार्दूलके समान महाबलवान् योद्धाओंमें श्रेष्ठ वीर सहदेवने क्रोध भरकर बलसे धनुष खींचा और शकुनीके शरीरमें दश बाण मारकर चार बाणोंसे चारों घोडे मारडाले, फिर एक एक बाणसे धनुष ध्वजा और छत्र काटकर सिंहके समान गर्जने लगे। फिर ध्वजा, छत्र और धनुष रहित शकु

शकुनेः प्रेषयामास शरवृष्टिं दुरासदाम् ॥ ५८ ॥
ततस्तु क्रुद्धः सुबलस्य पुत्रो माद्रीसुतं सहदेवं विमर्दे ।
प्रासेन जाम्बूनदभूषणेन जिघांसुरेकोऽभिपपात शीघ्रम् ॥ ५९ ॥
माद्रीसुतस्तस्य समुद्यतं तं प्रासं सुवृत्तौ च भुजौ रणाग्रे ।
भल्लैस्त्रिभिर्युगपत्संचकर्त्त ननाद चोच्चैस्तरसाऽऽजिमध्ये ॥ ६० ॥
तस्याशुकारी सुसमाहितेन सुवर्णपुङ्खेन दृढायसेन ।
भल्लेन सर्वावरणातिगेन शिरः शरीरात्प्रममाथ भूयः ॥ ६१ ॥
शरेण कार्त्तस्वरभूषितेन दिवाकराभेण सुसंहितेन ।
हृतोत्तमाङ्गो युधि पाण्डवेन पपात भूमौ सुबलस्य पुत्रः ॥ ६२ ॥
स तच्छिरो वेगवता शरेण सुवर्णपुङ्खेन शिलाशितेन ।
प्रावेरयत्कुपितः पाण्डुपुत्रो यत्तत्कुरूणामनयस्य मूलम् ॥ ६३ ॥
भुजौ सुवृत्तौ प्रचकर्त्त वीरः पश्चात्कबन्धं रुधिरावसिक्तम् ।
विस्पन्दमानं निपपात घोरं रथोत्तमात्पार्थिव पार्थिवस्य ॥ ६४ ॥
हृतोत्तमाङ्गं शकुनिं समीक्ष्य भूमौ शयानं रुधिरार्द्रगात्रम् ।
योधास्त्वदीया भयनष्टसत्वा दिशः प्रजग्मुः प्रगृहीतशस्त्राः ॥ ६५ ॥
प्रविद्रुताः शुष्कमुखा विसंज्ञा गाण्डीवघोषेण समाहताश्च ।
भयार्दिताभग्नरथाश्वनागाः पदातयश्चैव सधार्त्तराष्ट्राः ॥ ६६ ॥

नीको बाणसे व्याकुल करके और भी अनेक बाण चलाये। तब सुबल पुत्र शकुनी क्रोध करके सहदेवको मारनेके लिये, एक प्रास उठाकर सहदेवकी ओर दौडे। (५५-५९)

उस ही समय सहदेवने क्रोध करके एक ही समय धनुषपर तीन बाण चढाकर छोडे, एकसे शकुनीका प्रास और दोसे मोटे मोटे हाथ कट गये, फिर सहदेवने एक तेज बाणसे उसका शिर काटकर पृथ्वीमें गिरा दिया, और अत्यन्त ऊंचे शब्दसे गर्जने लगे। वीर सहदेवने उस तेज बाणके द्वारा कुरुकुल विरोधके मूल शकुनीके तडफते हुए शिर और हाथ रहित शरीरके टुकडे टुकडे कर दिये, रुधिरमें भीगे हुए शकुनीको पृथ्वीमें सोते हुए देख तुम्हारी सेनाके बचे हुए वीर भयसे व्याकुल होकर शस्त्र ले लेकर युद्धसे भाग गये। (६०-६५)

तुम्हारी सेनाके वीरोंके मुख सूख गये, गांडीवधनुषकी टङ्कार सुनकर हाथी, घोडे और दुर्योधन भयसे व्याकुल होकर इधर उधरको भागने लगे। शकुनीको रथसे गिराकर सब पाण्डवोंके

ततो रथाच्छकुनिं पातयित्वा मुदान्विता भारत पाण्डवेयाः ।
शङ्खान्प्रदध्मुः समरेऽतिहृष्टाः सकेशवाः सैनिकान्हर्षयन्तः ॥६७॥
तं चापि सर्वे प्रतिपूजयन्तो हृष्टा ब्रुवाणाः सहदेवमाजौ ।
दिष्ट्या हतो नैकृतिको महात्मा सहात्मजो वीर रणे त्वयेति ॥६८॥

इति श्रीमहाभारते० शल्यपर्वणि शकुन्युलूकवधे अष्टाविंशोऽध्यायः ॥ २८ ॥ [१६५९]

अथ ह्रदप्रवेशपर्व ।

सञ्जय उवाच— ततः क्रुद्धा महाराज सौबलस्य पदानुगाः ।
त्यक्त्वा जीवितमाक्रन्दे पाण्डवान्पर्यवारयन् ॥ १ ॥
तानर्जुनः प्रत्यगृह्णात्सहदेवो जये धृतः ।
भीमसेनश्च तेजस्वी क्रुद्धाशीविषदर्शनः ॥ २ ॥
शक्त्यृष्टिप्रासहस्तानां सहदेवं जिघांसताम् ।
सङ्कल्पमकरोन्मोघं गाण्डीवेन धनञ्जयः ॥ ३ ॥
संगृहीतायुधान्बाहून्योधानामभिधावताम् ।
भल्लैश्चिच्छेद बीभत्सुः शिरांस्यपि हयानपि ॥ ४ ॥
ते हयाः प्रत्यपद्यन्त वसुधां विगतासवः ।
चरता लोकवीरेण प्रहताः सव्यसाचिना ॥ ५ ॥
ततो दुर्योधनो राजा दृष्ट्वा स्वबलसंक्षयम् ।
हतशेषान्समानीय क्रुद्धो रथगणान्बहून् ॥ ६ ॥

योद्धा अपनी सेनाको प्रसन्न करनेके लिये शङ्ख बजाने लगे। फिर सब पाण्डव और श्रीकृष्ण सहदेवके चारों ओर खडे होकर उनकी प्रशंसा करके कहने लगे, हे वीर ! तुमने प्रारब्धहीसे इस छलीको पुत्रके सहित युद्धमें मारा। (६६–६८) [१६५९]

शल्यपर्वमें अट्ठाइस अध्याय समाप्त।

शल्यपर्वमें उनतीस अध्याय।

ह्रद प्रवेश पर्व

सञ्जय बोले, हे महाराज ! तब शकुनीके सङ्गी क्रोध करके पाण्डवोंसे युद्ध करनेको दौडे, वे सब केवल सहदेवको मारने लगे, तब विषभरे सांपके समान क्रोध करके तेजस्वी भीमसेन और अर्जुन उनको मारने को दौडे। तब अर्जुनने अपने बाणोंसे उन घोडोंपर चढे हुए वीरोंके शिर और हाथ काटकर पृथ्वीमें गिरा दिये। (१—५)

राजा दुर्योधनने अपनी सेनाका नाश देखकर बचे हुए हाथी, घोडे, रथोंपर बैठे और पदातियोंसे कहा कि तुम

कुञ्जरांश्च हयांश्चैव पादातांश्च समन्ततः ।
उवाच सहितान्सर्वान्धार्त्तराष्ट्र इदं वचः ॥ ७ ॥
समासाद्य रणे सर्वान्पाण्डवान्ससुहृद्गणान् ।
पाञ्चाल्यं चापि सबलं हत्वा शीघ्रं न्यवर्तत ॥ ८ ॥
तस्य ते शिरसा गृह्य वचनं युद्धदुर्मदाः ।
अभ्युद्ययू रणे पार्थांस्तव पुत्रस्य शासनात् ॥ ९ ॥
तानभ्यापततः शीघ्रं हतशेषान्महारणे ।
शरैराशीविषाकारैः पाण्डवाः समवाकिरन् ॥ १० ॥
तत्सैन्यं भरतश्रेष्ठ मुहूर्त्तेन महात्मभिः ।
अवध्यत रणं प्राप्य त्रातारं नाभ्यविन्दत ॥ ११ ॥
प्रतिष्ठमानं तु भयान्नावतिष्ठति दंशितम् ।
अश्वैर्विपरिधावद्भिः सैन्येन रजसावृते ॥ १२ ॥
न प्राज्ञायन्त समरे दिशः स प्रदिशस्तथा ।
ततस्तु पाण्डवानीकान्निःसृत्य बहवो जनाः ॥ १३ ॥
अभ्यघ्नंस्तावकान्युद्धे मुहूर्त्तादिव भारत ।
ततो निःशेषमभवत्तत्सैन्यं तव भारत ॥ १४ ॥
अक्षौहिण्यः समेतास्तु तव पुत्रस्य भारत ।
एकादश हता युद्धे ताः प्रभो पाण्डुसृञ्जयैः ॥ १५ ॥
तेषु राजसहस्रेषु तावकेषु महात्मसु ।

लोग सब इकट्ठे होकर बन्धुबान्धवों सहित पाण्डवोंको और सेना सहित सेनापति धृष्टद्युम्नको मारकर शीघ्र हमारे पास आओ। (६—८)

उन सब वीरोंने राजाकी आज्ञाको शिरसे ग्रहण किया, और पाण्डवोंको मारनेको चले, परन्तु उनके सङ्ग कोई प्रधान नहीं था, इसलिये व्यूह न बन सका। कहीं घोडे भागने लगे। और कहीं सेनामें धूल उडने लगी, उस समय तुम्हारी ओरके वीरोंको दिशाका ज्ञान भी नहीं रहा था। (९—१३)

तब पाण्डवोंकी सेनामेंसे थोडेसे वीर निकले और उन्होंने क्षण भरमें इन सबोंको मारडाला। हे महाराज! उस समय पाण्डव और सृञ्जयवंशी क्षत्रियों के हाथसे ग्यारह अक्षौहिणी सेना समाप्त हुई। हे महाराज! उस सहस्रों महात्मा राजोंसे भरे डेरेमें घावसे व्याकुल एकले राजा दुर्योधन स्थानपर

एको दुर्योधनो राजन्नदृश्यत भृशं क्षतः ॥ १६ ॥
ततो वीक्ष्य दिशः सर्वा दृष्ट्वा शून्यां च मेदिनीम्।
विहीनः सर्वयोधैश्च पाण्डवान्वीक्ष्य संयुगे ॥ १७ ॥
मुदितान्सर्वतः सिद्धान्नदमानान्समन्ततः।
बाणशब्दरवांश्चैव श्रुत्वा तेषां महात्मनाम् ॥ १८ ॥
दुर्योधनो महाराज कश्मलेनाभिसंवृतः।
अपयाने मनश्चक्रे विहीनबलवाहनः ॥ १९ ॥

धृतराष्ट्र उवाच—निहते मामके सैन्ये निःशेषे शिविरे कृते।
पाण्डवानां बले सूत किं नु शेषमभूत्तदा ॥ २० ॥
एतन्मे पृच्छतो ब्रूहि कुशलो ह्यसि सञ्जय।
यच्च दुर्योधनो मन्दः कृतवांस्तनयो मम ॥ २१ ॥
बलक्षयं तथा दृष्ट्वा स एकः पृथिवीपतिः।

सञ्जय उवाच— रथानां द्वे सहस्रे तु सप्तनागशतानि च ॥ २२ ॥
पंच चाश्वसहस्राणि पत्तीनां च शतं शताः।
एतच्छेषमभूद्राजन्पाण्डवानां महद्बलम् ॥ २३ ॥
परिगृह्य हि यद्युद्धे धृष्टद्युम्नो व्यवस्थितः।
एकाकी भरतश्रेष्ठ ततो दुर्योधनो नृपः ॥ २४ ॥
नापश्यत्समरे कंचित्सहायं रथिनां वरः।

दिखाई दिये। (१४-१६)

हे महाराज! उस समय अपने वीर और सहायकोंसे दुर्योधनको पृथ्वी शून्य दीखने लगी, पाण्डवोंके धनुषका शब्द सुनकर तथा, उन्हें नाचते कूदते देखकर और उनका मनोरथ सिद्ध जानकर राजा दुर्योधन बहुत घबडाये। तब उन्होंने अपनेको वाहन और सेनासे हीन देखकर भागनेकी इच्छा करी। (१७-१९)

धृतराष्ट्र बोले, हे सञ्जय! जिस समय हमारी सब सेना मर गई और डेरोंमें कोई नहीं रहा तब पाण्डवोंकी कितनी सेना शेष थी? उस समय अपनी सेनाका नाश देखकर मेरे पुत्र मूर्ख दुर्योधनने क्या किया? सो तुम हमसे कहो। सञ्जय बोले, उस समय पाण्डवों की सेनामें दो सहस्र रथ, सात सौ हाथी, पांच सहस्र घोडे और एक लाख पदाति शेष थे, इस ही सेनाका व्यूह बनाकर धृष्टद्युम्न खडे थे। (२०—२४)

हे महाराज! उस समय महारथ

नर्दमानान्परान्दृष्ट्वा स्वबलस्य च संक्षयम् ॥ २५ ॥
तथा दृष्ट्वा महाराज एकः स पृथिवीपतिः ।
हतं स्वहयमुत्सृज्य प्राङ्मुखः प्राद्रवद्भयात् ॥ २६ ॥
एकादशचमूभर्ता पुत्रो दुर्योधनस्तव ।
गदामादाय तेजस्वी पदातिः प्रस्थितो ह्रदम् ॥ २७ ॥
नातिदूरं ततो गत्वा पद्भ्यामेव नराधिपः ।
सस्मार वचनं क्षत्तुर्धर्मशीलस्य धीमतः ॥ २८ ॥
इदं नूनं महाप्राज्ञो विदुरो दृष्टवान्पुरा ।
महद्वैशसमस्माकं क्षत्रियाणां च संयुगे ॥ २९ ॥
एवं विचिन्तयानस्तु प्रविविक्षुर्ह्रदं नृपः ।
दुःखसंतप्तहृदयो दृष्ट्वा राजन्बलक्षयम् ॥ ३० ॥
पाण्डवास्तु महाराज धृष्टद्युम्नपुरोगमाः ।
अभ्यद्रवन्त संक्रुद्धास्तव राजन्बलंप्रति ॥ ३१ ॥
शक्त्यृष्टिप्रासहस्तानां बलानामभिगर्जताम् ।
संकल्पमकरोन्मोघं गाण्डीवेन धनंजयः ॥ ३२ ॥
तान्हत्वा निशितैर्बाणैः सामात्यान्सहबन्धुभिः ।
रथे श्वेतहये तिष्ठन्नर्जुनो बह्वशोभत ॥ ३३ ॥
सुबलस्य हते पुत्रे सवाजिरथकुञ्जरे ।
महावनमिवच्छिन्नमभवत्तावकं बलम् ॥ ३४ ॥

दुर्योधन पाण्डवोंको कूदते और अपनी सेनाका नाश देख गदा हाथमें लेकर भयसे व्याकुल होकर मरे हुए घोडेको छोड पूर्वकी ओरको भागे। हे महाराज! जो तेजस्वी दुर्योधन केवल गदा लेकर पैरों भागे जाते थे। वे ही एक दिन ग्यारह अक्षौहिणीके स्वामी थे। हे महाराज! थोडी दूर पैरों चलकर महाराजने बुद्धिमान धर्मात्मा विदुरके वचनोंका स्मरण किया, महाराज अपने मनमें कहने लगे कि बुद्धिमान् विदुरने हमारे वैरसे क्षत्रियोंको इस सर्वनाशको पहले ही देख लिया था। ऐसा विचार कर दुःखसे व्याकुल महाराज तालावमें प्रवेश करनेको चले ॥ (२५—३०)

हे महाराज! उस समय धृष्टद्युम्नको अगाडी करके पाण्डव अपनी सेनाके सहित तुम्हारे बचे हुए वीरोंको मारने लगे। हे महाराज! हाथी, घोडे, और मनुष्योंके सहित जब सुबल पुत्र शकुनी

अनेकशतसाहस्रे बले दुर्योधनस्य ह।
नान्यो महारथो राजन् जीवमानो व्यदृश्यत ॥ ३५ ॥
द्रोणपुत्रादृते वीरात्तथैव कृतवर्मणः।
कृपाच्च गौतमाद्राजन्पार्थिवाच्च तवात्मजात् ॥ ३६ ॥
धृष्टद्युम्नस्तु मां दृष्ट्वा हसन्सात्यकिमब्रवीत्।
किमनेन गृहीतेन नानेनार्थोऽस्ति जीविता ॥ ३७ ॥
धृष्टद्युम्नवचः श्रुत्वा शिनेर्नप्ता महारथः।
उद्यम्य निशितं खड्गं हन्तुं मामुद्यतस्तदा ॥ ३८ ॥
तमागम्य महाप्राज्ञः कृष्णद्वैपायनोऽब्रवीत्।
मुच्यतां सञ्जयो जीवन्न हन्तव्यः कथञ्चन ॥ ३९ ॥
द्वैपायनवचः श्रुत्वा शिनेर्नप्ता कृताञ्जलिः।
ततो मामब्रवीन्मुक्त्वा स्वस्ति संजय साधय ॥ ४० ॥
अनुज्ञातस्त्वहं तेन न्यस्तवर्मा निरायुधः।
प्रातिष्ठं येन नगरं सायाह्ने रुधिरोक्षितः ॥ ४१ ॥
क्रोशमात्रमपक्रान्तं गदापाणिमवस्थितम्।
एकं दुर्योधनं राजन्नपश्यं भृशविक्षतम् ॥ ४२ ॥

मारे गये, तब तुम्हारी सेनाके डेरे ऐसे दीखने लगे, जैसे वृक्ष कटनेसे वनकी भूमि, हे महाराज! उस समय तुम्हारी सेनामें केवल कृतवर्मा, पराक्रमी अश्वत्थामा और कृपाचार्यके सिवाय और कोई वीर नहीं दीखता था। (३१-३६)

हे राजन्! मुझे सात्यकीके रथमें बंधा हुआ देख सेनापति धृष्टद्युम्न बोले, इसे जीता ही छोड दो क्यों कि इसके जीने और मरनेसे हमें कुछ लाभ और हानि नहीं। धृष्टद्युम्नके वचन सुन महारथ सात्यकीने मेरे मारनेको तेज खड्ग निकाला। उसी समय महात्मा व्यास आये, और उन्होंने कहा कि सञ्जयको मत मारो इसे जीता ही छोड दो। (३७—३९)

व्यासके वचन सुन सात्यकी उनके आगे हाथ जोडने लगे और मुझे छोडकर बोले, हे सञ्जय! तुम्हारा कल्याण हो यहांसे भागजावो। उनकी आज्ञा सुनकर मैं शस्त्र और कवचसे रहित होकर रुधिरमें भींगकर सन्ध्या समय हास्तिनापुरकी ओर चला। एक कोसभर चला था, तो देखा कि महाराज दुर्योधन घावोंसे व्याकुल एकले गदा लिये पैरों चले जाते हैं। (४०-४२)

स तु मामश्रुपूर्णाक्षो नाशक्नोदभिवीक्षितुम् ।
उपप्रैक्षत मां दृष्ट्वा तथा दीनमवस्थितम् ॥ ४३ ॥
तं चाहमपि शोचन्तं दृष्ट्वैकाकिनमाहवे ।
मुहूर्तं नाशकं वक्तुमतिदुःखपरिप्लुतः ॥ ४४ ॥
ततोऽस्मै तदहं सर्वमुक्तवान् ग्रहणं तदा ।
द्वैपायनप्रसादाच्च जीवतो मोक्षमाहवे ॥ ४५ ॥
स मुहूर्तमिव ध्यात्वा प्रतिलभ्य च चेतनाम् ।
भ्रातॄंश्च सर्वसैन्यानि पर्यपृच्छत मां ततः ॥ ४६ ॥
तस्मै तदहमाचक्षे सर्वं प्रत्यक्षदर्शिवान् ।
भ्रातॄंश्च निहतान्सर्वान्सैन्यं च विनिपातितम् ॥ ४७ ॥
त्रयः किल रथाः शिष्टास्तावकानां नराधिप ।
इति प्रस्थानकाले मां कृष्णद्वैपायनोऽब्रवीत् ॥ ४८ ॥
स दीर्घमिव निःश्वस्य प्रत्यवेक्ष्य पुनः पुनः ।
असौ मां पाणिना स्पृष्ट्वा पुत्रस्ते पर्यभाषत ॥ ४९ ॥
त्वदन्यो नेह संग्रामे कश्चिज्जीवति सञ्जय ।
द्वितीयं नेह पश्यामि ससहायाश्च पाण्डवाः ॥ ५० ॥
ब्रूयाः सञ्जय राजानं प्रज्ञाचक्षुषमीश्वरम् ।

मुझे देखते ही महाराजकी आंखोंमें आंसू भर आए और मेरी ओर न देख सके। फिर उन्होंने मेरी ओरसे मुख फेर लिया। फिर मैं भी दीन होकर उनके पास ठहर गया, मैं भी उन्हें एकला युद्धसे भागते हुए देखकर दुःखसे व्याकुल होगया और क्षणभर कुछ न कह सका। फिर अपने पकडे जानेका और व्यासकी कृपासे जीते छूटनेका सब वर्णन उनसे किया। (४३-४५)

फिर महाराजने चैतन्य होकर अपने भाई और सब सेनाका समाचार मुझसे पूंछा; मैंने जो कुछ देखा था सब कह दिया। हे महाराज! अश्वत्थामा, कृतवर्मा और कृपाचार्य जीते हैं। मैं इस समाचारको नहीं जानता था, मुझसे अब व्यासने कहा कि वे तीनों जीते हैं। (४६-४८)

हे महाराज! फिर महाराजने ऊंचा स्वांस लेकर मेरा हाथ पकड लिया और कहने लगे। हे सञ्जय! अब हम अपने सहायकों में तुम्हारे सिवाय किसीको जीता नहीं देखते। जो हो तुम महाराजसे जाकर कहना कि तुम्हारा

दुर्योधनस्तव सुतः प्रविष्टो ह्रदमित्युत ॥ ५१ ॥
सुहृद्भिस्तादृशैर्हीनः पुत्रैर्भ्रातृभिरेव च।
पाण्डवैश्च हृते राज्ये को नु जीवेत मादृशः ॥ ५२ ॥
आचक्षीथाः सर्वमिदं मां च मुक्तं महाहवात्।
अस्मिंस्तोयह्रदे गुप्तं जीवन्तं भृशविक्षतम् ॥ ५३ ॥
एवमुक्त्वा महाराज प्राविशत्तं महाह्रदम्।
अस्तम्भयत तोयं च मायया मनुजाधिपः ॥ ५४ ॥
तस्मिन् ह्रदं प्रविष्टे तु त्रीन्रथान् श्रान्तवाहनान्।
अपश्यं सहितानेकस्तं देशं समुपेयुषः ॥ ५५ ॥
कृपं शारद्वतं वीरं द्रौणिं च रथिनां वरम्।
भोजं च कृतवर्माणं सहितान् शरविक्षतान् ॥ ५६ ॥
ते सर्वे मामभिप्रेक्ष्य तूर्णमश्वाननोदयन्।
उपयाय तु मामूचुर्दिष्ट्या जीवसि सञ्जय ॥ ५७ ॥
अपृच्छंश्चैव मां सर्वे पुत्रं तव जनाधिपम्।
कच्चिद् दुर्योधनो राजा स नो जीवति सञ्जय ॥ ५८ ॥
आख्यातवानहं तेभ्यस्तदा कुशलिनं नृपम्।
तच्चैव सर्वमाचक्षं यन्मां दुर्योधनोऽब्रवीत् ॥ ५९ ॥
ह्रदं चैवाहमाचक्षं यं प्रविष्टो नराधिपः।

पुत्र दुर्योधन सहायक, वैसे वैसे मित्र, भाई और पुत्रोंके मरनेपर भी अभी जीता है। पाण्डवोंके राज्य छीन लेनेपर दुर्योधनके सिवाय और कौन जी सक्ता है? और यह भी कहना कि घावोंसे व्याकुल होकर जीता ही युद्धसे चला आया है और तालावमें छिपा है। ऐसा कहकर महाराज तालावमें घुस गये और जलको मायासे स्तम्भित कर दिया (४९-५४)

जब महाराज तालावमें चले गये तब मैंने दूरसे आते हुए वाणोंसे व्याकुल कृपाचार्य, अश्वत्थामा और कृतवर्मा को देखा, उन्होंने मुझे देखकर घोडोंको तेज हांका और मेरे पास आकर बोले, हे सञ्जय! तुम प्रारब्धहीसे जीते हो, कहो, राजा दुर्योधन कहीं जीते हैं वा नहीं? (५५-५८)

तब मैंने महाराजकी कुशल उनसे कही और दुर्योधनने जो कुछ मुझसे कहा था, सब उनको कह सुनाया और यह भी कह दिया कि महाराज इस

अश्वत्थामा तु तद्राजन्निशम्य वचनं मम ॥ ६० ॥
तं ह्रदं विपुलं प्रेक्ष्य करुणं पर्यदेवयत् ।
अहो धिक् स न जानाति जीवतोऽस्मान्नराधिपः ॥६१॥
पर्याप्ता हि वयं तेन सह योधयितुं परान् ।
ते तु तत्र चिरं कालं विलप्य च महारथाः ॥ ६२ ॥
प्राद्रवन् रथिनां श्रेष्ठा दृष्ट्वा पाण्डुसुतान्रणे ।
ते तु मां रथमारोप्य कृपस्य सुपरिष्कृतम् ॥ ६३ ॥
सेनानिवेशमाजग्मुर्हतशेषास्त्रयो रथाः ।
तत्र गुल्माः परित्रस्ताः सूर्ये चास्तमिते सति ॥ ६४ ॥
सर्वे विचुक्रुशुः श्रुत्वा पुत्राणां तव संक्षयम् ।
ततो वृद्धा महाराज योषितां रक्षिणो नराः ॥ ६५ ॥
राजदारानुपादाय प्रययुर्नगरं प्रति ।
तत्र विक्रोशमानानां रुदतीनां च सर्वशः ॥ ६६ ॥
प्रादुरासीन्महान् शब्दः श्रुत्वा तद्बलसंक्षयम् ।
ततस्ता योषितो राजन् रुदत्यो वै मुहुर्मुहुः ॥ ६७ ॥
कुरर्य इव शब्देन नादयन्त्यो महीतलम् ।
आजघ्नुः करजैश्चापि पाणिभिश्च शिरांस्युत ॥ ६८ ॥

तालावहीमें हैं ॥ (५९-६०)

मेरे वचन सुन और तालावको बडा भारी देख अश्वत्थामा ऊंचे स्वरसे रोकर कहने लगे कि हाय हमको धिक्कार है कि जो महाराज यह भी नहीं जानते कि हम लोग अभी जीते हैं। यदि महाराज हमको मिलजांय तो अभी हम सब पाण्डवोंको जीत लेंगे। बहुत समय तक इस प्रकार रोकर पाण्डवोंकी सेनाको उधर ही आते देख मुझे कृपाचार्यके रथपर बिठलाकर डेरोंकी ओर चले गये ॥ (६१-६४)

हे महाराज ! वह जाकर हमने देखा कि सूर्य अस्त होनेके समय डेरोंमें पहरे देनेवाले मनुष्य व्याकुल हो रहे हैं। तब हम लोगोंसे राजा दुर्योधनका सर्वनाश सुन डेरोंमें हाहाकार मचगया। बूढे, रानी और डेरोंकी रक्षा करनेवाले मनुष्य राजोंकी स्त्रियोंको ले लेकर अपने अपने नगरोंकी ओरको चल दिये। (६५—६६)

हे महाराज ! डेरोंमें स्त्रियोंके रोनेका महा शब्द उठा, कोई छाती पीटने लगीं, कोई शिर पीटने लगीं, कोई

लुलुचुश्च तदा केशान् क्रोशत्यस्तत्र तत्र ह।
हाहाकारनिनादिन्यो विनिघ्नन्त्य उरांसि च ॥६९॥
शोचन्त्यस्तत्र रुरुदुः क्रन्दमाना विशाम्पते।
ततो दुर्योधनामात्याः साश्रुकण्ठा भृशातुराः ॥७०॥
राजदारानुपादाय प्रययुर्नगरं प्रति।
वेत्रव्यासक्तहस्ताश्च द्वाराध्यक्षा विशाम्पते ॥७१॥
शयनीयानि शुभ्राणि स्पर्ध्यास्तरणवन्ति च।
समादाय ययुस्तूर्णं नगरं दाररक्षिणः ॥७२॥
आस्थायाश्वतरीयुक्तान् स्यन्दनानपरे पुनः।
स्वान्स्वान्दारानुपादाय प्रययुर्नगरं प्रति ॥७३॥
अदृष्टपूर्वा या नार्यो भास्करेणापि वेश्मसु।
ददृशुस्ता महाराज जना याताः पुरं प्रति ॥७४॥
ताः स्त्रियो भरतश्रेष्ठ सौकुमार्यसमन्विताः।
प्रययुर्नगरं तूर्णं हतस्वजनबान्धवाः ॥७५॥
आगोपालाविपालेभ्यो द्रवन्तो नगरं प्रति।
ययुर्मनुष्याः संभ्रान्ता भीमसेनभयार्दिताः ॥७६॥
अपि चैषां भयं तीव्रं पार्थेभ्योऽभूत्सुदारुणम्।
प्रेक्षमाणास्तदाऽन्योन्यमाधावन्नगरं प्रति ॥७७॥
तस्मिंस्तथा वर्त्तमाने विद्रवे भृशदारुणे।

नखूनोंसे छाती चीरने लगीं, कोई बाल उखाडने लगीं और कोई हाहाकार कर करके शोच करने लगीं ॥ (६७—७०)

तब दुर्योधनके मन्त्री इकट्ठे होकर रोने लगे, फिर रानियोंको सङ्ग लेकर हस्तिनापुरको चले, उनके सङ्ग वेत्रधारी और द्वारपाल भी चले, स्त्रियोंकी रक्षा करनेवाले लोग भी पलङ्ग और बिछौने लदवा कर खच्चरोंके रथपर चढकर अपनी अपनी रानियोंको लेकर अपने अपने नगरोंको चले गये, जिन स्त्रियोंको पहिले सूर्यने भी नहीं देखा था, वे ही कोमल शरीरवाली सुन्दर स्त्री बान्धवोंके मरनेसे ग्वालियों और अहीरोंसे मार्ग पूंछती हुई अपने अपने नगरोंको चलीं। (७१—७६)

भीमसेनके डरसे मनुष्य भी एक दूसरेको देखते हुए भागे। इस घोर युद्ध होनेके पश्चात् शोकसे व्याकुल होकर युयुत्सु समयके अनुसार एक स्था-

युयुत्सुः शोकसंमूढः प्राप्तकालमचिन्तयत् ॥ ७८ ॥
जितो दुर्योधनः संख्ये पाण्डवैर्भीमविक्रमैः ।
एकादशचमूभर्त्ता भ्रातरश्चास्य सूदिताः ॥ ७९ ॥
हताश्च कुरवः सर्वे भीष्मद्रोणपुरःसराः ।
अहमेको विमुक्तस्तु भाग्ययोगाद्यदृच्छया ॥ ८० ॥
विद्रुतानि च सर्वाणि शिबिराणि समन्ततः ।
इतस्ततः पलायन्ते हतनाथा हतौजसः ॥ ८१ ॥
अदृष्टपूर्वा दुःखार्त्ता भयव्याकुललोचनाः ।
हरिणा इव वित्रस्ता वीक्षमाणा दिशो दश ॥ ८२ ॥
दुर्योधनस्य सचिवा ये केचिदवशेषिताः ।
राजदारानुपादाय प्रययुर्नगरं प्रति ॥ ८३ ॥
प्राप्तकालमहं मन्ये प्रवेशं तैः सह प्रभो ।
युधिष्ठिरमनुज्ञाप्य भीमसेनं तथैव च ॥ ८४ ॥
एतमर्थं महाबाहुरुभयोः स न्यवेदयत् ।
तस्य प्रीतोऽभवद्राजा नित्यं करुणवेदिता ॥ ८५ ॥
परिष्वज्य महाबाहुर्वैश्यापुत्रं व्यसर्जयत् ।
ततः स रथमास्थाय द्रुतमश्वानचोदयत् ॥ ८६ ॥
संवाहयितवांश्चापि राजदारान्पुरं प्रति ।

नपर शोचने लगे, कि ग्यारह अक्षौहिणियोंके स्वामी दुर्योधनको वीर पाण्डवोंने जीत लिया। भीष्म और द्रोणाचार्य आदि सब मारे गये। मैं प्रारब्धसे अकेला बच गया हूं। (७७-८०)

इस समय हे सब डेरेके लोग भी भागे जाते हैं, जिन स्त्रियोंको कभी किसीने नहीं देखा वे स्त्री आज भयसे व्याकुल पैरों चली जाती हैं। ये मनुष्य हरिनोंके समान घबडाये हुए चारों ओर देखते चले जाते हैं, दुर्योधनके बचे हुए मन्त्री रानियोंको सङ्ग लेकर हस्तिनापुरको चले जाते हैं। इस समय हमें पाण्डवोंके पास चलना चाहिये।(८१-८५

ऐसा विचारकर महाबाहु युयुत्सुने महाराज युधिष्ठिर और भीमसेनसे यह समाचार कह सुनाया। दोनोंके ऊपर कृपा करनेवाले महाराजने प्रसन्न होकर युयुत्सुको अपनी छातीसे लगाया और हस्तिनापुर जानेको बिदा किया। (८५—८६)

वे राजाकी आज्ञासे रथपर चढकर घोडोंको शीघ्र हांकते हुए रानियोंको

तैश्चव सहितः क्षिप्रमस्तं गच्छति भास्करे ॥ ८७ ॥
प्रविष्टो हास्तिनपुरं बाष्पकण्ठोऽश्रुलोचनः ।
अपश्यत महाप्राज्ञं विदुरं साश्रुलोचनम् ॥ ८८ ॥
राज्ञः समीपान्निष्क्रान्तं शोकोपहतचेतसम् ।
तमब्रवीत्सत्यधृतिः प्रणतं त्वग्रतः स्थितम् ॥ ८९ ॥
दिष्ट्या कुरुक्षये वृत्ते अस्मिंस्त्वं पुत्र जीवसि ।
विना राज्ञः प्रवेशाद्वै किमसि त्वमिहागतः ॥ ९० ॥
एतद्वै कारणं सर्वं विस्तरेण निवेदय ।
युयुत्सुरुवाच— निहते शकुनौ तत्र सज्ञातिसुतबान्धवे ॥ ९१ ॥
हतशेषपरीवारो राजा दुर्योधनस्ततः ।
स्वकं स हयमुत्सृज्य प्राङ्मुखः प्राद्रवद्भयात् ॥ ९२ ॥
अपक्रान्ते तु नृपतौ स्कन्धावारनिवेशनात् ।
भयव्याकुलितं सर्वं प्राद्रवन्नगरं प्रति ॥ ९३ ॥
ततो राज्ञः कलत्राणि भ्रातॄणां चास्य सर्वतः ।
वाहनेषु समारोप्य अध्यक्षाः प्राद्रवन्भयात् ॥ ९४ ॥
ततोऽहं समनुज्ञाप्य राजानं सहकेशवम् ।
प्रविष्टो हास्तिनपुरं रक्षल्लोकान्प्रधावितान् ॥ ९५ ॥
एतच्छ्रुत्वा तु वचनं वैश्यापुत्रेण भाषितम् ।

सङ्ग लेकर हस्तिनापुरको चले आये, सूर्य अस्त होते होते रोते हुए युयुत्सु नगरमें पहुंचे । उन्होंने आपके पाससे जाते रोते हुए विदुरको मार्गमें देखा और रथसे उतरकर प्रणाम किया, तब विदुरने कहा, हे पुत्र ! तुम प्रारब्धहीसे इस कुरुकुल क्षयसे बचे हो परन्तु राजासे पहिले ही तुम नगरमें क्यों चले आये ? इसका कारण तुम विस्तार पूर्वक हमसे कहो। (८७—९१)

युयुत्सु बोले, जब युद्धसे जाति बांधव और पुत्र सहित शकुनी मारे गये, तब राजा दुर्योधन घोडेसे उतरकर डरसे पूर्वकी ओर भाग गये। राजाके भागते ही सब लोग डेरे छोड कर डर कर भाग गये अनन्तर राजा और उनके भाइयोंकी स्त्रियोंको लेकर प्रधान मन्त्री नगरकी ओर भाग आये।(९२-९४)

तब मैं भी महाराज और कृष्णकी आज्ञानुसार भागती हुई स्त्रियोंकी रक्षा करनेके लिये हस्तिनापुरको चला आया। युयुत्सुके वचन सुन और उनके कर्मको

प्राप्तकालमिति ज्ञात्वा विदुरः सर्वधर्मवित् ॥ ९६ ॥
अपूजयदमेयात्मा युयुत्सुं वाक्यमब्रवीत् ।
प्राप्तकालमिदं सर्वं ब्रुवता भरतक्षये ॥ ९७ ॥
रक्षितः कुलधर्मश्च सानुक्रोशतया त्वया ।
दिष्ट्या त्वामिह संग्रामादस्माद्वीरक्षयात्पुरम् ॥ ९८ ॥
समागतमपश्याम चांशुमन्तमिव प्रजाः ।
अन्धस्य नृपतेर्यष्टिर्लुब्धस्यादीर्घदर्शिनः ॥ ९९ ॥
बहुशो याच्यमानस्य दैवोपहतचेतसः ।
त्वमेको व्यसनार्त्तस्य ध्रियसे पुत्र सर्वथा ॥ १०० ॥
अद्य त्वमिह विश्रान्तः श्वोऽभिगन्ता युधिष्ठिरम् ।
एतावदुक्त्वा वचनं विदुरः साश्रुलोचनः ॥ १०१ ॥
युयुत्सुं समनुप्राप्य प्रविवेश नृपक्षयम् ।
पौरजानपदैर्दुःखाद्धाहेति भृशं नादितम् ॥ १०२ ॥
निरानन्दं गतश्रीकं हृतारामसिवाशयम् ।
शून्यरूपमपध्वस्तं दुःखाद् दुःखतरोऽभवत् ॥ १०३ ॥
विदुरः सर्वधर्मज्ञो विक्लवेनांतरात्मना ।
विवेश नगरे राजन्निशश्वास शनैः शनैः ॥ १०४ ॥
युयुत्सुरपि तां रात्रिं स्वगृहे न्यवसत्तदा ।

समयानुसार जानकर धर्मात्मा विदुरने उनकी बहुत प्रशंसा की और कहा कि तुमने वीरक्षयमें धर्मके अनुसार अपने कुलकी रक्षा करी और प्रारब्धहीसे उस युद्धसे बचकर आये, हम तुम्हें इस समय इस प्रकार देख रहे हैं। जैसे प्रजा सूर्यको देखती है। अब तुम ही मूर्ख, हतभाग्य और हमारे वचन न माननेवाले दुःखसे व्याकुल अन्धे राजा धृतराष्ट्र की लठी हो ॥ (९५-१००)

हे पुत्र ! आज तुम हस्तिनापुरमें विश्राम करके प्रातःकाल युधिष्ठिरके पास जाइये। ऐसा कहकर विदुर रोने लगे। फिर युयुत्सुको लेकर राजभवनमें गये, उस समय राजभवनमें चारों ओर से हाहाकार मच रहा था। कोई मनुष्य आनन्द नहीं दीखता था। उस घरकी ऐसी शोभा दीखती थी जैसे चारों ओरका चौबचा कटनेसे तालावके चारों ओरसे शून्य दिखाई देता था। चारों ओरसे मनुष्य रो रहे थे, युयुत्सुको वहां पहुंचाकर धर्मज्ञ विदुर भी स्वांस लेते

वध्यमानः स्वकैश्चापि नाभ्यनन्दत्सुदुःखितः ॥
चिन्तया नः क्षयं तीव्रं भरतानां परस्परम् ॥ १०५ ॥

इति श्रीमहा० शतसाहस्र्यां संहितायां वैयासिक्यां शल्यपर्वणि ह्रदप्रवेशपर्वणि एकोनत्रिंशोऽध्यायः ॥२९॥

समाप्तं च ह्रदप्रवेशपर्व

अतः परं गदायुद्धपर्व ।

धृतराष्ट्र उवाच— हतेषु सर्वसैन्येषु पाण्डुपुत्रै रणाजिरे ।
मम सैन्यावशिष्टास्ते किमकुर्वत सञ्जय ॥ १ ॥
कृतवर्मा कृपश्चैव द्रोणपुत्रश्च वीर्यवान् ।
दुर्योधनश्च मन्दात्मा राजा किमकरोत्तदा ॥ २ ॥

सञ्जय उवाच— सम्प्राद्रवत्सु दारेषु क्षत्रियाणां महात्मनाम् ।
विद्रुते शिबिरे शून्ये भृशोद्विग्नास्त्रयो रथाः ॥ ३ ॥
निशम्य पाण्डुपुत्राणां तदा वै जयिनां स्वनम् ।
विद्रुतं शिबिरं दृष्ट्वा सायाह्ने राजगृद्धिनः ॥ ४ ॥
स्थानं नारोचयंस्तत्र ततस्ते ह्रदमभ्ययुः ।
युधिष्ठिरोऽपि धर्मात्मा भ्रातृभिः सहितो रणे ॥ ५ ॥
हृष्टः पर्यचरद्राजन् दुर्योधनवधेप्सया ।
मार्गमाणास्तु संक्रुद्धास्तव पुत्रं जयैषिणः ॥ ६ ॥

हुए अपने घरको चले गए, युयुत्सु अपने घरमें जाकर अपने सब मनुष्योंसे मिले, तौ भी कुलनाश होनेके दुःखसे रात्रिभर न सोये ॥ (१०१–१०५)

शल्यपर्वमें उनतीस अध्याय समाप्त ।
शल्यपर्वमें ह्रदप्रवेश पर्व
समाप्त हुआ ।

गदायुद्धपर्व ।

महाराज धृतराष्ट्र बोले, हे सञ्जय ! जब पाण्डवोंने हमारी सब सेनाका नाश कर दिया, तब हमारी ओरके बचे हुए; कृपाचार्य, बलवान् अश्वत्थामा, और मूर्ख राजा दुर्योधनने क्या किया ?, १-२

सञ्जय बोले, हे राजन् ! जब क्षत्रियोंके परिवार डेरोंसे भाग गये और सब डेरे शून्य होगये, तब कृपाचार्य, अश्वत्थामा और कृतवर्मा ये तीनों महारथ सन्ध्या समय विजयी पाण्डवोंका शब्द सुनकर डेरोंमें न बैठ सके और राजाको ढूंढनेके लिये उसही तालाबकी ओर चले। धर्मात्मा महाराज युधिष्ठिरने भी अपने भाइयों के सहित दुर्योधनको मारने के लिये ढूंढने लगे। (३–६)

REGISTERED NO. B 1819

अंक ७३ [शल्यपर्व ३]

महाभारत।

भाषा-भाष्य-समेत

संपादक — श्रीपाद दामोदर सातवळेकर,
स्वाध्याय मंडल, औंध जि. सातारा

रथका दाह ।

(भा सु औंध) (म. भा. शल्य. अ. ६२)

भीमने दुर्योधन के सिर पर लात मारी

(भा. मु. औंध) (म. भा. शल्य पर्व अ० ५९)

दुर्योधन जलसे बाहर आता है।

(भा. मु. औंध) (म. भा. शल्य पर्व अ० ३२)

यत्नतोऽन्वेषमाणास्ते नैवापश्यन् जनाधिपम् ।
स हि तीव्रेण वेगेन गदापाणिरपाक्रमत् ॥ ७ ॥
तं ह्रदं प्राविशच्चापि विष्टभ्यापः स्वमायया ।
यदा तु पाण्डवाः सर्वे सुपरिश्रान्तवाहनाः ॥ ८ ॥
ततः स्वशिबिरं प्राप्य व्यतिष्ठंत ससैनिकाः ।
ततः कृपश्च द्रौणिश्च कृतवर्मा च सात्वतः ॥ ९ ॥
सन्निविष्टेषु पार्थेषु प्रयातास्तं ह्रदं शनैः ।
ते तं ह्रदं समासाद्य यत्र शेते जनाधिपः ॥ १० ॥
अभ्यभाषन्त दुर्धर्षं राजानं सुप्तमंभसि ।
राजन्नुत्तिष्ठ युध्यस्व सहास्माभिर्युधिष्ठिरम् ॥ ११ ॥
जित्वा वा पृथिवीं भुंक्ष्व हतो वा स्वर्गमाप्नुहि ।
तेषामपि बलं सर्वं हतं दुर्योधन त्वया ॥ १२ ॥
प्रतिविद्धाश्च भूयिष्ठं ये शिष्टास्तत्र सैनिकाः ।
न ते वेगं विषहितुं शक्तास्तव विशाम्पते ॥ १३ ॥
अस्माभिरपि गुप्तस्य तस्मादुत्तिष्ठ भारत ।
दुर्योधन उवाच— दिष्ट्या पश्यामि वो मुक्तानीदृशात्पुरुषक्षयात् ॥१४॥
पाण्डुकौरवसम्मर्दाज्जीवमानान्नरर्षभान् ।

पाण्डवोंने बहुत क्रोध और यत्न करके ढूंढनेपर भी कहीं राजा दुर्योधनका पता न पाया। राजा दुर्योधनने गदा लेकर बहुत शीघ्रतासे तालावमें घुसकर अपनी मायासे जलको स्थिर कर दिया। जब ढूंढते ढूंढते पाण्डवोंके घोडे थक गये, तब वे लोग अपने डेरोंमें जाकर अपनी सेनाका प्रबन्ध करने लगे। जब पाण्डव डेरोंमें चले गये, तब अश्वत्थामा, कृपाचार्य और कृतवर्मा धीरे धीरे उस तालावकी ओर चले जहां राजा दुर्योधन सोते थे। वहां जाकर पानीमें सोते हुए तेजस्वी राजा दुर्योधनसे बोले। हे राजन्! आप उठिये और हम लोगोंके सहित युधिष्ठिरसे युद्ध कीजिये, और उन्हें जीतकर राज्य कीजिये या मरकर स्वर्गको जाइये, आपने पाण्डवों की सेनाका नाश कर दिया। (७-११)

और बचे हुए वीरोंको भी व्याकुल कर दिया। अब हम लोग आपकी रक्षा करेंगे। तब पाण्डव आपके बलको नहीं सह सकेंगे। इसलिये आप उठिये, और पाण्डवोंसे युद्ध कीजिये। (१२—१४)

राजा दुर्योधन बोले, हे वीरो!

विजेष्यामो वयं सर्वे विश्रान्ता विगतक्लमाः ॥ १५ ॥
भवन्तश्च परिश्रान्ता वयं च भृश विक्षताः ।
उदीर्णं च बलं तेषां तेन युद्धं न रोचये ॥ १६ ॥
न त्वेतदद्भुतं वीरा यद्वो महदिदं मनः ।
अस्मासु च परा शक्तिर्न तु कालः पराक्रमे ॥ १७ ॥
विश्रम्यैकां निशामद्य भवद्भिः सहितो रणे ।
प्रतियोत्स्याम्यहं शत्रून् श्वो न मेऽस्त्यत्र संशयः ॥१८॥
सञ्जय उवाच— एवमुक्तोऽब्रवीद्द्रौणी राजानं युद्धदुर्मदम् ।
उत्तिष्ठ राजन्भद्रं ते विजेष्यामो वयं परान् ॥ १९ ॥
इष्टापूर्तेन दानेन सत्येन च जयेन च ।
शपे राजन् यथा ह्यद्य निहनिष्यामि सोमकान्॥२०॥
मा स्म यज्ञकृतां प्रीतिमाप्नुयां सज्जनोचिताम् ।
यदीमां रजनीं व्युष्टां न हि हन्मि परान् रणे ॥ २१ ॥
नाहत्वा सर्वपाञ्चालान् विमोक्ष्ये कवचं विभो ।
इति सत्यं ब्रवीम्येतत्तन्मे शृणु जनाधिप ॥ २२ ॥
तेषु संभाषमाणेषु व्याधास्तं देशमाययुः ।

हमारी और पाण्डवोंके घोर युद्धरूपी मनुष्योंके नाशसे बचे हुए तुम तीन पुरुषसिंहोंको प्रारब्धहीसे जीता देखते हैं। आप लोग बहुत थक गये हैं, और हम भी घावोंसे व्याकुल हैं, पाण्डवोंकी सेनाका उत्साह बहुत बढा हुआ है। इसलिये हम इस समयमें युद्ध करना नहीं चाहते हैं। हे वीरो! आप लोगोंका जो हमारी ओर ऐसा चित्त है यह कुछ आश्चर्य नहीं। मैं आप लोगोंके बलको जानता हूं, परन्तु समयको नांघ नहीं सकता हूं, आज रात्रि भर विश्राम करके प्रातःकाल होते ही आप लोगोंके सहित पाण्डवोंसे निःसन्देह युद्ध करूंगा। (१५-१८)

सञ्जय बोले, महाबलवान राजाके ऐसे वचन सुन द्रोणपुत्र अश्वत्थामा बोले, हे राजन्! आपका कल्याण हो। आप उठिये हम आपके सब शत्रुओंको जीतेंगे, हम जय और विजयकी शपथ खाकर कहते हैं। यदि सोमक वंशियोंका नाश न करें तो महात्माओंके व्रत हीन योग्य यज्ञोंका फल हमें न मिले, हे राजन्! अब हम आपसे सत्य कहते हैं, की यह रात्रि बीतनेपर हम सब पाञ्चालोंका नाश करेंगे। और बिना

मांसभारपरिश्रान्ताः पानीयार्थं यदृच्छया ॥ २३ ॥
ते हि नित्यं महाराज भीमसेनस्य लुब्धकाः ।
मांसभारानुपाजह्रुर्भक्त्या परमया विभो ॥ २४ ॥
ते तत्र धिष्ठितास्तेषां सर्वं तद्वचनं रहः ।
दुर्योधनवचश्चैव शुश्रुवुः संगता मिथः ॥ २५ ॥
ते ऽपि सर्वे महेष्वासा अयुद्धार्थिनि कौरवे ।
निर्बन्धं परमं चक्रुस्तदा वै युद्धकांक्षिणः ॥ २६ ॥
तांस्तथा समुदीक्ष्याथ कौरवाणां महारथान् ।
अयुद्धमनसं चैव राजानं स्थितमंभसि ॥ २७ ॥
तेषां श्रुत्वा च संवादं राज्ञश्च सलिले सतः ।
व्याधाऽभ्यजानन् राजेन्द्र सलिलस्थं सुयोधनम् ॥२८॥
ते पूर्वं पाण्डुपुत्रेण पृष्टा ह्यासन् सुतं तव ।
यदृच्छोपगतास्तत्र राजानं परिमार्गता ॥ २९ ॥
ततस्ते पाण्डुपुत्रस्य स्मृत्वा तद्भाषितं तदा ।
अन्योन्यमब्रुवन् राजन् मृगव्याधाः शनैरिव ॥ ३० ॥
दुर्योधनं ख्यापयामो धनं दास्यति पाण्डवः ।
अव्यक्तमिह नः ख्यातो ह्रदे दुर्योधनो नृपः ॥ ३१ ॥
तस्माद्गच्छामहे सर्वे यत्र राजा युधिष्ठिरः ।
आख्यातुं सलिले सुप्तं दुर्योधनममर्षणम् ॥ ३२ ॥
धृतराष्ट्रात्मजं तस्मै भीमसेनाय धीमते ।

उनको मार कवच नहीं खोलेंगे।(१९-२२)

हे राजन्! जहां ये सब बातें होरहीं थी, वहां उसी समय भीमसेनके लिये, मांस लानेवाले, व्याधे मांस भारसे थककर पानी पीनेको आये और उनको बैठा देख छिपकर बातें सुनने लगे। उस तीनों वीरोंने भी जब राजाकी युद्धकी इच्छा न देखी तब शांत होकर दूसरे दिन युद्ध की इच्छासे बैठ गये,वे व्याधे भी उन महारथोंके वचन सुन राजाकी युद्धकी इच्छा न जान, और राजाको पानीमें जान, महाराज युधिष्ठिरके पास चले, महाराज युधिष्ठिरने उन सबसे पहले कहा था कि तुम दुर्योधनको ढूंढना। (२३-२९)

युधिष्ठिरके वेही वचन स्मरण करके धीरे धीरे कहने लगे, की चलो महाराज से दुर्योधनका पता बतावेंगे तो वे हमको

*

शयानं सलिले सर्वं कथयामो धनुर्भृते ॥ ३३ ॥
स नो दास्यति सुप्रीतो धनानि बहुलान्युत ।
किं नो मांसेन शुष्केण परिक्लिष्टेन शोषिणा ॥ ३४ ॥
एवमुक्त्वा तु ते व्याधाः सम्प्रहृष्टा धनार्थिनः ।
मांसभारानुपादाय प्रययुः शिविरं प्रति ॥ ३५ ॥
पाण्डवाऽपि महाराज लब्धलक्षाः प्रहारिणः ।
अपश्यमानाः समरे दुर्योधनमवस्थितम् ॥ ३६ ॥
निकृतेस्तस्य पापस्य ते पारं गमनेप्सवः ।
चारान्सम्प्रेषयामासुः समन्तात्तद्रणाजिरे ॥ ३७ ॥
आगम्य तु ततः सर्वे नष्टं दुर्योधनं नृपम् ।
न्यवेदयन्त सहिता धर्मराजस्य सैनिकाः ॥ ३८ ॥
तेषां तद्वचनं श्रुत्वा चाराणां भरतर्षभ ।
चिन्तामभ्यगमत्तीव्रां निशश्वास च पार्थिवः ॥ ३९ ॥
अथ स्थितानां पाण्डूनां दीनानां भरतर्षभ ।
तस्माद्देशादपक्रम्य त्वरिता लुब्धका विभो ॥ ४० ॥
आजग्मुः शिविरं हृष्टा दृष्ट्वा दुर्योधनं नृपम् ।
वार्यमाणाः प्रविष्टाश्च भीमसेनस्य पश्यतः ॥ ४१ ॥
ते तु पाण्डवमासाद्य भीमसेनं महाबलम् ।
तस्मै तत्सर्वमाचख्युर्यद्वृत्तं यच्च वै श्रुतम् ॥ ४२ ॥

बहुत धन देंगे। निश्चय राजा दुर्योधन ये ही हैं, यह समाचार बुद्धिमान् धनुषधारी भीमसेन सुनते ही हम लोगोंको बहुत धन देंगे, इस सूखे मांसको लेकर क्या करेंगे इसके क्लेशकारी तृप्तिसे क्या होगा, ऐसा कहते हुए वे सब व्याधे धन लेनेकी इच्छासे मांसकी बहंगी उठा कर डेरोंकी ओर चले गये। (३०-३५)

हे राजन्! पाण्डव लोग भी विजय कर और दुर्योधनको नाशकर वैर समाप्त करनेके लिये चारों ओर दूतोंको भेजने लगे। थोडे समयमें सब सेनावालोंने आकर महाराजसे कहा की राजा दुर्योधन कहीं भर गया। उनके वचन सुन राजा युधिष्ठिर ऊंचे स्वांस लेकर बहुत चिन्ता करने लगे, उसी समय वे व्याधे बहुत शीघ्रतासे डेरोंमें पहुंचे, यद्यपि पहरेदारोंने उन्हें रोका तौभी वे लोग प्रसन्न होकर भीमसेनके पास चले गये और

ततो वृकोदरो राजन् दत्वा तेषां धनं बहु ।
धर्मराजाय तत्सर्वमाचचक्षे परन्तपः　　॥ ४३ ॥
असौ दुर्योधनो राजन् विज्ञातो मम लुब्धकैः ।
संस्तभ्य सलिलं शेते यस्यार्थे परितप्यसे　　॥ ४४ ॥
तद्वचो भीमसेनस्य प्रियं श्रुत्वा विशाम्पते ।
अजातशत्रुः कौन्तेयो हृष्टोऽभूत्सहसोदरैः　　॥ ४५ ॥
तं च श्रुत्वा महेष्वासं प्रविष्टं सलिलह्रदे ।
क्षिप्रमेव ततोऽगच्छन्पुरस्कृत्य जनार्दनम्　　॥ ४६ ॥
ततः किलकिला शब्दः प्रादुरासीद्विशाम्पते ।
पाण्डवानां प्रहृष्टानां पञ्चालानां च सर्वशः　　॥ ४७ ॥
सिंहनादांस्ततश्चक्रुः क्ष्वेडाश्च भरतर्षभ ।
त्वरिताः क्षत्रिया राजन् जग्मुर्द्वैपायनं ह्रदम्　　॥ ४८ ॥
ज्ञातः पापो धार्तराष्ट्रो दृष्टश्चेत्यसकृद्रणे ।
प्राक्रोशन् सोमकास्तत्र हृष्टरूपाः समन्ततः　　॥ ४९ ॥
तेषामाशु प्रयातानां रथानां तत्र वेगिनाम् ।
बभूव तुमुलः शब्दो दिवस्पृक् पृथिवीपते　　॥ ५० ॥

महाबलवान् भीमसेनसे सब समाचार कह सुनाया । (३६-४२)

तब उन्होंने बहुत प्रसन्न होकर उन्हें बहुत धन देकर विदा किया और यह सब समाचार महाराजा युधिष्ठिरसे कह दिया । भीमसेन बोले, हे महाराज ! आप जिसके लिये शोच कर रहे थे, उस दुर्योधनको हमारे व्याधे देख आये, वह अपनी मायासे जलको स्तम्भित करके तालावमें सोता है । कुन्तीपुत्र अजातशत्रु युधिष्ठिर भीमसेनके ऐसे प्यारे वचन सुनकर अपने भाइयोंके सहित बहुत प्रसन्न हुए महाधनुषधारी दुर्योधनको तालावमें सोते सुन श्रीकृष्णके सहित वहीं चलनेकी इच्छा करी ।४३-४६

हे पृथ्वीनाथ ! उस समय पाण्डव और पाञ्चालोंकी सेनामें प्रसन्न क्षत्रियोंका घोर शब्द होने लगा, कहीं वीर-गर्जने लगे और कहीं कूदने लगे, चारों ओर वीर पाण्डवोंकी सेनामें यही शब्द सुनाई देता था, कि पापी दुर्योधनका पता लगगया और उसे हमारे मनुष्य देख भी आये, हे पृथ्वीनाथ ! उस समयमें प्रसन्न सोमकवंशियोंके वेगवान् रथोंका घोर शब्द पूरित होगया था । (४७-५०)

दुर्योधनं परीप्सन्तस्तत्र तत्र युधिष्ठिरम् ।
अन्वयुस्त्वरितास्ते वै राजानं श्रान्तवाहनाः ॥ ५१ ॥
अर्जुनो भीमसेनश्च माद्रीपुत्रौ च पाण्डवौ ।
धृष्टद्युम्नश्च पाञ्चाल्यः शिखण्डी चापराजितः ॥ ५२ ॥
उत्तमौजा युधामन्युः सात्यकिश्च महारथः ।
पञ्चालानां च ये शिष्टा द्रौपदेयाश्च भारत ॥ ५३ ॥
हयाश्च सर्वे नागाश्च शतशश्च पदातयः ।
ततः प्राप्तो महाराज धर्मराजः प्रतापवान् ॥ ५४ ॥
द्वैपायनं ह्रदं घोरं यत्र दुर्योधनोऽभवत् ।
शीतामलजलं हृद्यं द्वितीयमिव सागरम् ॥ ५५ ॥
मायया सलिलं स्तभ्य यत्राभूत्ते स्थितः सुतः ।
अत्यद्भुतेन विधिना दैवयोगेन भारत ॥ ५६ ॥
सलिलान्तर्गतः शेते दुर्दर्शः कस्यचित्प्रभो ।
मानुषस्य मनुष्येन्द्र गदाहस्तो जनाधिपः ॥ ५७ ॥
ततो दुर्योधनो राजा सलिलान्तर्गतो वसन् ।
शुश्रुवे तुमुलं शब्दं जलदोपमनिःस्वनम् ॥ ५८ ॥
युधिष्ठिरश्च राजेन्द्र तं ह्रदं सहसोदरैः ।
आजगाम महाराज तव पुत्रवधाय वै ॥ ५९ ॥

सब क्षत्री थके हुए वाहनोंपर चढ कर दुर्योधनको ढूढते हुए युधिष्ठिरके सङ्ग चले, उसमें प्रतापवान धर्मराजके सङ्ग भीमसेन, अर्जुन, नकुल, सहदेव, सेनापति धृष्टद्युम्न, महापराक्रमी शिखण्डी, उत्तमौजा, महारथ सात्यकी, द्रौपदीके पांचों पुत्र और बचे हुए सोमक वंशी क्षत्री, सब घोडे, हाथी और सहस्रों पैदल थे, थोडे ही समयमें प्रतापवान् धर्मराज युधिष्ठिर उस ठंढे जलवाले, समुद्रके समान गम्भीर द्वैपायन नाम तालावके पास पहुंचे। (५१-५५)

जहां अद्भुत विधि और देवतोंकी मायासे जलको स्तम्भित करके गदाधारी महाराज दुर्योधन सोतेथे, दुर्योधनने भी जलके भीतरहीसे युधिष्ठिरकी आती हुई सेनाका मेघके समान शब्द सुना, राजा युधिष्ठिर भी अपने भाइयोंके सहित दुर्योधनको मारनेके लिये शङ्ख और रथके पहियोंके शब्दसे पृथ्वीको कंपाते हुए और धूलिसे आकाशको पूरित करते हुए उस तालावके पास

महता शङ्खनादेन रथनेमिस्वनेन च ।
ऊर्ध्वं धुन्वन्महारेणुं कम्पयंश्चापि मेदिनीम् ॥ ६० ॥
यौधिष्ठिरस्य सैन्यस्य श्रुत्वा शब्दं महारथाः ।
कृतवर्मा कृपो द्रौणी राजानमिदमब्रुवन् ॥ ६१ ॥
इमे ह्यायान्ति संहृष्टाः पाण्डवा जितकाशिनः ।
अपयास्यामहे तावदनुजानातु नो भवान् ॥ ६२ ॥
दुर्योधनस्तु तच्छ्रुत्वा तेषां तत्र तरस्विनाम् ।
तथेत्युक्त्वा ह्रदं तं वै माययाऽस्तंभयत्प्रभो ॥ ६३ ॥
ते त्वनुज्ञाप्य राजानं भृशं शोकपरायणाः ।
जग्मुर्दूरे महाराज कृपप्रभृतयो रथाः ॥ ६४ ॥
ते गत्वा दूरमध्वानं न्यग्रोधं प्रेक्ष्य मारिष ।
न्यविशन्त भृशं श्रान्ताश्चिन्तयन्तो नृपं प्रति॥ ६५ ॥
विष्टभ्य सलिलं सुप्तो धार्तराष्ट्रो महाबलः ।
पाण्डवाश्चापि सम्प्राप्तास्तं देशं युद्धमीप्सवः ॥ ६६ ॥
कथं नु युद्धं भविता कथं राजा भविष्यति ।
कथं नु पाण्डवा राजन् प्रतिपत्स्यंति कौरवम् ॥ ६७ ॥
इत्येवं चिन्तयानास्तु रथेभ्योऽश्वान्विमुच्य ते ।
तत्रासाञ्चक्रिरे राजन् कृपप्रभृतयो रथाः ॥ ६८ ॥ [१८६२]

इति श्रीमहाभारते शतसाहस्त्र्यां संहितायां वैयासिक्यां शल्यपर्वांतर्गतगदापर्वणि त्रिंशोऽध्यायः ॥ ३० ॥

पहुंचे युधिष्ठिरकी सेनाका शब्द सुनकर कृपाचार्य, अश्वत्थामा, और कृतवर्मा दुर्योधनसे ऐसा बोले, विजयी प्रसन्न पाण्डवोंकी सेना इधर ही चली आती है, इसलिये हम लोग भागते हैं आप सावधान होजाइये । (५६—६२)

उस वीरोंके वचन सुन महाराजने बहुत अच्छा कहकर फिर अपनी मायासे जल को स्तम्भित कर दिया और आप तालावमें घुसगये, ये तीनों भी राजाकी- आज्ञा पाकर और शोकसे व्याकुल होकर वहांसे चले गये । तीनों वीर बहुत दूर जाकर थककर एक बडगदकी छा-यामें बैठकर राजाका शोच करने लगे कि महाबलवान धृतराष्ट्रपुत्र दुर्योधन जलके भीतर सोते हैं और पाण्डव भी युद्धके लिये वहीं पहुंच गये हैं, न जानें यह युद्ध कैसा होगा ? न जाने महारा-जकी क्या दशा होगी ? और न जाने महाराजके सङ्ग पाण्डव कैसा व्यवहार

सञ्जय उवाच— ततस्तेष्वपयातेषु रथेषु त्रिषु पाण्डवाः।
ते ह्रदं प्रत्यपद्यन्त यत्र दुर्योधनोऽभवत् ॥ १ ॥
आसाद्य च कुरुश्रेष्ठ तदा द्वैपायनं ह्रदम्।
स्तम्भितं धार्त्तराष्ट्रेण दृष्ट्वा तं सलिलाशयम् ॥ २ ॥
वासुदेवमिदं वाक्यमब्रवीत्कुरुनन्दनः।
पश्येमां धार्त्तराष्ट्रेण मायामप्सु प्रयोजिताम् ॥ ३ ॥
विष्टभ्य सलिलं शेते नास्य मानुषतो भयम्।
दैवीं मायामिमां कृत्वा सलिलान्तर्गतो ह्ययम् ॥ ४ ॥
निकृत्याऽनिकृतिप्रज्ञो न मे जीवन्विमोक्ष्यते।
यद्यस्य समरे साह्यं कुरुते वज्रभृत्स्वयम् ॥ ५ ॥
तथाप्येनं हतं युद्धे लोका द्रक्ष्यन्ति माधव।
वासुदेव उवाच—मायाविन इमां मायां मायया जहि भारत ॥ ६ ॥
मायावी मायया वध्यः सत्यमेतद्युधिष्ठिर।
क्रियाभ्युपायैर्बहुभिर्मायामप्सु प्रयोज्य च ॥ ७ ॥
जहि त्वं भरतश्रेष्ठ मायात्मानं सुयोधनम्।
क्रियाभ्युपायैरिन्द्रेण निहता दैत्यदानवाः ॥ ८ ॥
क्रियाभ्युपायैर्बहुभिर्बलिर्बद्धो महात्मना।
क्रियाभ्युपायैर्बहुभिर्हिरण्याक्षो महासुरः ॥ ९ ॥

करेंगे ? यही शोचते शोचते उन्होंने रथोंसे घोडे छोडे और वहीं सो रहे। (६३-६८) [१८३२]

शल्यपर्वमें तीस अध्याय समाप्त।

शल्यपर्वमें एकतीस अध्याय।

सञ्जय बोले, हे राजन् ! धृतराष्ट्र जब वे तीनों वीर चले गये, तब पाण्डवोंकी सेना उस तालावके पास पहुंची जहां मायासे जल स्तम्भित करके राजा दुर्योधन सोते थे। वहां जाकर कुरुकुलश्रेष्ठ महाराज युधिष्ठिर श्रीकृष्णसे ऐसा बोले, हे कृष्ण ! यह देखो दुर्योधनने अपनी दैवी मायासे इस जलको कैसा स्तम्भित कर दिया है, ये किसी मनुष्यसे भी नहीं डरता आज यदि इस छलीकी साक्षात् इन्द्र भी रक्षा करें तौभी यह मुझसे जीता नहीं बचेगा ॥ (१-६)

श्रीकृष्ण बोले, हे महाराज ! इस छलीको छलहीसे मारिये, छलीको छलसे मारनेमें कुछ भी पाप नहीं होता। हे भारतकुलश्रेष्ठ आप इस जलमें कुछ

हिरण्यकशिपुश्चैव क्रिययैव निषूदितौ ।
वृत्रश्च निहतो राजन् क्रिययैव न संशयः ॥ १० ॥
तथा पौलस्त्यतनयो रावणो नाम राक्षसः ।
रामेण निहतो राजन् सानुबन्धः सहानुगः ॥ ११ ॥
क्रियया योगमास्थाय तथा त्वमपि विक्रम ।
क्रियाभ्युपायैर्निहतौ मया राजन्पुरातनौ ॥ १२ ॥
तारकश्च महादैत्यो विप्रचित्तिश्च वीर्यवान् ।
वातापिरिल्वलश्चैव त्रिशिराश्च तथा विभो ॥ १३ ॥
सुन्दोपसुन्दावसुरौ क्रिययैव निषूदितौ ।
क्रियाभ्युपायैरिन्द्रेण त्रिदिवं भुज्यते विभो ॥ १४ ॥
क्रिया बलवती राजन् नान्यत्किंचिद्युधिष्ठिर ।
दैत्याश्च दानवाश्चैव राक्षसाः पार्थिवास्तथा ॥ १५ ॥
क्रियाभ्युपायैर्निहताः क्रियां तस्मात्समाचर ।
सञ्जय उवाच- इत्युक्तो वासुदेवेन पाण्डवः संशितव्रतः ॥ १६ ॥
जलस्थं तं महाराज तव पुत्रं महाबलम् ।
अभ्यभाषत कौन्तेयः प्रहसन्निव भारत ॥ १७ ॥

क्रिया करके इसको मारिये इन्द्रने अनेक दानवोंको मारा है, महात्मा रामने भी कौशलहीसे महा बलवान वालीको मारा था, विष्णुने भी कौशलहीसे हिरण्याक्ष राक्षसको मारा था, और विष्णुने ही कौशलहीसे हिरण्यकशिपु राक्षसको भी मारा था, इन्द्रने भी वृत्रासुरको कौश-लहीसे मारा था। (७—१०)

इसी प्रकार पुलस्त्यकुलमें उत्पन्न हुए रावण नामक राक्षसको भी सेना और बान्धवोंके सहित कौशलहीसे मारा था, आप भी वैसे ही कौशल और बलसे दुर्योधनको मारिये। (११—१२)

हे राजन्! पहिले समयमें मैंने भी विप्रचित्ती और तारक नाम राक्षसको कौशलहीसे मारा था, वातापी इल्वल, शुन्द, उपशुन्द, त्रिसिरा भी कौशलही-से मारे गये, कौशलहीसे इन्द्र स्वर्गका राज्य करते हैं। हे युधिष्ठिर! कौशलही जगत्में प्रधान है और कुछ नहीं, अने-क दैत्य, दानव और राक्षस कौशलहीसे मारे गये हैं। इसलिये आप भी कौशल से ही काम कीजिये। (१३-१६)

संजय बोले, श्रीकृष्णके ऐसे वचन सुन महाव्रतधारी कुन्तीपुत्र युधिष्ठिर जलमें सोते हुए महाबलवान दुर्योधनसे

सुयोधन किमर्थोऽयमारम्भोऽप्सु कृतस्त्वया।
सर्वं क्षत्रं घातयित्वा स्वकुलं च विशाम्पते ॥ १८ ॥
जलाशयं प्रविष्टोऽद्य वांछञ्जीवितमात्मनः।
उत्तिष्ठ राजन्युध्यस्व सहास्माभिः सुयोधन ॥ १९ ॥
स ते दर्पो नरश्रेष्ठ सचमानः क्व ते गतः।
यस्त्वं संस्तभ्य सलिलं भीतो राजन् व्यवस्थितः ॥२०॥
सर्वे त्वां शूर इत्येवं जना जल्पन्ति संसदि।
व्यर्थं तद्भवतो मन्ये शौर्यं सलिलशायिनः ॥ २१ ॥
उत्तिष्ठ राजन् युध्यस्व क्षत्रियोऽसि कुलोद्भवः।
कौरवेयो विशेषेण कुलं जन्म च संस्मर ॥ २२ ॥
स कथं कौरवे वंशे प्रशंसन् जन्मचात्मनः।
युद्धाद्भीतस्ततस्तोयं प्रविश्य प्रतितिष्ठसि ॥ २३ ॥
अयुद्धमव्यवस्थानं नैष धर्मः सनातनः।
अनार्यजुष्टमस्वर्ग्यं रणे राजन्पलायनम् ॥ २४ ॥
कथं पारमगत्वा हि युद्धे त्वं वै जिजीविषुः।
इमान्निपतितान् दृष्ट्वा पुत्रान् भ्रातॄन् पितॄंस्तथा ॥ २५॥
संबन्धिनो वयस्यांश्च मातुलान्बान्धवांस्तथा।

बोले ॥ हे दुर्योधन! सब क्षत्री और अपने वंशका नाश करके अब अपने जीनेकी इच्छासे तुम जलमें क्यों घुसे हो! तुम उठो और हम लोगोंसे युद्ध करो। (१७—१९)

हे पुरुषश्रेष्ठ! तुम्हारा वह अभिमान और तुम्हारा वह गौरव अब कहां गया? जो तुम डरकर पानीके भीतर छिपे हो, सभामें सब लोग तुम्हें वीर कहा करते थे, परन्तु आज पानीमें छिपनेसे हमें वह सबकी बात झूठ जान पडी, तुम क्षत्रीकुलमें उत्पन्न हुए विशेषकर कुरुवंशी कहलाते हो, अपने जन्म और वंशका स्मरण करो और उठकर हम लोगोंसे युद्ध करो। (२०-२२)

हम कुरुकुलमें उत्पन्न हुए हैं। यह कहके भी क्या युद्धसे डरकर छिपे हो? क्या यह तुम्हारे लिये एक लाजकी बात नहीं है? राज्य और युद्धमें न रहना युद्ध छोडकर भागना यह क्षत्रियोंका धर्म नहीं है। मूर्ख और अनाडी लोग ऐसा करते हैं, युद्ध छोडकर भागनेसे क्षत्रियको स्वर्ग नहीं होता तुम विना युद्ध समाप्त किये भाई, पुत्र, पिता, सम्बन्धी

घातयित्वा कथं तात ह्रदे तिष्ठसि साम्प्रतम् ॥ २६ ॥
शूरमानी न शूरस्त्वं मृषा वदसि भारत ।
शूरोऽहमिति दुर्बुद्धे सर्वलोकस्य शृण्वतः ॥ २७ ॥
न हि शूराः पलायन्ते शत्रून्दृष्ट्वा कथञ्चन ।
ब्रूहि वा त्वं यया वृत्त्या शूर त्यजसि संगरम् ॥ २८ ॥
स त्वमुत्तिष्ठ युध्यस्व विनीय भयमात्मनः ।
घातयित्वा सर्वसैन्यं भ्रातॄंश्चैव सुयोधन ॥ २९ ॥
नेदानीं जीविते बुद्धिः कार्या धर्मचिकीर्षया ।
क्षत्रधर्ममुपाश्रित्य त्वद्विधेन सुयोधन ॥ ३० ॥
यत्तु कर्णमुपाश्रित्य शकुनिं चापि सौबलम् ।
अमर्त्य इव संमोहात्त्वमात्मानं न बुद्धवान् ॥ ३१ ॥
तत्पापं सुमहत्कृत्वा प्रतियुध्यस्व भारत ।
कथं हि त्वद्विधो मोहाद्रोचयेत पलायनम् ॥ ३२ ॥
क ते तत्पौरुषं यातं क च मानः सुयोधन ।
क च विक्रान्तता याता क च विस्फूर्जितं महत् ॥३३॥
क ते कृतास्त्रता याता किं च शेषे जलाशये ।
स त्वमुत्तिष्ठ युध्यस्व क्षत्रधर्मेण भारत ॥ ३४ ॥

मामा और बान्धवोंको नाश कराकर तुम किसलिये इस पानीमें छिपे हो, रे दुर्बुद्धे ! तू वृथा वीरताका अभिमान किया करता था और सबको सुनाया करता था, कि मैं वीर हूं । (२३-२७)

वीर लोग क्षत्रियोंको देखकर कदापि युद्ध छोड कर नहीं भागते, हे वीर! तुम युद्ध छोडकर क्यों भाग आये ? सो तुम अब भय दूर करके उठो और हम लोगोंसे युद्ध करो। सब क्षत्रियोंका नाश कराके अब तुम्हें जीना धर्म नहीं है, हे दुर्योधन ! तुम्हारे समान क्षत्रिय अपने धर्मको नहीं छोडते हैं,(२८-३०)

हे भारत ! तुम जो पहिले कर्ण और सुबलपुत्र शकुनिके आश्रयसे अपनेको सब मनुष्योंसे अधिक मानते थे, उस ही घोर पापका फल भोगनेके लिये आज तुमको हम लोगोंसे युद्ध करना होगा, तुम्हारे समान क्षत्रियको युद्ध छोडकर भागना बहुत अनुचित है, तुम्हारा वह बल, तुम्हारा वह अभिमान, तुम्हारा वह गर्जना और तुम्हारी वह शस्त्रविद्या आज कहां गई ? जो डरसे पानीमें छिपे हो, तुम उठो और

अस्मांस्तु वा पराजित्य प्रशाधि पृथिवीमिमाम्।
अथवा निहतोऽस्माभिर्भूमौ स्वप्स्यसि भारत ॥३५॥
एष ते परमो धर्मः सृष्टो धात्रा महात्मनः।
तं कुरुष्व यथातथ्यं राजा भव महारथ ॥३६॥

संजय उवाच— एवमुक्तो महाराज धर्मपुत्रेण धीमता।
सलिलस्थस्तव सुत इदं वचनमब्रवीत् ॥३७॥

दुर्योधन उवाच- नैतच्चित्रं महाराज यद्भीः प्राणिनमाविशेत्।
न च प्राणभयाद्भीतो व्यपयातोऽस्मि भारत ॥३८॥
अरथश्चानिषंगी च निहतः पार्ष्णिसारथिः।
एकश्चाप्यगणः संख्ये प्रत्याश्वासमरोचयम् ॥३९॥
न प्राणहेतोर्न भयान्न विषादाद्विशाम्पते।
इदमंभः प्रविष्टोऽस्मि श्रमात्त्विदमनुष्ठितम् ॥४०॥
त्वं चाश्वसिहि कौन्तेय ये चाप्यनुगतास्तव।
अहमुत्थाय वः सर्वान्प्रतियोत्स्यामि संयुगे ॥४१॥

युधिष्ठिर उवाच- आश्वस्ता एव सर्वे स्म चिरं त्वां मृगयामहे।
तदिदानीं समुत्तिष्ठ युध्यस्वेह सुयोधन ॥४२॥

क्षत्रिय धर्मके अनुसार हम लोगोंसे युद्ध करो॥ (३१—३४)

ब्रह्माने तुम्हारा यही धर्म बनाया है कि, हम लोगोंको जीतकर पृथ्वीके स्वामी बनो अथवा लडकर पृथ्वीमें शयन करो, हे महारथ! तुम अपने धर्मको पालन करो और हम लोगोंको मारकर जगत्के राजा बनो। (३५—३६)

सञ्जय बोले, हे महाराज! बुद्धिमान युधिष्ठिरके ऐसे वचन सुन जलके भीतरसे तुम्हारे पुत्र ऐसा बोले। दुर्योधन बोले, हे पृथ्वीनाथ! हे भारत! मनुष्योंको भय हो यह कुछ आश्चर्यकी बात नहीं है। भय होना मनुष्योंका स्वाभाविक धर्म है परन्तु मुझे वह भी नहीं है अर्थात् मैं किसी समय किसीसे नहीं डरता। मैंने तुम्हारे भयसे, मरनेके डरसे या किसी शोकसे जलमें प्रवेश नहीं किया है, वरन युद्ध करता बहुत थक गया, रथ टूट गया, सारथी और रक्षा करनेवाने मर गए, कोई साथी न रहा, तब थोडासा सांस लेनेके लिये इस जलमें आयाथा, अब तुम और तुम्हारे सब साथी सावधान हो जाओ, मैं जलसे निकल कर सबको मारूंगा।(३७-४१)

युधिष्ठिर बोले, हम सब सावधान

हत्वा वा समरे पार्थान् स्फीतं राज्यमवाप्नुहि ।
निहतो वा रणेऽस्माभिर्वीरलोकमवाप्स्यसि ॥ ४३ ॥

दुर्योधन उवाच- यदर्थं राज्यमिच्छामि कुरूणां कुरुनन्दन ।
त इमे निहताः सर्वे भ्रातरो मे जनेश्वर ॥ ४४ ॥
क्षीणरत्नां च पृथिवीं हतक्षत्रियपुङ्गवाम् ।
न ह्युत्सहाम्यहं भोक्तुं विधवामिव योषितम् ॥ ४५ ॥
अद्यापि त्वहमाशंसे त्वां विजेतुं युधिष्ठिर ।
भंक्त्वा पाञ्चालपाण्डूनामुत्साहं भरतर्षभ ॥ ४६ ॥
न त्विदानीमहं मन्ये कार्यं युद्धेन कर्हिचित् ।
द्रोणे कर्णे च संशान्ते निहते च पितामहे ॥ ४७ ॥
अस्त्विदानीमियं राजन् केवला पृथिवी तव ।
असहायो हि को राजा राज्यमिच्छेत्प्रशासितुम् ॥४८॥
सुहृदस्तादृशान्हित्वा पुत्रान्भ्रातॄन्पितॄनपि ।
भवद्भिश्च हृते राज्ये को नु जीवेत मादृशः ॥ ४९ ॥
अहं वनं गमिष्यामि ह्यजिनैः प्रतिवासितः ।
रतिर्हि नास्ति मे राज्ये हतपक्षस्य भारत ॥ ५० ॥

हैं और बहुत समयसे तुम्हें ढूंढ रहे हैं, इसलिये तुम उठो और हम लोगोंको मारकर इस जगत्का राज्य करो। अथवा हम लोगोंके हाथसे मर कर वीर लोकको जाओ ॥ (४२—४३)

दुर्योधन बोले, हे कुरुकुलश्रेष्ठ ! मैं जिन लोगोंके लिये जगत्का राज्य करना चाहता था, वे मेरे, सब भाई मरे हुए पृथ्वीमें सोते हैं; और भी जगत्के उत्तम क्षत्रिय नष्ट होगये, पृथ्वी रत्नोंसे हीन होगई अब विधवा स्त्रीके समान मैं इसको नहीं भोगना चाहता। (४४—४५)

द्रोणाचार्य, कर्ण और भीष्म पितामह मर गये, इसलिये अब मुझे युद्ध करनेसे कुछ लाभ नहीं है, तौभी पाञ्चाल और पाण्डवोंका उत्साह तोडनेके लिये मैं अब भी तुम्हें मारनेका साहस करता हूं। ऐसा कौन मूर्ख राजा होगा जो अपने सब सहायकोंका नाश कराके राज्य करनेकी इच्छा करे ! इसलिये अब यह रत्नहीन पृथ्वी तुम्ही लो। (४६-४८)

जगत्में ऐसा कौन मनुष्य होगा, जो भाई, पुत्र और जातिका नाश कराके जीनेकी इच्छा करे; विशेषकर मेरे समान वीर; अब मुझे जीनेकी कुछ

हतबान्धवभूयिष्ठा हताश्वा हतकुञ्जरा ।
एषा ते पृथिवी राजन् भुंक्ष्वैनां विगतज्वरः ॥ ५१ ॥
वनमेव गमिष्यामि वसानो मृगचर्मणी ।
न हि मे निर्जनस्यास्ति जीवितेऽद्य स्पृहा विभो ॥५२॥
गच्छ त्वं भुंक्ष्व राजेन्द्र पृथिवीं निहतेश्वराम् ।
हतयोधां नष्टरत्नां क्षीणवृत्तिर्यथासुखम् ॥ ५३ ॥
सञ्जय उवाच— दुर्योधनं तव सुतं सलिलस्थं महायशाः ।
श्रुत्वा तु करुणं वाक्यमभाषत युधिष्ठिरः ॥ ५४ ॥
युधिष्ठिर उवाच—आर्तप्रलापान्मा तात सलिलस्थः प्रभाषिथाः ।
नैतन्मनसि मे राजन् वाशितं शकुनेरिव ॥ ५५ ॥
यदि वापि समर्थः स्यास्त्वं दानाय सुयोधन ।
नाहमिच्छेयमवनिं त्वया दत्तां प्रशासितुम् ॥ ५६ ॥
अधर्मेण न गृह्णीयांस्त्वया दत्तां महीमिमाम् ।
न हि धर्मः स्मृतो राजन् क्षत्रियस्य प्रतिग्रहः ॥५७ ॥
त्वया दत्तां न चेच्छेयं पृथिवीमखिलामहम् ।
त्वां तु युद्धे विनिर्जित्य भोक्ताऽस्मि वसुधामिमाम् ॥५८॥
अनीश्वरश्च पृथिवीं कथं त्वं दातुमिच्छसि ।
त्वयेयं पृथिवी राजन् किन्न दत्ता तदैव हि ॥ ५९ ॥

इच्छा नहीं, मैं हरिनका चमडा ओढकर वनको जाता हूं। यह क्षत्रिय, हाथी और घोडोंसे रहित पृथ्वी तुम्हारी हो, हे राजन्! तुम अपनी इच्छानुसार वीर और रत्नोंसे रहित पृथ्वीका राज्य करो। (४९-५३)

सञ्जय बोले, हे राजन्! मयायशस्वी युधिष्ठिर जलके भीतरसे दुर्योधनके ऐसे वचन सुन ऐसा कहने लगे। युधिष्ठिर बोले, हे तात! अब इस वृथा रोनेसे कुछ फल न होगा। जैसी शकुनीके मनमें छलसे पाण्डवोंका राज्य छीनने-की इच्छा थी वैसी मेरे मनमें नहीं है। तुम अत्यन्त समर्थ भी हो तौ भी मैं तुम्हारा दिया राज्य नहीं चाहता। परन्तु तुम्हे मारकर पृथ्वीका राजा बनूंगा। (५४-५८)

अब तुम पृथ्वीके स्वामी नहीं हो, इसलिये तुम्हे देनेका भी कुछ अधिकार नहीं जब तुम समर्थ थे, और हमलोग कुलकी शान्तिके लिये धर्मसे आधा राज्य मांगते थे, तभी तुमने हमें क्यों

धर्मतो याचमानानां प्रशमार्थं कुलस्य नः ।
वार्ष्णेयं प्रथमं राजन् प्रत्याख्याय महाबलम् ॥ ६० ॥
किमिदानीं ददासि त्वं को हि ते चित्तविभ्रमः ।
अभियुक्तस्तु को राजा दातुमिच्छेद्धि मेदिनीम् ॥६१॥
न त्वमद्य महीं दातुमीशः कौरवनन्दन ।
अच्छेत्तुं वा बलाद्राजन् स कथं दातुमिच्छसि ॥६२॥
मां तु निर्जित्य संग्रामे पालयेमां वसुन्धराम् ।
सूच्यग्रेणापि यद्भूमेरपि भिद्येत भारत ॥ ६३ ॥
तन्मात्रमपि तन्मह्यं न ददाति पुरा भवान् ।
स कथं पृथिवीमेतां प्रददासि विशाम्पते ॥ ६४ ॥
सूच्यग्रं नात्यजः पूर्वं स कथं त्यजसि क्षितिम् ।
एवमैश्वर्यमासाद्य प्रशास्य पृथिवीमिमाम् ॥ ६५ ॥
को हि मूढो व्यवस्येत शत्रोर्दातुं वसुन्धराम् ।
त्वं तु केवलमौर्ख्येण विमूढो नावबुध्यसे ॥ ६६ ॥
पृथिवीं दातुकामोऽपि जीवितेन विमोक्ष्यसे ।
अस्मान्वा त्वं पराजित्य प्रशाधि पृथिवीमिमाम् ॥६७॥
अथवा निहतोऽस्माभिर्व्रज लोकाननुत्तमान् ।

नहीं दिया था ? महावीर श्रीकृष्णका निरादर करके अब तुम हमको राज्य देना कहते हो, यह तुम कैसी भूलकी बात कहते हो ? कौन ऐसा राजा होगा जो समर्थ होकर अपना राज्य दूसरेको देनेकी इच्छा करे ? (५९—६१)

हे राजन् ! तुमको इस समय पृथ्वी देने और अपने वशमें रखनेकी समर्थ नहीं है । तुमने श्रीकृष्णसे कहा था की मैं सुईके नाकेके समान पृथ्वी विना युद्धके युधिष्ठिरको न दूंगा । सो तुम पहिले आज सब पृथ्वी मुझे क्यों देते हो ? तुम पहिले सुईके नाकेके समान पथ्वी नहीं छोडना चाहते थे, सो आज सब पृथ्वी छोडनेकी क्यों इच्छा करते हो ? तुम हमको जीतकर जगत्के राजा बनो । (६२—६५)

ऐसा कौन मूर्ख राजा होगा जो अपने जीते जी अपने शत्रुको राज्य दे ? परन्तु तुम मूर्ख हो, अपनी मूर्खतासे बक बक करते हो, अब तुम हम लोगोंको जीतकर पृथ्वीके राजा बनो । अथवा हमारे हाथसे मरकर स्वर्गको जावो । हमारे और तुम्हारे दोनोंके जीनेसे लो

आवयोर्जीवितो राजन् मयि च त्वयि च ध्रुवम् ॥६८॥
संशयः सर्वभूतानां विजये नौ भविष्यति।
जीवितं तव दुष्प्रज्ञमयि सम्प्रति वर्तते ॥ ६९ ॥
जीवयेयमहं कामं न तु त्वं जीवितुं क्षमः।
दहने हि कृतो यत्नस्त्वयाऽस्मासु विशेषतः ॥ ७० ॥
आशीविषैर्विषैश्चापि जले चापि प्रवेशनैः।
त्वया विनिकृता राजन् राज्यस्य हरणेन च ॥ ७१ ॥
अप्रियाणां च वचनैर्द्रौपद्याः कर्षणेन च।
एतस्मात्कारणात्पाप जीवितं ते न विद्यते ॥ ७२ ॥
उत्तिष्ठोत्तिष्ठ युध्यस्व युद्धे श्रेयो भविष्यति।
एवं तु विविधा वाचो जययुक्ताः पुनः पुनः।
कीर्तयन्ति स्म ते वीरास्तत्र तत्र जनाधिप॥ ७३ ॥ [१९०५]

इति श्रीमहा०संहितायां वैयासिक्यां शल्यांतर्गतगदापर्वणि सुयोधनयुधिष्ठिरसंवादे एकत्रिंशोऽध्यायः ॥३१॥

धृतराष्ट्र उवाच—एवं सन्तर्ज्यमानस्तु मम पुत्रो महीपतिः।
प्रकृत्या मन्युमान्वीरः कथमासीत्परन्तपः ॥ १ ॥
न हि सन्तर्जना तेन श्रुतपूर्वा कथञ्चन।
राजभावेन मान्यश्च सर्वलोकस्य सोऽभवत् ॥ २ ॥

गोंको यह सन्देह बना रहेगा, कि इस युद्धमें न जाने किसकी विजय हुई, रे मूर्ख ! तेरा जीना इस समय हमारे हाथमें है। (६६-६९)

हम अपनी इच्छासे जीसक्ते हैं। परन्तु तू नहीं जीसक्ता। तैने हमारे मारनेके लिये घरमें आग लगाई, विष खिलाया, सांपसे कटवाया, पानीमें डुबाया, छलसे हमारा राज्य छीन लिया, सभामें द्रौपदीके वस्त्र खींचे इत्यादिक अप्रिय कामोंसे अब मैं तुझे जीता न छोडूंगा। इसलिये उठो और युद्ध करो, युद्धहीसे कल्याण होगा। युधिष्ठिरने और सब वीरोंने भी दुर्योधनको ऐसी अनेक कठोर बातें कहीं। (७०-७३)[१९०५]

शल्यपर्वमें एकतीस अध्याय समाप्त।

शल्यपर्वमें बत्तीस अध्याय।

महाराज धृतराष्ट्र बोले, हे सञ्जय! हमारे पुत्र दुर्योधन स्वभावहीसे महाक्रोधी थे। उन्होंने युधिष्ठिरके ऐसे कठोर वचन सुनके क्या कहा? उन्होंने इससे पहिले, किसीके कठोर वचन नहीं सुने थे, सब जगत् महाराज कहकर जिनका आदर करता था, जिस छत्रकी छाया

यस्यातपत्रच्छायाऽपि स्वका भानोस्तथा प्रभा ।
खेदायैवाभिमानित्वात्सहेत्सैवं कथं गिरः ॥ ३ ॥
इयं च पृथिवी सर्वा सम्लेच्छाटविका भृशम् ।
प्रसादाद्ध्रियते यस्य प्रत्यक्षं तव सञ्जय ॥ ४ ॥
स तथा तर्जमानस्तु पाण्डुपुत्रैर्विशेषतः ।
विहीनश्च स्वकैर्भृत्यैर्निर्जने चावृतो भृशम् ॥ ५ ॥
स श्रुत्वा कटुका वाचो जययुक्ताः पुनः पुनः ।
किमब्रवीत्पाण्डवेयांस्तन्ममाचक्ष्व सञ्जय ॥ ६ ॥
सञ्जय उवाच— तर्ज्यमानस्तदा राजन्नुदकस्थस्तवात्मजः ।
युधिष्ठिरेण राजेन्द्र भ्रातृभिः सहितेन ह ॥ ७ ॥
श्रुत्वा स कटुका वाचो विषमस्थो नराधिपः ।
दीर्घमुष्णं च निश्वस्य सलिलस्थः पुनः पुनः ॥ ८ ॥
सलिलान्तर्गतो राजा धुन्वन्हस्तौ पुनः पुनः ।
मनश्चकार युद्धाय राजानं चाभ्यभाषत ॥ ९ ॥
यूयं ससुहृदः पार्थाः सर्वे सरथवाहनाः ।
अहमेकः परिद्यूनो विरथो हतवाहनः ॥ १० ॥
आत्तशस्त्रै रथोपेतैर्बहुभिः परिवारितः ।
कथमेकः पदातिः सन्नशस्त्रो योद्धुमुत्सहे ॥ ११ ॥
एकैकेन तु मां यूयं योधयध्वं युधिष्ठिर ।

अभिमानमें सूर्यके समान आकाशमें घूमती थी, जिसकी कृपासे वन और म्लेच्छोंके सहित यह पृथ्वी स्थिर थी, हे सञ्जय ! उस मेरे पुत्रने पाण्डवोंके कठोर वचन सुनके कैसे सहे? और क्या कहा ? सो तुम हमसे कहो उस समय वे ऐसी आपत्तिमें पडे थे, कि एक सेवक भी उनके सङ्ग न था । (१—६)

सञ्जय बोले, हे राजेन्द्र ! भाइयोंके सहित युधिष्ठिरके ऐसे कठोर वचन सुन कर राजा दुर्योधन बार बार हाथ पटकते हुए और गर्म स्वांस लेते हुए युद्ध करनेकी इच्छा करने लगे । और युधिष्ठिरसे ऐसा वचन बोले । (७—९)

हे महाराज ! आप लोग वाहन और सहायकोंके सहित हैं, मैं अकेला वाहनरहित और थका हुवा हूं । सो रथोंमें बैठे शस्त्र सहित अनेक वीरोंसे अकेला शस्त्र रहित पैदल घावोंसे व्याकुल किस प्रकार युद्ध करूंगा? (१०-११)

नह्येको बहुभिर्वीरैर्न्याय्यो योधयितुं युधि ॥ १२ ॥
विशेषतो विकवचः श्रान्तश्चापत्समाश्रितः ।
भृशं विक्षतगात्रश्च श्रान्तवाहनसैनिकः ॥ १३ ॥
न मे त्वत्तो भयं राजन्न च पार्थाद्वृकोदरात् ।
फाल्गुनाद्वासुदेवाद्वा पञ्चालेभ्योऽथ वा पुनः ॥ १४ ॥
यमाभ्यां युयुधानाद्वा ये चान्ये तव सैनिकाः ।
एकः सर्वानहं क्रुद्धो वारयिष्ये युधि स्थितः ॥ १५ ॥
धर्ममूला सतां कीर्तिर्मनुष्याणां जनाधिप ।
धर्मं चैवेह कीर्तिं च पालयन्प्रब्रवीम्यहम् ॥ १६ ॥
अहमुत्थाय सर्वान्वै प्रतियोत्स्यामि संयुगे ।
अनुगम्यागतान्सर्वानृतून्संवत्सरो यथा ॥ १७ ॥
अद्य वः सरथान् साश्वानशस्त्रो विरथोऽपि सन् ।
नक्षत्राणीव सर्वाणि सविता रात्रिसंक्षये ॥ १८ ॥
तेजसा नाशयिष्यामि स्थिरी भवत पाण्डवाः ।
अद्यानृण्यं गमिष्यामि क्षत्रियाणां यशस्विनाम्॥१९॥
बाह्लीकद्रोणभीष्माणां कर्णस्य च महात्मनः ।
जयद्रथस्य शूरस्य भगदत्तस्य चोभयोः ॥ २० ॥
मद्रराजस्य शल्यस्य भूरिश्रवस एव च ।

हे राजन् ! धर्मसे एक एक के सङ्ग युद्ध करनेसे कुछ भय नहीं करता परन्तु अकेलेसे अनेक वीरोंके सहित युद्ध करना अधर्म है, मैं तुमसे, भीमसेनसे, अर्जुनसे, नकुलसे, सहदेवसे, श्रीकृष्णसे, धृष्टद्युम्नसे, सब पाञ्चालोंसे और सात्यकि आदि सब वीरोंसे कुछ नहीं डरता, मैं एकला ही सबको मार सक्ता हूं। परन्तु जगत्में कीर्त्तिका मूल धर्म ही है, आपका धर्म नष्ट न हो, इसी लिये, यह सब कह रहा हूं जैसे वर्ष सब ऋतुवोंको नांघ जाता है, ऐसे ही मैं सब तुम लोगोंको जीत लूंगा ? (१२-१७)

जैसे प्रातःकाल एकला सूर्य अपने तेजसे सब तारोंको छिपा देता है। ऐसे ही आज मैं एकला रथ, और शस्त्रोंसे हीन होनेपर भी तुम्हारा सबका नाश करूंगा। हे पाण्डवो ! तुम लोग स्थिर और सावधान हो जावो, आज मैं महायशस्वी क्षत्रिय, बाह्लीक, भीष्म, द्रोणाचार्य, महात्मा कर्ण, वीर जयद्रथ, वीर भगदत्त, मद्रराज शल्य, भूरिश्रवा,

पुत्राणां भरतश्रेष्ठ शकुनेः सौबलस्य च ॥ २१ ॥
मित्राणां सुहृदां चैव बान्धवानां तथैव च ।
आनृण्यमद्य गच्छामि हत्वा त्वां भ्रातृभिः सह॥२२॥
एतावदुक्त्वा वचनं विरराम जनाधिपः ।
युधिष्ठिर उवाच—दिष्ट्या त्वमपि जानीषे क्षत्रधर्मं सुयोधन ॥ २३ ॥
दिष्ट्या ते वर्तते बुद्धिर्युद्धायैव महाभुज ।
दिष्ट्या शूरोऽसि कौरव्य दिष्ट्या जानासि सङ्गरम्॥२४॥
यस्त्वमेको हि नः सर्वान्संगरे योद्धुमिच्छसि ।
एक एकेन सङ्गम्य यत्ते संमतमायुधम् ॥ २५ ॥
तत्त्वमादाय युध्यस्व प्रेक्षकास्ते वयं स्थिताः ।
स्वयमिष्टं च ते कामं वीर भूयो ददाम्यहम् ॥ २६ ॥
हत्वैकं भवतो राज्यं हतो वा स्वर्गमाप्नुहि ।
दुर्योधन उवाच- एकश्चेद्योद्धुमाक्रन्दे शूरोऽद्य मम दीयताम् ॥ २७ ॥
आयुधानामियं चापि वृता त्वत्सम्मते गदा ।
हन्तैकं भवतामेकः शक्यं मां योऽभिमन्यते ॥ २८ ॥
पदातिर्गदया संख्ये स युध्यतु मया सह ।

अपने पुत्र, सुबलपुत्र शकुनी आदि अपने बान्धवोंके ऋणसे छूटूंगा । और तुम्हें बान्धवोंके सहित मारूंगा ! ऐसा कह कर महाराज चुप होगए । (१८-२२)

महाराज युधिष्ठिर बोले, हे महावीर प्रारब्धहीसे तुम क्षत्रियधर्मको जानते हो, प्रारब्धहीसे तुम युद्धके लिये उपस्थित हुए हो, प्रारब्धहीसे तुम्हारे चित्तमें वीरता आई है ॥(२३—२४)

तुम्हे धन्य है जो तुम एकले ही हमसे युद्ध करनेको उपस्थित होगए । अब हम तुम्हारी इच्छानुसार तुम्हे एक बरदान देते हैं । जो तुम्हारी इच्छा हो सो शस्त्र ले लो । और हम सबमेंसे जिस वीरके सङ्गमें तुम्हारी इच्छा हो उससे युद्ध करो और सब लोग युद्ध देखेंगे, कोई लडेगा नहीं, और भी वरदान देते हैं । कि हम पांचोंमेंसे एकको मारनेसे भी तुम्हें राज्य मिलेगा अथवा मरकर स्वर्ग मिलेगा । (२५-२७)

दुर्योधन बोले, आपने जो कहा हम वही स्वीकार करते हैं । शस्त्र हमारे पास गदा है, आपकी सम्मती हो तो हम इसीसे युद्ध करें, अब तुम सबमेंसे जो गदा युद्ध जानता हो सो गदा लेकर हमसे पैदल गदा युद्ध करें, रथों-

वृत्तानि रथयुद्धानि विचित्राणि पदे पदे ॥ २९ ॥
इदमेकं गदायुद्धं भवत्वद्याद्भुतं महत्।
अस्त्राणामपि पर्यायं कर्तुमिच्छन्ति मानवाः ॥ ३० ॥
युद्धानामपि पर्यायो भवत्वनुमते तव।
गदया त्वां महाबाहो विजेष्यामि सहानुजम्॥ ३१ ॥
पञ्चालान्सृञ्जयांश्चैव ये चान्ये तव सैनिकाः।
न हि मे सम्भ्रमो जातु शक्रादपि युधिष्ठिर ॥ ३२ ॥

युधिष्ठिर उवाच—उत्तिष्ठोत्तिष्ठ गान्धारे मां योधय सुयोधन।
एक एकेन सङ्गम्य संयुगे गदया बली ॥ ३३ ॥
पुरुषो भव गान्धारे युध्यस्व सुसमाहितः।
अद्य ते जीवितं नास्ति यदीन्द्रोऽपि तवाश्रयः ॥ ३४॥

सञ्जय उवाच— एतत्स नरशार्दूलो नामृष्यत तवात्मजः।
सलिलान्तर्गतः श्वभ्रे महानाग इव श्वसन् ॥ ३५ ॥
तथाऽसौ वाक्प्रतोदेन तुद्यमानः पुनः पुनः।
वचो न ममृषे राजन्नुत्तमाश्वः कशामिव ॥ ३६ ॥
सन्क्षोभ्य सलिलं वेगाद्गदामादाय वीर्यवान्।
अद्रिसारमयीं गुर्वीं काञ्चनां गदभूषणाम् ॥ ३७ ॥

में बैठकर अनेक विचित्र युद्ध किए, अब आज यह आपकी आज्ञासे घोर गदा युद्ध भी होजाय। वीर लोग अनेक शस्त्रोंसे युद्ध करते हैं। परन्तु मैं केवल गदाहीसे भाइयोंके सहित तुमको मारूंगा, पाञ्चाल और सृञ्जय आदि तुम्हारे सब पक्षपातियोंको मारूंगा। हे युधिष्ठिर! मैं युद्धमें इन्द्रसे भी नहीं डरता। (२८-३२)

युधिष्ठिर बोले, हे गान्धारीपुत्र दुर्योधन! तुम शूर पुरुष बनो, पानीसे निकलकर गदा धारण करके एक एकसे युद्ध करो, आज यदि इन्द्र भी तुम्हारी रक्षा करें तौभी जीते नहीं बचोगे। सञ्जय बोले, युधिष्ठिरके इन कटु वचनोंको पुरुषसिंह दुर्योधन क्षमा न कर सके और भीतरसे ही मतवाले हाथीके समान स्वांस लेने लगे। (३३-३५)

जैसे उत्तम घोडा कोडेकी चोट नहीं सह सक्ता, ऐसे ही दुर्योधन युधिष्ठिरके कडवे वचन न सह सके, तब बलसे सब पानीको उथल पुथल करके सोनेसे जडी पर्वतके समान भारी दृढ गदाको कन्धेपर रखकर इस प्रकार उठे, जैसे

अन्तर्जलात्समुत्तस्थौ नागेन्द्र इव निःश्वसन् ।
स भित्त्वास्तम्भितं तोयं स्कन्धे कृत्वाऽऽयसीं गदाम् ॥ ३८॥
उदतिष्ठत पुत्रस्ते प्रतपन्रश्मिवानिव ।
ततः शैक्यायसीं गुर्वीं जातरूपपरिष्कृताम् ॥ ३९ ॥
गदां परामृशद्धीमान्धार्तराष्ट्रो महाबलः ।
गदाहस्तं तु तं दृष्ट्वा सशृङ्गमिव पर्वतम् ॥ ४० ॥
प्रजानामिव संक्रुद्धं शूलपाणिमिव स्थितम् ।
सगदो भारतो भाति प्रतपन्भास्करो यथा ॥ ४१ ॥
तमुत्तीर्णं महाबाहुं गदाहस्तमरिन्दमम् ।
मेनिरे सर्वभूतानि दण्डपाणिमिवान्तकम् ॥ ४२ ॥
वज्रहस्तं यथा शक्रं शूलहस्तं यथा हरम् ।
ददृशुः सर्वपञ्चालाः पुत्रं तव जनाधिप ॥ ४३ ॥
तमुत्तीर्णं तु सम्प्रेक्ष्य समहृष्यन्त सर्वशः ।
पाञ्चालाः पाण्डवेयाश्च तेऽन्योन्यस्य तलान्ददुः ॥४४॥
अवहासं तु तं मत्वा पुत्रो दुर्योधनस्तव ।
उद्वृत्य नयने क्रुद्धो दिधक्षुरिव पाण्डवान् ॥ ४५ ॥
त्रिशिखां भ्रुकुटीं कृत्वा सन्दष्टदशनच्छदः ।
प्रत्युवाच ततस्तान्वै पाण्डवान्सहकेशवान् ॥ ४६ ॥

दुर्योधन उवाच– अस्यावहासस्य फलं प्रतिभोक्ष्यथ पाण्डवाः ।

मतवाला हाथी जलसे निकलता है। (३६-३८)

महाबलवान् दुर्योधन दो पहरके सूर्यके समान खडे होकर गदाको छूने लगे। उस समय गदाधारी दुर्योधनका शरीर ऐसा दीखता था, जैसे शिखरके सहित पर्वत और प्रलयकालमें शूलधारी यमराज। महाबाहु शत्रुनाशन गदाधारी दुर्योधनको सब लोग दण्डधारी यमराज, वज्रधारी इन्द्र और त्रिशूलधारी शिवके समान देखने लगे (३९-४३)

उनको युद्धमें एकले खडा देख पाञ्चाल, सञ्जय और पाण्डव ताली देकर हंसने लगे। तुम्हारे पुत्र दुर्योधन उस हंसीको न क्षमा कर सके और नेत्र फैलाकर देखने लगे। मानो पाण्डवोंको भस्म कर देंगे। फिर दांत चबाकर भौंह टेढी करके श्रीकृष्ण और पाण्डवोंसे बोले। अरे पाण्डवो! तुम सब हमारे पास आओ और हंसीका फल लो और

गमिष्यथ हताः सद्यः सपञ्चाला यमक्षयम् ॥ ४७ ॥

सञ्जय उवाच— उत्थितश्च जलात्तस्मात्पुत्रो दुर्योधनस्तव ।
अतिष्ठत गदापाणी रुधिरेण समुक्षितः ॥ ४८ ॥
तस्य शोणितदिग्धस्य सलिलेन समुक्षितम् ।
शरीरं स्म तदा भाति स्रवन्निव महीधरः ॥ ४९ ॥
तमुद्यतगदं वीरं मेनिरे तत्र पाण्डवाः ।
वैवस्वतमिव क्रुद्धं किङ्करोद्यतपाणिनम् ॥ ५० ॥
समेघनिनदो हर्षान्नर्दन्निव च गोवृषः ।
आजुहाव ततः पार्थान्गदया युधि वीर्यवान् ॥ ५१ ॥

दुर्योधन उवाच- एकैकेन च मां यूयमासीदत युधिष्ठिरं ।
नह्येको बहुभिर्न्याय्यो वीरो योधयितुं युधि ॥ ५२ ॥
न्यस्तवर्मा विशेषेण श्रान्तश्चाप्सु परिप्लुतः ।
भृशं विक्षतगात्रश्च हतवाहनसैनिकः ॥ ५३ ॥
अवश्यमेव योद्धव्यं सर्वैरेव मया सह ।
युक्तं त्वयुक्तमित्येतद्वेत्सि त्वं चैव सर्वदा ॥ ५४ ॥

युधिष्ठिर उवाच- मा भूदियं तव प्रज्ञा कथमेवं सुयोधन ।
यदाऽभिमन्युं बहवो जघ्नुर्युधि महारथाः ॥ ५५ ॥
क्षत्रधर्मं भृशं क्रूरं निरपेक्षं सुनिर्घृणम् ।

पाञ्चालोंके सहित मरकर स्वर्गको जाओ। (४४-४७)

सञ्जय बोले, रुधिर और पानीमें भीगे, दुर्योधनका शरीर उस समय ऐसा दीखता था, जैसे झरनोंके सहित पर्वत उस समय पाण्डवोंने उन्हें दण्डधारी यमराजके समान देखा, तब मतवाले बैलके समान नाचते हुए मेघके समान गर्जते हुए दुर्योधन गदा लेकर पाण्डवोंको ललकारने लगे। (४८-५१)

दुर्योधन बोले, हे युधिष्ठिर! अब तुम लोग एक एक मुझसे युद्ध करनेको चले आवो, क्यों कि धर्मके अनुसार एक वीरके साथ अनेक वीर नहीं लड सक्ते। यद्यपि मेरा वैर सबहीके सङ्ग है और सभीको मुझसे लडना चाहिये परंतु आप युक्त और अयुक्त विषयोंको जानते हैं। (५२-५४)

महाराज युधिष्ठिर बोले, हे दुर्योधन! तुम्हारी बुद्धि ऐसी न होनी चाहिये क्यों कि यह बतलाओ कि अभिमन्युको कई महारथोंने मिलकर मारा था? क्षत्री-

अन्यथा तु कथं हन्युरभिमन्युं तथागतम् ॥ ५६ ॥
सर्वे भवंतो धर्मज्ञाः सर्वे शूरास्तनुत्यजः ।
न्यायेन युध्यतां प्रोक्ता शक्रलोकगतिः परा ॥ ५७ ॥
यद्येकस्तु न हन्तव्यो बहुभिर्धर्म एव तु ।
तदाऽभिमन्युं बहवो निजघ्नुस्त्वन्मते कथम् ॥ ५८ ॥
सर्वो विमृशते जन्तुः कृच्छ्रस्थो धर्मदर्शनम् ।
पदस्थः पिहितं द्वारं परलोकस्य पश्यति ॥ ५९ ॥
आमुंच कवचं वीर मूर्धजान् यमयस्व च ।
यच्चान्यदपि ते नास्ति तदप्यादत्स्व भारत ॥ ६० ॥
इममेकं च ते कामं वीर भूयो ददाम्यहम् ।
पञ्चानां पाण्डवेयानां येन त्वं योद्धुमिच्छसि ॥ ६१ ॥
तं हत्वा वै भवान् राजा हतो वा स्वर्गमाप्नुहि ।
ऋते च जीविताद्वीर युद्धे किं कुर्म ते प्रियम् ॥ ६२ ॥
सञ्जय उवाच— ततस्तव सुतो राजन् वर्म जग्राह काञ्चनम् ।
विचित्रं च शिरस्त्राणं जांबूनदपरिष्कृतम् ॥ ६३ ॥
सोऽवबद्धशिरस्त्राणः शुभकांचनवर्मभृत् ।

योंका धर्म महादुष्ट और नीच है, नहीं तो अभिमन्युको कौन मार सक्ता था? तुम सब लोग धर्मात्मा और वीर थे, और सब लोग इन्द्रलोकमें जानेके लिये धर्मसे युद्ध कर रहे थे, और यह भी जानते थे कि, एक वीरके सङ्ग अनेक वीरोंको युद्ध न करना चाहिए, तब अभिमन्युको तुम्हारी सम्मतिसे अनेक वीरोंने क्यों मारा? (५५—५८)

धर्म सब मनुष्य करना चाहते हैं। परन्तु धर्म बडा कठिन है, धर्म करनेसे स्वर्गका द्वार दीखने लगता है, जो हो अब तुम यह कवच पहिनो, बालोंको ठीक करके टोप लगावो और भी जो सामग्री तुम्हारे पास न हो सो हम से लो, हम फिर भी एक वरदान तुम्हें देते हैं। कि हम पांचोंमेंसे जिसके सङ्ग तुम लडना चाहो उस एकको मार कर राजा बनोगे, अथवा उसके हाथसे मर- कर स्वर्गको जावोगे, हे वीर! जीव- दानको छोडकर और जो तुम्हारी इच्छा हो सो हमसे मागो।(५९-६२)

सञ्जय बोले, हे राजन्! तब तुम्हारे पुत्रने सोनेका विचित्र कवच पहिना और सोनेका विचित्र टोप ओढा उस समय उनकी शोभा सुमेरु पर्वतके समान

ररराज राजन्पुत्रस्ते कांचनः शैलराडिव ॥ ६४ ॥
सन्नद्धः सगदो राजन् सज्जः संग्राममूर्धनि ।
अब्रवीत्पाण्डवान्सर्वान्पुत्रो दुर्योधनस्तव ॥ ६५ ॥
भ्रातॄणां भवतामेको युध्यतां गदया मया ।
सहदेवेन वा योत्स्ये भीमेन नकुलेन वा ॥ ६६ ॥
अथवा फाल्गुनेनाद्य त्वया वा भरतर्षभ ।
योत्स्येऽहं संगरं प्राप्य विजेष्ये च रणाजिरे ॥ ६७ ॥
अहमद्य गमिष्यामि वैरस्यान्तं सुदुर्गमम् ।
गदया पुरुषव्याघ्र हेमपट्टनिबद्धया ॥ ६८ ॥
गदायुद्धे न मे कश्चित्सदृशोऽस्तीति चिन्तये ।
गदया वो हनिष्यामि सर्वानेव समागतान् ॥ ६९ ॥
न मे समर्थाः सर्वे वै योद्धुं नान्येन केचन ।
न युक्तमात्मना वक्तुमेवं गर्वोद्धतं वचः ।
अथवा सफलं ह्येतत्करिष्ये भवतः पुरः ॥ ७० ॥
अस्मिन्मुहूर्ते सत्यं वा मिथ्या वैतद्भविष्यति ।
गृह्णातु च गदां यो वै योत्स्यतेऽद्य मया सह ॥७१॥ [१९७६]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यांतर्गतगदापर्वणि
सुयोधनयुधिष्ठिरसंवादे द्वात्रिंशोऽध्यायः ॥३२॥

दीखने लगी। तब गदा लेकर दुर्योधन खडे हुए और ऐसा बोले, पांचो पाण्डवोंमेंसे जिसकी इच्छा हो सो गदा लेकर हमसे युद्ध करनेको आवें। चाहे सहदेव, चाहे भीमसेन, चाहे नकुल, चाहे अर्जुन और चाहे साक्षात् युधिष्ठिर ही मुझसे क्यों न लडे, आज सबको मारूंगा। (६३-६७)

आज मैं सोनेकी मढी गदासे युद्ध करके इस वैरके पार जाऊंगा, मुझे यह निश्चय है कि जगत्में मेरे समान कोई गदायुद्ध नहीं जानता, इसलिये यदि धर्मसे लडोगे तो मैं तुम सबोंको मार डालूंगा। परन्तु मुझे ऐसे अभिमानके वचन न कहने चाहिये, अथवा जो कहता हूं वह सब सत्य करके दिखला दूंगा, इसलिये कहनेमें कुछ दोष नहीं; अधिक क्या कहूँ, जिसे युद्ध करना हो सो गदा लेकर आवे। हमारे वचन सत्य हैं वा झूठ हैं सो प्रत्यक्ष होजावेंगे ॥ (६८—७१) [१९७६]

शल्यपर्वमें बत्तीस अध्याय समाप्त।

सञ्जय उवाच— एवं दुर्योधने राजन्गर्जमाने मुहुर्मुहुः ।
युधिष्ठिरस्य संक्रुद्धो वासुदेवोऽब्रवीदिदम् ॥ १ ॥
यदि नाम ह्ययं युद्धे वरयेत्त्वां युधिष्ठिर ।
अर्जुनं नकुलं चैव सहदेवमथापि वा ॥ २ ॥
किमिदं साहसं राजंस्त्वया व्याहृतमीदृशम् ।
एकमेव निहत्याजौ भव राजा कुरुष्विति ॥ ३ ॥
न समर्थानहं मन्ये गदाहस्तस्य संयुगे ।
एतेन हि कृता योग्या वर्षाणीह त्रयोदश ॥ ४ ॥
आयसे पुरुषे राजन्भीमसेनजिघांसया ।
कथं नाम भवेत्कार्यमस्माभिर्भरतर्षभ ॥ ५ ॥
साहसं कृतवांस्त्वं तु ह्यनुक्रोशान्नृपोत्तम ।
नान्यमस्यानुपश्यामि प्रतियोद्धारमाहवे ॥ ६ ॥
ऋते वृकोदरात्पार्थात्स च नातिकृतश्रमः ।
तदिदं द्यूतमारब्धं पुनरेव यथा पुरा ॥ ७ ॥
विषमं शकुनेश्चैव तव चैव विशांपते ।
बली भीमः समर्थश्च कृती राजा सुयोधनः ॥ ८ ॥
बलवान्वा कृती वेति कृती राजन्विशिष्यते ।
सोऽयं राजंस्त्वया शत्रुः समे पथि निवेशितः ॥ ९ ॥

शल्यपर्वमें तेहेतीस अध्याय ।

सञ्जय बोले, हे राजन् धृतराष्ट्र ! दुर्योधनको इस प्रकार गर्जते देख श्रीकृष्ण बोले, हे युधिष्ठिर ! आपने यह क्या भूल करी जो दुर्योधनको यह वरदान दिया कि हम पांचोंमेंसे एकको मारकर राजा बनोगे, यदि अब यह तुमसे, अर्जुनसे, नकुलसे या सहदेवसे युद्ध करना चाहे तो क्या हो ? इसने तेरह वर्षतक लोहेके भीमसेन बनाकर तोडनेका अभ्यास किया है, तब हम लोगोंकी कार्यसिद्धि कैसे होगी ? (१-५)

हे राजोंमें श्रेष्ठ ! हम इस समयमें भीमसेनके सिवाय और किसीको ऐसा नहीं देखते जो दुर्योधनको जीत सके। आपने क्रोध और साहसमें भर करके ऐसे वचन कह दिये जैसे शकुनी और आपसे पहिले जुवा हुआ था, वैसे ही अब यह दूसरा जुआ होगया, जो हो अब तो भीमसेन बलवान और समर्थ हैं, परन्तु राजा दुर्योधन चतुर और चालाक हैं, चतुर बलवानसे सदा तेज रहता

न्यस्तश्चात्मा सुविषमे कृच्छ्रमापादिता वयम् ।
को नु सर्वान्विनिर्जित्य शत्रूनेकेन वैरिणा ॥ १० ॥
कृच्छ्रप्राप्तेन च तथा हारयेद्राज्यमागतम् ।
पणित्वा चैकपाणेन रोचयेदेवमाहवम् ॥ ११ ॥
न हि पश्यामि तं लोके योऽद्य दुर्योधनं रणे ।
गदाहस्तं विजेतुं वै शक्तः स्यादमरोऽपि हि ॥ १२ ॥
न त्वं भीमो न नकुलः सहदेवोऽथ फाल्गुनः ।
जेतुं न्यायेन शक्तो वै कृती राजा सुयोधनः ॥ १३ ॥
स कथं वदसे शत्रुं युध्यस्व गदयेति हि ।
एकं च नो निहत्याजौ भव राजेति भारत ॥ १४ ॥
वृकोदरं समासाद्य संशयो वै जये हि नः ।
न्यायतो युध्यमानानां कृती ह्येष महाबलः ॥ १५ ॥
एकं वास्मान्निहत्य त्वं भव राजेति वै पुनः ।
नूनं न राज्यभागेषा पाण्डोः कुन्त्याश्च सन्ततिः ॥ १६ ॥
अत्यन्तवनवासाय सृष्टा भैक्ष्याय वा पुनः ।
भीमसेन उवाच- मधुसूदन मा कार्षीर्विषादं यदुनन्दन ॥ १७ ॥
अद्य पारं गमिष्यामि वैरस्य भृश दुर्गमम् ।

है, यह नियम है ऐसे चालाक शत्रुके सङ्गमें अपने घोर प्रतिज्ञा करके, आप आपत्तिमें पडे और हम लोगोंको भी दुःखमें डाला, ऐसा कौन राजा होगा जो इतने युद्धसे प्राप्तहुए राज्यको एक मनुष्यके मरनेपर शत्रुके हाथमें देदे ? हमें कोई ऐसा मनुष्य और देवता नहीं दीखता जो गदाधारी दुर्योधनको जीत सकै । (५—१२)

आप भीमसेन, नकुल, सहदेव और अर्जुन पांचौमें कोई ऐसा नहीं है जो धर्मसे युद्ध करते हुए दुर्योधनको जीत सकै; तब आपने ऐसा क्यों कहा कि गदासे युद्ध करो ? और एकको मार कर राजा हो जाओ ? राजा दुर्योधन बडा चतुर है, इसलिये भीमसेन उन्हें जीत सकैं या नहीं इसमें हमें सन्देह है, हमें यह निश्चय होता है कि पाण्डु और कुन्तीकी सन्तान केवल भीख मांगने और वनमें रहनेहीके लिये उत्पन्न हुई है राज्य भोगनेको नहीं । भीमसेन बोले, हे यदुकुलश्रेष्ठ ! आप कुछ भय मत कीजिये हम निःसन्देह दुर्योधनको मारेंगे और इस घोर वैरके पार

अहं सुयोधनं संख्ये हनिष्यामि न संशयः ॥ १८ ॥
विजयो वै ध्रुवः कृष्ण धर्मराजस्य दृश्यते ।
अध्यर्धेन गुणेनेयं गदा गुरुतरी मम ॥ १९ ॥
न तथा धार्तराष्ट्रस्य माऽकार्षीर्माधव व्यथाम् ।
अहमेनं हि गदया संयुगे योद्धुमुत्सहे ॥ २० ॥
भवन्तः प्रेक्षकाः सर्वे मम सन्तु जनार्दन ।
सामरानपि लोकांस्त्रीन्नानाशस्त्रधराण्युधि ॥ २१ ॥
योधयेयं रणे कृष्ण किमुताद्य सुयोधनम् ।
सञ्जय उवाच— तथा सम्भाषमाणं तु वासुदेवो वृकोदरम् ॥ २२ ॥
हृष्टः सम्पूजयामास वचनं चेदमब्रवीत् ।
त्वामाश्रित्य महाबाहो धर्मराजो युधिष्ठिरः ॥ २३ ॥
निहतारिः स्वकां दीप्तां श्रियं प्राप्तो न संशयः ।
त्वया विनिहताः सर्वे धृतराष्ट्रसुता रणे ॥ २४ ॥
राजानो राजपुत्राश्च नागाश्च विनिपातिताः ।
कलिङ्गमागधाः प्राच्या गान्धाराः कुरवस्तथा ॥ २५ ॥
त्वामासाद्य महायुद्धे निहताः पाण्डुनन्दन ।
हत्वा दुर्योधनं चापि प्रयच्छोर्वीं ससागराम् ॥ २६ ॥
धर्मराजाय कौन्तेय यथा विष्णुः शचीपतेः ।

जायगे ॥ (१२—१८)

हमें निश्चय है, कि धर्मराजकी विजय होगी, हमारी दुर्योधनकी गदासे दुगणी भारी है, इसलिये आप मत कीजिये हम दुर्योधनसे गदा युद्ध कर सकते हैं आप सब लोग देखिये हम एकले तीनों लोकोंके सहित शस्त्रधारी देवतों· से युद्ध कर सकते हैं । फिर दुर्योधनकी तो कथा ही क्या है? सञ्जय बोले, भीमसेनके ऐसे वचन सुन उनकी प्रशंसा करके प्रसन्न होकरके श्रीकृष्ण बोले, हे महाबाहो ! तुम्हारे ही आश्रयसे आज राजा युधिष्ठिर शत्रुरहित हुए हैं और तुम्हारे ही आश्रयसे इनको यह उत्तम लक्ष्मी प्राप्त हुई है, तुमने धृतराष्ट्रके सौ पुत्रोंको मारा, तुमने अनेक राजा और राज पुत्रोंको मारा, तुम्हारे पास आते ही कलिङ्ग, मागध, प्राच्य, गान्धार, और कुरुवंशी क्षत्रियोंका नाश होगया । (१८—२५)

जैसे विष्णुने जीत कर स्वर्ग इन्द्रको दिया था, वैसे ही तुम दुर्योधनको मार

त्वां च प्राप्य रणे पापो धार्तराष्ट्रो विनंक्ष्यति॥ २७ ॥
त्वमस्य सक्थिनी भंक्त्वा प्रतिज्ञां पालयिष्यसि।
यत्नेन तु सदा पार्थ योद्धव्यो धृतराष्ट्रजः ॥ २८ ॥
कृती च बलवांश्चैव युद्धशौण्डश्च नित्यदा।
ततस्तु सात्यकी राजन्पूजयामास पाण्डवम् ॥ २९ ॥
पञ्चालाः पाण्डवेयाश्च धर्मराजपुरोगमाः।
तद्वचो भीमसेनस्य सर्वे एवाभ्यपूजयन् ॥ ३० ॥
ततो भीमबलो भीमो युधिष्ठिरमथाब्रवीत्।
सृञ्जयैः सह तिष्ठन्तं तपन्तमिव भास्करम् ॥ ३१ ॥
अहमेतेन सङ्गम्य संयुगे योद्धुमुत्सहे।
न हि शक्तो रणे जेतुं मामेष पुरुषाधमः ॥ ३२ ॥
अद्य क्रोधं विमोक्ष्यामि निहितं हृदये भृशम्।
सुयोधने धार्तराष्ट्रे खाण्डवेऽग्निमिवार्जुनः ॥ ३३ ॥
शल्यमद्योद्धरिष्यामि तव पाण्डव हृच्छयम्।
निहत्य गदया पापमद्य राजन् सुखी भव ॥ ३४ ॥
अद्य कीर्तिमयीं मालां प्रतिमोक्ष्ये तवानघ।
प्राणान् श्रियं च राज्यं च मोक्ष्यतेऽद्य सुयोधनः॥३५ ॥
राजा च धृतराष्ट्रोऽद्य श्रुत्वा पुत्रं मया हतम्।

कर सब पृथ्वी युधिष्ठिरको दो, हमें यह निश्चय है कि तुम इसे मारोगे तुम उसकी जङ्घा तोड कर अपनी प्रतिज्ञा पालन करना। यह चालाक, बलवान् और महायोद्धा है इसलिये यत्नके सहित सावधान होकर इससे युद्ध करना। हे राजन्! तब सात्यकी युधिष्ठिरादि पाण्डव और धृष्टद्युम्नादि पाञ्चाल भीमसेनकी प्रशंसा करने लगे। तब महाबलवान भीमसेन सृञ्जयवंशी क्षत्रियोंके बीचमें खडे सूर्यके समान तेजस्वी युधिष्ठिरसे बोले। (२५-३१)

हे महाराज! मैं इससे युद्ध कर सक्ता हूं, यह नीच मुझे नहीं जीत सक्ता है, जैसे अर्जुनने खाण्डव वनको जलाके अपना महा क्रोध शान्त किया था, वैसे ही आज मैं दुर्योधनको मारकर अपने हृदयमें भरे क्रोधको शान्त करूंगा, आज पापीको गदासे मारकर आपके हृदयका शल्य निकालूंगा। हे पापरहित आप प्रसन्न हूजिए, आज विजय और कीर्त्ति माला पहिनोगे, मूर्ख दुर्योधन

सास्मिष्यत्यशुभं कर्म यत्तच्छकुनिबुद्धिजम् ॥ ३६ ॥
इत्युक्त्वा भरतश्रेष्ठो गदामुद्यम्य वीर्यवान् ।
उदतिष्ठत युद्धाय शक्रो वृत्रमिवाह्वयन् ॥ ३७ ॥
तदाह्वानममृष्यन्वै तव पुत्रोऽतिवीर्यवान् ।
प्रत्युपस्थित एवाशु मत्तो मत्तमिव द्विपम् ॥ ३८ ॥
गदाहस्तं तव सुतं युद्धाय समुपस्थितम् ।
ददृशुः पाण्डवाः सर्वे कैलासमिव शृङ्गिणम् ॥ ३९ ॥
तमेकाकिनमासाद्य धार्तराष्ट्रं महाबलम् ।
वियूथमिव मातङ्गं समहृष्यन्त पाण्डवाः ॥ ४० ॥
न सम्भ्रमो न च भयं न च ग्लानिर्न च व्यथा ।
आसीद्दुर्योधनस्यापि स्थितः सिंह इवाहवे ॥ ४१ ॥
समुद्यतगदं दृष्ट्वा कैलासमिव शृङ्गिणम् ।
भीमसेनस्तदा राजन् दुर्योधनमथाब्रवीत् ॥ ४२ ॥
राज्ञाऽपि धृतराष्ट्रेण त्वया चास्मासु यत्कृतम् ।
स्मर तद्दुष्कृतं कर्म यद्वृत्तं वारणावते ॥ ४३ ॥
द्रौपदी च परिक्लिष्टा सभामध्ये रजस्वला ।

राज्य, धन और प्राणोंसे छूटेगा, आज अपने पुत्रको मरा हुआ सुन राजा धृतराष्ट्र शकुनिकी सम्मतिसे किये हुए पापका स्मरण करेंगे ॥ (३१—३६)

ऐसा कह कर भरतकुलश्रेष्ठ बलवान भीमसेन गदा लेकर खडे होगये और जैसे इन्द्रने वृत्रासुरको ललकारा था वैसेही दुर्योधनको पुकारने लगे। दुर्योधन भी उस ललकारको क्षमा न कर सके और जैसे मतवाला हाथी मतवाले हाथीकी ओर युद्ध करनेको दौडता है, ऐसे भीमसेनकी ओरको दौडे। गदाधारी दुर्योधनको पाण्डवोंने शिखरधारी कैलाशके समान देखा; महाबलवान एकले दुर्योधनका सब पाण्डव इस प्रकार साहस बढाने लगे जैसे झुण्डसे छूटे हाथीका। (३६-४०)

राजा दुर्योधनको उस समय न कुछ घबडाहट थी, न कुछ भय था, न कुछ थकाई थी, और न कुछ दुःख था, वे सिंहके समान युद्धमें खडे थे, उन्हें गदा धारण किये शिखरधारी पर्वतके समान खडा देख भीमसेन बोले, वारणवत नगरमें राजा धृतराष्ट्रने और तुमने जो हमारे सङ्ग अधर्म किया था, उसको स्मरण करो, रजस्वला द्रौपदी को

द्यूते यद्विजितो राजा शकुनेर्बुद्धिनिश्चयात् ॥ ४४ ॥
यानि चान्यानि दुष्टात्मन् पापानि कृतवानसि ।
अनागःसु च पार्थेषु तस्य पश्य महत्फलम् ॥ ४५ ॥
त्वत्कृते निहतः शेते शरतल्पे महायशाः ।
गाङ्गेयो भरतश्रेष्ठः सर्वेषां नः पितामहः ॥ ४६ ॥
हतो द्रोणश्च कर्णश्च हतः शल्यः प्रतापवान् ।
वैरस्य चादिकर्ताऽसौ शकुनिर्निहतो रणे ॥ ४७ ॥
भ्रातरस्ते हताः शूराः पुत्राश्च सहसैनिकाः ।
राजानश्च हताः शूराः समरेष्वनिवर्तिनः ॥ ४८ ॥
एते चान्ये च निहता बहवः क्षत्रियर्षभाः ।
प्रातिकामी तथा पापो द्रौपद्याः क्लेशकृद्धतः ॥ ४९ ॥
अवशिष्टस्त्वमेवैकः कुलघ्नोऽधमपूरुषः ।
त्वामप्यद्य हनिष्यामि गदया नात्र संशयः ॥ ५० ॥
अद्य तेऽहं रणे दर्पं सर्वं नाशयिता नृप ।
राज्याशां विपुलां राजन् पाण्डवेषु च दुष्कृतम् ॥ ५१ ॥
दुर्योधन उवाच—किं कत्थितेन बहुना युद्ध्यस्वाद्य मया सह ।
अद्य तेऽहं विनेष्यामि युद्धश्रद्धां वृकोदर ॥ ५२ ॥

सभामें दुःख दिया था, शकुनी के छलसे महाराजको जीताथा, और भी धर्मात्मा पाण्डवोंके सङ्ग तुमने जो जो पाप किये हैं आज उन सबका फल देखोगे। (४१—४५)

रे दुष्टात्मा! तेरे ही पापसे महायशस्वी भरतकुल श्रेष्ठ हम सबके पितामह भीष्म शरशय्यापर सोते हैं, तेरे ही पापसे गुरु द्रोणाचार्य, कर्ण, महाप्रतापी शल्य और वैरका मूल शकुनी मारा गया, तुम्हारे सब वीर भाई, बेटे, महायोद्धा अनेक राजा और उत्तम क्षत्रियों का नाश हुआ। पापी, द्रौपदीका क्लेश देनेवाला प्रातिकामी भी मारा गया। अब एक कुलनाशन पुरुषाधम तुही बचा है, सो अब गदासे तुझे भी निःसंदेह मार डालूंगा, आज तेरा महा घोर अभिमान जिससे पाण्डवोंको राज्य मिलना बहुत कठिन था, उसे गदासे तोड़ूंगा। (४६—५१)

दुर्योधन बोले, रे पापी भीमसेन! वृथा बकनेसे क्या होगा? आज मैं तेरी युद्ध श्रद्धाका नाश करदूंगा आज मुझसे युद्ध कर, रे पापी! क्या तू नहीं

किं न पश्यसि मां पाप गदायुद्धे व्यवस्थितम् ।
हिमवच्छिखराकारां प्रगृह्य महतीं गदाम् ॥ ५३ ॥
गदिनं कोऽद्य मां पाप हन्तुमुत्सहते रिपुः ।
न्यायतो युध्यमानस्य देवेष्वपि पुरन्दरः ॥ ५४ ॥
मा वृथा गर्ज कौन्तेय शारदाभ्रमिवाजलम् ।
दर्शय स्वबलं युद्धे यावत्तत्तेऽद्य विद्यते ॥ ५५ ॥
तस्य तद्वचनं श्रुत्वा पाण्डवाः सहसृञ्जयाः ।
सर्वे सम्पूजयामासुस्तद्वचो विजिगीषवः ॥ ५६ ॥
उन्मत्तमिव मातङ्गं तलशब्देन मानवाः ।
भूयः संहर्षयामासू राजन्दुर्योधनं नृपम् ॥ ५७ ॥
बृंहन्ति कुञ्जरास्तत्र हया हेषन्ति चासकृत् ।
शस्त्राणि सम्प्रदीप्यन्ते पाण्डवानां जयैषिणाम् ॥५८॥२०३४

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि भीमसेनदुर्योधनसंवादे त्रयस्त्रिंशोऽध्यायः ॥ ३३॥

सञ्जय उवाच— तस्मिन्युद्धे महाराज सुसंवृत्ते सुदारुणे ।
उपविष्टेषु सर्वेषु पाण्डवेषु महात्मसु ॥ १ ॥
ततस्तालध्वजो रामस्तयोर्युद्ध उपस्थिते ।
श्रुत्वा तच्छिष्ययो राजन्नाजगाम हलायुधः ॥ २ ॥
तं दृष्ट्वा परमप्रीताः पाण्डवाः सहकेशवाः ।

देखता है कि मैं हिमाचलके शिखरके समान भारी गदा लिये खडा हूं? ऐसा कौन शत्रु है, कि जो गदा धारण करने पर भी मुझको जीत सके। न्यायसे तो मुझे इन्द्र भी नहीं जीत सक्ता, हे कुन्ती पुत्र! शरद्कालके जल रहित मेघके समान मत गर्ज, जो तुझमें बल हो सो दिखला। (५२-५५)

दुर्योधनके वचन सुन सब पाण्डव और सृञ्जय उनकी प्रशंसा करने लगे, जैसे मतवाले हाथीको कोई क्रोधित करता है, ऐसे ही सब ताली बजाकर दुर्योधनका क्रोध बढाने लगे। हाथी, घोडे गर्जने लगे, और विजयी पाण्डव शस्त्र चमकाने लगे। (५६-५८)

शल्यपर्वमें तेंतीस अध्याय समाप्त। [२०३४]

शल्यपर्वमें चौंतीस अध्याय।

सञ्जय बोले, हे महाराज! जब इन दोनोंका घोर युद्ध होनेको उपस्थित हुआ, तब बलराम तीर्थोंसे घूमते हुए यह युद्ध देखनेको आये। उनको देखकर श्रीकृष्णके सहित सब प्रसन्न होकर

उपगम्योपसंगृह्य विधिवत्प्रत्यपूजयन् ॥ ३ ॥
पूजयित्वा ततः पश्चादिदं वचनमब्रुवन् ।
शिष्ययोः कौशलं युद्धे पश्य रामेति पार्थिव ॥ ४ ॥
अब्रवीच्च तदा रामो दृष्ट्वा कृष्णं सपाण्डवम् ।
दुर्योधनं च कौरव्य गदापाणिमवस्थितम् ॥ ५ ॥
चत्वारिंशदहान्यद्य द्वे च मे निःसृतस्य वै ।
पुष्येण सम्प्रयातोऽस्मि श्रवणे पुनरागतः ॥ ६ ॥
शिष्ययोर्वै गदायुद्धं द्रष्टुकामोऽस्मि माधव ।
ततस्तदा गदाहस्तौ दुर्योधनवृकोदरौ ॥ ७ ॥
युद्धभूमिं गतौ वीरावुभावेव रराजतुः ।
ततो युधिष्ठिरो राजा परिष्वज्य हलायुधम् ॥ ८ ॥
स्वागतं कुशलं चास्मै पर्यपृच्छद्यथातथम् ।
कृष्णौ चापि महेष्वासावभिवाद्य हलायुधम् ॥ ९ ॥
सस्वजाते परिप्रीतौ प्रियमाणौ यशस्विनौ ।
माद्रीपुत्रौ तथा शूरौ द्रौपद्याः पंच चात्मजाः ॥ १० ॥
अभिवाद्य स्थिता राजन् रौहिणेयं महाबलम् ।
भीमसेनोऽथ बलवान्पुत्रस्तव जनाधिप ॥ ११ ॥
तथैव चोद्यतगदौ पूजयामासतुर्बलम् ।
स्वागतेन च ते तत्र प्रतिपूज्य समंततः ॥ १२ ॥

खडे होगये और यथा योग्य सत्कार करके कहने लगे कि अपने दोनों शिष्योंका युद्ध देखिये। (१-४)

तब बलराम, श्रीकृष्ण और पाण्डवोंको बैठे तथा भीमसेन और दुर्योधन को खडे हुए देख बोले, मैं पुष्य नक्षत्रमें द्वारिकासे गया था, और श्रवणमें लौट कर आया हूं। आज मुझे द्वारिकासे चले बयालिस दिन हुए। अब अपने दोनों शिष्योंका गदा युद्ध देखनेको आया हूं। बलरामकी बात सुन और वीर भीमसेन वीर दुर्योधन गदा हाथमें लेकर युद्ध करनेको अखाडेमें चले गये। (५—८)

तब राजा युधिष्ठिर बलरामको हृदयसे लगाकर कुशल पूंछने, लगे श्रीकृष्ण और महाधनुषधारी यशस्वी अर्जुनने भी प्रसन्न होकर बलरामको प्रणाम किया। भीमसेन और महाबलवान दुर्योधनने गदा लिये ही लिये बलरामको प्रणाम किया। और कुशल पूंछी। सब

पश्य युद्धं महाबाहो इति ते राममब्रुवन् ।
एवमूचुर्महात्मानं रौहिणेयं नराधिपाः ॥ १३ ॥
परिष्वज्य तदा रामः पाण्डवान्सहसृंजयान् ।
अपृच्छत्कुशलं सर्वान् पार्थिवांश्चामितौजसः ॥ १४ ॥
तथैव ते समासाद्य पप्रच्छुस्तमनामयम् ।
प्रत्यभ्यर्च्य हली सर्वान् क्षत्रियांश्च महात्मनः ॥१५॥
कृत्वा कुशलसंयुक्तां संविदं च यथावयः ।
जनार्दनं सात्यकिं च प्रेम्णा स परिषस्वजे ॥ १६ ॥
मूर्ध्नि चैतावुपाघ्राय कुशलं पर्यपृच्छत ।
तौ च तं विधिवद्राजन् पूजयामासतुर्गुरुम् ॥ १७ ॥
ब्रह्माणमिव देवेशमिन्द्रोपेन्द्रौ मुदान्वितौ ।
ततोऽब्रवीद्धर्मसुतो रौहिणेयमरिन्दमम् ॥ १८ ॥
इदं भ्रात्रोर्महायुद्धं पश्य रामेति भारत ।
तेषां मध्ये महाबाहुः श्रीमान्केशवपूर्वजः ॥ १९ ॥
न्यविशत्परमप्रीतः पूज्यमानो महारथैः ।
स बभौ राजमध्यस्थो नीलवासाः सितप्रभः ॥ २० ॥
दिवीव नक्षत्रगणैः परिकीर्णो निशाकरः ।
ततस्तयोः संनिपातस्तुमुलो लोमहर्षणः ॥ २१ ॥

राजा और महात्मा क्षत्री बलरामके चारों ओर बैठकर कहने लगे कि आप इन दोनोंका युद्ध देखिये । महात्मा रोहिणीपुत्र बलराम भी पाण्डव और सृञ्जयोंसे मिलकर कुशल प्रश्न पूछने लगे और सब राजोंसे भी कुशल पूंछी, उन सब राजाओंने भी बलरामसे कुशल पूंछी । (८-१४)

इस प्रकार सबसे कुशल प्रश्न करके महात्मा बलरामने प्रेम सहित श्रीकृष्ण और सात्यकीको अपनी छातीसे लगाकर माथा सूङ्कर कुशल प्रश्न किया । इन दोनोंने भी अपने गुरु बलरामकी कुशल पूंछ, इस प्रकार पूजा करी जैसे इन्द्र और उपेन्द्र ब्रह्माकी पूजा करते हैं । तब महाराज युधिष्ठिरने शत्रुनाशन रोहिणी पुत्रसे कहा कि हे राम ! अब आप इन दोनों भाइयोंका घोर युद्ध देखिये, उन सब महात्मा महारथ क्षत्रियोंके बीचमें बैठकर नीलाम्बरधारी गोरेवर्णवाले बलराम इस प्रकार शोभित हुए जैसे तारोंके बीचमें पूर्णचन्द्रमा । तब दुर्योधन और भीम-

आसीदन्तकरो राजन्वैरस्य तव पुत्रयोः ॥ २२ ॥ [२०५६]

इति श्रीमहाभारते० संहितायां वैयासिक्यां शल्यपर्वांतर्गतगदापर्वणि बलदेवागमने चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

जनमेजय उवाच- पूर्वमेव यदा रामस्तस्मिन्युद्ध उपस्थिते ।
आमंत्र्य केशवं यातो वृष्णिभिः सहितः प्रभुः ॥ १ ॥
साहाय्यं धार्त्तराष्ट्रस्य न च कर्ताऽस्मि केशव ।
न चैव पाण्डुपुत्राणां गमिष्यामि यथागतम् ॥ २ ॥
एवमुक्त्वा तदा रामो यातः क्षत्रनिवर्हणः ।
तस्य चागमनं भूयो ब्रह्मन् शंसितुमर्हसि ॥ ३ ॥
आख्याहि मे विस्तरशः कथं राम उपस्थितः ।
कथं च दृष्टवान्युद्धं कुशलो ह्यसि सत्तम ॥ ४ ॥
वैशंपायन उवाच- उपप्लव्ये निविष्टेषु पाण्डवेषु महात्मसु ।
प्रेषितो धृतराष्ट्रस्य समीपं मधुसूदनः ॥ ५ ॥
शमं प्रति महाबाहो हितार्थं सर्वदेहिनाम् ।
स गत्वा हास्तिनपुरं धृतराष्ट्रं समेत्य च ॥ ६ ॥
उक्तवान्वचनं तथ्यं हितं चैव विशेषतः ।
न च तत्कृतवान् राजा यथाऽऽख्यातं हि तत्पुरा ॥७॥

सेनका घोर युद्ध होने लगा। दोनोंकी यही इच्छा हुई की इस वैरको समाप्त कर दें। (१५—२२) [२०५६]

शल्यपर्वमें चौतीस अध्याय समाप्त।

शल्यपर्वमें पैंतीस अध्याय।

महाराज जनमेजय बोले, हे ब्राह्मण श्रेष्ठ ! जिस समय कौरव और पाण्डवों-का युद्ध होनेवाला था, तब ही बलराम श्रीकृष्णकी सम्मतिसे यदुवंशियोंके सहित तीर्थयात्राको चले गए थे और यह कह गए थे कि हम इन दोनोंमेंसे किसीकी सहायता नहीं करेंगे। परन्तु वे फिर क्यों चले आए। यह कथा आप हमसे विस्तारपूर्वक कहिये, आप सब वृत्तान्तको जानते हैं। इसलिये कहिए कि बलरामने इस युद्धको किस प्रकार देखा ? (१—४)

श्रीवैशम्पायन मुनि बोले, जब महात्मा पाण्डव विराट नगरके उपप्लव अर्थात् उपनगर या छावनी में रहते थे, उसी समय युधिष्ठिरने सब जगत्के कल्याण के लिये और सन्धिके लिये, श्रीकृष्णको हस्तिनापुर भेजा था, उन्होंने वहां जाकर राजा धृतराष्ट्रसे यथार्थ वचन कहे थे, परन्तु उन्होंने नहीं माने यह कथा हम पहिले तुमसे कह चुके हैं।

अनवाप्य शमं तत्र कृष्णः पुरुषसत्तमः ।
आगच्छत महाबाहुरुपप्लव्यं जनाधिप ॥ ८ ॥
ततः प्रत्यागतः कृष्णो धार्तराष्ट्रविसर्जितः ।
अक्रियायां नरव्याघ्र पाण्डवानिदमब्रवीत् ॥ ९ ॥
न कुर्वन्ति वचो मह्यं कुरवः कालनोदिताः ।
निर्गच्छध्वं पाण्डवेयाः पुष्येण सहिता मया ॥ १० ॥
ततो विभज्यमानेषु बलेषु बलिनां वरः ।
प्रोवाच भ्रातरं कृष्णं रौहिणेयो महामनाः ॥ ११ ॥
तेषामपि महाबाहो साहाय्यं मधुसूदन ।
क्रियतामिति तत्कृष्णो नास्य चक्रे वचस्तदा ॥ १२ ॥
ततो मन्युपरीतात्मा जगाम यदुनन्दनः ।
तीर्थयात्रां हलधरः सरस्वत्यां महायशाः ॥ १३ ॥
मैत्रनक्षत्रयोगे स्म सहितः सर्वयादवैः ।
आश्रयामास भोजस्तु दुर्योधनमरिन्दमः ॥ १४ ॥
युयुधानेन सहितो वासुदेवस्तु पाण्डवान् ।
रौहिणेये गते शूरे पुष्येण मधुसूदनः ॥ १५ ॥
पाण्डवेयान्पुरस्कृत्य ययावभिमुखः कुरून् ।
गच्छन्नेव पथिस्थस्तु रामः प्रेष्यानुवाच ह ॥ १६ ॥

जब सन्धि न हुई तब महाबाहु पुरुषश्रेष्ठ श्रीकृष्ण लौटकर पाण्डवोंके पास आगये और कहने लगे कि, हे पाण्डव ! कुरुवंशके नाशका समय आगया, कौरवोंने हमारे वचन नहीं माने, आज पुष्य नक्षत्र है ! युद्ध करने को चलो। जब सेनाका विभाग होने लगा, तब महाबलवान रोहिणीपुत्र बलरामने अपने भाई श्रीकृष्णसे कहा कि, हे यदुनन्दन ! तुम दुर्योधनकी भी सहायता करो, परन्तु श्रीकृष्णने उनके वचन नहीं माने। (५-१२)

तब महायशस्वी बलराम पुष्यनक्षत्रमें तीर्थयात्राको चले गए, जिस दिन बलराम श्रीकृष्णसे बिदा हुए, उस दिन पुष्य और जिस दिन द्वारिकासे चले, उस दिन अनुराधा नक्षत्र था, बलरामके सङ्ग मुख्य यदुवंशी सब चले गये, उसी दिन शत्रुनाशन कृतवर्मा दुर्योधनके पास और सात्यकी सहित श्रीकृष्ण पाण्डवोंके पास चले गये, उस ही पुष्यनक्षत्रमें पाण्डवोंने कौरवोंसे युद्ध

संभारांस्तीर्थयात्रायां सर्वोपकरणानि च।
आनयध्वं द्वारकायामग्नीन्वै याजकांस्तथा ॥ १७ ॥
सुवर्णरजतं चैव धेनुर्वासांसि वाजिनः।
कुञ्जरांश्च रथांश्चैव खरोष्ट्रं वाहनानि च ॥ १८ ॥
क्षिप्रमानीयतां सर्वं तीर्थहेतोः परिच्छदम्।
परिस्रोतः सरस्वत्या गच्छध्वं शीघ्रगामिनः ॥ १९ ॥
ऋत्विजश्चानयध्वं वै शतशश्च द्विजर्षभान्।
एवं संदिश्य तु प्रेष्यान्बलदेवो महाबलः ॥ २० ॥
तीर्थयात्रां ययौ राजन्कुरूणां वैशसे तदा।
सरस्वतीं प्रतिस्रोतः समंताद्भिजग्मिवान् ॥ २१ ॥
ऋत्विग्भिश्च सुहृद्भिश्च तथाऽन्यैर्द्विजसत्तमैः।
रथैर्गजैस्तथाऽश्वैश्च प्रेष्यैश्च भरतर्षभ ॥ २२ ॥
गोखरोष्ट्रप्रयुक्तैश्च यानैश्च बहुभिर्वृतः।
श्रान्तानां क्लान्तवपुषां शिशूनां विपुलायुषाम् ॥ २३ ॥
देशे देशे तु देयानि दानानि विविधानि च।
अर्चायै चार्थिनां राजन् क्लृप्तानि बहुशस्तथा ॥ २४॥
तानि यानीह देशेषु प्रतीक्षन्ति स्म भारत।
बुभुक्षितानामर्थाय क्लृप्तमन्नं समन्ततः ॥ २५ ॥

करनेकी यात्रा करी। (१३—१६)

बलराम थोडी दूर जाकर दूतोंसे बोले, तुम लोग द्वारिका जावो और तीर्थयात्राकी सब सामग्री लाओ हम सरस्वतीके तटपर मिलेंगे। शीघ्र आवो, सहस्रों यज्ञ करानेवाले, उत्तम ब्राह्मण आदि सामग्री सब ले आवो, उनको वैसी आज्ञा देकर महाबलवान बलराम सरस्वतीके तटको चले गये, फिर द्वारिकासे आए हुए ऋत्विक अर्थात् यज्ञ करानेवाले ब्राह्मण, बान्धव, रथ, हाथी, घोडे, पैदल, बैल, गधे, ऊंट, गाय, अग्नि, याचक, सोना, चांदी, वस्त्र आदि सब वस्तु मिल गई। (१७-२३)

फिर उनको सङ्गमें लेकर सरस्वतीके तटपर घूमने लगे। जिस देशमें जाते थे, तहां भूखे, रोगी, थके, बालक और बूढोंको अनेक प्रकारके धन, वस्त्र और भोजन देते थे, जो ब्राह्मण जिस समय आकर जो मांगता था, उसी समय उसको वही मिलता था, बलरामकी आज्ञासे मार्गमें मनुष्योंने ऐसा प्रबन्ध

यो यो यत्र द्विजो भोज्यं भोक्तुं कामयते तदा ।
तस्य तस्य तु तत्रैवमुपजह्रुस्तदा नृप ॥ २६ ॥
तत्र तत्र स्थिता राजन्रौहिणेयस्य शासनात् ।
भक्ष्यपेयस्य कुर्वन्ति राशींस्तत्र समन्ततः ॥ २७ ॥
वासांसि च महार्हाणि पर्यङ्कास्तरणानि च ।
पूजार्थं तत्र क्लृप्तानि विप्राणां सुखमिच्छताम् ॥ २८ ॥
यत्र यः स्वदते विप्रः क्षत्रियो वाऽपि भारत ।
तत्र तत्र तु तस्यैव सर्वं क्लृप्तमदृश्यत ॥ २९ ॥
यथासुखं जनः सर्वो याति तिष्ठति वै तदा ।
यातुकामस्य यानानि पानानि तृषितस्य च ॥ ३० ॥
बुभुक्षितस्य चान्नानि स्वादूनि भरतर्षभ ।
उपजह्रुर्नरास्तत्र वस्त्राण्याभरणानि च ॥ ३१ ॥
स पन्थाः प्रबभौ राजन्सर्वस्यैव सुखावहः ।
स्वर्गोपमस्तदा वीर नराणां तत्र गच्छताम् ॥ ३२ ॥
नित्यप्रमुदितोपेतः स्वादुभक्ष्यः शुभान्वितः ।
विपण्यापणपण्यानां नानाजनशतैर्वृतः ।
नानाद्रुमलतोपेतो नानारत्नविभूषितः ॥ ३३ ॥
ततो महात्मा नियमे स्थितात्मा पुण्येषु तीर्थेषु वसूनि राजन् ।

किया था कि जहां बलरामके जानेका मार्ग था और जहां उनके ठहरनेका निश्चय होता था, वहां पहिलेहीसे खाने, पीने, वस्त्र, आसन और पलङ्ग आदि सामग्रीके ढेर होजाते थे, ब्राह्मणोंके सत्कारकी सामग्री भी ठीक कर ली थी। (२४-२८)

जो ब्राह्मण वा क्षत्री जिस स्थानमें जो वस्तु खानेकी इच्छा करता था, उसे वहीं वह वस्तु प्राप्त होती थी। जिसे चलनेकी इच्छा हो उसे वाहन, प्यासेको पीनेकी वस्तु और भूखेको स्वादु अन्न लिये हर समय मनुष्य खडे रहते थे। इसी प्रकार वस्त्र और आभूषणोंका भी पूरा प्रबन्ध था, उस समय वह वीर मनुष्योंसे भरा हुआ मार्ग स्वर्गके समान दीखता था, अनेक रत्नोंसे जडे, बाजारमें दूकानोंपर सुन्दर स्वादु खानेकी वस्तु भरी हुई दीखती थी, और फूले हुए वृक्ष और लता शोभित हो रहीं थीं। सैकडों मनुष्य घूमते थे, इस प्रकार महात्मा हलधर बलराम पवित्र

दद‍ौ द्विजेभ्यः क्रतुदक्षिणाश्च यदुप्रवीरो हलभृत्प्रतीतः ॥ ३४ ॥
दोग्ध्रीश्च धेनूश्च सहस्रशो वै सुवाससः काञ्चनबद्धशृङ्गीः ।
हयांश्च नानाविधदेशजातान्यानानि दासांश्च शुभान्द्विजेभ्यः॥३५॥
रत्नानि मुक्तामणिविद्रुमं चाप्यग्र्यं सुवर्णं रजतं सुशुद्धम् ।
अयस्मयन्ताम्रमयं च भाण्डं ददौ द्विजातिप्रवरेषु रामः ॥ ३६ ॥
एवं स वित्तं प्रददौ महात्मा सरस्वतीतीर्थवरेषु भूरि ।
ययौ क्रमेणाप्रतिमप्रभावस्ततः कुरुक्षेत्रमुदारवृत्तिः ॥ ३७ ॥
जनमेजय उवाच- सारस्वतानां तीर्थानां गुणोत्पत्तिं वदस्व मे ।
फलं च द्विपदां श्रेष्ठ कर्मनिर्वृत्तिमेव च ॥ ३८ ॥
यथाक्रमेण भगवंस्तीर्थानामनुपूर्वशः ।
ब्रह्मन्ब्रह्मविदां श्रेष्ठ परं कौतूहलं हि मे ॥ ३९ ॥
वैशम्पायन उवाच- तीर्थानां च फलं राजन्गुणोत्पत्तिं च सर्वशः ।
मयोच्यमानं वै पुण्यं शृणु राजेन्द्र कृत्स्नशः ॥ ४० ॥
पूर्वं महाराज यदुप्रवीर ऋत्विक्सुहृद्विप्रगणैश्च सार्धम् ।
पुण्यं प्रभासं समुपाजगाम यत्रोडुराड्यक्ष्मणा क्लिश्यमानः॥ ४१ ॥
विमुक्तशापः पुनराप्य तेजः सर्वं जगद्भासयते नरेन्द्र ।

होकर ब्राह्मणोंको द्रव्य देते हुए अनेक यज्ञ दान करते हुए तीर्थोंमें घूमने लगे। (२८-३४)

उस यात्रामें घडा भर दूध देनेवाली सोनेकी सींगवाली, उत्तम वस्त्रधारिणी सहस्रों गौ, अनेक देशोंमें उत्पन्न हुए घोडे, वाहन, दास, रत्न, मोती, मणी, मूंगे, सोना, शुद्ध चांदी तथा तांबे और लोहेके सहस्रों बरतन महात्मा ब्राह्मणोंको दान किये। इस प्रकार उदार महानुभाव बलराम सरस्वतीके तटपर बहुत धन दान करते करते क्रमसे कुरुक्षेत्रमें पहुंच गये। (३५-३७)

जनमेजय बोले, हे ब्राह्मणश्रेष्ठ! सरस्वतीके तटपर जो तीर्थ हैं, आप उनके पुण्यफल और कर्मोंका वर्णन हमसे कीजिये, हमारी इन तीर्थोंका क्रम सुननेकी बहुत इच्छा है। (३८-३९)

श्रीवैशम्पायन मुनि बोले, हे महाराज! हे राजेन्द्र! यदुकुलश्रेष्ठ बलराम पहिले द्वारिकासे चलकर ब्राह्मण और अपने बान्धवोंके सहित पवित्र प्रभास क्षेत्रमें पहुंचे, इसी स्थानपर चन्द्रमा राज्ययक्ष्मा रोगसे पीडित हुए थे, और वहीं शापसे छूटकर फिर तेजको प्राप्त हुए थे। वहीं अबतक जगत्में प्रकाश

एवं तु तीर्थप्रवरं पृथिव्यां प्रभासनात्तस्य ततः प्रभासः ॥ ४२ ॥
जनमेजय उवाच- कथं तु भगवान्सोमो यक्ष्मणा समगृह्यत ।
कथं च तीर्थप्रवरे तस्मिंश्चंद्रोन्वमज्जत ॥ ४३ ॥
कथमाप्लुत्य तस्मिंस्तु पुनराप्यायितः शशी ।
एतन्मे सर्वमाचक्ष्व विस्तरेण महामुने ॥ ४४ ॥
वैशम्पायन उवाच- दक्षस्य तनयास्तात प्रादुरासन्विशाम्पते ।
स सप्तविंशतिं कन्या दक्षः सोमाय वै ददौ ॥ ४५ ॥
नक्षत्रयोगनिरताः संख्यानार्थं च ताऽभवन् ।
पत्न्यो वै तस्य राजेन्द्र सोमस्य शुभकर्मणः ॥ ४६ ॥
तास्तु सर्वा विशालाक्ष्यो रूपेणाप्रतिमा भुवि ।
अत्यरिच्यत तासां तु रोहिणी रूपसंपदा ॥ ४७ ॥
ततस्तस्यां स भगवान्प्रीतिं चक्रे निशाकरः ।
साऽस्य हृद्या बभूवाथ तस्मात्तां बुभुजे सदा ॥ ४८ ॥
पुरा हि सोमो राजेन्द्र रोहिण्यामवसत्परम् ।
ततस्ताः कुपिताः सर्वा नक्षत्राख्या महात्मनः ॥४९॥
ता गत्वा पितरं प्राहुः प्रजापतिमतंद्रिताः ।
सोमो वसति नास्मासु रोहिणीं भजते सदा ॥ ५० ॥

करते हैं । चन्द्रमाको तेज इस स्थानमें मिला था इसलिये इसका नाम प्रभास क्षेत्र होगया । (४०-४२)

जनमेजय बोले, हे भगवान् ! भगवान् चन्द्रमाको राजयक्ष्मा रोग क्यों होगया था ? वे इस तीर्थमें आकर क्यों डूबे थे ! और उन्हें फिर तेज कैसे प्राप्त हुआ ? यह सब कथा आप हमसे विस्तार पूर्वक कहिये । (४३-४४)

श्रीवैशम्पायन मुनि बोले, हे राजेन्द्र ! दक्ष प्रजापतिकी नक्षत्र नामक सत्ताइस कन्या थीं । उन्होंने सत्ताइसों कन्या चन्द्रमाको व्याह दीं, जगत्के गिननेके लिये उन्हे ही नक्षत्र कहते हैं। वे सब बडे बडे नत्रोंवाली और असाधारण रूपवाली थीं, परन्तु उन सबमें रोहिणी अधिक रूपवती थी, इसलिये चन्द्रमा उसीसे अधिक प्रेम करते थे, और सदा उसहीके घरमें रहा करते थे। इसालिये सब स्त्री चन्द्रमासे रुष्ट होगई और अपने बाप दक्ष प्रजापतिसे जाकर कहने लगीं कि, हे प्रजापते ! चन्द्रमा हम लोगोंके पास नहीं आते सदा रोहिणीके घरमें रहते हैं इसलिये हम सब

ता वयं सहिताः सर्वास्त्वत्सकाशे प्रजेश्वर ।
वत्स्यामो नियताहारास्तपश्चरणतत्पराः ॥ ५१ ॥
श्रुत्वा तासां तु वचनं दक्षः सोममथाब्रवीत् ।
समं वर्तस्व भार्यासु मा त्वाऽधर्मो महान्स्पृशेत् ॥५२॥
तास्तु सर्वाऽब्रवीद्दक्षो गच्छध्वं शशिनोऽन्तिकम् ।
समं वत्स्यति सर्वासु चन्द्रमा मम शासनात् ॥ ५३ ॥
विसृष्टास्तास्तथा जग्मुः शीतांशुभवनं तदा ।
तथाऽपि सोमो भगवान्पुनरेव महीपते ॥ ५४ ॥
रोहिणीं निवसत्येव प्रीयमाणो मुहुर्मुहुः ।
ततस्ताः सहिताः सर्वा भूयः पितरमब्रुवन् ॥ ५५ ॥
तव शुश्रूषणे युक्ता वत्स्यामो हि तवांतिके ।
सोमो वसति नास्मासु नाकरोद्वचनं तव ॥ ५६ ॥
तासां तद्वचनं श्रुत्वा दक्षः सोममथाब्रवीत् ।
समं वर्तस्व भार्यासु मा त्वां शप्स्ये विरोचन ॥ ५७ ॥
अनादृत्य तु तद्वाक्यं दक्षस्य भगवान् शशी ।
रोहिण्या सार्धमवसत्ततस्ताः कुपिताः पुनः ॥ ५८ ॥
गत्वा च पितरं प्राहुः प्रणम्य शिरसा तदा ।

तुम्हारे पास रहकर तपस्या करेंगी । (४५—५१)

उनके वचन सुनकर दक्ष प्रजापतिने चन्द्रमासे कहा तुम ऐसा महा अधर्म मत करो और सबसे समान प्रेम रखो, फिर अपनी बेटियोंसे कहा कि तुम सब चन्द्रमाके घरको चली जाओ, वे हमारी आज्ञासे सबके सङ्ग समान प्रेम रखेंगे । (५२-५३)

तब वे सब चन्द्रमाके घरमें चली गईं परन्तु भगवान् चन्द्रमा फिर भी रोहिणीसे वैसाही प्रेम करने लगे, तब वे सब फिर अपने पिताके पास जाकर कहने लगीं कि भगवान चन्द्रमा हम लोगोंके पास नहीं रहते, इसलिये हम सब यहीं रहकर आपकी सेवा करेंगी । (५४—५६)

तब दक्ष प्रजापतिने चन्द्रमासे कहा कि तुम सब स्त्रियोंसे समान प्रेम करो नहीं तो तुम्हें शाप देवेंगे । यह कहकर सबको विदा कर दिया, परन्तु भगवान् चन्द्रमा उनके वचनका निरादर करके फिर भी रोहिणी ही के सङ्ग रहने लगे । (५७—५८)

सोमो वसति नास्मासु तस्मान्नः शरणं भव ॥ ५९ ॥
रोहिण्यामेव भगवान्सदा वसति चन्द्रमाः ।
न त्वद्वचो गणयति नास्मासु स्नेहमिच्छति ॥ ६० ॥
तस्मान्नस्त्राहि सर्वा वै यथा नः सोम आविशेत् ।
तच्छ्रुत्वा भगवान् क्रुद्धो यक्ष्माणं पृथिवीपते ॥ ६१ ॥
ससर्ज रोषात्सोमाय स चोडुपतिमाविशत् ।
स यक्ष्मणाऽभिभूतात्मा क्षीयताहरहः शशी ॥ ६२ ॥
यत्नं चाप्यकरोद्राजन् मोक्षार्थं तस्य यक्ष्मणः ।
इष्टेष्टिभिर्महाराज विविधाभिर्निशाकरः ॥ ६३ ॥
न चामुच्यत शापाद्वै क्षयं चैवाभ्यगच्छत ।
क्षीयमाणे ततः सोमे ओषध्यो न प्रजज्ञिरे ॥ ६४ ॥
निरास्वादरसाः सर्वा हतवीर्याश्च सर्वशः ।
ओषधीनां क्षये जाते प्राणिनामपि संक्षयः ॥ ६५ ॥
कृशाश्चासन्प्रजाः सर्वाः क्षीयमाणे निशाकरे ।
ततो देवाः समागम्य सोममूचुर्महीपते ॥ ६६ ॥
किमिदं भवतो रूपमीदृशं न प्रकाशते ।
कारणं ब्रूहि नः सर्वं येनेदं ते महद्भयम् ॥ ६७ ॥

तब फिर वे सब क्रोधित होकर अपने पिताके घर गईं और शिरसे प्रणाम कर कहने लगीं कि चन्द्रमाने आपके वचनको नहीं माना और हम लोगोंसे प्रेम नहीं करते, वे सदा रोहिणी ही के घरमें रहते हैं, इसलिये आप हमको या तो शरण दीजिये अथवा ऐसा उपाय कीजिये जिससे चन्द्रमा हम लोगोंसे प्रेम करें। (५९—६१)

उनके वचन सुन भगवान् दक्ष प्रजापतिने क्रोध करके राजयक्ष्मा रोगको चन्द्रमाके पास भेजा। वह चन्द्रमाके हृदयमें घुस गया तब वह दिन प्रतिदिन क्षीण होने लगे। (६२)

उन्होंने इस रोगके छूटनेके लिये अनेक यज्ञादि यत्न भी किये, परन्तु शाप न छूटा और क्षीण होगये, उनके क्षीण होनेसे औषधी न उत्पन्न हुई और जो उत्पन्न भी हुई वे रस वीर्य और स्वादसे हीन होगई। औषधियोंका नाश होनेसे प्रजाका नाश होने लगा; मनुष्य दुर्बल और हीन होगये। (६१—६६)

तब सब देवता चन्द्रमाके पास जाकर बोले, कि आपका यह रूप अब

श्रुत्वा तु वचनं त्वत्तो विधास्यामस्ततो वयम् ।
एवमुक्तः प्रत्युवाच सर्वास्तान् शशलक्षणः ॥ ६८ ॥
शापस्य लक्षणं चैव यक्ष्माणं च तथाऽऽत्मनः ।
देवास्तथा वचः श्रुत्वा गत्वा दक्षमथाब्रुवन् ॥ ६९ ॥
प्रसीद भगवन्सोमे शापोऽयं विनिवर्त्यताम् ।
असौ हि चन्द्रमाः क्षीणः किंचिच्छेषो हि लक्ष्यते ॥७०॥
क्षयाच्चैवास्य देवेश प्रजाश्चैव गताः क्षयम् ।
वीरुदोषधयश्चैव बीजानि विविधानि च ॥ ७१ ॥
तेषां क्षये क्षयोऽस्माकं विनास्माभिर्जगच्च किम् ।
इति ज्ञात्वा लोकगुरो प्रसादं कर्तुमर्हसि ॥ ७२ ॥
एवमुक्तस्ततो देवान्प्राह वाक्यं प्रजापतिः ।
नैतच्छक्यं मम वचो व्यावर्तयितुमन्यथा ॥ ७३ ॥
हेतुना तु महाभागा निवर्तिष्यति केनचित् ।
समं वर्ततु सर्वासु शशी भार्यासु नित्यशः ॥ ७४ ॥
सरस्वत्या वरे तीर्थे उन्मज्जन्शशलक्षणः ।
पुनर्वर्धिष्यते देवास्तद्वै सत्यं वचो मम ॥ ७५ ॥

कैसा होगया? आपमें पहिलेके समान तेज क्यों नहीं रहा? यह सब कारण आप हमसे कहिये तब हम लोग उसका उपाय करेंगे। (६७-६८)

देवतोंके वचन सुन चन्द्रमा बोले, कि दक्ष प्रजापतिने शाप दिया है, इस लिये हमें यक्ष्मारोग होगया है। चन्द्रमाके वचन सुन सब देवता दक्ष प्रजापतिके पास जाकर कहने लगे कि, हे भगवान्! अब आप चन्द्रमाके ऊपर कृपा करके इस शापको लौटा लीजिये क्यों कि चन्द्रमा क्षीण हो चुके अब बहुत थोडे शेष हैं, इनके क्षीण होनेसे सब प्रजाका नाश होजायगा, इसलिये आप कृपा कीजिये, चन्द्रमाके क्षीण होनेसे औषधी और बीज नहीं रहेंगे औषधी न रहनेसे हम लोग कैसे रहेंगे यह विचार कर आप कृपा कीजिये। (६९-७२)

देवतोंके वचन सुन दक्ष प्रजापति बोले, हमारा शाप वृथा नहीं हो सक्ता परन्तु यदि चन्द्रमा अपनी सब स्त्रियोंसे समान प्रेम करें तो थोडे ही किसी कारणसे उनका शाप दूर कर सक्ते हैं उपाय हम बतला देते हैं यदि चन्द्रमा सरस्वतीके तीर्थमें स्नान करें तो उनका

मासार्धं च क्षयं सोमो नित्यमेव गमिष्यति ।
मासार्धं तु सदा वृद्धिं सत्यमेतद्वचो मम ॥ ७६ ॥
समुद्रं पश्चिमं गत्वा सरस्वत्यब्धिसंगमम् ।
आराधयतु देवेशं ततः कांतिमवाप्स्यति ॥ ७७ ॥
सरस्वतीं ततः सोमः स जगामर्षिशासनात् ।
प्रभासं प्रथमं तीर्थं सरस्वत्या जगाम ह ॥ ७८ ॥
अमावास्यां महातेजास्तत्रोन्मज्जन्महाद्युतिः ।
लोकान्प्रभासयामास शीतांशुत्वमवाप च ॥ ७९ ॥
देवास्तु सर्वे राजेन्द्र प्रभासं प्राप्य पुष्कलम् ।
सोमेन सहिता भूत्वा दक्षस्य प्रमुखेऽभवन् ॥ ८० ॥
ततः प्रजापतिः सर्वा विससर्जाथ देवताः ।
सोमं च भगवान्प्रीतो भूयो वचनमब्रवीत् ॥ ८१ ॥
माऽवमंस्थाः स्त्रियः पुत्र मा च विप्रान्कदाचन ।
गच्छ युक्तः सदा भूत्वा कुरु वै शासनं मम ॥ ८२ ॥
स विसृष्टो महाराज जगामाथ स्वमालयम् ।
प्रजाश्च मुदिता भूत्वा पुनस्तस्थुर्यथा पुरा ॥ ८३ ॥
एवं ते सर्वमाख्यातं यथा शप्तो निशाकरः ।

तेज फिर वैसाही होजायगा; हमारे यह वचन सत्य हैं परन्तु इतना शाप बना ही रहेगा; आधे महीने तक चन्द्रमा क्षीण हुआ करेगा और आधे महिने बढा करेंगे, ये पश्चिम समुद्रके तट पर जाके सरस्वती और समुद्रके सङ्गममें शिवको पूजा करें तब फिर तेज बढ जायगा । (७२-७७)

उस चन्द्रमा ऋषियोंकी आज्ञासे अमावस तिथिको सरस्वती तीर्थ पर पहुंचे तब उनका तेज बढने लगा और किरण शीतल होगई, तब सब देवता प्रभास क्षेत्रमें आकर दक्ष प्रजापतिको प्रणाम करने लगे, और चन्द्रमासे मिले फिर दक्ष प्रजापतिने सब देवतोंको विदा करके चन्द्रमासे कहा, हे पुत्र ! तुम कभी अपनी किसी स्त्रीका और द्विजोंका अपमान न करना और सदा हमारी आज्ञामें रहना । (७८-८२)

यह कह कर दक्षप्रजापतिने चन्द्रमाको विदा किया, चन्द्रमा भी उनसे विदा होकर अपने घर चले गये; तब सब देवता और प्रजा पहिलेके समान प्रसन्न होकर रहने लगे । (८३)

प्रभासं च यथा तीर्थं तीर्थानां प्रवरं महत् ॥ ८४ ॥
अमावास्यां महाराज नित्यशः शशलक्षणः ।
स्नात्वा ह्याप्यायते श्रीमान् प्रभासे तीर्थ उत्तमे ॥८५॥
अतश्चैतत्प्रजानन्ति प्रभासमिति भूमिप ।
प्रभां हि परमां लेभे तस्मिन्नुन्मज्ज्य चन्द्रमाः ॥८६॥
ततस्तु चमसोद्भेदमच्युतस्त्वगमद्बली ।
चमसोद्भेद इत्येवं यं जनाः कथयंत्युत ॥ ८७ ॥
तत्र दत्त्वा च दानानि विशिष्टानि हलायुधः ।
उषित्वा रजनीमेकां स्नात्वा च विधिवत्तदा ॥ ८८ ॥
उदपानमथागच्छत्त्वरावान्केशवाग्रजः ।
आद्यं स्वस्त्ययनं चैव यत्रावाप्य महत्फलम् ॥ ८९ ॥
स्निग्धत्वादोषधीनां च भूमेश्च जनमेजय ।
जानन्ति सिद्धा राजेन्द्र नष्टामपि सरस्वतीम् ॥९०॥ [२१४६]

इति श्रीमहाभारते० शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां प्रभासोत्पत्तिकथने पञ्चत्रिंशोऽध्यायः ॥३५॥

वैशंपायन उवाच-तस्मान्नदीगतं चापि ह्युदपानं यशस्विनः ।
त्रितस्य च महाराज जगामाथ हलायुधः ॥ १ ॥
तत्र दत्त्वा बहु द्रव्यं पूजयित्वा तथा द्विजान् ।
उपस्पृश्य च तत्रैव प्रहृष्टो मुसलायुधः ॥ २ ॥

हमने जिस प्रकार चन्द्रमाको शाप हुआ था और जैसे प्रभास क्षेत्र सब तीर्थोंमें श्रेष्ठ हुआ सो सब कथा तुमसे कही उस दिनसे चन्द्रमा सदा अमावसको प्रभास तीर्थमें स्नान करते हैं और उनका तेज बढता है, इस तीर्थमें चन्द्रमाका प्रभाव बढा इसलिये लोग इसे प्रभास कहते हैं। यहांसे बलराम चमसोद्भेद नामक तीर्थमें गये, वहां विधिपूर्वक स्नान करके ब्राह्मणोंको दान देकर एक रात्रि रहे, फिर जल पीकर शीघ्रता सहित स्वस्त्ययन सुनकर चले गये, जहां घास और पृथ्वी चिकनी हो तहां सिद्ध लोग कहते हैं कि यहां सरस्वती हैं। (८४-९०) [२१४६]

शल्यपर्वमें पैंतीस अध्याय समाप्त।

शल्यपर्वमें छत्तीस अध्याय।

श्रीवैशम्पायन मुनि बोले, कि वहांसे बलराम उदपान नामक तीर्थमें गये, उस ही तीर्थमें महायशस्वी त्रित नामक मुनिको परम पद लाभ हुआ था। उस स्थानपर बलरामने प्रसन्न होकर बहुत

तत्र धर्मपरो भूत्वा त्रितः स सुमहातपाः।
कूपे च वसता तेन सोमः पीतो महात्मना ॥ ३ ॥
तत्र चैनं समुत्सृज्य भ्रातरौ जग्मतुर्गृहान्।
ततस्तौ वै शशापाथ त्रितो ब्राह्मणसत्तमः ॥ ४ ॥

जनमेजय उवाच–उदपानं कथं ब्रह्मन् कथं च सुमहातपाः।
पतितः किं च सन्त्यक्तो भ्रातृभ्यां द्विजसत्तम ॥ ५ ॥
कूपे कथं च हित्वैनं भ्रातरौ जग्मतुर्गृहान्।
कथं च याजयामास पपौ सोमं च वै कथम् ॥ ६ ॥
एतदाचक्ष्व मे ब्रह्मन् श्रोतव्यं यदि मन्यसे।

वैशंपायन उवाच- आसन्पूर्वयुगे राजन्मुनयो भ्रातरस्त्रयः ॥ ७ ॥
एकतश्च द्वितश्चैव त्रितश्चादित्यसन्निभाः।
सर्वे प्रजापतिसमाः प्रजावन्तस्तथैव च ॥ ८ ॥
ब्रह्मलोकजिताः सर्वे तपसा ब्रह्मवादिनः।
तेषां तु तपसा प्रीतो नियमेन दमेन च ॥ ९ ॥
अभवद्गौतमो नित्यं पिता धर्मरतः सदा।
स तु दीर्घेण कालेन तेषां प्रीतिमवाप्य च ॥ १० ॥
जगाम भगवान्स्थानमनुरूपमिवात्मनः।

दान किया। इसी स्थानमें महातपस्वी त्रित नामक ब्राह्मणने कुएंमें बैठकर धर्म धारण करके सोम पिया था, उनके दोनों भाई उन्हे वहीं छोडकर चले गये थे। तब उन्होंने अपने दोनों भाइयोंको शाप दिया था। (१-४)

जनमेजय बोले, हे ब्रह्मन्! इस तीर्थका नाम उदपान क्यों हुआ? वे ब्राह्मणश्रेष्ठ त्रित कुएमें क्यों गिरे थे? उनके भाई उनको कुएमें पडे छोड क्यों चले गये थे? फिर उन्होंने यज्ञ कैसे करी? और सोमपान कैसे करा? यदि आप यह कथा हमसे कहने योग्य समझैं तो कहिये। (५—७)

श्रीवैशम्पायन मुनि बोले, हे राजन् पहिले युगमें एकत, द्वित और त्रित नामक तीन भाई थे, ये तीनों गौतम मुनिके बेटे थे। तीनों महातपस्वी, सूर्यके समान तेजस्वी, प्रजापतिके समान महात्मा तपसे ब्रह्म लोकको जीतनेवाले, वेदपाठी और सन्तानवान थे। उनके नियम और तपसे गौतम सदा प्रसन्न रहते थे, फिर बहुत दिनके पश्चात् गौतम अपने पुण्यके फलसे ब्रह्म लोकको चले गये

राजानस्तस्य ये ह्यासन्याज्या राजन्महात्मनः ॥ ११ ॥
ते सर्वे स्वर्गते तस्मिंस्तस्य पुत्रानपूजयन् ।
तेषां तु कर्मणा राजंस्तथा चाध्ययनेन च ॥ १२ ॥
त्रितः स श्रेष्ठतां प्राप यथैवास्य पिता तथा ।
तथा सर्वे महाभागा मुनयः पुण्यलक्षणाः ॥ १३ ॥
अपूजयन्महाभागं यथाऽस्य पितरं तथा ।
कदाचिद्धि ततो राजन्भ्रातरावेकतद्वितौ ॥ १४ ॥
यज्ञार्थं चक्रतुश्चिन्तां तथा वित्तार्थमेव च ।
तयोर्बुद्धिः समभवत्त्रितं गृह्य परन्तप ॥ १५ ॥
याज्यान्सर्वानुपादाय प्रतिगृह्य पशूंस्ततः ।
सोमं पास्यामहे हृष्टाः प्राप्य यज्ञं महाफलम् ॥ १६ ॥
चक्रुश्चैवं तथा राजन्भ्रातरस्त्रय एव च ।
तथा ते तु परिक्रम्य याज्यान्सर्वान्पशून्प्रति ॥ १७ ॥
याजयित्वा ततो याज्यान्लब्ध्वा तु सुबहून्पशून् ।
याज्येन कर्मणा तेन प्रतिगृह्य विधानतः ॥ १८ ॥
प्राचीं दिशं महात्मान अजग्मुस्ते महर्षयः ।
त्रितस्तेषां महाराज पुरस्ताद्याति हृष्टवत् ॥ १९ ॥
एकतश्च द्वितश्चैव पृष्ठतः कालयन्पशून् ।
तयोश्चिन्ता समभवद् दृष्ट्वा पशुगणं महत् ॥ २० ॥

इनके मरनेके पश्चात् उनके यजमान गौतमके तीनों पुत्रोंका वैसा ही आदर करने लगे। उन तीनोंमें विद्या और कर्मसे त्रित श्रेष्ठ था। ये अपने पिता गौतम मुनिके समान थे, महात्मा और पुण्यात्मा मुनि भी उन्हें गौतमके समान मानते थे। (७-१३)

तभी एक दिन एकत और द्वितने धन इकठा करनेके लिये यज्ञ करनेका विचार किया, फिर त्रितसे जाकर कहा कि हम पशु और यज्ञकी सामग्री इकट्ठा कर रहे हैं। महाफलवाला यज्ञ करके प्रसन्नता पूर्वक सोमपान करेंगे। (१४-१६

हे राजन्! फिर तीनों भाइयोंने ऐसा ही किया और यज्ञके लिये मांगकर पशु लाए, जब उन पशुवोंको लिये हुए पूर्व दिशाको चले आते थे, उस समय प्रसन्न त्रित तीनों महात्मा ऋषियोंके आगे प्रसन्न हुए चले जाते थे और पीछेसे दोनों भाई पशुवोंको हांकते चले आते

कथं च स्युरिमा गाव आवाभ्यां हि विना त्रितम् ।
तावन्योन्यं समाभाष्य एकतश्च द्वितश्च ह ॥ २१ ॥
यदूचतुर्मिथः पापौ तन्निबोध जनेश्वर ।
त्रितो यज्ञेषु कुशलस्त्रितो वेदेषु निष्ठितः ॥ २२ ॥
अन्यास्तु बहुला गावस्त्रितः समुपलप्स्यते ।
तदावां सहितौ भूत्वा गाः प्रकाल्य व्रजावहे ॥ २३ ॥
त्रितोऽपि गच्छतां काममावाभ्यां वै विना कृतः ।
तेषामागच्छतां रात्रौ पथिस्थानां वृकोऽभवत् ॥ २४ ॥
तत्र कूपो विदूरेऽभूत्सरस्वत्यास्तटे महान् ।
अथ त्रितो वृकं दृष्ट्वा पथि तिष्ठन्तमग्रतः ॥ २५ ॥
तद्भयादपसर्पन्वै तस्मिन्कूपे पपात ह ।
अगाधे सुमहाघोरे सर्वभूतभयङ्करे ॥ २६ ॥
त्रितस्ततो महाराज कूपस्थो मुनिसत्तमः ।
आर्तनादं ततश्चक्रे तौ तु शुश्रुवतुर्मुनी ॥ २७ ॥
तं ज्ञात्वा पतितं कूपे भ्रातरावेकतद्वितौ ।
वृकत्रासाच्च लोभाच्च समुत्सृज्य प्रजग्मतुः ॥ २८ ॥
भ्रातृभ्यां पशुलुब्धाभ्यामुत्सृष्टः स महातपाः ।
उदपाने तदा राजन्निर्जले पांसुसंवृते ॥ २९ ॥

थे, तब बहुत गौ देखकर दोनों भाइयोंने विचार किया कि ऐसा कुछ उपाय करना चाहिये, कि जिससे सब गौ हम हीं दोनोंको मिले और तृतको न मिलें। तब उन पापियोंने परस्पर ये बातचीत करी कि त्रित यज्ञकर्ममें बहुत कुशल और वेदपाठी हैं, इसलिये इन्हे और भी बहुत गौ मिल जायेंगी, हम इन सब गौवोंको लेकर चलदें ॥ (१७—२३)

तब ये दोनों भाई तृतको छोडकर चलदिये, त्रित भी रात्रिहीमें इनके सङ्ग ही सङ्गमें चले तब मार्गमें एक भेडिया मिला उसे देखकर तृत भागे। मार्गके पास ही एक कूवां था, वह बहुत गहरा भयानक और धूल मट्टीसे भरा था, त्रित उसीमें गिर पडे महात्मा त्रित उसमें गिरकर ऊंचेस्वरसे रोने लगे। उन दोनों भाइयोंने उस शब्दको सुना और जान लिया कि, त्रित कुएमें गिर गये, परन्तु भेडियेके डरसे और पशुवोंके लोभसे उन्हे वहीं छोडकर भाग गये। महात्मा तृत अपने लोभी भाइयोंसे छूटकर जल

त्रित आत्मानमालक्ष्य कूपे वीरुत्तृणावृते।
निमग्नं भरतश्रेष्ठ नरके दुष्कृती यथा ॥ ३० ॥
स बुद्ध्याऽगणयत्प्राज्ञो मृत्योर्भीतो ह्यसोमपः।
सोमः कथं तु पातव्य इहस्थेन मया भवेत् ॥ ३१ ॥
स एवमभिनिश्चित्य तस्मिन्कूपे महातपाः।
ददर्श वीरुधं तत्र लम्बमानां यदृच्छया ॥ ३२ ॥
पांशुग्रस्ते ततः कूपे विचिन्त्य सलिलं मुनिः।
अग्नीन्सङ्कल्पयामास होत्रे चात्मानमेव च ॥ ३३ ॥
ततस्तां वीरुधं सोमं सङ्कल्प्य सुमहातपाः।
ऋचो यजूंषि सामानि मनसाऽचिन्तयन्मुनिः ॥ ३४ ॥
ग्रावाणः शर्कराः कृत्वा प्रचक्रेऽभिषवं नृप।
आज्यं च सलिलं चक्रे भागांश्च त्रिदिवौकसाम् ॥३५॥
सोमस्याभिषवं कृत्वा चकार विपुलं ध्वनिम्।
स चाविशद्दिवं राजन्पुनः शब्दस्त्रितस्य वै ॥ ३६ ॥
समवाप्य च तं यज्ञं यथोक्तं ब्रह्मवादिभिः।
वर्तमाने महायज्ञे त्रितस्य सुमहात्मनः ॥ ३७ ॥
आविग्नं त्रिदिवं सर्वं कारणं च न बुध्यते।
ततः सुतुमुलं शब्दं शुश्रावाथ बृहस्पतिः ॥ ३८ ॥
श्रुत्वा चैवाब्रवीत्सर्वान्देवान्देवपुरोहितः।

रहित तृणके और धूलके भरे हुए कुएमें गिरकर अपनेको नरकवासी पापीके समान मानने लगे। फिर उन्होंने अपनी बुद्धिसे विचारा कि जो ब्राह्मण सोमपान नहीं करता उसे नरक का भय रहता है। अब मुझे इस कुएमें सोम कैसे मिले ? (२४—३१)

अनन्तर उस महातपस्वीने एक लटकती हुई घास देखी। फिर धूलको जल और अग्नि अपने शरीरको आहुति और उस घासको सोम सङ्कल्प करके ऋक् यजु और सामवेद पढना आरम्भ किया, उस ही धूलिको आहुति मानकर देवतोंके भाग निकाले और ऊंचे स्वरसे वेद पढना आरम्भ किया। वह शब्द आकाशतक फैल गया, तब उस महा-यज्ञको सुनके देवता घबडाने लगे। तब उस शब्दको सुनकर देवतोंके पुरोहित बृहस्पति बोले, महात्मा त्रितने यज्ञ किया है, हम सब लोग वहींको चलें, यदि हम

त्रितस्य वर्तते यज्ञस्तत्र गच्छामहे सुराः ॥ ३९ ॥
स हि क्रुद्धः सृजेदन्यान्देवानपि महातपाः ।
तच्छ्रुत्वा वचनं तस्य सहिताः सर्वदेवताः ॥ ४० ॥
प्रययुस्तत्र यत्रासौ त्रितयज्ञः प्रवर्तते ।
ते तत्र गत्वा विबुधास्तं कूपं यत्र स त्रितः ॥ ४१ ॥
ददृशुस्तं महात्मानं दीक्षितं यज्ञकर्मसु ।
दृष्ट्वा चैनं महात्मानं श्रिया परमया युतम् ॥ ४२ ॥
ऊचुश्चैनं महाभागं प्राप्ता भागार्थिनो वयम् ।
अथाब्रवीदृषिर्देवान्पश्यध्वं मां दिवौकसः ॥ ४३ ॥
अस्मिन्प्रतिभये कूपे निमग्नं नष्टचेतसम् ।
ततस्त्रितो महाराज भागांस्तेषां यथाविधि ॥ ४४ ॥
मंत्रयुक्तान्समददत्ते च प्रीतास्तदाऽभवन् ।
ततो यथाविधिप्राप्तान्भागान्प्राप्य दिवौकसः ॥ ४५ ॥
प्रीतात्मानो ददुस्तस्मै वरान्यान्मनसेच्छति ।
स तु वव्रे वरं देवांस्त्रातुमर्हथ मामितः ॥ ४६ ॥
यश्चेहोपस्पृशेत्कूपे स सोमपगतिं लभेत् ।
तत्र चोर्मिमती राजन्नुत्पपात सरस्वती ॥ ४७ ॥
तयोत्क्षिप्तः समुत्तस्थौ पूजयंस्त्रिदिवौकसः ।

लोग न चलैंगे तो वह महातस्वी दूसरे देवता बना लेगा । (३२—३९)

बृहस्पतिके वचन सुनके सब देवता महात्मा त्रितकी यज्ञमें पहुंचे और उस महात्माको यज्ञ दीक्षाके लिये कुएमें तेजसे प्रकाशित होते देखा । अनन्तर सब देवता बोले, हे महाभाग ! हमलोग अपना अपना भाग लेनेको तुम्हारे पास आये हैं । त्रित बोले, हे देवतों ! देखो हम इस अन्धे कुएमें पडे हैं, हमें कुछ चैतन्यता भी नहीं है फिर त्रितने मन्त्रोंके सहित देवतोंको भाग दिये, वे लोगभी अपना अपना भाग पाकर प्रसन्न होगये और कहने लगे, कि जो चाहो वरदान मांगो । (४०—४६)

त्रित बोले, कि हमें कुएसे निकालो और जो इस कुएको छूवे उसको सोम पियोंका फल होय । हे राजन् ! देवता उन्हे यह दोनों वरदान देकर चले गये, उस ही समय उस कुएको तोड कर सरस्वती नदी निकली और उसने त्रितको ऊपरको उछाल दिया, तब त्रित

तथेति चोक्ता विबुधा जग्मू राजन्यथागताः ॥ ४८ ॥
त्रितश्चाभ्यागमत्प्रीतः स्वमेव निलयं तदा।
क्रुद्धस्तु स समासाद्य तावृषी भ्रातरौ तदा ॥ ४९ ॥
उवाच परुषं वाक्यं शशाप च महातपाः।
पशुलुब्धौ युवां यस्मान्मामुत्सृज्य प्रधावितौ ॥ ५० ॥
तस्माद्वृकाकृती रौद्रौ दंष्ट्रिणावभितश्चरौ।
भवितारौ मया शप्तौ पापेनानेन कर्मणा ॥ ५१ ॥
प्रसवश्चैव युवयोर्गोलांगूलर्क्षवानराः।
इत्युक्तेन तदा तेन क्षणादेव विशांपते ॥ ५२ ॥
तथाभूतावदृश्येतां वचनात्सत्यवादिनः।
तत्राप्यमितविक्रान्तः स्पृष्ट्वा तोयं हलायुधः ॥ ५३ ॥
दत्त्वा च विविधान्दायान्पूजयित्वा च वै द्विजान्।
उदपानं च तं वीक्ष्य प्रशस्य च पुनःपुनः।
नदीगतमदीनात्मा प्राप्तो विनशनं तदा ॥ ५४ ॥ [२१९०]

इति श्रीमहाभारते० शल्यपर्वान्तर्गतगदापर्वणि बलदेवत्रिताख्याने षट्त्रिंशोऽध्यायः ॥ ३६ ॥

वैशंपायन उवाच-ततो विनशनं राजन्जगामाथ हलायुधः।
शूद्राभीरान्प्रतिद्वेषाद्यत्र नष्टा सरस्वती ॥ १ ॥
तस्मात्तु ऋषयो नित्यं प्राहुर्विनशनेति च।

भी प्रसन्न होते हुए अपने घरको आये और भाइयोंको देख कर क्रोध करके बोले, तुम लोग हमें जङ्गलमें एकला छोडकर चले आये थे। इसलिये उस पाप कर्मसे हम तुम्हे शाप देते हैं। कि तुम लोग बडे बडे दांतवाले भेडिये बनकर जगत्में घूमो, फिर लङ्कूर बन्दर और रीछ योनिमें जन्म लो, इस सत्यवादीके वचन निकलते ही वे भेडिये होगये। (४७—५४)

इस प्रकार इस तीर्थका नाम उदपान हुआ। वहां महात्मा बलरामने ब्राह्मणोंको बहुत दान देकर कुरु क्षेत्रकी ओर यात्रा करी। (५५) [२१९०]

शल्यपर्वमें छतीस अध्याय समाप्त।

शल्यपर्वमें सइतीस अध्याय।

वैशम्पायन मुनि बोले, हे राजन्! जनमेजय तब हलधारी बलराम कुरुक्षेत्रमें पहुंचे और जल स्पर्श करके विश्राम किया; हे राजन्! यह वही स्थान था। जहां सरस्वती शूद्रोंके दोषसे नष्ट होगई थी, इस ही लिये मुनियोंने

यत्राप्युपस्पृश्य बलः सरस्वत्यां महाबलः ॥ २ ॥
सुभूमिकं ततोऽगच्छत्सरस्वत्यास्तटे वरे ।
तत्र चाप्सरसः शुभ्रा नित्यकालमतंद्रिताः ॥ ३ ॥
क्रीडाभिर्विमलाभिश्च क्रीडन्ति विमलाननाः ।
तत्र देवाः सगंधर्वा मासि मासि जनेश्वर ॥ ४ ॥
अभिगच्छन्ति तत्तीर्थं पुण्यं ब्राह्मणसेवितम् ।
तत्रादृश्यन्त गंधर्वास्तथैवाप्सरसां गणाः ॥ ५ ॥
समेत्य सहिता राजन्यथाप्राप्तं यथासुखम् ।
तत्र मोदन्ति देवाश्च पितरश्च सवीरुधः ॥ ६ ॥
पुण्यैः पुष्पैः सदा दिव्यैः कीर्यमाणाः पुनःपुनः ।
आक्रीडभूमिः सा राजंस्तासामप्सरसां शुभा ॥ ७ ॥
सुभूमिकेति विख्याता सरस्वत्यास्तटे वरे ।
तत्र स्नात्वा च दत्त्वा च वसु विप्राय माधवः ॥ ८ ॥
श्रुत्वा गीतं च तद्दिव्यं वादित्राणां च निःस्वनम् ।
छायाश्च विपुला दृष्ट्वा देवगन्धर्वरक्षसाम् ॥ ९ ॥
गंधर्वाणां ततस्तीर्थमागच्छद्रोहिणीसुतः ।
विश्वावसुमुखास्तत्र गंधर्वास्तपसाऽन्विताः ॥ १० ॥
नृत्यवादित्रगीतं च कुर्वन्ति सुमनोरमम् ।

उसका नाम विनशन तीर्थ रक्खा है । (१-२)

वहांसे चलकर बलवान बलराम सरस्वतीके तटपर सुभूमिक नामक तीर्थपर पहुंचे। इसी तीर्थपर सदा अति उत्तम सुन्दर मुखवाली पवित्र अप्सरा क्रीडा करा करती हैं। हे प्रजानाथ ! उस स्थानपर महीने महीने देवता और गन्धर्व आया करते हैं । ब्राह्मण लोग सदा ही उस तीर्थकी सेवा करते हैं, उसी स्थानमें देवता पितर और औषधी आकर गन्धर्व और अप्सराओंसे मिलकर क्रीडा करती हैं । हे राजन् ! वह स्थान अप्सराओंकी क्रीडा करनेका है, वहां अप्सरा फूल वर्षाती हैं, और क्रीडा करती हैं। इस स्थानपर बलरामने ब्राह्मणोंको बहुत दान दिया। दिव्य गीत और बाजे सुने गन्धर्व अप्सरा और राक्षसोंकी परछाहीं देखी। (२-९)

वहांसे चलकर रोहिणी पुत्र हलधर गन्धर्व तीर्थमें पहुंचे, वहां तपस्वी विश्वावसु आदि गन्धर्व मनोहर गीतगाते

तत्र दत्त्वा हलधरो विप्रेभ्यो विविधं वसु ॥ ११ ॥
अजाविकं गोखरोष्ट्रं सुवर्णं रजतं तथा ।
भोजयित्वा द्विजान्कामैः संतर्प्य च महाधनैः ॥ १२ ॥
प्रययौ सहितो विप्रैः स्तूयमानश्च माधवः ।
तस्माद्द्वैपर्वतीर्थाच्च महाबाहुररिन्दमः ॥ १३ ॥
गर्गस्रोतो महातीर्थमाजगामैककुण्डली ।
तत्र गर्गेण वृद्धेन तपसा भावितात्मना ॥ १४ ॥
कालज्ञानगतिश्चैव ज्योतिषां च व्यतिक्रमः ।
उत्पाता दारुणाश्चैव शुभाश्च जनमेजय ॥ १५ ॥
सरस्वत्याः शुभे तीर्थे विदिता वै महात्मना ।
तस्य नाम्ना च तत्तीर्थं गर्गस्रोत इति स्मृतम् ॥ १६ ॥
तत्र गर्गं महाभागं ऋषयः सुव्रता नृप ।
उपासांचक्रिरे नित्यं कालज्ञानं प्रति प्रभो ॥ १७ ॥
तत्र गत्वा महाराज बलः श्वेतानुलेपनः ।
विधिवद्धि धनं दत्त्वा मुनीनां भावितात्मनाम् ॥ १८ ॥
उच्चावचांस्तथा भक्ष्यान्विप्रेभ्यो विप्रदाय सः ।
नीलवासास्तदा गच्छच्छंखतीर्थं महायशाः ॥ १९ ॥
तत्रापश्यन्महाशंखं महामेरुमिवोच्छ्रितम् ।
श्वेतपर्वतसंकाशं ऋषिसंघैर्निषेवितम् ॥ २० ॥

और नाचते रहते हैं। वहां बलरामने ब्राह्मणोंको बकरी, भेड, गाय, गधे, ऊंट, सोना, चांदी, आदि दान दिये फिर ब्राह्मणोंको इच्छानुसार धन और भोजनसे सन्तुष्ट करके स्तुती सुनते हुए शत्रुनाशन बलराम ब्राह्मणोंके सहित गर्ग श्रोत्रपर पहुंचे, इसी स्थानपर बैठकर महात्मा महातपस्वी बूढे गर्गाचार्यने कालज्ञान तारोंकी गतिसे अनेक घोर उत्पातोंको जाना था। इसी लिये इस तीर्थका नाम गर्गस्रोत्र विदित होगया, इस स्थानमें ज्योतिष पढनेके लिये अनेक मुनि व्रतधारी महात्मा गर्गकी सेवा करते थे, वहां जाकर श्वेतचन्दन-धारी महात्मा एक कुण्डलधारी बलरामने तपस्वी ब्राह्मणोंको विधिके अनुसार बहुत दान दिया। (९-१८)

उस स्थानमें ब्राह्मणोंको उत्तम उत्तम भोजन कराकर नीलाम्बर महायशस्वी बलराम शङ्ख तीर्थमें पहुंचे, वहां जाकर

सरस्वत्यास्तटे जातं नगं तालध्वजो बली ।
यक्षा विद्याधराश्चैव राक्षसाश्चामितौजसः ॥ २१ ॥
पिशाचाश्चामितबला यत्र सिद्धाः सहस्रशः ।
ते सर्वे ह्यशनं त्यक्त्वा फलं तस्य वनस्पतेः ॥ २२ ॥
व्रतैश्च नियमैश्चैव काले काले स्म भुञ्जते ।
प्राप्तैश्च नियमैस्तैस्तैर्विचरंतः पृथक् पृथक् ॥ २३ ॥
अदृश्यमाना मनुजैर्व्यचरन्पुरुषर्षभ ।
एवं ख्यातो नरव्याघ्र लोकेऽस्मिन्स वनस्पतिः ॥ २४॥
ततस्तीर्थं सरस्वत्याः पावनं लोकविश्रुतम् ।
तस्मिंश्च यदुशार्दूलो दत्त्वा तीर्थे पयस्विनीः ॥ २५ ॥
ताम्रायसानि भांडानि वस्त्राणि विविधानि च ।
पूजयित्वा द्विजांश्चैव पूजितश्च तपोधनैः ॥ २६ ॥
पुण्यं द्वैतवनं राजन्नाजगाम हलायुधः ।
तत्र गत्वा मुनीन्दृष्ट्वा नानावेषधरान्बलः ॥ २७ ॥
आप्लुत्य सलिले चापि पूजयामास वै द्विजान् ।
तथैव दत्त्वा विप्रेभ्यः परिभोगान् सुपुष्कलान् ॥२८॥
ततः प्रायाद्बलो राजन्दक्षिणेन सरस्वतीम् ।
गत्वा चैवं महाबाहुर्नातिदूरे महायशाः ॥ २९ ॥

एक सुमेरुके समान ऊंचा शृङ्ग देखा उस सफेद पर्वतके समान शृङ्गके चारों ओर ऋषी तपस्या कर रहे थे, उस सरस्वतीके तटपर एक उत्तम वृक्ष भी देखा, महातेजस्वी यक्ष विद्याधर,राक्षस महाबलवान पिशाच और सहस्रों सिद्ध भोजन छोडकर उसके चारों ओर तपस्या कर रहे थे और उनका यह प्रण था कि जब व्रत और नियम समाप्त हो तब समय होनेपर उसीका फल खांय और फिर तपस्या करने लगे, परन्तु ऐसा उत्तम वृक्ष था, कि उसके नीचे बैठे ऋषियोंको कोई नहीं देख सक्ता था, उस पवित्र लोक विख्यात तीर्थमें यदुकुल बलरामने तांबे और लोहेके बरतन अनेक प्रकारकी वस्तु सहित अनेक गौ तपस्वियोंको दान करीं, वहांसे पवित्र द्वैतवनमें पहुंचे । वहां अनेक वेषधारी मुनियोंको देखा, फिर जलमें स्नान करके ब्राह्मणोंको अनेक दान देकर सरस्वतीके दक्षिण ओरको चले गये । वहां थोडा दूर जाकर धर्मात्मा बलरामने नाग

धर्मात्मा नागधन्वानं तीर्थमागमदच्युतः ।
यत्र पन्नगराजस्य वासुकेः सन्निवेशनम् ॥ ३० ॥
महाद्युतेर्महाराज बहुभिः पन्नगैर्वृतम् ।
ऋषीणां हि सहस्राणि तत्र नित्यं चतुर्दश ॥ ३१ ॥
यत्र देवाः समागम्य वासुकिं पन्नगोत्तमम् ।
सर्वपन्नगराजानमभ्यषिंचन्यथाविधि ॥ ३२ ॥
पन्नगेभ्यो भयं तत्र विद्यते न स्म पौरव ।
तत्रापि विधिवद्दत्वा विप्रेभ्यो रत्नसंचयान् ॥ ३३ ॥
प्रायात्प्राचीं दिशं तत्र तत्र तीर्थान्यनेकशः ।
सहस्रशतसंख्यानि प्रथितानि पदे पदे ॥ ३४ ॥
आप्लुत्य तत्र तीर्थेषु यथोक्तं तत्र चर्षिभिः ।
कृत्वोपवासनियमं दत्त्वा दानानि सर्वशः ॥ ३५ ॥
अभिवाद्य मुनींस्तान्वै तत्र तीर्थनिवासिनः ।
उद्दिष्टमार्गः प्रययौ यत्र भूयः सरस्वती ॥ ३६ ॥
प्राङ्मुखं वै निवबृते वृष्टिर्वातहता यथा ।
ऋषीणां नैमिषेयाणामवेक्षार्थं महात्मनाम् ॥ ३७ ॥
निवृत्तां तां सरिच्छ्रेष्ठां तत्र दृष्ट्वा तु लांगली ।
बभूव विस्मितो राजन्बलः श्वेतानुलेपनः ॥ ३८ ॥

जनमेजय उवाच- कस्मात्सरस्वती ब्रह्मन्निवृत्ता प्राङ्मुखी भवत् ।

तीर्थको देखा, इस स्थानमें महातेजस्वी सर्प राजा वासुकीका स्थान था वहां सहस्रों सर्प रहते थे, इसी स्थानपर चौदह सहस्र ऋषियोंने और सब देवतोंने मिलकर नागराज वासुकीका विधिके अनुसार अभिषेक किया था। (१९-३२)

इसी लिये उस स्थानपर सापोंका डर नहीं था, वहां भी अनेक रत्न दान करके पूर्व देशके सैकडों सहस्रों तीर्थोंको देखते हुए तीर्थोंमें स्नान करते हुए ऋषियोंको उपदेशानुसार दान उपास और नियम करते हुए उनके बतलाये हुए मार्गोंसे चलते हुए पूर्वकी ओरको चले, फिर उस स्थानपर पहुंचे जहां सरस्वती नदी बहनेसे बन्द होगई है, उस समय बलराम ऐसे शीघ्र जाते थे, जैसे वायुके वशमें मेघ, वहां जाकर नैमिषारण्यको देखा, वहां सरस्वतीकी निवृत्ति देखकर यदुवंशियोंमें श्रेष्ठ बलराम विस्मित होगये। (३२-३८)

व्याख्यातमेतदिच्छामि सर्वमध्वर्युसत्तम ॥ ३९ ॥
कस्मिंश्चित्कारणे तत्र विस्मितो यदुनन्दनः ।
निवृत्ता हेतुना केन कथमेव सरिद्वरा ॥ ४० ॥
वैशंपायन उवाच- पूर्वं कृतयुगे राजन्नैमिषेयास्तपस्विनः ।
वर्तमाने सुविपुले सत्रे द्वादशवार्षिके ॥ ४१ ॥
ऋषयो बह्वो राजंस्तत्सत्रमभिपेदिरे ।
उषित्वा च महाभागास्तस्मिन्सत्रे यथाविधि ॥ ४२ ॥
निवृत्ते नैमिषेये वै सत्रे द्वादशवार्षिके ।
आजग्मुर्ऋषयस्तत्र बह्वस्तीर्थकारणात् ॥ ४३ ॥
ऋषीणां बहुलत्वात्तु सरस्वत्या विशाम्पते ।
तीर्थानि नगरायन्ते कूले वै दक्षिणे तदा ॥ ४४ ॥
समन्तपञ्चकं यावत्तावत्ते द्विजसत्तमाः ।
तीर्थलोभान्नरव्याघ्र नद्यास्तीरं समाश्रिताः ॥ ४५ ॥
जुह्वतां तत्र तेषां तु मुनीनां भावितात्मनाम् ।
स्वाध्यायेनातिमहता बभूवुः पूरिता दिशः ॥ ४६ ॥
अग्निहोत्रैस्ततस्तेषां क्रियमाणैर्महात्मनाम् ।
अशोभत सरिच्छ्रेष्ठा दीप्यमानैः समंततः ॥ ४७ ॥
वालखिल्या महाराज अश्मकुट्टाश्च तापसाः ।
दन्तोलूखलिनश्चान्ये प्रसंख्यानास्तथा परे ॥ ४८ ॥

जनमेजय बोले, हे ब्रह्मन् ! हे यज्ञ करनेवालोंमें श्रेष्ठ सरस्वती पूर्वकी ओर बहती थीं, तब वहांसे निवृत्त क्यों होगई ? और महात्मा बलराम विस्मित क्यों हुए ? हम यह सब कथा आपके मुखसे सुनना चाहते हैं। (३९—४०)

श्री वैशम्पायन मुनि बोले, हे राजन् ! जनमेजय पहिले सतयुगमें नैमिष नामक ऋषियोंने बारह वर्षका यज्ञारम्भ किया था। उसमें अनेक ऋषी तीर्थ जानकर आये थे। हे महाराज ! उस यज्ञमें इतने मुनि आये कि सरस्वतीके तटके तीर्थ नगरके समान दीखने लगे, हे पुरुष सिंह ! समन्त पञ्चक नामक तीर्थ तक मुनि लोग तीर्थोंके लोभसे आये, उनके धूंये और वेद पाठके शब्दसे दिशायें पूरित होगई। उन महात्माओंकी अग्नि शालाओंसे सरस्वती नदी सब ओर प्रकाशित दीखने लगी, वालखिल्य, अश्मकुट्ट, दन्तोलूखल, प्रसंख्यान

वायुभक्षा जलाहाराः पर्णभक्षाश्च तापसाः।
नानानियमयुक्ताश्च तथास्थण्डिलशायिनः ॥ ४९ ॥
आसन्वै मुनयस्तत्र सरस्वत्याः समीपतः।
शोभयन्तः सरिच्छ्रेष्ठां गङ्गामिव दिवौकसः ॥ ५० ॥
शतशश्च समापेतुर्ऋषयः सत्रयाजिनः।
तेऽवकाशं न ददृशुः सरस्वत्या महाव्रताः ॥ ५१ ॥
ततो यज्ञोपवीतैस्ते तत्तीर्थं निर्मिमाय वै।
जुहुवुश्चाग्निहोत्रांश्च चक्रुश्च विविधाः क्रियाः ॥ ५२ ॥
ततस्तमृषिसङ्घातं निराशं चिन्तयान्वितम्।
दर्शयामास राजेन्द्र तेषामर्थे सरस्वती ॥ ५३ ॥
ततः कुञ्जान्बहून्कृत्वा सन्निवृत्ता सरस्वती।
ऋषिणां पुण्यतपसां कारुण्याज्जनमेजय ॥ ५४ ॥
ततो निवृत्य राजेन्द्र तेषामर्थे सरस्वती।
भूयः प्रतीच्यभिमुखी प्रसुस्राव सरिद्वरा ॥ ५५ ॥
अमोघागमनं कृत्वा तेषां भूयो व्रजाम्यहम्।
इत्यद्भुतं महच्चक्रे तदा राजन्महानदी ॥ ५६ ॥
एवं स कुञ्जो राजन्वै नैमिषीय इति स्मृतः।

नामादि अनेक ऋषी थे, कोई वायू, कोई जल और और कोई पत्ते खाकर रहता था, कोई पृथ्वीमें सोता था, और कोई अनेक नियम धारण किये था, इस प्रकार इन मुनियोंने सरस्वतीको इस प्रकार शोभित किया जैसे देवता गङ्गा-को शोभित करते हैं। (४१-५०)

अनन्तर उन यज्ञ करनेवाले सहस्रों मुनियोंसे सरस्वतीका तट ऐसा भर-गया, कि कुछ भी अवकाश न रहा, तब ऋषियोंने अपने यज्ञोपवीतोंसे तीर्थ बनाकर अग्निहोत्र करने आरम्भ किये। जब सरस्वतीने उन ऋषियोंको चिन्तासे व्याकुल और निराश देखा तब उन-को अपनी मायासे अनेक मुनियोंको अनेक कुञ्ज दिखलाये। (५१-५४)

हे जनमेजय! मुनियोंके ऊपर कृपा करके फिर पूर्वकी ओर बहने लगी, पुण्यात्मा और तपस्वियोंके ऊपर कृपा करके सरस्वतीने यह बडा आश्चर्य किया। (५५-५६)

हे राजन्! उस ही दिनसे इसका नाम नैमिषीय कुंज है, हे राजन्! यह भी स्थान कुरुक्षेत्र ही में है सो तुम भी

कुरुश्रेष्ठ कुरुक्षेत्रे कुरुष्व महतीं क्रियाम् ॥ ५७ ॥
तत्र कुञ्जान्बहून्दृष्ट्वा निवृत्तां च सरस्वतीम् ।
बभूव विस्मयस्तत्र रामस्याथ महात्मनः ॥ ५८ ॥
उपस्पृश्य तु तत्रापि विधिवद्यदुनन्दनः ।
दत्त्वा दायान् द्विजातिभ्यो भाण्डानि विविधानि च॥ ५९ ॥
भक्ष्यं भोज्यं च विविधं ब्राह्मणेभ्यः प्रदाय च ।
ततः प्रायाद्बली राजन्पूज्यमानो द्विजातिभिः॥ ६० ॥
सरस्वतीतीर्थवरं नानाद्विजगणायुतम् ।
बदरेंगुदकाश्मर्यप्लक्षाश्वत्थबिभीतकैः ॥ ६१ ॥
कङ्कोलैश्च पलाशैश्च करीरैः पीलुभिस्तथा ।
सरस्वतीतीर्थरुहैस्तरुभिर्विविधैस्तथा ॥ ६२ ॥
करूषकवरैश्चैव बिल्वैराम्रातकैस्तथा ।
अतिमुक्तकषण्डैश्च पारिजातैश्च शोभितम् ॥ ६३ ॥
कदलीवनभूयिष्ठं दृष्टिकान्तं मनोहरम् ।
वाय्वम्बुफलपर्णादैर्दन्तोलूखलिकैरपि ॥ ६४ ॥
तथाऽश्मकुट्टैर्वानेयैर्मुनिभिर्बहुभिर्वृतम् ।
स्वाध्यायघोषसंघुष्टं मृगयूथशताकुलम् ॥ ६५ ॥
अहिंस्रैर्धर्मपरमैर्नृभिरत्यर्थसेवितम् ।
सप्तसारस्वतं तीर्थमाजगाम हलायुधः ।

वहां अनेक दान करो । (५७)

हे महाराज ! उस स्थानमें सरस्वती को निवृत्त और अनेक कुञ्ज देखकर महात्मा बलदेवको आश्चर्य हुआ, वहां जलका स्पर्श करके ब्राह्मणोंको अनेक प्रकारके बरतन और अनेक प्रकारकी खानेकी वस्तु दान करी, तब ब्राह्मणोंसे पूजित होकर वहांसे चले और अनेक बेर, इङ्गुदी, खम्भारी, बडगद, पीपल, बहेडे, दाख, करील, पीलू, फालसे, बेल, आमले, अति मुक्तक और आम आदि सरस्वतीके तटके वृक्षोंसे शोभित, केलेके वृक्षोंसे भरा नेत्रोंके प्यारे वायु, जल, फल, और पत्ते खानेवाले मुनियोंसे पूरित दन्तोलूखल, अश्मकुट्ट, वानेय मुनियोंसे पूरित, वेदके शब्दसे पूरित, अनेक हरिनोंके सहस्रों झुण्डों करके राजित हिंसारहित धार्मिक मनुष्योंसे सेवित सप्त सारस्वत नामक तीर्थमें कङ्कणक नामक सिद्धने तपस्या करी

यत्र मङ्कणकः सिद्धस्तपस्तेपे महामुनिः ॥ ६६ ॥ [२२५६]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यांतर्गतगदापर्वणि

बलदेवतीर्थ० सारस्वतोपाख्याने सप्तत्रिंशोऽध्यायः ॥३७॥

जनमेजय उवाच-सप्तसारस्वतं कस्मात्कश्च मङ्कणको मुनिः।

कथं सिद्धः स भगवान्कश्चास्य नियमोऽभवत् ॥ १ ॥

कस्य वंशे समुत्पन्नः किं चाधीतं द्विजोत्तम।

एतदिच्छाम्यहं श्रोतुं विधिवद् द्विजसत्तम ॥ २ ॥

वैशंपायन उवाच-राजन्सप्तसरस्वत्यो याभिर्व्याप्तमिदं जगत्।

आहूता बलवद्भिर्हि तत्र तत्र सरस्वती ॥ ३ ॥

सुप्रभा कांचनाक्षी च विशाला च मनोरमा।

सरस्वती चौघवती सुरेणुर्विमलोदका ॥ ४ ॥

पितामहस्य महतो वर्तमाने महामखे।

वितते यज्ञवाटे च संसिद्धेषु द्विजातिषु ॥ ५ ॥

पुण्याह घोषैर्विमलैर्वेदानां निनदैस्तथा।

देवेषु चैव व्यग्रेषु तस्मिन्यज्ञविधौ तदा ॥ ६ ॥

तत्र चैव महाराज दीक्षिते प्रपितामहे।

यजतस्तस्य सत्रेण सर्वकामसमृद्धिना ॥ ७ ॥

मनसा चिंतिताह्यर्था धर्मार्थकुशलैस्तदा।

थी। (५८-६६) [२२५६]

शल्यपर्वमें सदतीस अध्याय समाप्त।

शल्यपर्वमें अडतीस अध्याय।

जनमेजय बोले, इस तीर्थका नाम सप्तसारस्वत क्यों हुआ? मङ्कणक मुनि कौन थे? उन्होंने क्या नियम किया था? कैसे सिद्ध हुए थे? किसके वंशमें हुए थे? और क्या पढे थे? हम इस सब कथाको आपसे सुनना चाहते हैं। (१-२)

श्रीवैशम्पायन मुनि बोले, हे राजन्! जगत्में सुप्रभा, काञ्चनाक्षी, विशाला, मनोरमा, सरस्वती ओघवती सुरेणु और विमलोदका नामक सात सरस्वती हैं, इनसे सब जगत् व्याप्त होरहा है। (३—४)

जब ब्रह्माने महायज्ञ किया था, और उसी समय अनेक ब्राह्मण सिद्ध हुए थे, जहां पुण्याहवाचनका शब्द और वेदोंका शब्द हो रहा था। उस यज्ञको देखकर देवता भी घबडा गए थे, यज्ञ करनेके लिये ब्रह्माने दीक्षा ली थी। महा-

उपतिष्ठंति राजेन्द्र द्विजातींस्तत्र तत्र ह ॥ ८ ॥
जगुश्च तत्र गन्धर्वा ननृतुश्चाप्सरोगणाः ।
वादित्राणि च दिव्यानि वादयामासुरञ्जसा ॥ ९ ॥
तस्य यज्ञस्य संपत्त्या तुतुषुर्देवता अपि ।
विस्मयं परमं जग्मुः किमु मानुषयोनयः ॥ १० ॥
वर्तमाने तथा यज्ञे पुष्करस्थे पितामहे ।
अब्रुवन्नृषयो राजन्नायं यज्ञो महागुणः ॥ ११ ॥
न दृश्यते सरिच्छ्रेष्ठा यस्मादिह सरस्वती ।
तच्छ्रुत्वा भगवान्प्रीतः सस्माराथ सरस्वतीम् ॥१२॥
पितामहेन यजता आहूता पुष्करेषु वै ।
सुप्रभा नाम राजेन्द्र नाम्ना तत्र सरस्वती ॥ १३ ॥
तां दृष्ट्वा मुनयस्तुष्टास्त्वरायुक्तां सरस्वतीम् ।
पितामहं मानयंतीं क्रतुं ते बहु मेनिरे ॥ १४ ॥
एवमेषा सरिच्छ्रेष्ठा पुष्करेषु सरस्वती ।
पितामहार्थं संभूता तुष्ट्यर्थं च मनीषिणाम् ॥ १५ ॥
नैमिषे मुनयो राजन्समागम्य समासते ।
तत्र चित्राः कथा ह्यासन् वेदं प्रति जनेश्वर ॥ १६ ॥
यत्र ते मुनयो ह्यासन्नानास्वाध्यायवेदिनः ।

त्मा लोग जो मनमें इच्छा करते थे, उनको वही फल उसी समय मिलता था । उस यज्ञमें गन्धर्व गाते थे, अप्सरा नाचती थीं और दिव्य बाजे बजते थे, उस यज्ञकी सामग्री देखकर देवता आश्चर्य कर थे और मनुष्योंकी तो कथा ही क्या है ? जब ब्रह्माने इस यज्ञको पुष्करक्षेत्रमें किया, तब महात्मा ऋषियोंने कहा कि यह यज्ञ अच्छी नहीं हुई, क्यों कि नदियोंमेंसे सरस्वती तो यहां है नहीं । (५-१२)

तब ब्रह्माने सुप्रभा नामक सरस्वती को बुलाया । उसको देख ऋषी लोग बहुत प्रसन्न हुए ब्रह्माको प्रणाम करती हुई सरस्वतीको शीघ्र आते देख ब्राह्मणोंने कहा कि यह यज्ञ बहुत अच्छा हुआ । हे राजन् ! इस प्रकार ब्राह्मणोंकी प्रसन्नताके लिये ब्रह्माने सरस्वती को पुष्करक्षेत्रमें बुलाया था । हे राजन्! जब नैमिषारण्यमें अनेक मुनि इकट्ठे हुए तहां वेदके विषयमें अनेक प्रकारके विचित्र शास्त्रार्थ होने लगे । जहांपर वेद

ते समागम्य मुनयः सस्मरुर्वै सरस्वतीम् ॥ १७ ॥
सा तु ध्याता महाराज ऋषिभिः सत्रयाजिभिः ।
समागतानां राजेन्द्र सहायार्थं महात्मनाम् ॥ १८ ॥
आजगाम महाभागा तत्र पुण्या सरस्वती ।
नैमिषे कांचनाक्षी तु मुनीनां सत्रयाजिनाम् ॥ १९ ॥
आगता सरितां श्रेष्ठा तत्र भारत पूजिता ।
गयस्य यजमानस्य गयेष्वेव महाक्रतुम् ॥ २० ॥
आहूता सरितां श्रेष्ठा गययज्ञे सरस्वती ।
विशालां तु गयस्याहुर्ऋषयः संशितव्रताः ॥ २१ ॥
सरित्सा हिमवत्पार्श्वात्प्रसुता शीघ्रगामिनी ।
औद्दालकेस्तथा यज्ञे यजतस्तस्य भारत ॥ २२ ॥
समेते सर्वतः स्फीते मुनीनां मंडले तदा ।
उत्तरे कोसलाभागे पुण्ये राजन्महात्मनः ॥ २३ ॥
उद्दालकेन यजता पूर्वं ध्याता सरस्वती ।
आजगाम सरिच्छ्रेष्ठा तं देशं मुनिकारणात् ॥ २४ ॥
पूज्यमाना मुनिगणैर्वल्कलाजिनसंवृतैः ।
मनोरमेऽति विख्याता सा हि तैर्मनसा कृता ॥ २५ ॥
सुरेणुर्ऋषभे द्वीपे पुण्ये राजर्षिसेविते ।

पाठी ब्राह्मण बैठे थे, तहां थोडेसे मुनि आकर सरस्वतीका ध्यान करने लगे। हे राजेन्द्र! विदेशसे आये हुए मुनियोंके सहायता के लिये उन यज्ञ करने वाले मुनियोंके ध्यान करनेसे महाभागा काञ्चनाक्षी नामक सरस्वती नैमिषारण्य में आई। (१३—१९)

जब राजा गय गया नामक स्थानमें यज्ञ कर रहे थे और अनेक व्रतधारी ब्राह्मणोंने सरस्वतीका महाध्यान किया, तब विशाला नामक सरस्वती गयामें पहुंची, यह शीघ्र बहनेवाली नदी हिमाचलके शिखरसे चली थी। जब उत्तरको शिला अर्थात अयोध्यामें उद्दालकके पुत्र, यजमान बनकर यज्ञ कर रहे थे तब उन्होंने पहिले सरस्वतीका ध्यान किया, तब बलकले और हरिनका चमडा ओढनेवाले, मुनियोंसे पूजित होकर मनोरमा नामक सरस्वती अयोध्यामें पहुंची। (२०—२५)

हे राजेन्द्र! जब महाराज कुरुने कुरुक्षेत्रमें यज्ञ करी तब उन्होंने सरस्वती

कुरोश्च यजमानस्य कुरुक्षेत्रे महात्मनः ॥ २६ ॥
आजगाम महाभागा सरिच्छ्रेष्ठा सरस्वती ।
ओघवत्यपि राजेन्द्र वसिष्ठेन महात्मना ॥ २७ ॥
समाहूता कुरुक्षेत्रे दिव्यतोया सरस्वती ।
दक्षेण यजता चापि गंगाद्वारे सरस्वती ॥ २८ ॥
सुरेणुरिति विख्याता प्रस्रुता शीघ्रगामिनी ।
विमलोदा भगवती ब्रह्मणा यजता पुनः ॥ २९ ॥
समाहूता ययौ तत्र पुण्ये हैमवते गिरौ ।
एकीभूतास्ततस्तास्तु तस्मिंस्तीर्थे समागताः ॥ ३० ॥
सप्तसारस्वतं तीर्थं ततस्तु प्रथितं भुवि ।
इति सप्तसरस्वत्यो नामतः परिकीर्तिताः ॥ ३१ ॥
सप्तसारस्वतं चैव तीर्थं पुण्यं तथा स्मृतम् ।
शृणु मंकणकस्यापि कौमारब्रह्मचारिणः ॥ ३२ ॥
आपगामवगाढस्य राजन्प्रक्रीडितं महत् ।
दृष्ट्वा यदृच्छया तत्र स्त्रियमंभसि भारत ॥ ३३ ॥
स्नायंतीं रुचिरापाङ्गीं दिग्वाससमनिंदिताम् ।
सरस्वत्यां महाराज चस्कंदे वीर्यमंभसि ॥ ३४ ॥
तद्रेतः स तु जग्राह कलशे वै महातपाः ।

का ध्यान किया। ध्यान करते ही राज ऋषियोंसे सेवित ऋषभ द्वीपको छोडकर सुरेणु नामक सरस्वती कुरुक्षेत्रमें पहुंची। ओघवती नामक सरस्वती महात्मा वसिष्ठके ध्यान करनेसे कुरुक्षेत्रमें आई थी, जब दक्ष प्रजापतिने गङ्गाद्वारमें यज्ञ किया था, तब सुरेणु नामक सरस्वती शीघ्रता सहित वहां आई थी, वह सरस्वती बहुत शीघ्र वहती है। (२६-२९)

जब ब्रह्माने हिमाचल पर यज्ञ करी थी, तब भगवती विमलोदका नामक सरस्वती वहां गई थीं और उसी पवित्र तीर्थमें सातों सरस्वतियोंका सङ्गम होगया, इसीलिये इस तीर्थका नाम सप्त सारस्वत तीर्थ हुआ। हमने ये सातों सरस्वतियोंका वर्णन किया। अब बाल ब्रह्मचारी मंकणककी कथा सुनो। एकदिन मंकणक मुनि सरस्वती नदीमें स्नान कर रहे थे, तब एक सुन्दर नेत्रवाली नङ्गी नहाती स्त्रीको देखा, उसको देखते ही इनका वीर्य स्खलित होगया, तब उस

सप्तधा प्रविभागं तु कलशस्थं जगाम ह ॥ ३५ ॥
तत्रर्षयः सप्त जाता जज्ञिरे मरुतां गणाः ।
वायुवेगो वायुबलो वायुहा वायुमंडलः ॥ ३६ ॥
वायुज्वालो वायुरेता वायुचक्रश्च वीर्यवान् ।
एवमेते समुत्पन्ना मरुतां जनयिष्णवः ॥ ३७ ॥
इदमत्यद्भुतं राजन् शृण्वाश्चर्यतरं भुवि ।
महर्षेश्चरितं यादृक् त्रिषु लोकेषु विश्रुतम् ॥ ३८ ॥
पुरा मंकणकः सिद्धः कुशाग्रेणेति नः श्रुतम् ।
क्षतः किल करे राजंस्तस्य शाकरसोऽस्रवत् ॥ ३९ ॥
स वै शाकरसं दृष्ट्वा हर्षाविष्टः प्रनृत्तवान् ।
ततस्तस्मिन्प्रनृत्ते वै स्थावरं जंगमं च यत् ॥ ४० ॥
प्रनृत्तमुभयं वीर तेजसा तस्य मोहितम् ।
ब्रह्मादिभिः सुरै राजन्नृषिभिश्च तपोधनैः ॥ ४१ ॥
विज्ञप्तो वै महादेव ऋषेरर्थे नराधिप ।
नायं नृत्येद्यथा देव तथा त्वं कर्तुमर्हसि ॥ ४२ ॥
ततो देवो मुनिं दृष्ट्वा हर्षाविष्टमतीव ह ।
सुराणां हितकामार्थं महादेवोऽभ्यभाषत ॥ ४३ ॥

वीर्यको मंकणकने घडेमें लेलिया । उस घडेमें वीर्यके सात भाग होगये, तब उससे सात ऋषी उत्पन्न हुये, इनहीको जगत्‌में मरुद्गण कहते हैं इन हीसे उश्वास वायु उत्पन्न हुये हैं । (३०–३५)

उन सातों ऋषियोंके ये नाम हैं वायुवेग, वायुबल, वायुहा, वायुमण्डल, वायुरेता, वायुज्वाल और वायुचक्र, ये सातों बडे बलवान थे, आगे उस महा ऋषिका तीन लोक विख्यात अद्भुत चरित्र सुनो । (३६—३८)

हमने कुशाग्र नामक मुनिसे सुना है कि एक दिन सिद्ध मंकणक हाथमें साग लिये चलेजाते थे, तब हाथसे सागाका रस टपक पडा । उसको देख मंकणक प्रसन्न होकर नाचने लगे, उनके नाचनेसे उनके तेजसे मोहित होकर- सब स्थावर जङ्गम जगत् नांचने लगा, तब ब्रह्मादिक देवता और महा तपस्वी मुनि महादेवके पास जाकर बोले, कि आप ऐसा उपाय कीजिये कि जिसमें ये मुनि न नाचैं, तब महादेवने उनके पास जाकर मंकणक मुनिको बहुतही प्रसन्नतासे नाचते हुए देखा । तब देव-

भो भो ब्राह्मण धर्मज्ञ किमर्थं नृत्यते भवान् ।
हर्षस्थानं किमर्थं च तदेवमधिकं मुने ॥ ४४ ॥
तपस्विनो धर्मपथे स्थितस्य द्विजसत्तम ।
ऋषिरुवाच — किं न पश्यसि मे ब्रह्मन्कराच्छाकरसं स्रुतम् ॥ ४५ ॥
यं दृष्ट्वा सम्प्रनृत्तो वै हर्षेण महता विभो ।
तं प्रहस्याब्रवीद्देवो मुनिं रागेण मोहितम् ॥ ४६ ॥
अहं न विस्मयं विप्र गच्छामीति प्रपश्य माम् ।
एवमुक्त्वा मुनिश्रेष्ठं महादेवेन धीमता ॥ ४७ ॥
अंगुल्यग्रेण राजेन्द्र स्वांगुष्ठस्ताडितोऽभवत् ।
ततो भस्मक्षताद्राजन्निर्गतं हिमसन्निभम् ॥ ४८ ॥
तद्दृष्ट्वा व्रीडितो राजन्स मुनिः पादयोर्गतः ।
मेने देवं महादेवमिदं चोवाच विस्मितः ॥ ४९ ॥
नान्यं देवादहं मन्ये रुद्रात्परतरं महत् ।
सुरासुरस्य जगतो गतिस्त्वमसि शूलधृत् ॥ ५० ॥
त्वया सृष्टमिदं विश्वं वदन्तीह मनीषिणः ।
त्वामेव सर्वं विशति पुनरेव युगक्षये ॥ ५१ ॥

तोंके कल्याणके लिये महादेवने इनसे कहा हे धर्म जाननेवाले ब्राह्मण ! तुम क्यों नाच रहे हो ? तुम्हारी इतनी प्रसन्नताका कारण क्या है ? आप धर्म जाननेवाले तपस्वी और ब्राह्मणोंमें श्रेष्ठ हैं ॥ (३९—४५)

मंकणक बोले, हे ब्रह्मन ! हे जगत्के स्वामी ! क्या आप नहीं देखते कि हमारे हाथसे सागका रस गिर रहा है। उसीको देखकर हम प्रसन्नतासे नाच रहे हैं मुनिका वचन सुन महादेव बोले, हे ब्राह्मण ! हम कोई आश्चर्यका स्थान नहीं देखते। अब तुम हमें देखो। ४५-४६

ऐसा कहकर बुद्धिमान महादेवने अपनी अंगुली अंगूठेमें मारी,उस घावसे वर्फके समान भस्म निकलने लगी, यह देख मंकणक लज्जित हो उनके चरणोंमें गिर पडे और उन्हे महादेव जानकर विस्मित होकर कहने लगे, हम शिवसे अधिक किसी देवता को नहीं मानते। (४७—४९)

हे शूलधारी ! आप ही सब देवता और राक्षसोंकी गति हैं, हे वरदान देने-वाले ! हमने बुद्धिमानोंसे सुना है, कि आप ही इस सब जगत्को बनाते हैं। और प्रलयकालमें सब जगत् आप हीमें

देवैरपि न शक्यस्त्वं परिज्ञातुं कुतो मया ।
त्वयि सर्वे स्म दृश्यन्ते भावा ये जगति स्थिताः ॥ ५२ ॥
त्वामुपासन्त वरदं देवा ब्रह्मादयोऽनघ ।
सर्वस्त्वमसि देवानां कर्ता कारयिता च ह ॥ ५३ ॥
त्वत्प्रसादात्सुराः सर्वे मोदन्तीहाकुतोभयाः ।
एवं स्तुत्वा महादेवं स ऋषिः प्रणतोऽभवत् ॥ ५४ ॥
यदिदं चापलं देव कृतमेतत्त्वयादिकम् ।
ततः प्रसादयामि त्वां तपो मे न क्षरेदिति ॥ ५५ ॥
ततो देवः प्रीतमनास्तमृषिं पुनरब्रवीत् ।
तपस्ते वर्धतां विप्र मत्प्रसादात्सहस्रधा ॥ ५६ ॥
आश्रमे चेह वत्स्यामि त्वया सार्धमहं सदा ।
सप्तसारस्वते चास्मिन्यो मामर्चिष्यते नरः ॥ ५७ ॥
न तस्य दुर्लभं किञ्चिद्भवितेह परत्र वा ।
सारस्वतं च ते लोकं गमिष्यन्ति न संशयः ॥ ५८ ॥
एतन्मङ्कणकस्यापि चरितं भूरितेजसः ।
स हि पुत्रः सुकन्यायामुत्पन्नो मातारिश्वना ॥५९॥ [२३१५]

इति श्रीमहाभारते० शल्यपर्वान्तर्गतगदापर्वणि बलदेव० सारस्वतोपाख्याने अष्टत्रिंशोऽध्यायः॥ ३८॥

मिल जाता है। आपको देवता भी नहीं जान सक्ते, मेरी तो कथा ही क्या है? जगत्‌के सब भाव तुममें दिखाई देते हैं हे पाप रहित! ब्रह्मादिक देवता भी आपकी उपासना करते हैं। हे देव! तुम जगत्‌के रूप और देवतोंके भी बनानेवाले हो, आपकी कृपासे सब देवता निर्भय होकर आनन्द करते हैं। हमने जो चपलता करी, वह भूल थी, अब हम आपसे यह वरदान मांगते हैं कि हमारी तपस्या क्षीण न होवे। (५०-५५)

मुनिके ऐसे वचन सुन महादेव प्रसन्न होकर बोले, हे ब्राह्मण! हमारे आशीर्वादसे तुम्हारा तप सहस्रों गुणा बढेगा, हम तुम्हारे सङ्ग इस आश्रममें सदा निवास करेंगे, जो मनुष्य इस सारस्वत तीर्थमें हमारी पूजा करेगा उसे जगत् में कोई वस्तु दुर्लभ नहीं होगी। मरकर वह मनुष्य सारस्वत लोकमें जायगा, हमने यह महातेजस्वी मंकणककी कथा तुमसे कही, ये मङ्कणक मातरिश्वा मुनि और सुकन्याके पुत्र थे। (५५—५९) [२३१५]

शल्यपर्वमें अडतीस अध्याय समाप्त।

वैशंपायन उवाच-उषित्वा तत्र रामस्तु सम्पूज्याश्रमवासिनः।
तथा मङ्कणके प्रीतिं शुभां चक्रे हलायुधः ॥ १ ॥
दत्वा दानं द्विजातिभ्यो रजनीं तामुपोष्य च।
पूजितो मुनिसङ्घैश्च प्रातरुत्थाय लाङ्गली ॥ २ ॥
अनुज्ञाप्य मुनीन्सर्वान्स्पृष्ट्वा तोयं च भारत।
प्रययौ त्वरितो रामस्तीर्थहेतोर्महाबलः ॥ ३ ॥
ततस्त्वौशनसं तीर्थमाजगाम हलायुधः।
कपालमोचनं नाम यत्र मुक्तो महामुनिः ॥ ४ ॥
महता शिरसा राजन्ग्रस्तजंघो महोदरः।
राक्षसस्य महाराज रामक्षिप्तस्य वै पुरा ॥ ५ ॥
तत्र पूर्वं तपस्तप्तं काव्येन सुमहात्मना।
यत्रास्य नीतिरखिला प्रादुर्भूता महात्मनः ॥ ६ ॥
यत्रस्थश्चिन्तयामास दैत्यदानवविग्रहम्।
तत्प्राप्य च बलो राजंस्तीर्थप्रवरमुत्तमम् ॥ ७ ॥
विधिवद्वै ददौ वित्तं ब्राह्मणानां महात्मनाम्।
जनमेजय उवाच-कपालमोचनं ब्रह्मन्कथं यत्र महामुनिः ॥ ८ ॥
मुक्तः कथं चास्य शिरो लग्नं केन च हेतुना।

शल्यपर्वमें उनचालीस अध्याय।

श्रीवैशम्पायनमुनि बोले, हे राजन् जनमेजय! बलरामने वहां रहकर आश्रमवासी मुनियों की पूजा करी और मङ्कणक मुनिकी बहुत भक्ती करी; फिर रात्रिभर रहकर ब्राह्मणोंको अनेक प्रकारके दान देकर महापराक्रमी बलराम मुनियोंसे पूजित होकर उस स्थानके जलको स्पर्श करके मुनियोंकी आज्ञा लेकर औनस नामक तीर्थमें पहुंचे। १-४

हे महाराज! इसी स्थानपर बडे पेट और बडे शिर और छोटी जङ्घावाले कपालमोचन नामक महामुनिकी मुक्ति हुई थी। इसी स्थानपर रामने राक्षसको फेंका था, इसी स्थानपर महात्मा शुक्राचार्यने तपस्या की थी, यहांपर उन्हें नीति बनानेको बुद्धि हुई थी, यहीं बैठकर महात्मा शुक्राचार्यने देवता और दानवोंके युद्धका विचार किया था। इसही तीर्थसे शुक्राचार्यका बहुत बल बढ गया था, यहां उन्होंने महात्मा ब्राह्मणोंको विधिके अनुसार बहुत दान किया था। राजा जनमेजय बोले, हे ब्रह्मन्! इस तीर्थका नाम कपालमोचन

वैशंपायन उवाच-पुरा वै दण्डकारण्ये राघवेण महात्मना ॥ ९ ॥
वसता राजशार्दूल राक्षसान्शमयिष्यता।
जनस्थाने शिरश्छिन्नं राक्षसस्य दुरात्मनः ॥ १० ॥
क्षुरेण शितधारेण उत्पपात महावने।
महोदरस्य तल्लग्नं जङ्घायां वै यदृच्छया ॥ ११ ॥
वने विचरतो राजन्नस्थि भित्त्वा स्फुरत्तदा।
स तेन लग्नेन तदा द्विजातिर्न शशाक ह ॥ १२ ॥
अभिगन्तुं महाप्राज्ञस्तीर्थान्यायतनानि च।
स पूतिना विस्रवता वेदनार्तो महामुनिः ॥ १३ ॥
जगाम सर्वतीर्थानि पृथिव्यां चेति नः श्रुतम्।
स गत्वा सरितः सर्वाः समुद्रांश्च महातपाः ॥ १४ ॥
कथयामास तत्सर्वमृषीणां भावितात्मनाम्।
आप्लुत्य सर्वतीर्थेषु न च मोक्षमवाप्तवान् ॥ १५ ॥
स तु शुश्राव विप्रेन्द्र मुनीनां वचनं महत्।
सरस्वत्यास्तीर्थवरं ख्यातमौशनसं तदा ॥ १६ ॥
सर्वपापप्रशमनं सिद्धिक्षेत्रमनुत्तमम्।
स तु गत्वा ततस्तत्र तीर्थमौशनसं द्विजः ॥ १७ ॥

कैसे हुआ? उसका शिर पहिले क्यों कटा था? और फिर क्यों जड गया। (४-९)

श्रीवैशम्पायन मुनि बोले, हे राजन! पहिले समयमें महात्मा राम दण्डकारण्यमें निवास करते थे, और राक्षसोंका नाश करते थे, तब ही जनस्थान निवासी दुरात्मा राक्षसका एक तेज बाणसे उन्होंने शिर काटा। हे महाराज! वही वनमें घूमते महोदर मुनिकी जङ्घा तोड कर जमआया उसके लगनेसे महाबुद्धिमान् महोदर मुनि चल फिर न सके और तीर्थयात्रा भी न कर सके। पैरमें भी पीव निकलने लगी, बहुत पीडा होने लगी तौ भी वे तीर्थोंमें घूमते ही रहे, हमने सुना है, कि उसी अवस्थामें महातपस्वी महोदर सब नदी और सब समुद्रमें स्नानकर आये और सब मुनियोंसे अपनी दशा कहते रहे। परन्तु किसी तीर्थमें उनका यह दुःख न छूटा, तब उन्होंने अनेक मुनियोंसे सरस्वतीके तटपर विराजमान् औशनस नामक तीर्थकी प्रशंसा सुनी। (९-१६)

तब वे सब पापोंके नाश करनेवाले

तत औशनसे तीर्थे तस्योपस्पृशतस्तदा ।
तच्छिरश्चरणं मुक्त्वा पपातान्तर्जले तदा ॥ १८ ॥
विमुक्तस्तेन शिरसा परं सुखमवाप ह ।
स चाप्यन्तर्जले मूर्धा जगामादर्शनं विभो ॥ १९ ॥
ततः स विशिरा राजन्पूतात्मा वीतकल्मषः ।
आजगामाश्रमं प्रीतः कृतकृत्यो महोदरः ॥ २० ॥
सोऽथ गत्वाऽऽश्रमं पुण्यं विप्रमुक्तो महातपाः ।
कथयामास तत्सर्वमृषीणां भावितात्मनाम् ॥ २१ ॥
ते श्रुत्वा वचनं तस्य ततस्तीर्थस्य मानद ।
कपालमोचनमिति नाम चक्रुः समागताः ॥ २२ ॥
स चापि तीर्थप्रवरं पुनर्गत्वा महानृषिः ।
पीत्वा पयः सुविपुलं सिद्धिमायात्तदा मुनिः ॥ २३ ॥
तत्र दत्त्वा बहून्दायान्विप्रान्संपूज्य माधवः ।
जगाम वृष्णिप्रवरो रुषङ्गोराश्रमं तदा ॥ २४ ॥
यत्र तप्तं तपो घोरमार्ष्टिषेणेन भारत ।
ब्राह्मण्यं लब्धवांस्तत्र विश्वामित्रो महामुनिः ॥ २५ ॥
सर्वकामसमृद्धं च तदाश्रमपदं महत ।
मुनिभिर्ब्राह्मणैश्चैव सेवितं सर्वदा विभो ॥ २६ ॥
ततो हलधरः श्रीमान्ब्राह्मणैः परिवारितः ।

सिद्ध औशनस तीर्थमें पहुंचे जब उन्होंने उस तीर्थमें स्नान किया, उसी समय वह शिर जलके भितर गिर गया और गुप्त होगया, तब उसके छूटनेसे वे मुनि भी बहुत प्रसन्न हुए, फिर वे पवित्र और प्रसन्न होकर अपने घरको चले आये, महातपस्वी महोदरने अपने आश्रममें आकर अपने कपाल छूटनेकी कथा महात्मा मुनियोंसे कही उन्होंने सुनकर उस तीर्थका नाम कपालमोचन रख दिया। महात्मा महोदर फिर उसी तीर्थपर गये, और इच्छानुसार जल पीकर सिद्ध होगये। (१७-२३)

वृष्णिकुल श्रेष्ठ बलराम भी यहां बहुत दान करके रुषंग मुनिके आश्रमको चले गये, इसी तीर्थपर आर्ष्टिषेण मुनि सिद्ध हुए थे, और इस ही आश्रमपर महामुनि विश्वामित्र क्षत्रीसे ब्राह्मण हुए थे, इस पवित्र सब कामनासे भरे तीर्थकी ब्राह्मण सदा सेवा करते हैं।

जगाम तत्र राजेन्द्र रुषंगुस्तनुमत्यजत् ॥ २७ ॥
रुषंगुर्ब्राह्मणो वृद्धस्तपोनिष्ठश्च भारत।
देहन्यासे कृतमना विचिन्त्य बहुधा तदा ॥ २८ ॥
ततः सर्वानुपादाय तनयान्वै महातपाः।
रुषंगुरब्रवीत्तत्र नयध्वं मां पृथूदकम् ॥ २९ ॥
विज्ञायातीतवयसं रुषंगुं ते तपोधनाः।
तं च तीर्थमुपानिन्युः सरस्वत्यास्तपोधनम् ॥ ३० ॥
स तैः पुत्रैस्तदा धीमानानीतो वै सरस्वतीम्।
पुण्यां तीर्थशतोपेतां विप्रसंघैर्निषेविताम् ॥ ३१ ॥
स तत्र विधिना राजन्नाप्लुत्य सुमहातपाः।
ज्ञात्वा तीर्थगुणांश्चैव प्राहेदमृषिसत्तमः ॥ ३२ ॥
सुप्रीतः पुरुषव्याघ्र सर्वान्पुत्रानुपासतः।
सरस्वत्युत्तरे तीरे यस्त्यजेदात्मनस्तनुम् ॥ ३३ ॥
पृथूदके जप्यपरो नैनं श्वो मरणं तपेत्।
तत्राप्लुत्य स धर्मात्मा उपस्पृश्य हलायुधः ॥ ३४ ॥
दत्त्वा चैव बहून्दायान्विप्राणां विप्रवत्सलः।
ससर्ज यत्र भगवाँल्लोकाँल्लोकपितामहः ॥ ३५ ॥

यहीं तपस्वी रुषंगूने शरीर त्याग किया था। (२४-२७)

रुषंगू नामक एक बूढा ब्राह्मण था। जब उसको शरीर छोडनेकी इच्छा हुई तब अपने सब पुत्रोंको बुलाकर महातपस्वी रुषंगू बोले, तुम लोग हमे पृथूदक नामक तीर्थमें ले चलो। पुत्रोंने इनकी अवस्था पूर्ण देखकर उस महात्माको सरस्वतीके तटपर पृथूदक नामक तीर्थपर पहुंचा दिया, महातपस्वी रुषंगू सहस्रों तीर्थोंसे भरी ब्राह्मणोंसे सेवित सरस्वतीके तटपर पहुंचकर विधि पूर्वक स्नान करते तीर्थोंके गुणोंको स्मरण करते अपने पुत्रोंसे ऐसा बोले, जो महात्मा सरस्वतीके उत्तर तीरपर पृथूदक नामक तीर्थपर जप करता हुआ शरीर छोडेगा, उसे फिर शरीर धारण करनेका दुःख नहीं उठाना पडेगा, ऐसा कहकर उन्होंने शरीर छोड दिया। (२८-३४)

ब्राह्मणोंके प्यारे धर्मात्मा बलरामने उस तीर्थमें स्नान करके ब्राह्मणोंको बहुत दान दिया। इसी स्थानमें बैठकर ब्रह्माने सब जगत्‌को रचा था, इसी स्थानपर

यत्रार्ष्टिषेणः कौरव्य ब्राह्मण्यं संशितव्रतः।
तपसा महता राजन्प्राप्तवानृषिसत्तमः ॥ ३६ ॥
सिंधुद्वीपश्च राजर्षिर्देवापिश्च महातपाः।
ब्राह्मण्यं लब्धवान्यत्र विश्वामित्रस्तथा मुनिः॥ ३७ ॥
महातपस्वी भगवानुग्रतेजा महातपाः।
तत्राजगाम बलवान्बलभद्रः प्रतापवान् ॥ ३८ ॥ [२३५३]

इति श्रीमहा० शल्यपर्वांतर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने ऊनचत्वारिंशोऽध्यायः ॥३९ ॥

जनमेजय उवाच- कथमार्ष्टिषेणो भगवान् विपुलं तप्तवांस्तपः।
सिंधुद्वीपः कथं चापि ब्राह्मण्यं लब्धवांस्तदा ॥ १ ॥
देवापिश्च कथं ब्रह्मन् विश्वामित्रश्च सत्तम।
तन्ममाचक्ष्व भगवन्परं कौतूहलं हि मे ॥ २ ॥

वैशंपायन उवाच- पुरा कृतयुगे राजन्नार्ष्टिषेणो द्विजोत्तमः।
वसन्गुरुकुले नित्यं नित्यमध्ययने रतः ॥ ३ ॥
तस्य राजन्गुरुकुले वसतो नित्यमेव च।
समाप्तिं नागमद्विद्या नापि वेदा विशाम्पते ॥ ४ ॥
स निर्विण्णस्ततो राजंस्तपस्तेपे महातपाः।
ततो वै तपसा तेन प्राप्य वेदाननुत्तमान् ॥ ५ ॥
स विद्वान् वेदयुक्तश्च सिद्धश्चाप्यृषिसत्तमः।

महातपस्वी ऋषियोंमें श्रेष्ठ सिन्धुद्वीप और आर्ष्टिषेण महातप करके ब्राह्मण होगये थे। और यहीं राजऋषि देवापी भी ब्राह्मण हुए थे और इसी स्थानपर महातपस्वी महातेजस्वि भगवान् विश्वामित्र भी ब्राह्मण होगये थे। (३४-३८)

शल्यपर्वमें उनचालीस अध्याय समाप्त। २३५३

शल्यपर्वमें चालीस अध्याय।

राजा जनमेजय बोले, हे ब्रह्मन्! भगवान आर्ष्टिषेणने किस प्रकार घोर तप किया? सिन्धुद्वीप कैसे ब्राह्मण बने थे, देवापी और विश्वामित्र किस प्रकार ब्राह्मणहुए थे सो कथा हमसे कहिये हमे सुननेकी बहुत इच्छा है। (१-२)

श्रीवैशम्पायन मुनि बोले, हे राजन्! पहिले सतयुगमें एक आर्ष्टिषेण नामक ब्राह्मण था। वह बहुत दिनतक गुरुके घरमें रहा परन्तु सब विद्या समाप्त न कर सका, जब बहुत दिनतक पढनेपर भी वेद समाप्त न हुए तब आर्ष्टिषेण बहुत घबडाये और घोर तपस्या करने लगे। उस तपके बलसे उन्हें सब

तत्र तीर्थे वरान्प्रादात्त्रीनेव सुमहातपाः ॥ ६ ॥
अस्मिंस्तीर्थे महानद्या अद्य प्रभृति मानवः।
आप्लुतो वाजिमेधस्य फलं प्राप्स्यति पुष्कलम् ॥ ७ ॥
अद्यप्रभृति नैवात्र भयं व्यालाद्भविष्यति।
अपि चाल्पेन कालेन फलं प्राप्स्यति पुष्कलम् ॥ ८ ॥
एवमुक्त्वा महातेजा जगाम त्रिदिवं मुनिः।
एवं सिद्धः स भगवानार्ष्टिषेणः प्रतापवान् ॥ ९ ॥
तस्मिन्नेव तदा तीर्थे सिंधुद्वीपः प्रतापवान्।
देवापिश्च महाराज ब्राह्मण्यं प्रापतुर्महत् ॥ १० ॥
तथा च कौशिकस्तात तपोनित्यो जितेन्द्रियः।
तपसा वै सुतप्तेन ब्राह्मणत्वमवाप्तवान् ॥ ११ ॥
गाधिर्नाम महानासीत्क्षत्रियः प्रथितो भुवि।
तस्य पुत्रोऽभवद्राजन् विश्वामित्रः प्रतापवान् ॥ १२॥
स राजा कौशिकस्तात महायोग्यभवत्किल।
सपुत्रमभिषिच्याथ विश्वामित्रं महातपाः ॥ १३ ॥
देहन्यासे मनश्चक्रे तमूचुः प्रणताः प्रजाः।
न गन्तव्यं महाप्राज्ञ त्राहि चास्मान्महाभयात् ॥१४॥
एवमुक्तः प्रत्युवाच ततो गाधिः प्रजास्ततः।

वेद विद्या आगई और सिद्ध भी होगए, फिर उन्होंने उस तीर्थको तीन वरदान दिये, जो मनुष्य आजसे इस तीर्थमें स्नान करेगा, उसे अश्वमेध यज्ञका फल होगा। आजसे इस तीर्थमें सांपोंका भय नहीं रहेगा, इस तीर्थमें स्नान करनेसे मनुष्यको शीघ्र ही फल मिलेगा, ये तीनों वरदान देकर महातपस्वी आर्ष्टिषेण स्वर्गको चले गये। (३—९)

हे तात! इस ही तीर्थपर महाप्रतापी सिन्धुद्वीप देवापी और जितेन्द्रीय विश्वामित्र घोर तप करके ब्राह्मण हुए थे। (१०—११)

पहिले समयमें एक गाधि नामक प्रतापी क्षत्रीय हुए थे। उनके पुत्रका नाम विश्वामित्र था, हे राजन्! वह गाधि नामक राजा विश्वामित्रके पिता बडे प्रतापी थे। उन्होंने अपने पुत्रको राज्य देकर अपने शरीर छोडनेकी इच्छा करी, तब सब प्रजाने इकट्ठे होकर कहा कि, हे महाराज! आप कभी स्वर्गको मत जाइये और हम लोगोंके

विश्वस्य जगतो गोप्ता भविष्यति सुतो मम ॥ १५ ॥
इत्युक्त्वा तु ततो गाधिर्विश्वामित्रं निवेश्य च ।
जगाम त्रिदिवं राजन्विश्वामित्रोऽभवन्नृपः ॥ १६ ॥
न स शक्नोति पृथिवीं यत्नवानपि रक्षितुम् ।
ततः शुश्राव राजा स राक्षसेभ्यो महाभयम् ॥ १७ ॥
निर्ययौ नगराच्चापि चतुरंगबलान्वितः ।
स गत्वा दूरमध्वानं वसिष्ठाश्रममभ्ययात् ॥ १८ ॥
तस्य ते सैनिका राजंश्चक्रुस्तत्रानयान्बहून् ।
ततस्तु भगवान्विप्रो वसिष्ठोऽऽश्रममभ्ययात् ॥ १९ ॥
ददृशेऽथ ततः सर्वं भज्यमानं महावनम् ।
तस्य क्रुद्धो महाराज वसिष्ठो मुनिसत्तमः ॥ २० ॥
सृजस्व शबरान्घोरानिति स्वां गामुवाच ह ।
तथोक्ता साऽसृजद्धेनुः पुरुषान्घोरदर्शनान् ॥ २१ ॥
ते तु तद्बलमासाद्य बभंजुः सर्वतो दिशम् ।
तच्छ्रुत्वा विद्रुतं सैन्यं विश्वामित्रस्तु गाधिजः ॥ २२ ॥
तपः परं मन्यमानस्तपस्येव मनो दधे ।
सोऽस्मिंस्तीर्थवरे राजन्सरस्वत्याः समाहितः ॥ २३ ॥
नियमैश्चोपवासैश्च कर्षयन्देहमात्मनः ।

दुःखको रक्षा कीजिये, तब राजा गाधिने अपनी प्रजासे कहा कि पुत्र सब जगत् की रक्षा करेगा । (१२-१५)

ऐसा कहकर राजा गाधि विश्वामित्रको राज्य देकर आप स्वर्गको चले गये, और राजा विश्वामित्र राज्य करने लगे । परन्तु विश्वामित्र अनेक यत्न करनेपर भी जगत्की रक्षा न कर सके। तब एक दिन उन्होंने सुना कि प्रजाको राक्षसोंसे बहुत पीडा हो रही है । यह सुनकर चतुरङ्गिनी सेना लेकर नगरसे बाहर निकले, फिर बहुत दूर जाकर वसिष्ठ मुनिके आश्रमपर ठहरे।(१६-१८)

सेनावालोंने उस स्थानपर अनेक उपद्रव करे । तब भगवान वसिष्ठ भी आश्रमपर आये, और अपने वनको टूटा देखकर बहुत क्रोध किया, और अपनी गौसे बोले कि, तुम घोर रूपवाले भयानक मनुष्योंको उत्पन्न करो। वसिष्ठके वचन सुन गौने वैसा ही किया, उनको देखते ही विश्वामित्रकी सेना इधर उधर भागने लगी, तब अपनी

जलाहारो वायुभक्षः पर्णाहारश्च सोऽभवत् ॥ २४ ॥
तथा स्थण्डिलशायी च ये चान्ये नियमाः पृथक् ।
असकृत्तस्य देवास्तु व्रतविघ्नं प्रचक्रिरे ॥ २५ ॥
न चास्य नियमाद् बुद्धिरपयाति महात्मनः ।
ततः परेण यत्नेन तप्त्वा बहुविधं तपः ॥ २६ ॥
तेजसा भास्कराकारो गाधिजः समपद्यत ।
तपसा तु तथा युक्तं विश्वामित्रं पितामहः ॥ २७ ॥
अमन्यत महातेजा वरदो वरमस्य तत् ।
स तु वव्रे वरं राजन्स्यामहं ब्राह्मणस्त्विति ॥ २८ ॥
तथेति चाब्रवीद्ब्रह्मा सर्वलोकपितामहः ।
स लब्ध्वा तपसोग्रेण ब्राह्मणत्वं महायशाः ॥ २९ ॥
विचचार महीं कृत्स्नां कृतकामः सुरोपमः ।
तस्मिंस्तीर्थवरे रामः प्रदाय विविधं वसु ॥ ३० ॥
पयस्विनीस्तथा धेनूर्यानानि शयनानि च ।
अथ वस्त्राण्यलंकारं भक्ष्यं पेयं च शोभनम् ॥ ३१ ॥
अददन्मुदितो राजन्पूजयित्वा द्विजोत्तमान् ।
ययौ राजंस्ततो रामो बकस्याश्रममन्तिकात् ॥ ३२ ॥

सेनाको भागती हुई सुन विश्वामित्रने तप करनेका विचार किया, और सरस्वतीके तटपर इस तीर्थमें आकर नियम और उपवासोंसे शरीरको सुखाते हुए तपस्या करने लगे, कभी जल पीकर रह जाते थे, कभी वायु और कभी सूखे पत्ते ही खाते थे और पृथ्वीमें सोते थे, उनके यह सब नियम देखकर देवता विघ्न करने लगे। परन्तु महात्मा विश्वामित्रकी बुद्धि कुछ भी भ्रष्ट न हुई। (१९—२६)

थोडे दिनमें बहुत तप करके सूर्यके समान तपस्वी होगये, फिर उनके घोर तपको देखकर ब्रह्मा वरदान देनेको आये तब विश्वामित्रने यह वरदान मांगा कि हम ब्राह्मण होजांय, ब्रह्माने कहा ऐसा ही होजायगा। इस प्रकार महातपस्वी विश्वामित्र ब्राह्मण होकर अपना काम सिद्ध करके देवतोंके समान जगत्में घूमने लगे महाबलवान् बलरामने इस तीर्थमें बहुत धन, दूध देनेवाली गाय, पलङ्ग, वस्त्र भूषण, खाने पीनेकी वस्तु ब्राह्मणोंको दान दिये, वहांसे बकदाल्भ्य नामक मुनि के आश्रम को चले

यत्र तेपे तपस्तीव्रं दाल्भ्यो बक इति श्रुतिः॥ ३३॥ [२३८६]

इति श्रीमहाभारते० शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थ० सारस्वतोपाख्याने चत्वारिंशोऽध्यायः॥ ४०॥

वैशंपायन उवाच-ब्रह्मयोनेरवाकीर्णं जगाम यदुनन्दनः।
यत्र दाल्भ्यो बको राजन्नाश्रमस्थो महातपाः ॥ १ ॥
जुहाव धृतराष्ट्रस्य राष्ट्रं वैचित्रवीर्यिणः।
तपसा घोररूपेण कर्षयन्देहमात्मनः ॥ २ ॥
क्रोधेन महताऽऽविष्टो धर्मात्मा वै प्रतापवान्।
पुरा हि नैमिषीयाणां सत्रे द्वादशवार्षिके ॥ ३ ॥
वृत्ते विश्वजितोऽन्ते वै पञ्चालानृषयोऽगमन्।
तत्रेश्वरमयाचन्त दक्षिणार्थं मनस्विनः ॥ ४ ॥
बलान्वितान्वत्सतरान्निर्व्याधीनेकविंशतिम्।
तानब्रवीद्बको दाल्भ्यो विभजध्वं पशूनिति ॥ ५ ॥
पशूनेतानहं त्यक्त्वा भिक्षिष्ये राजसत्तमम्।
एवमुक्त्वा ततो राजनृषीन्सर्वान्प्रतापवान् ॥ ६ ॥
जगाम धृतराष्ट्रस्य भवनं ब्राह्मणोत्तमः।
स समीपगतो भूत्वा धृतराष्ट्रं जनेश्वरम् ॥ ७ ॥

गये। (२७—३३) [२३८६]

शल्यपर्वमें उनचालीस अध्याय समाप्त।

शल्यपर्वमें चालीस अध्याय।

श्रीवैशम्पायन मुनि बोले, हे महाराज जनमेजय! प्रसन्न बलवान बलराम बकदालभ्य मुनिके आश्रममें पहुंचे, वहीं महात्मा बकदालभ्यने तप किया था। यह स्थान वह है जहां आनेसे दूसरी जातिके मनुष्य भी ब्राह्मण होजाते हैं। यह स्थान विचित्रवीर्य पुत्र धृतराष्ट्रके राज्यमें है, इहांपर महात्मा बकदालभ्य मुनि क्रोध करके अपने तप और नियमोंसे शरीरको सुखाते हुए तपस्या करते थे। (१-२)

हे राजन्! पहिले समयमें जब मुनियोंने नैमिषारण्यमें राजा विश्वजितके लिये बारह वर्षकी यज्ञ करी थी, और पाञ्चालदेशके मुनि वहां आये थे। तब उन्होंने यज्ञमेंसे व्याधि रहित इक्कीस बैल दक्षिणामें पाये, तब बकदालभ्य मुनिने मुनियोंसे कहा, तुम लोग इन बैलोंको बांटलो हम इनमेंसे नहीं लेंगे, और राजा धृतराष्ट्रके पास जाकर दूसरे बैल मांग लावेंगे। (३-६)

ऐसा विचार कर वे राजाधृतराष्ट्रके पास गौ और बैल मांगे, तब

अयाचत पशून्दाल्भ्यः स चैनं रुषितोऽब्रवीत् ।
यदृच्छया मृता दृष्ट्वा गास्तदा नृपसत्तमः ॥ ८ ॥
एतान्पशून्नय क्षिप्रं ब्रह्मबन्धो यदीच्छसि ।
ऋषिस्तथा वचः श्रुत्वा चिन्तयामास धर्मवित् ॥ ९ ॥
अहो बत नृशंसं वै वाक्यमुक्तोऽस्मि संसदि ।
चिन्तयित्वा मुहूर्तेन रोषाविष्टो द्विजोत्तमः ॥ १० ॥
मतिं चक्रे विनाशाय धृतराष्ट्रस्य भूपतेः ।
स तूत्कृत्य मृतानां वै मांसानि मुनिसत्तमः ॥ ११ ॥
जुहाव धृतराष्ट्रस्य राष्ट्रं नरपतेः पुरा ।
अवाकीर्णे सरस्वत्यास्तीर्थे प्रज्वाल्य पावकम् ॥ १२ ॥
बको दाल्भ्यो महाराज नियमं परमं स्थितः ।
स तैरेव जुहावास्य राष्ट्रं मांसैर्महातपाः ॥ १३ ॥
तस्मिंस्तु विधिवत्सत्रे सम्प्रवृत्ते सुदारुणे ।
अक्षीयत ततो राष्ट्रं धृतराष्ट्रस्य पार्थिव ॥ १४ ॥
ततः प्रक्षीयमाणं तद्राज्यं तस्य महीपतेः ।
छिद्यमानं यथाऽनन्तं वनं परशुना विभो ॥ १५ ॥
बभूवापद्गतं तच्च व्यवकीर्णमचेतनम् ।
दृष्ट्वा तथावकीर्णं तु राष्ट्रं स मनुजाधिपः ॥ १६ ॥

क्रोध करके कहा कि, हे ब्राह्मणाधम ! हमारे ये सब गौ मरीपडी हैं, यदि तुम चाहो तो यही लेजाओ। राजाके वचन सुन धर्मके जाननेवाले बकदाल्भ्य मुनिको महाकोप हुआ और कहने लगे। कि इस मूर्खने हमें सभाके बीचमें ऐसे कठोर वचन कहे। (७—१०)

थोडे समय तक ऐसा विचार कर बकदाल्भ्य मुनिने उनका राज्य नाश करनेकी इच्छा करी और उन ही मरी हुई गौओंको ले गये, फिर सरस्वतीके तटपर जाकर उनका मांस काट काट करके राजा धृतराष्ट्रके नामसे आहुती देने लगे, महातपस्वी बकदाल्भ्यने सरस्वतीके तटपर अग्नि जलाकर उसी मांससे आहुती देनी आरम्भ करी, जब यह भयानक यज्ञ विधिके अनुसार होने लगी, तब राजा धृतराष्ट्रका राज्य नाश होने लगा। हे महाराज ! उस देशका इस प्रकार नाश होने लगा, जैसे कुल्हाडीसे काटनेसे वनका। राज्य भरके मनुष्य व्याकुल होगये। (११-१६)

बभूव दुर्मना राजंश्चिन्तयामास च प्रभुः ।
मोक्षार्थमकरोद्यत्नं ब्राह्मणैः सहितः पुरा　　॥ १७ ॥
न च श्रेयोऽध्यगच्छत्तु क्षीयते राष्ट्रमेव च ।
यदा स पार्थिवः खिन्नस्ते च विप्रास्तदाऽनघ ॥ १८ ॥
यदा चापि न शक्नोति राष्ट्रं मोक्षयितुं नृप ।
अथ वै प्राश्निकांस्तत्र पप्रच्छ जनमेजय　　॥ १९ ॥
ततो वै प्राश्निकाः प्राहुः पशुं विप्रकृतस्त्वया ।
मांसैरभिजुहोतीति तव राष्ट्रं मुनिर्बकः　　॥ २० ॥
तेन ते हूयमानस्य राष्ट्रस्यास्य क्षयो महान् ।
तस्यैतत्तपसः कर्म येन तेऽद्य लयो महान्　　॥ २१ ॥
अपां कुञ्जे सरस्वत्यास्तं प्रसादय पार्थिव ।
सरस्वतीं ततो गत्वा स राजा बकमब्रवीत्　　॥ २२ ॥
निपत्य शिरसा भूमौ प्राञ्जलिर्भरतर्षभ ।
प्रसादये त्वां भगवन्नपराधं क्षमस्व मे　　॥ २३ ॥
मम दीनस्य लुब्धस्य मौर्ख्येण हृतचेतसः ।
त्वं गतिस्त्वं च मे नाथः प्रसादं कर्तुमर्हसि　　॥ २४ ॥
तं तथा विलपन्तं तु शोकोपहतचेतसम् ।

अपने राज्यको व्याकुल देख राजा धृतराष्ट्र घबडाये और शोचने लगे, कि अब हम क्या उपाय करें ? जब सब ब्राह्मण और राजा सब उपाय करके थक गये, तब उन्होंने ज्योतिषियोंको बुलाकर पूछा, तब उन्होंने कहा कि तुमने एक ब्राह्मणका निरादर किया था, वही गौवोंके मांससे होम कर रहा है, इसीसे तुम्हारे राज्यका नाश हुआ जाता है। महात्मा वकदाल्भ्य सरस्वतीके तटपर यज्ञ कर रहे हैं। उन्हींके तपके बलसे तुम्हारे राज्यका नाश हुवा जाता है। (१८-२१)

उनके वचन सुन राजा धृतराष्ट्र वकदाल्भ्य मुनिके पास जाकर गौ देकर और पृथ्वीमें गिर कर शिरसे प्रणाम किया। और हाथ जोड कर कहा, हे भगवन् ! हे नाथ ! मेरी बुद्धि मूर्खतासे नष्ट होगई है, मैं दीन और लोभी हूं, इसलिये आप मेरा अपराध क्षमा कीजिये, इस समय मैं आपकी शरण हूं, इसलिये आप प्रसन्न हूजिये। (२२—२४)

राजाको इस प्रकार शोकसे व्याकुल

दृष्ट्वा तस्य कृपा जज्ञे राष्ट्रं तस्य व्यमोचयत् ॥ २५ ॥
ऋषिः प्रसन्नस्तस्याभूत्संरंभं च विहायसः।
मोक्षार्थं तस्य राज्यस्य जुहाव पुनराहुतिम् ॥ २६ ॥
मोक्षयित्वा ततो राष्ट्रं प्रतिगृह्य पशून्बहून्।
हृष्टात्मा नैमिषारण्यं जगाम पुनरेव सः ॥ २७ ॥
धृतराष्ट्रोऽपि धर्मात्मा स्वस्थचेता महामनाः।
स्वमेव नगरं राजन्प्रतिपेदे महर्द्धिमत् ॥ २८ ॥
तत्र तीर्थे महाराज बृहस्पतिरुदारधीः।
असुराणामभावाय भवाय च दिवौकसाम् ॥ २९ ॥
मांसैरभिजुहावेष्टिमक्षीयन्त ततोऽसुराः।
दैवतैरपिसम्भग्ना जितकाशिभिराहवे ॥ ३० ॥
तत्रापि विधिवद्दत्वा ब्राह्मणेभ्यो महायशाः।
वाजिनः कुञ्जरांश्चैव रथांश्चाश्वतरीयुतान् ॥ ३१ ॥
रत्नानि च महार्हाणि धनं धान्यं च पुष्कलम्।
ययौ तीर्थं महाबाहुर्यायातं पृथिवीपते ॥ ३२ ॥
तत्र यज्ञे ययातेश्च महाराज सरस्वती।

और रोते देखकर मुनिको कृपा आगई और उनके राज्यको आहुतियोंसे छुडाय दिया। महात्मा वकदालभ्य प्रसन्न होकर क्रोधको दूर किया और उस राज्यको आपत्तिसे छुडानेके लिये आहु ति देनी आरम्भ करी। उस राज्यको आपत्तिसे छुडाकर फिर राजा धृतराष्ट्रसे बैल मांगे उन्होंने प्रसन्न होकर बहुतसे बैल दिये। (२५—२६)

महात्मा वकदालभ्य उन बैलोंको लेकर प्रसन्न होकर अपने आश्रमको चले गये, महातपस्वी महाराज धृतराष्ट्र भी सावधान होकर अपने देशको चले गये। हे महाराज! इस ही तीर्थमें देवतोंकी विजय और राक्षसोंके नाशके लिये महा बुद्धिमान बृहस्पतिने मांससे यज्ञ करा था। तब देवतोंसे हार कर युद्धमें राक्षसोंका नाश होगया था। (२७—३०)

इस तीर्थमें भी यशस्वी बलदेवने हाथी घोडे खच्चर लगे रथ, रत्न बहुत धन और वस्त्रादि दान किया। हे महाराज! यहांसे बलदेवजी ययाति नामक तीर्थमें पहुंचे, इस तीर्थमें जब महात्मा नहुष पुत्र ययातिने यज्ञ किया था, तब सरस्वती घी और दूधकी होकर बही

सर्पिः पयश्च सुस्राव नाहुषस्य महात्मनः ॥ ३३ ॥
तत्रेष्ट्वा पुरुषव्याघ्रो ययातिः पृथिवीपतिः ।
अक्रामदूर्ध्वं मुदितो लेभे लोकांश्च पुष्कलान् ॥ ३४ ॥
पुनस्तत्र च राज्ञस्तु ययातेर्यजतः प्रभोः ।
औदार्यं परमं कृत्वा भक्तिं चात्मनि शाश्वतीम् ॥३५॥
ददौ कामान्ब्राह्मणेभ्यो यान्यान्यो मनसेच्छति ।
यो यत्र स्थित एवेह आहूतो यज्ञसंस्तरे ॥ ३६ ॥
तस्य तस्य सरिच्छ्रेष्ठा गृहादि शयनादिकम् ।
षड्रसं भोजनं चैव दानं नानाविधं तथा ॥ ३७ ॥
ते मन्यमाना राज्ञस्तु सम्प्रदानमनुत्तमम् ।
राजानं तुष्टुवुः प्रीता दत्वा चैवाशिषः शुभाः ॥ ३८ ॥
तत्र देवाः सगन्धर्वाः प्रीता यज्ञस्य सम्पदा ।
विस्मिता मानुषाश्चासन्दृष्ट्वा तां यज्ञसम्पदम् ॥ ३९ ॥
ततस्तालकेतुर्महाधर्मकेतुर्महात्मा कृतात्मा महादाननित्यः ।
वसिष्ठापवाहं महाभीमवेगं धृतात्मा जितात्मा समभ्याजगाम ॥ ४० ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यांतर्गतगदापर्वणि
बलदेवतीर्थ० सारस्वतोपाख्याने एकचत्वारिंशोऽध्यायः ॥४१॥ [२४२६]

जनमेजय उवाच- वसिष्ठस्यापवाहोऽसौ भीमवेगः कथं नु सः ।

थीं, उसी यज्ञके प्रतापसे महाबाहु राजा ययाती इसी शरीरसे ऊपरको उडकर स्वर्गको चले गये। (३१-३४)

जब दूसरी बार महाराज ययातिने इस तीर्थमें यज्ञ करी थी, तब उदारता और भक्ति बढाकर ब्राह्मणोंको बहुत दान किये थे, जो ब्राह्मण जहां बैठा था, उसने जिस बातकी इच्छा करी उसे वही वही वस्तू मिली थी, तब उस यज्ञमें ब्राह्मणोंको घर शय्या और छःरस युक्त उत्तम भोजन मिले थे, राजाकी उस उत्तम भक्तिको देखकर ब्राह्मणोंने उनको बहुत आशीर्वाद देकर उनकी प्रशंसा करी, उस यज्ञको देखकर देवता मनुष्य और गन्धर्व प्रसन्न होकर आश्चर्य करने लगे। तब महात्मा तालकेतु बलराम महावेगवान वसिष्ठापवाह तीर्थको गये। (३५—४०) [२४२६]

शल्यपर्वमें एकतालीस अध्याय समाप्त।

शल्यपर्वमें बयालीस अध्याय।

राजा जनमेजय बोले, हे ब्राह्मण-श्रेष्ठ ! महामने ! वसिष्ठके आश्रममें

किमर्थं च सरिच्छ्रेष्ठा तमृषिं प्रत्यवाहयत् ॥ १ ॥
कथमस्याऽभवद्वैरं कारणं किं च तत्प्रभो ।
शंस पृष्टो महाप्राज्ञ न हि तृप्यामि कथ्यति ॥ २ ॥
वैशंपायन उवाच- विश्वामित्रस्य विप्रर्षेर्वसिष्ठस्य च भारत ।
भृशं वैरमभूद्राजंस्तपः स्पर्धाकृतं महत् ॥ ३ ॥
आश्रमो वै वसिष्ठस्य स्थाणुतीर्थेऽभवन्महान् ।
पूर्वतः पार्श्वतश्चासीद्विश्वामित्रस्य धीमतः ॥ ४ ॥
यत्र स्थाणुर्महाराज तप्तवान्परमं तपः ।
तत्रास्य कर्म तद्घोरं प्रवदन्ति मनीषिणः ॥ ५ ॥
यत्रेष्ट्वा भगवान्स्थाणुः पूजयित्वा सरस्वतीम् ।
स्थापयामास तत्तीर्थं स्थाणुतीर्थमिति प्रभो ॥ ६ ॥
तत्र तीर्थे सुराः स्कंदमभ्यषिंचन्नराधिप ।
सैनापत्येन महता सुरारिविनिवर्हणम् ॥ ७ ॥
तस्मिन्सारस्वते तीर्थे विश्वामित्रो महामुनिः ।
वसिष्ठं चालयामास तपसोग्रेण तच्छृणु ॥ ८ ॥
विश्वामित्रवसिष्ठौ तावहन्यहनि भारत ।
स्पर्धां तपः कृतां तीव्रां चक्रतुस्तौ तपोधनौ ॥ ९ ॥

यह अपवाहक नामक तीर्थ कैसे हुआ, नदियोंमें श्रेष्ठ सरस्वतीने उस ऋषिको क्यों बहाया था ? उन मुनि और सरस्वतीसे वैर क्यों होगया था ? आपकी वाणी सुननेसे हमारा जी तृप्त नहीं होता, इस लिये यह कथा भी आप कहिये। (१--२)

श्रीवैशम्पायन मुनि बोले, हे राजन् ! महामुनि विश्वामित्र और वसिष्ठसे बहुत वैर हो गया था, क्योंकि उन दोनोंको तप करते करते दोनोंमें विरोध बढ गया था, महात्मा वसिष्ठका आश्रम स्थाणु तीर्थमें था, और उससे पूर्वकी ओर विश्वामित्रका आश्रम था। (३-४)

हे महाराज ! उसी स्थाणु तीर्थमें विश्वामित्र घोर तप करते थे, सरस्वती और शिवकी पूजा करते थे, और उसी दिनसे उस तीर्थका अभिषेक किया था, उसी तीर्थमें जिस प्रकार विश्वामित्रने वसिष्ठको उग्र तपके बलसे चलित कर दिया था, सो कथा तुम हमसे सुनो। हे महाराज ! महातपस्वी विश्वामित्र और वसिष्ठ उस स्थानमें रहकर परस्पर विरोधसे घोर तप करने लगे, परन्तु महा-

तत्राप्यधिकसंतापो विश्वामित्रो महामुनिः ।
दृष्ट्वा तेजो वसिष्ठस्य चिन्तामभिजगाम ह ॥ १० ॥
तस्य बुद्धिरियं ह्यासीद्धर्मनित्यस्य भारत ।
इयं सरस्वती तूर्णं मत्समीपं तपोधनम् ॥ ११ ॥
आनयिष्यति वेगेन वसिष्ठं तपतां वरम् ।
इहागतं द्विजश्रेष्ठं हनिष्यामि न संशयः ॥ १२ ॥
एवं निश्चित्य भगवान्विश्वामित्रो महामुनिः ।
सस्मार सरितां श्रेष्ठां क्रोधसंरक्तलोचनः ॥ १३ ॥
सा ध्याता मुनिना तेन व्याकुलत्वं जगाम ह ।
जज्ञे चैनं महावीर्यं महाकोपं च भाविनी ॥ १४ ॥
तत एनं वेपमाना विवर्णा प्रांजलिस्तदा ।
उपतस्थे मुनिवरं विश्वामित्रं सरस्वती ॥ १५ ॥
हतवीरा यथा नारी साऽभवद् दुःखिता भृशम् ।
ब्रूहि किं करवाणीति प्रोवाच मुनिसत्तमम् ॥ १६ ॥
तामुवाच मुनिः क्रुद्धो वसिष्ठं शीघ्रमानय ।
यावदेनं निहन्म्यद्य तच्छ्रुत्वा व्यथिता नदी ॥ १७ ॥
प्राञ्जलिं तु ततः कृत्वा पुंडरीकनिभेक्षणा ।
प्राकम्पत भृशं भीता वायुनेवाहता लता ॥ १८ ॥

मुनि विश्वामित्र वसिष्ठका अधिक तेज देखकर दाह और शोक करने लगे, एकदिन बैठे बैठे उन्होंने यह विचारा कि यदि यह सरस्वती नदी सदा धर्म करनेवाले महातपस्वी मुनि और ब्राह्मणोंमें श्रेष्ठ वसिष्ठको अपने जलमें बहाकर मेरे पास ले आवे तो मैं उन्हें मार डालूं ॥ (५-१२)

ऐसा विचार महामुनि विश्वामित्रने क्रोधसे लाल नेत्र करके सब नदियोंमें श्रेष्ठ सरस्वतीका ध्यान किया । ध्यान करते ही सरस्वती बहुत व्याकुल होगई। इतने समयमें महावीर्यवान् विश्वामित्रको और भी क्रोध बढ गया, तब सरस्वती मलीन होकर कांपती हुई हाथ जोडकर और अनाथ स्त्रीके समान दीन होकर विश्वामित्रके पास आई और कहने लगी कि, हे भगवन् ! हम आपका कौनसा काम करें ॥ (१३-१६)

विश्वामित्र बोले, हम वसिष्ठको मारेंगे, इसलिये तुम उन्हें अपने पानीमें बहा लावो, उनके वचन सुन कमलके

तथारूपां तु तां दृष्ट्वा मुनिराह महानदीम्।
अविचारं वसिष्ठं त्वमानय स्वान्तिकं मम ॥ १९ ॥
सा तस्य वचनं श्रुत्वा ज्ञात्वा पापं चिकीर्षितम्।
वसिष्ठस्य प्रभावं च जानन्त्यप्रतिमं भुवि ॥ २० ॥
साऽभिगम्य वसिष्ठं च इदमर्थमचोदयत्।
यदुक्ता सरितां श्रेष्ठा विश्वामित्रेण धीमता ॥ २१ ॥
उभयोः शापयोर्भीता वेपमाना पुनः पुनः।
चिन्तयित्वा महाशापमृषिवित्रासिता भृशम् ॥ २२ ॥
तां कृशां च विवर्णां च दृष्ट्वा चिन्तासमन्विताम्।
उवाच राजन्धर्मात्मा वसिष्ठो द्विपदां वरः ॥ २३ ॥

वसिष्ठ उवाच— पाह्यात्मानं सरिच्छ्रेष्ठे वह मां शीघ्रगामिनी।
विश्वामित्रः शपेद्धि त्वां मा कृथास्त्वं विचारणाम् ॥ २४ ॥
तस्य तद्वचनं श्रुत्वा कृपाशीलस्य सा सरित्।
चिन्तयामास कौरव्य किं कृत्वा सुकृतं भवेत् ॥ २५ ॥
तस्याश्चिन्ता समुत्पन्ना वसिष्ठो मय्यतीव हि।
कृतवान्हि दयां नित्यं तस्य कार्यं हितं मया ॥ २६ ॥

समान नेत्रवाली सरस्वती नदी वायुसे हिलती हुई लताके समान कांपने लगी। महानदी सरस्वतीकी यह दशा देख विश्वामित्र बोले, तुम बिना विचारे वसिष्ठको हमारे यहां ले आवो, विश्वामित्रके ऐसे वचन सुन और उनके मनमें पाप जानकर उधर वसिष्ठके भी असाधारण प्रतापको जानकर सरस्वती बहुत घबडाई और वसिष्ठके पास जाकर बुद्धिमान विश्वामित्रके सब वचन कह-सुनाये। दोनोंके शापसे डरती मलीन चिन्तायुक्त धर्मात्मा वसिष्ठने ऐसे वचन सुनाये। (१७-२३)

वसिष्ठ बोले, हे नदियोंमें श्रेष्ठ! सरस्वती तुम अपनी रक्षा करो और हमें बहाकर विश्वामित्रके पास ले चलो, इससे कुछ विचार मत करो, नहीं तो वे तुम्हें शाप दे देवेंगे। कृपाशील वसिष्ठ मुनिके ऐसे वचन सुन नदीयोंमें श्रेष्ठ सरस्वती शोचने लगी कि अब कौनसा काम करनेसे हमारा कल्याण होगा। फिर उसने विचारा कि वसिष्ठने मेरे ऊपर बहुत ही कृपा करी है, इसलिये जिसमें उनका कल्याण हो सो काम करना मुझे उचित है। (२४-२६)

एक दिन सरस्वतीने महामुनि विश्वा-

अथ कूले स्वके राजञ्जपन्तमृषिसत्तमम् ।
जुह्वानं कौशिकं प्रेक्ष्य सरस्वत्यभ्यचिन्तयत् ॥ २७ ॥
इदमन्तरमित्येवं ततः सा सरितां वरा ।
कूलापहारमकरोत्स्वेन वेगेन सा सरित् ॥ २८ ॥
तेन कूलापहारेण मैत्रावरुणिरौह्यत ।
उह्यमानः स तुष्टाव तदा राजन्सरस्वतीम् ॥ २९ ॥
पितामहस्य सरसः प्रवृत्ताऽसि सरस्वति ।
व्याप्तं चेदं जगत्सर्वं तवैवाम्भोभिरुत्तमैः ॥ ३० ॥
त्वमेवाकाशगा देवि मेघेषु सृजसे पयः ।
सर्वाश्चापस्त्वमेवेति त्वत्तो वयमधीमहि ॥ ३१ ॥
पुष्टिर्द्युतिस्तथा कीर्त्तिः सिद्धिर्बुद्धिरुमा तथा ।
त्वमेव वाणी स्वाहा त्वं तवायत्तमिदं जगत् ॥ ३२ ॥
त्वमेव सर्वभूतेषु वससीह चतुर्विधा ।
एवं सरस्वती राजंस्तूयमाना महर्षिणा ॥ ३३ ॥
वेगेनोवाह तं विप्रं विश्वामित्राश्रमं प्रति ।
न्यवेदयत चाभीक्ष्णं विश्वामित्राय तं मुनिम् ॥ ३४ ॥
तमानीतं सरस्वत्या दृष्ट्वा कोपसमन्वितः ।
अथान्वेषत्प्रहरणं वसिष्ठान्तकरं तदा ॥ ३५ ॥

मित्रको होम और जप करते देखकर विचारा कि इस समयमें नहीं उठ सकेंगे। ऐसा विचार कर उन्होंने अपना तट तोड दिया, और वासिष्ठको बहा ले चली। बहते हुए वासिष्ठ उनकी स्तुति करने लगे। (२७-२९)

वासिष्ठ बोले, हे सरस्वती ! तुम ब्रह्माके तलावसे निकली हो, सब जगत् तुम्हारे उत्तम जलसे पूरित है। तुम आकाश में जाकर मेघोंको जलसे पूरित करती हो, तुम सब जलोंका रूप हो, तुम्हारे ही प्रतापसे हम लोग वेद पढते हैं। तुम पुष्टी, कान्ती, कीर्त्ति, सिद्धि, बुद्धि और वाणी रूपी हो। तुम इस सब जगत्में व्याप्त हो, तुम सब जगत् में चार रूप कर के बसती हो। (३०—३३)

वसिष्ठकी ऐसी स्तुती सुन सरस्वती वेगसे बहने लगी, फिर उनके आश्रमके पास जाकर विश्वामित्रसे कह दिया, मैं वासिष्ठको ले आई। वसिष्ठको अपने पास आये देख, विश्वामित्रको बहुत क्रोध

तं तु क्रुद्धमभिप्रेक्ष्य ब्रह्मवध्याभयान्नदी ।
अपोवाह वसिष्ठं तु प्राचीं दिशमतंद्रिता ॥ ३६ ॥
उभयोः कुर्वती वाक्यं वंचयित्वा च गाधिजम् ।
ततोऽपवाहितं दृष्ट्वा वसिष्ठमृषिसत्तमम् ॥ ३७ ॥
अब्रवीद्दुःखसंक्रुद्धो विश्वामित्रो ह्यमर्षणः ।
यस्मान्मां त्वं सरिच्छ्रेष्ठे वंचयित्वा पुनर्गता ॥ ३८ ॥
शोणितं वह कल्याणि रक्षोग्रामणिसंमतम् ।
ततः सरस्वती शप्ता विश्वामित्रेण धीमता ॥ ३९ ॥
अवहच्छोणितोन्मिश्रं तोयं संवत्सरं तदा ।
अथर्षयश्च देवाश्च गन्धर्वाप्सरसस्तदा ॥ ४० ॥
सरस्वतीं तथा दृष्ट्वा बभूवुर्भृशदुःखिताः ।
एवं वसिष्ठापवाहो लोके ख्यातो जनाधिप ।
आगच्छच्च पुनर्मार्गं स्वमेव सरितां वरा ॥ ४१ ॥ [२४६७]

इति श्रीमहाभारते० शल्यपर्वांतर्गतगदापर्वणि बलदेवती० सारस्वतोपाख्याने द्विचत्वारिंशोऽध्यायः ॥४२॥

वैशम्पायन उवाच– सा शप्ता तेन क्रुद्धेन विश्वामित्रेण धीमता ।
तस्मिंस्तीर्थवरे शुभ्रे शोणितं समुपावहत् ॥ १ ॥
अथाजग्मुस्ततो राजन्राक्षसास्तत्र भारत ।

हुआ और वसिष्ठके मारनेके लिये अस्त्र ढूंढने लगे। विश्वामित्रको क्रोध देख ब्रह्महत्याके भयसे वसिष्ठको सरस्वतीने सावधान होकर पूर्वकी ओर वेगसे बहा दिया। (३४—३६)

इस प्रकार सरस्वतीने दोनों मुनियोंका वचन सत्य किया। वसिष्ठको बहते देख क्रोधी विश्वामित्र क्रोध करके बोले, हे नदियोंमें श्रेष्ठ सरस्वती! तू हमसे छल करके चली गई। इसलिये तेरा जल रुधिर होजाय और उसे राक्षस पियें। बुद्धिमान विश्वामित्रके ऐसे वचन सुनते ही सरस्वतीका जल रुधिर होगया और एक वर्षतक वैसा ही रहा। सरस्वतीकी यह दशा देख ऋषी, देवता, गन्धर्व और अप्सरा आदि सब घवडा गये। हे पृथ्वीनाथ! फिर सरस्वती वैसी ही होगयी उसी दिनसे इस तीर्थका नाम वसिष्ठापवाह तीर्थ हुआ। ३७-४१

शल्यपर्वमें बयालिस अध्याय समाप्त। [२४६७]

शल्यपर्वमें तियालिस अध्याय।

श्रीवैशम्पायन मुनि बोले, हे राजन्! जनमेजय क्रोधभरे बुद्धिमान् विश्वामित्रका शाप होनेसे सरस्वतीकी उस तीर्थ-

तत्र ते शोणितं सर्वे पिबन्तः सुखमासते ॥ २ ॥
तृप्ताश्च सुभृशं तेन सुखिता विगतज्वराः ।
नृत्यन्तश्च हसन्तश्च यथा स्वर्गजितस्तथा ॥ ३ ॥
कस्यचित्त्वथ कालस्य ऋषयः सुतपोधनाः ।
तीर्थयात्रां समाजग्मुः सरस्वत्यां महीपते ॥ ४ ॥
तेषु सर्वेषु तीर्थेषु स्वाप्लुत्य मुनिपुङ्गवाः ।
प्राप्य प्रीतिं परां चापि तपोलुब्धा विशारदाः ॥ ५ ॥
प्रययुर्हि ततो राजन्येन तीर्थमसृग्वहम् ।
अथागम्य महाभागास्तत्तीर्थं दारुणं तदा ॥ ६ ॥
दृष्ट्वा तोयं सरस्वत्याः शोणितेन परिप्लुतम् ।
पीयमानं च रक्षोभिर्बहुभिर्नृपसत्तम ॥ ७ ॥
तान्दृष्ट्वा राक्षसान्राजन्मुनयः संशितव्रताः ।
परित्राणे सरस्वत्याः परं यत्नं प्रचक्रिरे ॥ ८ ॥
ते तु सर्वे महाभागाः समागम्य महाव्रताः ।
आहूय सरितां श्रेष्ठामिदं वचनमब्रुवन् ॥ ९ ॥
कारणं ब्रूहि कल्याणि किमर्थं ते ह्रदो ह्ययम् ।
एवमाकुलतां यातः श्रुत्वाऽध्यास्यामहे वयम् ॥ १० ॥
ततः सा सर्वमाचष्ट यथावृत्तं प्रवेपती ।

में रुधिर बहने लगा। एक दिन कई राक्षस उस शुद्ध तीर्थपर आये और उस रुधिरको पीकर बहुत प्रसन्न होकर इस प्रकार नाचने और हंसने लगे, जैसे स्वर्गमें देवता। एक दिन अनेक तपस्वी तीर्थ करते करते तीर्थोंमें स्नान करने जाते उस रुधिर बहनेवाले तीर्थमें भी पहुंचे। (१-४)

हे राजेन्द्र! महातपस्वी और महाभाग मुनीश्वर सरस्वतीके उस तीर्थमें पानीको रुधिरसे भरा और उसे राक्षसोंको पीते देख, मुनियोंने सरस्वतीके उद्धारका यत्न किया, अनन्तर महाव्रतधारी और महाभाग मुनियोंने नदियोंमें श्रेष्ठ सरस्वतीको बुलाकर पूंछा हे कल्याणी! तुम्हारा यह तालाब ऐसा नष्ट क्यों होगया है? इसका कारण हमसे कहो, सो सुनकर हम लोग कुछ उपाय करेंगे। (५-१०)

ऋषियोंके वचन सुन कांपती हुई सरस्वतीने सब वृत्तान्त कह सुनाया। सरस्वतीको दुःखित देख तपस्वी बोले,

दुःखितामथ तां दृष्ट्वा ऊचुस्ते वै तपोधनाः ॥ ११ ॥
कारणं श्रुतमस्माभिः शापश्चैव श्रुतोऽनघे ।
करिष्यन्ति तु यत्प्राप्तं सर्व एव तपोधनाः ॥ १२ ॥
एवमुक्त्वा सरिच्छ्रेष्ठामूचुस्तेऽथ परस्परम् ।
विमोचयामहे सर्वे शापादेतां सरस्वतीम् ॥ १३ ॥
ते सर्वे ब्राह्मणा राजंस्तपोभिर्नियमैस्तथा ।
उपवासैश्च विविधैर्यमैः कष्टव्रतैस्तथा ॥ १४ ॥
आराध्य पशुभर्तारं महादेवं जगत्पतिम् ।
मोक्षयामासुस्तां देवीं सरिच्छ्रेष्ठां सरस्वतीम् ॥ १५ ॥
तेषां तु सा प्रभावेण प्रकृतिस्था सरस्वती ।
प्रसन्नसलिला जज्ञे यथापूर्वं तथैव हि ॥ १६ ॥
निर्मुक्ता च सरिच्छ्रेष्ठा विबभौ सा यथा पुरा ।
दृष्ट्वा तोयं सरस्वत्या मुनिभिस्तैस्तथाकृतम् ॥ १७ ॥
तानेव शरणं जग्मू राक्षसाः क्षुधितास्तथा ।
कृत्वाञ्जलिं ततो राजन्राक्षसाः क्षुधयाऽर्दिताः ॥ १८ ॥
ऊचुस्तान्वै मुनीन्सर्वान् कृपायुक्तान्पुनः पुनः ।
वयं च क्षुधिताश्चैव धर्माद्धीनाश्च शाश्वतात् ॥ १९ ॥
न च नः कामकारोऽयं यद्वयं पापकारिणः ।
युष्माकं चाप्रसादेन दुष्कृतेन च कर्मणा ॥ २० ॥
यत्पापं वर्धतेऽस्माकं यतः स्मो ब्रह्मराक्षसाः ।

शाप और उसका कारण हम लोगोंने सुना, अब कुछ उपाय करेंगे, सरस्वतीसे ऐसा कहकर ऋषियोंने परस्पर विचार किया कि, सरस्वतीको इस शापसे छुडाना उचित है, फिर, उन सबने तप उपास और कठोर व्रत करके जगत्के स्वामी शिवको प्रसन्न करके सरस्वतीका शाप छुडा दिया। उन ब्राह्मणोंकी कृपासे सरस्वतीका जल पहिलेके समान निर्मल होगया, और पहिलेके समान बहने लगी। (११-१६)

सरस्वतीका जल निर्मल देखकर वे राक्षस भूखे मरने लगे। तब हाथजोडकर उन दयावान् मुनियोंके शरण गये, और कहने लगे। हम लोग सनातन धर्मसे भ्रष्ट होकर राक्षस हुए हैं, और अब भूखसे व्याकुल होरहे हैं, अब हम लोगोंकी यह इच्छा नहीं है, कि हम सब आप

योषितां चैव पापेन योनिदोषकृतेन च ॥ २१ ॥
एवं हि वैश्यशूद्राणां क्षत्रियाणां तथैव च ।
ये ब्राह्मणान्प्रद्विषंति ते भवन्तीह राक्षसाः ॥ २२ ॥
आचार्यमृत्विजं चैव गुरुं वृद्धजनं तथा ।
प्राणिनो येऽवमन्यन्ते ते भवन्तीह राक्षसाः ॥ २३ ॥
तत्कुरुध्वमिहास्माकं तारणं द्विजसत्तमाः ।
शक्ता भवंतः सर्वेषां लोकानामपि तारणे ॥ २४ ॥
तेषां तु वचनं श्रुत्वा तुष्टुवुस्तां महानदीम् ।
मोक्षार्थं रक्षसां तेषामूचुः प्रयतमानसाः ॥ २५ ॥
क्षतं कीटावपन्नं च यच्चोच्छिष्टाचितं भवेत् ।
सकेशमवधूतं च रुदितोपहतं च यत् ॥ २६ ॥
एभिः संसृष्टमन्नं च भागोऽसौ रक्षसामिह ।
तस्माज्ज्ञात्वा सदा विद्वानेतान्यत्नाद्विवर्जयेत् ॥२७॥
राक्षसान्नमसौ भुंक्ते यो भुंक्ते ह्यन्नमीदृशम् ।
शोधयित्वा ततस्तीर्थमृषयस्ते तपोधनाः ॥ २८ ॥
मोक्षार्थं राक्षसानां च नदीं तां प्रत्यचोदयन् ।
महर्षीणां मतं ज्ञात्वा ततः सा सरितां वरा ॥ २९ ॥
अरुणामानयामास स्वां तनुं पुरुषर्षभ ।

लोगोंका द्वेष करके पापी बने और घोर पापमें पडे हमलोग ब्रह्मराक्षस हैं। योनि दोष और स्त्रियोंके दोषसे हमें पाप करना ही होता है। जो वैश्य, शूद्र और क्षत्रिय ब्राह्मणोंके द्वेष करते हैं वे हमारे ही समान राक्षस होंगे। जो आचार्य ऋत्विग गुरु और बूढेका द्वेष करते हैं। प्रथम जो किसी प्राणीका द्वेष करते हैं, वे भी राक्षस होंगे। (१७—२२)

हे मुनीश्वरों तुम लोग तीनों लोकका उद्धार करनेमें समर्थ हो, इसलिये हम लोगोंका भी उद्धार कीजिये। राक्षसोंके वचन सुनकर ऋषियोंने महानदीसे कहा कि जो अन्न सडा, कीडोंसे खाया, जूठा, बालयुक्त और रोते हुए मनुष्यसे दिया हुआ अन्न राक्षसोंका भाग होगा, जो इस अन्नको खायगा वह राक्षसोंका अन्न खानेवाला होगा, इसलिये बुद्धिमान यत्नके सहित विचार करके इन अन्नोंको छोड देय। ऋषियोंने उन उन राक्षसोंको मुक्तिके लिये सरस्वतीसे वरदान मांगा।

तस्यां ते राक्षसाः स्नात्वा तनूस्त्यक्त्वा दिवं गताः ॥ ३०॥
अरुणायां महाराज ब्रह्मवध्यापहा हि सा।
एतमर्थमभिज्ञाय देवराजः शतक्रतुः ॥ ३१ ॥
तस्मिंस्तीर्थे वरे स्नात्वा विमुक्तः पाप्मना किल।
जनमेजय उवाच- किमर्थं भगवान् शक्रो ब्रह्मवध्यामवाप्तवान् ॥ ३२ ॥
कथमस्मिंश्च तीर्थे वै आप्लुत्याकल्मषोऽभवत्।
वैशंपायन उवाच- शृणुष्वैतदुपाख्यानं यथा वृत्तं जनेश्वर ॥ ३३ ॥
यथा बिभेद समयं नमुचेर्वासवः पुरा।
नमुचिर्वासवाद्भीतः सूर्यरश्मिं समाविशत् ॥ ३४ ॥
तेनेन्द्रः सख्यमकरोत्समयं चेदमब्रवीत्।
न चार्द्रेण न शुष्केण न रात्रौ नापि चाहनि ॥ ३५ ॥
वधिष्याम्यसुरश्रेष्ठ सखे सत्येन ते शपे।
एवं स कृत्वा समयं दृष्ट्वा नीहारमीश्वरः ॥ ३६ ॥
चिच्छेदास्य शिरो राजन्नपां फेनेन वासवः।
तच्छिरो नमुचेश्छिन्नं पृष्ठतः शक्रमन्वियात् ॥ ३७ ॥
भो भो मित्रहन् पापेति ब्रुवाणं शक्रमन्तिकात्।

हे पृथ्वीनाथ! ऋषियोंकी सम्मति जानकर सरस्वतीने अरुणनामक अपनी दूसरी धाराको बुलाया, राक्षसोंने उसमें स्नान किया और उनकी मुक्ति होगई। (२४—३०)

अरुणामें स्नान करनेसे ब्रह्महत्या छूट जाती है यह विचार देवराज इन्द्रने इस तीर्थमें स्नान किया और ब्रह्महत्यासे छूट गये। (३१)

राजा जनमेजय बोले, हे भगवन्! इन्द्रको ब्रह्महत्या क्यों लगी थी? और इस तीर्थमें स्नान करनेसे वे पाप रहित कैसे होगये?। (३२)

श्रीवैशम्पायन मुनि बोले, हे महाराज! जिस प्रकार इन्द्रने विश्वासघात किया था, सो कथा हम तुमसे कहते हैं तुम सुनो। पहिले समयमें नमुची इन्द्रसे डर कर सूर्यकी किरणोंमें घुस गये, तब इन्द्रने उससे मित्रता करली और उसके सङ्ग यह प्रतिज्ञा करी कि, हे राक्षस श्रेष्ठ मित्र! हम सत्यकी शपथ खाकर कहते हैं कि तुम्हें न सूखेसे न गीलेसे न रातको और न दिनको मारेंगे। (३३-३६)

इस प्रतिज्ञाको नमुचीने भी स्वीकार कर लिया, एक दिन इन्द्रने पानीमें

एवं स शिरसा तेन चोद्यमानः पुनः पुनः ॥ ३८ ॥
पितामहाय संतप्त एतमर्थं न्यवेदयत् ।
तमब्रवील्लोकगुरुररुणायां यथाविधि ॥ ३९ ॥
इष्ट्वोपस्पृश देवेन्द्र तीर्थे पापभयापहे ।
एषा पुण्यजला शक्र कृता मुनिभिरेव तु ॥ ४० ॥
निगूढमस्यागमनमिहासीत्पूर्वमेव तु ।
ततोऽभ्येत्यारुणां देवीं प्लावयामास वारिणा ॥ ४१ ॥
सरस्वत्याऽरुणायाश्च पुण्योऽयं संगमो महान् ।
इह त्वं यज देवेन्द्र दद दानान्यनेकशः ॥ ४२ ॥
अत्राप्लुत्य सुघोरात्त्वं पातकाद्विप्रमोक्ष्यसे ।
इत्युक्तः स सरस्वत्याः कुञ्जे वै जनमेजय ॥ ४३ ॥
इष्ट्वा यथावद्बलभिदरुणायामुपास्पृशत् ।
समुक्तः पाप्मना तेन ब्रह्मवध्याकृतेन च ॥ ४४ ॥
जगाम संहृष्टमनास्त्रिदिवं त्रिदशेश्वरः ।
शिरस्तच्चापि नमुचेस्तत्रैवाप्लुत्य भारत ।
लोकान्कामदुघान्प्राप्तमक्षयान् राजसत्तम ॥ ४५ ॥

फेना देखा तब उसहीसे कुहर पडनेके समय उसका शिर काट दिया। वह कटा हुवा नमुचीका शिर बोला! अरे मित्रको मारने वाले पापी! ऐसा कहता हुआ इन्द्रके बहुत पीछे दौडा। इन्द्र उससे व्याकुल होकर ब्रह्माके पास गये, और यह सब समाचार कह सुनाया। (३६—३९)

लोगगुरू ब्रह्माने कहा कि, हे इन्द्र! सरस्वतीको मुनियोंने पवित्र जलवाली बनादिया है। इसलिये तुम उसहीके पाप भय नाशक तीर्थ पर जाकर यज्ञ करो और जलका स्पर्श करो। यह नदी पहिले समयमें गूढ भावसे यहां आई थी, यह स्थान सरस्वती और अरुणाका सङ्गम है, इसलिये बहुत पवित्र तीर्थ है। हे देवेन्द्र! तुम वहां जाकर यज्ञ करो और अनेक प्रकारके दान दो। तब तुम इस घोर ब्रह्महत्यारूपी पापसे छूटोगे ब्रह्मा के ऐसे वचन सुन इन्द्रने उस तीर्थमें जाकर स्नान किया, और विधिके अनुसार यज्ञ किया, तब उस ब्रह्महत्यासे छुट कर और अत्यन्त प्रसन्न होकर स्वर्गको चले गये। वह शिर भी उस तीर्थमें स्नान करके अक्षय लोगोंको चला गया। (४०-४५)

वैशंपायनउवाच-तत्राप्युपस्पृश्य बलो महात्मा दत्वा च दानानि पृथग्विधानि।
अवाप्य धर्मं परमार्थकर्मा जगाम सोमस्य महत्सुतीर्थम् ॥४६॥
यत्रायजद्राजसूयेन सोमः साक्षात्पुरा विधिवत्पार्थिवेन्द्र।
अत्रिर्धीमान्विप्रमुख्यो बभूव होता यस्मिन्क्रतुमुख्ये महात्मा ॥४७॥
यस्यान्तेऽभूत्सुमहद्दानवानां दैतेयानां राक्षसानां च देवैः।
यस्मिन्युद्धं तारकाख्यं सुतीव्रं यत्र स्कंदस्तारकाख्यं जघान ॥ ४८॥
सैनापत्यं लब्धवान्देवतानां महासेनो यत्र दैत्यांतकर्त्ता। [२५१६]
साक्षाच्चैवं न्यवसत्कार्त्तिकेयः सदा कुमारो यत्र स प्लक्षराजः॥४९॥

इति श्रीमहा०शल्यपर्वांतर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने त्रिचत्वारिंशोऽध्यायः॥ ४३॥

जनमेजय उवाच--सरस्वत्याः प्रभावोऽयमुक्तस्ते द्विजसत्तम।
कुमारस्याभिषेकं तु ब्रह्मन्व्याख्यातुमर्हसि ॥ १॥
यस्मिन्देशे च काले च यथा च वदतां वर।
यैश्चाभिषिक्तो भगवान्विधिना येन च प्रभुः ॥ २॥
स्कंदो यथा च दैत्यानामकरोत्कदनं महत्।
तथा मे सर्वमाचक्ष्व परं कौतूहलं हि मे ॥ ३॥
वैशंपायन उवाच-कुरुवंशस्य सदृशं कौतूहलमिदं तव।

श्रीवैशम्पायन मुनि बोले, उस तीर्थ में भी उत्तम कर्म करनेवाले, महात्मा बलरामने जलस्पर्श करके बहुत दान दिये, फिर वहांसे सोम तीर्थको चले गये। हे राजेन्द्र! इस ही तीर्थमें चन्द्रमाने राजसूय यज्ञ करी थी; उस यज्ञमें ब्राह्मण श्रेष्ठ बुद्धिमान् महात्मा अत्रि होता थे। इसी स्थानमें देवता और राक्षसोंका घोर युद्ध हुवा था, इसी युद्धमें कार्त्तिकेयने तारकासुरको मारा था, इसी स्थान पर दैत्योंके नाश करनेवाले, स्वामिकार्त्तिकको देव सेनापति पद मिला था, यहीं स्वामिकार्त्तिक प्लक्षके वृक्षके नीचे सदा निवास करते हैं। (४६-४९) [२५१६]

शल्यपर्वमें तैंयालिस अध्याय समाप्त।

शल्यपर्वमें चवालीस अध्याय।

राजा जनमेजय बोले, हे ब्राह्मण श्रेष्ठ! आपने हमसे सरस्वतीका महात्म कहा, अब कार्त्तिकेयके अभिषेककी कथा हमसे कहिये। हे कहनेवालोंमें श्रेष्ठ! भगवान् कार्त्तिकेयका किस समय किस देशमें किस किस विधिसे अभिषेक किया था? उन्होंने किस प्रकार दैत्योंका नाश किया था? यह कथा सुननेकी हमारी बहुत इच्छा है, आप कहिये। (१-३)

हर्षमुत्पादयत्येव वचो मे जनमेजय ॥ ४ ॥
हन्त ते कथयिष्यामि शृण्वानस्य नराधिप ।
अभिषेकं कुमारस्य प्रभावं च महात्मनः ॥ ५ ॥
तेजो माहेश्वरं स्कन्नमग्नौ प्रपतितं पुरा ।
तत्सर्वभक्षो भगवान्नाशकद्दग्धुमक्षयम् ॥ ६ ॥
तेनासीदति तेजस्वी दीप्तिमान्हव्यवाहनः ।
न चैव धारयामास गर्भं तेजोमयं तदा ॥ ७ ॥
स गङ्गामभिसङ्गम्य नियोगाद्ब्रह्मणः प्रभुः ।
गर्भमाहितवान् दिव्यं भास्करोपमतेजसम् ॥ ८ ॥
अथ गङ्गाऽपि तं गर्भमसहन्ती विधारणे ।
उत्ससर्ज गिरौ रम्ये हिमवत्यमरार्चिते ॥ ९ ॥
स तत्र ववृधे लोकानावृत्य ज्वलनात्मजः ।
ददृशुर्ज्वलनाकारं तं गर्भमथ कृत्तिकाः ॥ १० ॥
शरस्तम्बे महात्मानमनलात्मजमीश्वरम् ।
ममायमिति ताः सर्वाः पुत्रार्थिन्योऽभिचुक्रुशुः ॥११॥
तासां विदित्वा भावं तं मातॄणां भगवान्प्रभुः ।

श्रीवैशम्पायन मुनि बोले, हे राजन् जनमेजय ! तुम जो हमारे वचन सुन-कर प्रसन्न हुए हो यह कुरुकुलके अनु-सार ही है। हम महात्मा कार्त्तिकेयका अभिषेक और प्रभाव तुमसे वर्णन करते हैं, सुनो। (४-५)

पहिले समयमें शिवका तेज अग्निमें गिरा था, यद्यपि भगवान् अग्नि सब वस्तुको खा सक्ते हैं तौभी उस अक्षय वीर्यको भस्म न कर सके। तब अग्निका तेज बहुत बढ गया, तौभी अग्नि उस तेजसे भरे गर्भको धारण न कर सके। अनन्तर अग्निने ब्रह्माकी आज्ञासे वह सूर्यके समान तेजस्वी गर्भ गङ्गाको दे दिया। परन्तु गङ्गा भी उस गर्भको धारण न कर सकी और देव पूजित हिमालय पर्वत पर फेंक दिया। वह अग्निके समान तेजस्वी गर्भ वहीं बढने लगा, और सब लोक उसके तेजसे पूरित होगये। एक दिन उस सरकंडेके वनमें पडे महात्मा भगवानको कृत्तिका नक्षत्रोंने देखा, तब उन सबने उन्हें पुत्र बनानेके लिये कहा कि ये हमारे पुत्र हैं। (६-११)

भगवान् कार्त्तिकेय भी उनका अभि-प्राय जान कर अपने छः मुख बनाकर

प्रस्नुतानां पयः षड्भिर्वदनैरपिबत्तदा ॥ १२ ॥
तं प्रभावं समालक्ष्य तस्य बालस्य कृत्तिकाः।
परं विस्मयमापन्ना देव्यो दिव्यवपुर्धराः ॥ १३ ॥
यत्रोत्सृष्टः स भगवान्गङ्गया गिरिमूर्द्धनि।
स शैलकाञ्चनः सर्वः सम्बभौ कुरुसत्तम ॥ १४ ॥
वर्धता चैव गर्भेण पृथिवी तेन रञ्जिता।
अतश्च सर्वे संवृत्ता गिरयः काञ्चनाकराः ॥ १५ ॥
कुमारः सुमहावीर्यः कार्तिकेय इति स्मृतः।
गाङ्गेयः पूर्वमभवन्महायोगबलान्वितः ॥ १६ ॥
शमेन तपसा चैव वीर्येण च समन्वितः।
ववृधेऽतीव राजेन्द्र चन्द्रवत्प्रियदर्शनः ॥ १७ ॥
स तस्मिन्काञ्चने दिव्ये शरस्तम्बे श्रिया वृतः।
स्तूयमानः सदा शेते गन्धर्वैर्मुनिभिस्तथा ॥ १८ ॥
तथैनमन्वनृत्यन्त देवकन्याः सहस्रशः।
दिव्यवादित्रनृत्यज्ञाः स्तुवन्त्यश्चारुदर्शनाः ॥ १९ ॥
अन्वास्ते च नदीदेवं गङ्गा वै सरितां वरा।
दधार पृथिवी चैनं बिभ्रती रूपमुत्तमम् ॥ २० ॥

उन छाहोंका दूध पीने लगे। दिव्य शरीर धारण करनेवाली कृत्तिका देवी उस बालकका प्रभाव देखकर विस्मित होगई। हे कुरुकुल श्रेष्ठ! जहां पर गङ्गाने उस गर्भको गिराया था, वह पर्वत उत्तम सोनेके समान चमकने लगा, बढते बढते वह तेज सब जगत्में फैल गया। इस लिये सब पर्वत भी भरगये और उनमेंसे सोना निकलने लगा॥ (१२—१५)

हे राजेन्द्र! गङ्गापुत्र महायोगी महा बलवान कार्त्तिकेय उसी दिनसे कार्तिकेय नामसे प्रसिद्ध हुए, तब वे अपने शम, तपस्या और वीर्यके बलसे चन्द्रमाके समान बढने लगे। और वैसे ही सुन्दर भी होगये उस ही सरकण्डेके वनमें उनकी स्तुती करनेके लिये गन्धर्व और मुनि आने लगे। सुन्दर रूपवाली सहस्रों गन्धर्व और देवतोंकी कन्या उनके पास आके नाचने गाने और दिव्य बाजे बजाकर उनकी स्तुती करने लगीं। नदियोंमें श्रेष्ठ गङ्गाभी उनके पास आती थी, जबसे पृथ्वीने उन्हें धारण किया था, तबसे पृथ्वीका भी तेज बहुत बढ गया था। अनन्तर बृहस्पतिने उनका जात-

जातकर्मादिकास्तत्र क्रियाश्चक्रे बृहस्पतिः ।
वेदश्चैनं चतुर्मूर्तिरुपतस्थे कृताञ्जलिः ॥ २१ ॥
धनुर्वेदश्चतुष्पादः शस्त्रग्रामः ससंग्रहः ।
तत्रैनं समुपातिष्ठत्साक्षाद्वाणी च केवला ॥ २२ ॥
स ददर्श महावीर्यं देवदेवमुमापतिम् ।
शैलपुत्र्यासमासीनं भूतसङ्घशतैर्वृतम् ॥ २३ ॥
निकाया भूतसङ्घानां परमाद्भुतदर्शनाः ।
विकृता विकृताकारा विकृताभरणध्वजाः ॥ २४ ॥
व्याघ्रसिंहर्क्षवदना बिडालमकराननाः ।
वृषदंशमुखाश्चान्ये गजोष्ट्रवदनास्तथा ॥ २५ ॥
उलूकवदनाः केचिद्गृध्रगोमायुदर्शनाः ।
क्रौञ्चपारावतनिभैर्वदनैराङ्कवैरपि ॥ २६ ॥
श्वाविच्छल्यकगोधानामजैडकगवां तथा ।
सदृशानि वपूंष्यन्ये तत्र तत्र व्यधारयन् ॥ २७ ॥
केचिच्छैलाम्बुदप्रख्याश्चक्रोद्यतगदायुधाः ।
केचिदञ्जनपुञ्जाभाः केचिच्छ्वेताचलप्रभाः ॥ २८ ॥
सप्त मातृगणाश्चैव समाजग्मुर्विशाम्पते ।

कर्म किया था । चारों वेद चारों उपवेद चरण शस्त्र और संग्रह ग्रन्थोंके सहित धनुर्वेद हाथ जोडकर उनके पास आये इसी प्रकार सरस्वती भी उनके पास पहुंच गई । (१६—२२)

एकदिन कार्त्तिकेयने पार्वती और अनेक प्रकारके रूपधारी भूतोंके सङ्ग बैठे महाबलवान शिवको देखा । शिवके सङ्गके भूत अद्भुत थे, कोई विचित्र ध्वजावाला, कोई विचित्र भूषणवाला, किसीका सिंहके ऐसा मुंह, किसीका गधेके समान मुख, किसीका, रीछके समान मुंह, किसीका भेडिये, किसीका मगर, किसीका हाथी, किसीका ऊंट, किसीका उल्लू, किसीका गिदड, किसीका कुञ्ज और किसीका कबूतरके समान मुख था । (२३—२६)

किसीका शरीर भेडिये, किसीका साही, किसीका गोह, किसीका बकरी, किसीका भेड, और किसीका गायके समान था । कोई पर्वत और मेघोंके समान शरीरवाले थे। कोईगदा और कोई चक्र लिये थे, कोई अञ्जनके समान काले और कोई सफेद पर्वतके समान सुन्दर

साध्या विश्वेऽथ मरुतो वसवः पितरस्तथा ॥ २९ ॥
रुद्रादित्यास्तथा सिद्धा भुजगा दानवाः खगाः ।
ब्रह्मा स्वयम्भूर्भगवान्सपुत्रः सह विष्णुना ॥ ३० ॥
शक्रस्तथाऽभ्ययाद्द्रष्टुं कुमारवरमच्युतम् ।
नारदप्रमुखाश्चापि देवगन्धर्वसत्तमाः ॥ ३१ ॥
देवर्षयश्च सिद्धाश्च बृहस्पतिपुरोगमाः ।
पितरो जगतः श्रेष्ठा देवानामपि देवताः ॥ ३२ ॥
तेऽपि तत्र समाजग्मुर्यामाधामाश्च सर्वशः ।
स तु बालोऽपि बलवान्महायोगबलान्वितः ॥ ३३ ॥
अभ्याजगाम देवेशं शूलहस्तं पिनाकिनम् ।
तमाव्रजन्तमालक्ष्य शिवस्यासीन्मनोगतम् ॥ ३४ ॥
युगपच्छैलपुत्र्याश्च गङ्गायाः पावकस्य च ।
कं नु पूर्वमयम्बालो गौरवादभ्युपैष्यति ॥ ३५ ॥
अपि मामिति सर्वेषां तेषामासीन्मनोगतम् ।
तेषामेतमभिप्रायश्चतुर्णामुपलक्ष्य सः ॥ ३६ ॥
युगपद्योगमास्थाय ससर्ज विविधास्तनूः ।
ततोऽभवच्चतुर्मूर्तिः क्षणेन भगवान्प्रभुः ॥ ३७ ॥
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठतः ।
एवं स कृत्वा ह्यात्मानं चतुर्धा भगवान्प्रभुः ॥ ३८ ॥

थे। हे पृथ्वीनाथ ! शिवके सङ्ग सातों मातृगण, साध्य, विश्वेदेव, वसु, पितर, रुद्र, आदित्य, सिद्ध, सर्प, पक्षी, पुत्र सहित भगवान् ब्रह्मा, इन्द्र, नारदादिक, मुनि, देवता, गन्धर्व, बृहस्पत्यादि सिद्ध, देव, ऋषि, विष्णु, जगत् श्रेष्ठ पितर और यामा, धामा, आदि देवतोंके देवता उस अविनाशी बालकको देखने आये। (२७-३३)

उनको देख महायोगी कार्त्तिकेय भी शूलधारी देवराज शिवके पासको चले, कार्त्तिकेयको आते देख शिव, पार्वती, गङ्गा और अग्नि इन चारोंके मनमें यह बात उठी कि यह बालक पहिले हमारे ही पास आवेंगे। इन चारोंका यह अभिप्राय जान भगवान् कार्त्तिकेयने क्षण भरमें अपनी मायासे चार शरीर बना लिये, उन चारोंके ये नाम हैं, शाख विशाख, नैगमेय, और स्कन्द, इस प्रकार चार अद्भुत शरीर भगवान

यतो रुद्रस्ततः स्कन्दो जगामाद्भुतदर्शनः ।
विशाखस्तु ययौ येन देवी गिरिवरात्मजा ॥ ३९ ॥
शाखो ययौ स भगवान्वायुमूर्तिर्विभावसुम् ।
नैगमेयोऽगमद्गङ्गां कुमारः पावकप्रभः ॥ ४० ॥
सर्वे भासुरदेहास्ते चत्वारः समरूपिणः ।
तान्समभ्ययुरव्यग्रास्तदद्भुतमिवाभवत् ॥ ४१ ॥
हाहाकारो महानासीद्देवदानवरक्षसाम् ।
तद्दृष्ट्वा महदाश्चर्यमद्भुतं लोमहर्षणम् ॥ ४२ ॥
ततो रुद्रश्च देवी च पावकश्च पितामहम् ।
गङ्गया सहिताः सर्वे प्रणिपेतुर्जगत्पतिम् ॥ ४३ ॥
प्रणिपत्य ततस्ते तु विधिवद्राजपुङ्गव ।
इदमूचुर्वचो राजन्कार्तिकेयप्रियेप्सया ॥ ४४ ॥
अस्य बालस्य भगवन्नाधिपत्यं यथेप्सितम् ।
अस्मत्प्रियार्थं देवेश सदृशं दातुमर्हसि ॥ ४५ ॥
ततः स भगवान्धीमान्सर्वलोकपितामहः ।
मनसा चिन्तयामास किमयं लभतामिति ॥ ४६ ॥
ऐश्वर्याणि च सर्वाणि देवगंधर्वरक्षसाम् ।
भूतयक्षविहंगानां पन्नगानां च सर्वशः ॥ ४७ ॥
पूर्वमेवादिदेशासौ निकायेषु महात्मनाम् ।

कार्त्तिकेयने बनाये । (३४—३८)

तिनमेंसे स्कन्द शिवके पास, विशाख पार्वतीदेवीके पास, भगवान साधुमूर्त्ति शाख अग्निके पास और अग्निके समान तेजस्वी नैगमेय गङ्गाके पास गये । ये चारों महातेजस्वी और समान रूपवाले, चारों एकही समय चारोंके पास गये यह देखकर देवता, दानव और राक्षस विस्मय करके हाहाकार करने लगे, और इन सबके रोंए खडे होगये। तब शिव, पार्वती, अग्नि और गङ्गाने कार्त्तिकेयको ब्रह्माके पैरोंमें डाल दिया। और प्रणाम करके चारों बोले।(३९-४४

हे भगवन्! आप हमलोगोंकी प्रसन्नताके लिये इस बालकको कहींका स्वामी बना दीजिये । उनके वचन सुन भगवान बुद्धिमान ब्रह्मा शोचने लगे, कि इस बालकको क्या देना चाहिये । सब रत्न पहिले ही देवता, गन्धर्व, राक्षस, भूत, पक्षी और सर्पोंको दे चुके हैं और

समर्थं च तमैश्वर्ये महामतिरमन्यत ॥ ४८ ॥
ततो मुहूर्तं स ध्यात्वा देवानां श्रेयसि स्थितः ।
सैनापत्यं ददौ तस्मै सर्वभूतेषु भारत ॥ ४९ ॥
सर्वदेवनिकायानां ये राजानः परिश्रुता ।
तान्सर्वान्व्यादिदेशास्मै सर्वभूतपितामहः ॥ ५० ॥
ततः कुमारमादाय देवा ब्रह्मपुरोगमाः ।
अभिषेकार्थमाजग्मुः शैलेन्द्रसहितास्ततः ॥ ५१ ॥
पुण्यां हैमवतीं देवीं सरिच्छ्रेष्ठां सरस्वतीम् ।
समन्तपञ्चके या वै त्रिषु लोकेषु विश्रुता ॥ ५२ ॥
तत्र तीरे सरस्वत्याः पुण्ये सर्वगुणान्विते ।
निषेदुर्देवगंधर्वाः सर्वे सम्पूर्णमानसाः ॥ ५३ ॥ [२५६९]

इति श्रीमहा० शल्यपर्वांतर्गतगदापर्वणि बलदेवतीर्थ० सारस्वतो० कुमाराभिषेकोपक्रमे चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

वैशंपायन उवाच-ततोऽभिषेकसम्भारान् सर्वान् सम्भृत्य शास्त्रतः ।
बृहस्पतिः समिद्धेऽग्नौ जुहावाग्निं यथाविधि ॥ १ ॥
ततो हिमवता दत्ते मणिप्रवरशोभिते ।
दिव्यरत्नाचिते पुण्ये निषण्णं परमासने ॥ २ ॥
सर्वमङ्गलसंभारैर्विधिमन्त्रपुरस्कृतम् ।

सब ऐश्वर्य भी सब पा चुके हैं। थोडे समयतक विचार करके ब्रह्माने उन्हे सब ऐश्वर्य भोगनेमें समर्थ समझा और देवतोंका सेनापति बना दिया, फिर देवतोंके सब राजोंको बुलाकर ब्रह्माने यह आज्ञा सुना दी। (४५-५०)

अनन्तर हिमाचलके सहित ब्रह्मादिक देवता कार्त्तिकेयको सङ्ग लेकर इनका अभिषेक करनेके लिये सब नदियोंमें श्रेष्ठ पवित्र सरस्वती देवीके तटपर तीनों लोक विख्यात समंतपञ्चक नामक तीर्थ-पर आये, वहां पवित्र सब गुणोंसे भरे सरस्वतीके तटपर सब देवता प्रसन्न होकरे बैठे। (५१—५३) [२५६९]

शल्यपर्वमें चवालिस अध्याय समाप्त।

शल्यपर्वमें पैंतालीस अध्याय।

श्रीवैशम्पायन मुनि बोले, हे राजन्! जनमेजय! तब बृहस्पति अभिषेककी सब सामग्री इकट्ठी करके शास्त्रमें लिखी विधिके अनुसार होम करने लगे। (१)

अनन्तर हिमाचलके दिये उत्तम मणिजटित सिंहासनपर कार्त्तिकेयको

आभिषेचनिकं द्रव्यं गृहीत्वा देवतागणाः ॥ ३ ॥
इन्द्राविष्णू महावीर्यौ सूर्याचन्द्रमसौ तथा ।
धाता चैव विधाता च तथा चैवानिलानलौ ॥ ४ ॥
पूष्णा भगेनार्यम्णा च अंशेन च विवस्वता ।
रुद्रश्च सहितो धीमान्मित्रेण वरुणेन च ॥ ५ ॥
रुद्रैर्वसुभिरादित्यैरश्विभ्यां च वृतः प्रभुः ।
विश्वेदेवैर्मरुद्भिश्च साध्यैश्च पितृभिः सह ॥ ६ ॥
गन्धर्वैरप्सरोभिश्च यक्षराक्षसपन्नगैः ।
देवर्षिभिरसंख्यातैस्तथा ब्रह्मर्षिभिस्तथा ॥ ७ ॥
वैखानसैर्वालखिल्यैर्वाय्वाहारैर्मरीचिपैः ।
भृगुभिश्चाङ्गिरोभिश्च यतिभिश्च महात्मभिः ॥ ८ ॥
सर्पैर्विद्याधरैः पुण्यैर्योगसिद्धैस्तथावृतः ।
पितामहः पुलस्त्यश्च पुलहश्च महातपाः ॥ ९ ॥
अङ्गिराः कश्यपोऽत्रिश्च मरीचिर्भृगुरेव च ।
क्रतुर्हरः प्रचेताश्च मनुर्दक्षस्तथैव च ॥ १० ॥
ऋतवश्च ग्रहाश्चैव ज्योतींषि च विशाम्पते ।
मूर्तिमत्यश्च सरितो वेदाश्चैव सनातनाः ॥ ११ ॥
समुद्राश्च ह्रदाश्चैव तीर्थानि विविधानि च ।
पृथिवी द्यौर्दिशश्चैव पादपाश्च जनाधिप ॥ १२ ॥
अदितिर्देवमाता च ह्रीः श्रीः स्वाहा सरस्वती ।

बिठलाकर, सब मङ्गलकी सामग्री रखकर और सब अभिषेककी वस्तु इकट्ठी करके महाबलवान् इन्द्र, विष्णु, सूर्य, चन्द्रमा, धाता, विधाता अग्नि, वायु, पूषा, भग, अर्यमागण, अंश, विवस्वान, रुद्र, मित्र, वरुण, वसु, आदित्य, अश्विनीकुमार, मरुत, साध्य, गन्धर्व, पितर, अप्सरा, यक्ष, राक्षस, सांप, देवऋषि, ब्रह्मर्षि, वैखानस, वालखिल्य, वायुभक्षी, किरण भक्षी, भृगु, अङ्गिरादि, महात्मा यती, सर्प, विद्याधर, आदि पवित्र योगी, सिद्ध, ब्रह्मा, पुलस्त्य, महातपा पुलह, अङ्गिरा, कश्यप, अत्रि मरीचि, भृगु, क्रतु, हर, प्रचेता, मनु, दक्ष, यक्ष, तारे, ग्रह, मूर्त्तिमान् सनातन वेद, समुद्र, तालाब, अनेक प्रकारके तीर्थ, पृथ्वी, आकाश, दिशा, वृक्ष, देव माता अदिति, ह्री, श्री, स्वाहा, सरस्वती, सती, सिनी-

उमा शची सिनीवाली तथा चानुमतिः कुहूः॥ १३ ॥
राका च धिषणा चैव पत्न्यश्चान्या दिवौकसाम्।
हिमवांश्चैव विन्ध्यश्च मेरुश्चानेकशृङ्गवान् ॥ १४ ॥
ऐरावतः सानुचरः कलाः काष्ठास्तथैव च।
मासार्धमासा ऋतवस्तथा राज्यहनी नृप ॥ १५ ॥
उच्चैःश्रवा हयश्रेष्ठो नागराजश्च वासुकिः।
अरुणो गरुडश्चैव वृक्षाश्चौषधिभिः सह ॥ १६ ॥
धर्मश्च भगवान्देवः समाजग्मुर्हि सङ्गताः।
कालो यमश्च मृत्युश्च यमस्यानुचराश्च ये ॥ १७ ॥
बहुलत्वाच्च नोक्ता ये विविधा देवतागणाः।
ते कुमाराभिषेकार्थं समाजग्मुस्ततस्ततः ॥ १८ ॥
जगृहुस्ते तदाराजन्सर्व एव दिवौकसः।
आभिषेचनिकं भाण्डम्मङ्गलानि च सर्वशः ॥ १९ ॥
दिव्यसम्भारसंयुक्तैः कलशैः काञ्चनैर्नृप।
सरस्वतीभिः पुण्याभिर्दिव्यतोयाभिरेव तु ॥ २० ॥
अभ्यषिञ्चन्कुमारं वै सम्प्रहृष्टा दिवौकसः।
सेनापतिं महात्मानमसुराणां भयङ्करम् ॥ २१ ॥
पुरा यथा महाराज वरुणं वै जलेश्वरम्।
तथाऽभ्यषिञ्चद्भगवान्सर्वलोकपितामहः ॥ २२ ॥

वाली अनुमती, कूहू, राका धिषणा, आदि देवतोंकी स्त्री, हिमाचल, विन्ध्याचल, अनेक शृङ्गोंके सहित सुमेरु, सेवकोंके सहित ऐरावत, कला, काष्ठा, महीना, पक्ष, रात्रि, दिन, ऋतु, घोडोंमें श्रेष्ठ उच्चैश्रवा, नागराज वासुकि, अरुण, गरुड, वृक्ष, औषधी, भगवान धर्म, शमन सहित यमराज, काल और सेवकों सहित मृत्यु आदि सब देवता अपने अपने घरोंसे अभिषेकके लिये जलके घडे भरकर और मङ्गलकी सामग्री लेकर आये॥ (२-१९)

फिर देवतोंने प्रसन्न होकर सोनेके घडोंमें सरस्वतीका पवित्र और दिव्य जल भरकर राक्षसोंको भय देनेवाले महात्मा कार्त्तिकेयका अभिषेक किया। जैसे पहिले समयमें जलराज वरुणका अभिषेक हुआ था, ऐसे ब्रह्माने और महातेजस्वी कश्यप आदि ऋषियोंने कार्त्तिकेयका अभिषेक किया। फिर

कश्यपश्च महातेजा ये चान्ये लोककीर्तिताः ।
तस्मै ब्रह्मा ददौ प्रीतो बलिनो वातरंहसः ॥ २३ ॥
कामवीर्यधरान्सिद्धान्महापारिषदान्प्रभुः ।
नन्दिसेनं लोहिताक्षं घंटाकर्णं च सम्मतम् ॥ २४ ॥
चतुर्थमस्यानुचरं ख्यातं कुमुदमालिनम् ।
तत्र स्थाणुर्महातेजा महापारिषदं प्रभुः ॥ २५ ॥
मायाशतधरं कामं कामवीर्यबलान्वितम् ।
ददौ स्कन्दाय राजेन्द्र सुरारिविनिबर्हणम् ॥ २६ ॥
स हि देवासुरे युद्धे दैत्यानां भीमकर्मणाम् ।
जघान दोर्भ्यां संक्रुद्धः प्रयुतानि चतुर्दश ॥ २७ ॥
तथा देवा ददुस्तस्मै सेनां नैर्ऋतसंकुलाम् ।
देवशत्रुक्षयकरीमजय्यां विष्णुरूपिणीम् ॥ २८ ॥
जय शब्दं तथा चक्रुर्देवाः सर्वे सवासवाः ।
गन्धर्वा यक्षरक्षांसि मुनयः पितरस्तथा ॥ २९ ॥
ततः प्रादादनुचरौ यमकालोपमावुभौ ।
उन्माथश्च प्रमाथश्च महावीर्यौ महाद्युती ॥ ३० ॥
सुभ्राजो भास्वरश्चैव यौ तौ सूर्यानुयायिनौ ।
तौ सूर्यः कार्तिकेयाय ददौ प्रीतः प्रतापवान् ॥ ३१ ॥

ब्रह्माने प्रसन्न होकर वायुके समान शीघ्र चलनेवाले, इच्छानुसार बलधारी सिद्ध पार्षद दिये। ब्रह्माने कार्त्तिकेयको नन्दिसेन, लोहिताक्ष घण्टाकर्ण और विख्यात कुमुदमाली पारिषद दिये। (२०-२५)

भगवान महातेजस्वी शिवने अनेक माया जाननेवाले दानवोंका नाश करनेवाला महाबलवान एक पार्षद दिया, उसीने देवासुर संग्राममें क्रोध करके चौदह प्रयुत राक्षसोंको अपने पैरोंसे पीस दिया था। अनन्तर देवतोंने विष्णुरूपिणी दानवोंका नाश करनेवाली किसीसे न हारनेवाली नैऋत सेना उनको दे दी। तब इन्द्रादिक सब देवता, गन्धर्व, यक्ष, राक्षस, मुनि और पितर उनकी जय जय पुकारने लगे। (२६-२९)

हे राजन्! अनन्तर प्रतापवान सूर्यने प्रसन्न होकर अपने सङ्ग रहने वाले काल और यमराजके समान बलवान अपने समान तेजस्वी शुभ्राज और भास्वर नामक दो अनुचर दिये। ब्रह्माने भी महाबलवान प्रमाथ और उन्माथ

कैलासशृङ्गसङ्काशौ श्वेतमाल्यानुलेपनौ ।
सोमोऽप्यनुचरौ प्रादान्मणिं सुमणिमेव च ॥ ३२ ॥
ज्वालाजिह्वं तथा ज्योतिरात्मजाय हुताशनः ।
ददावनुचरौ शूरौ परसैन्यप्रमाथिनौ ॥ ३३ ॥
परिघं चवटं चैव भीमं च सुमहाबलम् ।
दहतिं दहनं चैव प्रचंडौ वीर्यसंमतौ ॥ ३४ ॥
अंशोऽप्यनुचरान्पंच ददौ स्कंदाय धीमते ।
उत्क्रोशं पंचकं चैव वज्रदंडधरावुभौ ॥ ३५ ॥
ददावनलपुत्राय वासवः परवीरहा ।
तौ हि शत्रून्महेन्द्रस्य जघ्नतुः समरे बहून् ॥ ३६ ॥
चक्रं विक्रमकं चैव संक्रमं च महाबलम् ।
स्कंदाय त्रीननुचरान् ददौ विष्णुर्महायशाः ॥ ३७ ॥
वर्धनं नंदनं चैव सर्वविद्याविशारदौ ।
स्कंदाय ददतुः प्रीतावश्विनौ भिषजां वरौ ॥ ३८ ॥
कुंदं च कुसुमं चैव कुमुदं च महायशाः ।
डंबराडंबरौ चैव ददौ धाता महात्मने ॥ ३९ ॥
चक्रानुचक्रौ बलिनौ मेघचक्रौ बलोत्कटौ ।
ददौ त्वष्टा महामायौ स्कंदायानुचरावुभौ ॥ ४० ॥

नामक दो अनुचर दिये। चन्द्रमाने कैलाशके शिखरके समान सुन्दर श्वेत मालाधारी और सुमणि नामक दो अनुचर दिये। अग्निने अपने पुत्र कार्त्तिकेयको शत्रुओंकी सेनाको नाश करनेवाले, महावीर ज्वालाजिह्व और ज्योति नामक दो सेवक दिये। अंशुनामक देवताने बुद्धिमान कार्त्तिकेयको परिघ, चवट, महाबलवान भीम, दहती, और महावीर दहन नामक सभासद दिये। शत्रुनाशन इन्द्रने वज्रधारी, उत्क्रोश और दण्डधारी पञ्चक नामक दो सेवक दिये। उन्होंने युद्धमें अनेक दानवोंका नाश किया था। (३०३६)

महायशस्वी विष्णुने चक्र, विक्रम और संक्रम नामक तीन बलवान सभासद दिये। वैद्योंमें श्रेष्ठ अश्विनीकुमारने सब विद्याओंसे पूर्ण वर्द्धन और नंदक नामक दो पारिषद दिये। महात्मा कार्त्तिकेयको धाताने कुसुम, कुंद, कुमुद, डम्बर, और आडम्बर नामक सेवक दिये। त्वष्टाने माया जाननेवाले, महा-

सुव्रतं सत्यसंधं च ददौ मित्रो महात्मने ।
कुमाराय महात्मानौ तपोविद्याधरौ प्रभुः ॥ ४१ ॥
सुदर्शनीयौ वरदौ त्रिषु लोकेषु विश्रुतौ ।
सुव्रतं च महात्मानं शुभकर्माणमेव च ॥ ४२ ॥
कार्त्तिकेयाय संप्रादाद्विधाता लोकविश्रुतौ ।
पाणीतकं कालिकं च महामायाविनावुभौ ॥ ४३ ॥
पूषा च पार्षदौ प्रादात्कार्तिकेयाय भारत ।
बलं चातिबलं चैव महावक्त्रौ महाबलौ ॥ ४४ ॥
प्रददौ कार्तिकेयाय वायुर्भरतसत्तम ।
यमं चातियमं चैव तिमिवक्त्रौ महाबलौ ॥ ४५ ॥
प्रददौ कार्तिकेयाय वरुणः सत्यसंगरः ।
सुवर्चसं महात्मानं तथैवाप्यतिवर्चसम् ॥ ४६ ॥
हिमवान्प्रददौ राजन् हुताशनसुताय वै ।
कांचनं च महात्मानं मेघमालिनमेव च ॥ ४७ ॥
ददावनुचरौ मेरुरग्निपुत्राय भारत ।
स्थिरं चातिस्थिरं चैव मेरुरेवापरौ ददौ ॥ ४८ ॥
महात्मा त्वग्निपुत्राय महाबलपराक्रमौ ।
उच्छृंगं चातिशृंगं च महापाषाणयोधिनौ ॥ ४९ ॥

बलवान मेघचक्र संज्ञक चक्र और अतिचक्र नामक दो अनुचर दिये । महात्मा कार्त्तिकेयको भगवान मित्रने सब माया जाननेवाले, महासुव्रत और सत्यसन्धा नामक दो बलवान पार्षद दिये, ये दोनोंपार्षद विद्या और तपसे भरे थे । विधाताने अत्यन्त सुन्दर तीन लोकोंमें विख्यात महात्मा सुव्रत और शुभकर्मा नामक दो सेवक दिये । (३७-४३)

पूषाने कार्त्तिकेयको सब माया जाननेवाले, पाणीतक और काली नामक दो पार्षद दिये । हे भरतकुल श्रेष्ठ ! वायुने कार्त्तिकेयको बडे मुख और बडे बलवाले बल और अतिबल नामक दो पार्षद दिये । सत्यवादी वरुणने बडे मुख और बडे बलवाले यम और अतियम नामक दो पार्षद दिये । अग्निके पुत्र कार्त्तिकेयको हिमाचलने सुवर्चा और अतिवर्चा नामक दो अनुचर दिये । मेरु पर्वतने अग्निपुत्रको महात्मा कांचन और मेघमाली नामक दो अनुचर दिये। फिर मेरुने स्थिर और अतिस्थिर नामक

प्रददावग्निपुत्राय विंध्यः पारिषदावुभौ।
संग्रहं विग्रहं चैव समुद्रोऽपि गदाधरौ ॥ ५० ॥
प्रददावग्निपुत्राय महापारिषदावुभौ।
उन्मादं शंकुकर्णं च पुष्पदंतं तथैव च ॥ ५१ ॥
प्रददावाग्निपुत्राय पार्वती शुभदर्शना।
जयं महाजयं चैव नागौ ज्वलनसूनवे ॥ ५२ ॥
प्रददौ पुरुषव्याघ्र वासुकिः पन्नगेश्वरः।
एवं साध्याश्च रुद्राश्च वसवः पितरस्तथा ॥ ५३ ॥
सागराः सरितश्चैव गिरयश्च महाबलाः।
ददुः सेना गणाध्यक्षान् शूलपट्टिशधारिणः ॥ ५४ ॥
दिव्यप्रहरणोपेतान्नानावेषविभूषितान्।
शृणु नामानि चाप्येषां येऽन्ये स्कंदस्य सैनिकाः॥५५॥
विविधायुधसंपन्नाश्चित्राभरणभूषिताः।
शंकुकर्णो निकुंभश्च पद्मः कुमुद एव च ॥ ५६ ॥
अनंतो द्वादशभुजस्तथा कृष्णोपकृष्णकौ।
घ्राणश्रवाः कपिस्कंधः कांचनाक्षो जलंधमः ॥ ५७ ॥
अक्षः संतर्जनो राजन् कुनदीकस्तमान्तकृत्।
एकाक्षो द्वादशाक्षश्च तथैवैकजटः प्रभुः ॥ ५८ ॥
सहस्रबाहुर्विकटो व्याघ्राक्षः क्षितिकंपनः।

दो अनुचर और दिये। (४४-४८)

विन्ध्याचलने पत्थरोंसे युद्ध करनेवाले महापराक्रमी उच्छृङ्ग और अतिशृङ्ग नामक दो अनुचरे दिये। समुद्रने गदाधारी संग्रह और विग्रह नामक दो अनुचर दिये। सुन्दरी पार्वतीने उन्माद, शंकुकर्ण और पुष्पदन्त नामक सेवक दिये। सर्पराज वासुकीने अग्निपुत्र को जय और महाजय नामक दो सर्प दिये। इसी प्रकार साध्य, रुद्र, पितर, वसु, समुद्र, नदी, और पर्वतोंने कार्त्तिकेयको शूल और पट्टिश धारी अनेक सेनापति दिये॥ (४९-५५)

हे राजन्! अनेक प्रकारसे युद्ध करनेवाले, सब युद्ध विद्याके जाननेवाले विचित्र भूषणधारी इन गणोंके नाम भी तुम सुनो। शंकुकर्ण, निकुम्भ, पद्म, कुमुद, अनन्त, द्वादशभुजा, कृष्ण उपकृष्ण, घ्राणश्रवा, कपिस्कन्द, कांचनाक्ष, जलन्धर, अक्ष, सन्तर्पन, कुनदीक, तम, तमान्त

पुण्यनामा सुनामा च सुचक्रः प्रियदर्शनः ॥ ५९ ॥
परिश्रुतः कोकनदः प्रियमाल्यानुलेपनः ।
अजो दरो गजशिराः स्कंधाक्षः शतलोचनः ॥ ६० ॥
ज्वालाजिह्वः करालाक्षः शितिकेशो जटी हरिः ।
परिश्रुतः कोकनदः कृष्णकेशो जटाधरः ॥ ६१ ॥
चतुर्दंष्ट्रोष्टजिह्वश्च मेघनादः पृथुश्रवाः ।
विद्युताक्षो धनुर्वक्त्रो जाठरो मारुताशनः ॥ ६२ ॥
उदाराक्षो रथाक्षश्च वज्रनाभो वसुप्रभः ।
समुद्रवेगो राजेन्द्र शैलकंपी तथैव च ॥ ६३ ॥
वृषो मेषः प्रवाहश्च तथा नंदोपनंदकौ ।
धूम्रः श्वेतः कलिंगश्च सिद्धार्थो वरदस्तथा ॥ ६४ ॥
प्रियकश्चैव नन्दश्च गोनन्दश्च प्रतापवान् ।
आनन्दश्च प्रमोदश्च स्वस्तिको ध्रुवकस्तथा ॥ ६५ ॥
क्षेमवाहः सुवाहश्च सिद्धपात्रश्च भारत ।
गोव्रजः कनकापीडो महापारिषदेश्वरः ॥ ६६ ॥
गायनो हसनश्चैव वाणः खड्गश्च वीर्यवान् ।
वैताली गतितालो च तथा कथकवातिकौ ॥ ६७ ॥
हंसजः पङ्कदिग्धाङ्गः समुद्रोन्मादनश्च ह ।
रणोत्कटः प्रहासश्च श्वेतसिद्धश्च नन्दनः ॥ ६८ ॥

कृत, एकाक्ष, द्वादशाक्ष, एकजट, सहस्त्रबाहु, विकट, व्याघ्राक्ष, क्षितिकम्पन, पुण्यनामा, सुनामा, सुचक्र, प्रियदर्शन, परिश्रुत, कोकनद, प्रियमाली, प्रियानुलेपन, अजोदर, गजशिरा, स्कन्धाक्ष, शतलोचन, ज्वालाजिह्व, करालाक्ष, शितिकेश, जटी, हरी, परिश्रुत, कोकनद, कृष्णकेश, जटाधर, चतुर्दंष्ट्र, अष्टजिह्व, मेघनाद, प्रथुश्रवा, विधूताक्ष, धनुर्वक्र, मारुताशन, उदाराक्ष, रथाक्ष, वज्रनाभ, वसुप्रभ, समुद्रवेग, शैलकम्पी, वृषमेष, प्रवाह, नन्द, उपनन्द, धूम्र, श्वेत, कलिङ्ग, सिद्धार्थ, वरद, प्रियक, नन्द, प्रतापी, गोनन्द, आनन्द, अमोद, स्वस्तिक, ध्रुवक, क्षेमवाह, सुवाह, सिद्धपात्र, गोव्रज, कनकापीड, महापारिषदेश्वर। गायन, हसन, बाण, बलवान्, खड्ग, वैताली, गतिताली, कथक, वातिक। हंसज, पङ्क, दिग्धाङ्ग, समद्रोन्मादन, रणोत्कट, प्रहास, श्वेतसिद्ध,

कालकण्ठः प्रभासश्च तथा कुम्भाण्डकोदरः।
कालकक्षः सितश्चैव भूतानां मथनस्तथा ॥ ६९ ॥
यज्ञवाहः सुवाहश्च देवयाजी च सोमपः।
मज्जनश्च महातेजाः क्रथक्राथौ च भारत ॥ ७० ॥
तुहरश्च तुहारश्च चित्रदेवश्च वीर्यवान्।
मधुरः सुप्रसादश्च किरीटी च महाबलः ॥ ७१ ॥
वत्सलो मधुवर्णश्च कलशोदर एव च।
धर्मदो मन्मथकरः सूचीवक्त्रश्च वीर्यवान् ॥ ७२ ॥
श्वेतवक्त्रः सुवक्त्रश्च चारुवक्त्रश्च पाण्डुरः।
दण्डबाहुः सुबाहुश्च रजः कोकिलकस्तथा ॥ ७३ ॥
अचलः कनकाक्षश्च बालानामपि यः प्रभुः।
सञ्चारकः कोकनदो गृध्रपत्रश्च जम्बुकः ॥ ७४ ॥
लोहाजवक्त्रो जवनः कुम्भवक्त्रश्च कुम्भकः।
स्वर्णग्रीवश्च कृष्णौजा हंसवक्त्रश्च चन्द्रभः ॥ ७५ ॥
पाणिकूर्चाश्च शम्बूकः पञ्चवक्त्रश्च शिक्षकः।
चाषवक्त्रश्च जम्बूकः शाकवक्त्रश्च कुण्डलः ॥ ७६ ॥
योगयुक्ता महात्मानः सततं ब्राह्मणप्रियाः।
पैतामहा महात्मानो महापारिषदाश्च ये ॥ ७७ ॥
यौवनस्थाश्च बालाश्च वृद्धाश्च जनमेजय।

नन्दन। कालकण्ठ, प्रभास, कुम्भाण्डोदर, कालकक्ष, शित, भूत, मथन। यज्ञवाहु, सुबाहु, देवयाजी, सोमप, मज्जन, महा, तेजा, कथ, क्राथ, तेजधर, तुहार, बलवान, चित्रदेव, सुप्रसाद, मधुर, महाबलवान, किरीटी, वत्सल, मधुवर्ण, कलशोदर, धर्मद, मन्मथकर, बलवान् सूचीवेणु। सुवक्त्र, श्वेतवक्त्र, चारुवक्त्र, पांडुर, दण्डबाहु, रज, सुबाहु, कोकिल, अचल, कनकाक्ष, बालाप्रिय, सञ्चारक, कोकनद, गृध्र, पुत्र, जम्बुक, लोहवक्त्र, अजवक्त्र, जवन, कुम्भवक्त्र, कुम्भक, स्वर्णग्रीव कृष्णौजा, हंसवक्त्र, चन्द्रमा, पाणीकुक्ष, शम्बुक, पञ्चवक्त्र, शिक्षक, चाशवक्त्र, जम्बुक, शाकवक्त्र और कुञ्जल। आदि ब्रह्माके बनाये योगी महात्मा सदा ब्राह्मणोंके प्यारे सहस्रों पारिषद कार्त्तिकेयके पास आये। (५६-७७)

हे जनमेजय! इनमेंसे कोई युवा, कोई बालक और कोई बुढे थे। अब उनके

सहस्रशः पारिषदाः कुमारमवतस्थिरे ॥ ७८ ॥
वक्त्रैर्नानाविधैर्यैस्तु शृणु तान्जनमेजय ।
कूर्मकुक्कुटवक्त्राश्च शशोलूकमुखास्तथा ॥ ७९ ॥
खरोष्ट्रवदनाश्चान्ये वराहवदनास्तथा ।
मार्जारशशवक्त्राश्च दीर्घवक्त्राश्च भारत ॥ ८० ॥
नकुलोलूकवक्त्राश्च काकवक्त्रास्तथाऽपरे ।
आखुबभ्रुकवक्त्राश्च मयूरवदनास्तथा ॥ ८१ ॥
मत्स्यमेषाननाश्चान्ये अजाविमहिषाननाः ।
ऋक्षशार्दूलवक्त्राश्च द्वीपिसिंहाननास्तथा ॥ ८२ ॥
भीमा गजाननाश्चैव तथा नक्रमुखाश्च ये ।
गरुडाननाः कङ्कमुखा वृककाकमुखास्तथा ॥ ८३ ॥
गोखरोष्ट्रमुखाश्चान्ये वृषदंशमुखास्तथा ।
महाजठरपादाङ्गास्तारकाक्षाश्च भारत ॥ ८४ ॥
पारावतमुखाश्चान्ये तथा वृषमुखाः परे ।
कोकिलाभाननाश्चान्ये श्येनतित्तिरिकाननाः॥ ८५ ॥
कृकलासमुखाश्चैव विरजोऽम्बरधारिणः ।
व्यालवक्त्राः शूलमुखाश्चण्डवक्त्राः शुभाननाः ॥ ८६ ॥
आशीविषाश्चीरधरा गोनासावदनास्तथा ।

अनेक प्रकारके मुखोंका वर्णन सुनो। कोई कछुवे, कोई भुसे, कोई खरहे, कोई उल्लू, कोई गधे, कोई सूअर, कोई बिलावके समान मुखवाले थे। किसीका लम्बा मुख था, कोई नौ उल्लू कौवे, मूंस, मोर, मछली, बकरी, मेढा, भेड, भैंस, रीछ, शार्दूल, गैडा, सिंह, भयानक हाथी, नाको, गरुण, गिद्ध, कङ्क, भेडिया, गाय, गधा, और चीतेके समान मुखवाले थे। (७८-८४)

किसीका बडा पेट किसीके बडे पैर और किसीके तारेके समान नेत्र थे किसीका मुख परे, वा किसीका बैल, किसीका कोकिला, किसीका बाज, किसीका तीतर, किसीका गिर्गट, किसीका सांप, और किसीका शूलके समान भयानक मुख था, ये सब उस समय निर्मल वस्त्र धारण किये थे, और सांपोंके भूषण पहने थे । (८४-८६)

किसीके नाक गायके ऐसी थी, और किसीका मुख गायके ऐसा था, और किसीका शरीर बहुत दुबला और पेट

स्थूलोदराः कृशाङ्गाश्च स्थूलाङ्गाश्च कृशोदराः॥८७॥
ह्रस्वग्रीवा महाकर्णा नानाव्यालविभूषणाः।
गजेन्द्रचर्मवसनास्तथा कृष्णाजिनाम्बराः ॥ ८८ ॥
स्कन्धेमुखा महाराज तथाऽप्युदरतो मुखाः।
पृष्ठे मुखा हनुमुखास्तथा जङ्घामुखा अपि ॥ ८९ ॥
पार्श्वाननाश्च बहवो नानादेशमुखास्तथा।
तथा कीटपतङ्गानां सदृशास्या गणेश्वराः ॥ ९० ॥
नानाव्यालमुखाश्चान्ये बहुबाहुशिरोधराः।
नानावृक्षभुजाः केचित्कटिशीर्षास्तथाऽपरे ॥ ९१ ॥
भुजङ्गभोगवदना नानागुल्मनिवासिनः।
चीरसंवृतगात्राश्च नानाकनकवाससः ॥ ९२ ॥
नानावेषधराश्चैव नानामाल्यानुलेपनाः।
नानावस्त्रधराश्चैव चर्मवासस एव च ॥ ९३ ॥
उष्णीषिणो मुकुटिनः सुग्रीवाश्च सुवर्चसः।
किरीटिनः पञ्चशिखास्तथा काञ्चनमूर्धजाः ॥ ९४ ॥
त्रिशिखा द्विशिखाश्चैव तथा सप्तशिखाः परे।

बहुत बडाथा, किसीका शरीर बहुत मोटा और पेट छोटा था। किसीकी गरदन छोटी थी, और कान भारी थे, कोई सांप लपेट रहा था, कोई हाथीका चमडा ओढ रहा था, और कोई मृग-छाला ओढ रहा था। (८७-८८)

किसीका मुख कंधेमें, किसीका पेटमें किसीका पीठमें, किसीका ठोडीमें किसीका जांघमें। और किसीका पसलीमें मुख था किसीके अनेक मुख थे, किसीके सब शरीरमें मुखी मुख थे, किसीके शरीरमें अनेक सांपोंके मुख लगे थे, किसीके अनेक हाथ और किसीके अनेक शिर थे, किसीके अनेक वृक्षोंके समान हाथ थे और किसीका कमरमें मुख था। किसीका मुख सांपके फणोंके समान था, ये सब अनेक देशोंके रहनेवाले थे, अनेक प्रकारके सोनेके भूषण धारण किये थे। अनेक प्रकारके वस्त्र और माला पहिरे थे, अनेक प्रकारके सुगन्ध लगाये थे, चमडा आढे थे, कोई पगडी बांध थे कोई मुकुट बांधे थे, कोई सुन्दर कंठ-वाले और कोई महातेजस्वी थे, कोई किरीट बांधे थे, किसीके पांच शिखा थीं किसीके सोनेके समान शिखा थीं। किसीके तीन शिखा थीं, किसीके दो

REGISTERED NO. B 1319

अंक ७४ [शल्यपर्व ४]

महाभारत।

भाषा-भाष्य-समेत

संपादक — श्रीपाद दामोदर सातवळेकर,
स्वाध्याय मंडल, औंध जि. सातारा

छपकर तैय्यार हैं।

१ आदिपर्व। पृष्ठ संख्या ११२५. मूल्य म. आ. से ६) रु.
२ सभापर्व। पृष्ठ संख्या ३५६. मूल्य म. आ. से २) रु.
३ वनपर्व। पृष्ठ संख्या १५३८ मूल्य म. आ. से ८) रु.
४ विराटपर्व। पृष्ठ संख्या ३०६ मूल्य. म. आ. से १॥) रु.
५ उद्योगपर्व। पृष्ठ संख्या ९५३ मूल्य. म. आ. से. ५) रु.
६ भीष्मपर्व। पृष्ठ संख्या ८०० मूल्य म. आ. से ४) रु
७ द्रोणपर्व। पृष्ठ संख्या १३६४ मूल्य म० आ० से ७॥) रु.
८ कर्णपर्व। पृष्ठ संख्या ६३७ मू. म० आ० से ३॥) रु.

[१] महाभारतकी समालोचना।

मंत्री— स्वाध्याय मंडल, औंध, (जि. सातारा)

१२ अंकोंका मूल्य म. आ. से. ६) और वी. पी. से ७) विदेशके लिये ८)

शिखण्डिनो मुकुटिनो मुण्डाश्च जटिलास्तथा ॥ ९५॥
चित्रमालाधराः केचित् केचिद्रोमाननास्तथा ।
विग्रहैकरसानित्यमजेयाः सुरसत्तमैः ॥ ९६ ॥
कृष्णा निर्मांसवक्त्राश्च दीर्घपृष्ठास्तनूदराः ।
स्थूलपृष्ठा ह्रस्वपृष्ठाः प्रलम्बोदरमेहनाः ॥ ९७ ॥
महाभुजा ह्रस्वभुजा ह्रस्वगात्राश्च वामनाः ।
कुब्जाश्च ह्रस्वजंघाश्च हस्तिकर्णशिरोधराः ॥ ९८ ॥
हस्तिनासाः कूर्मनासा वृकनासास्तथाऽपरे ।
दीर्घोच्छ्वासा दीर्घजंघा विकराला ह्यधोमुखाः ॥९९॥
महादंष्ट्रा ह्रस्वदंष्ट्राश्चतुर्दंष्ट्रास्तथाऽपरे ।
वारणेन्द्रनिभाश्चान्ये भीमा राजन्सहस्रशः ॥ १०० ॥
सुविभक्तशरीराश्च दीप्तमंतः स्वलंकृताः ।
पिंगाक्षाः शंकुकर्णाश्च रक्तनासाश्च भारत ॥ १०१ ॥
पृथुदंष्ट्रा महादंष्ट्राः स्थूलौष्ठा हरिमूर्धजाः ।
नानापादौष्ठदंष्ट्राश्च नानाहस्तशिरोधराः ॥ १०२ ॥

शिखा थीं और किसीके सात शिखा थीं, किसीका शिर मुडा था और किसीकी जटा बढी थी। किसीके मुख-पर बडे बडे बाल थे,कोई विचित्र माला पहिने थे,ये सब वीररसके प्यारे और देवतोंको भी जीतनेवाले थे।(८९-९६)

सब कालमूखे,मुख बडे बडे कमर और पेटवाले थे, किसीकी कमर बडी भारी और किसीकी कमर छोटी थी,किसीका पेट बडा और किसीका लिङ्ग बडा भारी था, किसीका हाथ बडा और किसीके छोटे छोटे थे, कोई बहुत लम्बे और कोई बौने ही थे, कोई कुबडे और कोई छोटी जांघवाले थे। किसीका कान किसीकी नाक और किसीका शिर हाथीके समान था। किसीकी नाक कछवेके समान थी, किसीकी नाक भेडियेके समान थी,कोई लम्बे श्वास लेता था, किसीकी जङ्घा बडी भारी थी, किसीका मुख बडा भयानक और नीचको था।(९७-९९)

हे राजन्! किसीके बडे बडे दांत, किसीके चार दांत और किसीके हाथीके समान दांत थे किसीका बडा सुन्दर। और तेजस्वी शरीर था! कोई उत्तम। आभूषण पहिने था, किसीके नेत्र बन्द-रके समान थे, किसीके कान छोठे छोटे थे, किसीकी नाक लाल थी, किसीके लम्बे और चौडे दांत थे। किसीके मोटे

नानाचर्मभिराच्छन्ना नानाभाषाश्च भारत ।
कुशला देशभाषासु जल्पन्तोऽन्योन्यमीश्वराः॥१०३॥
हृष्टाः परिपतन्ति स्म महापारिषदास्तथा ।
दीर्घग्रीवा दीर्घनखा दीर्घपादशिरोभुजाः ॥ १०४ ॥
पिंगाक्षा नीलकण्ठाश्च लम्बकर्णाश्च भारत ।
वृकोदरनिभाश्चैव केचिदञ्जनसन्निभाः ॥ १०५ ॥
श्वेताक्षा लोहितग्रीवाः पिंगाक्षाश्च तथा परे ।
कल्माषा बहवो राजंश्चित्रवर्णाश्च भारत ॥ १०६ ॥
चामरापीडकनिभाः श्वेतलोहितराजयः ।
नानावर्णाः सवर्णाश्च मयूरसदृशप्रभाः ॥ १०७ ॥
पुनः प्रहरणान्येषां कीर्त्यमानानि मे शृणु ।
शेषैः कृतः पारिषदैरायुधानां परिग्रहः ॥ १०८ ॥
पाशोद्यतकराः केचिद्व्यादितास्याः खराननाः ।
पृष्ठाक्षा नीलकण्ठाश्च तथा परिघबाहवः ॥ १०९ ॥
शतघ्नीचक्रहस्ताश्च तथा मुसलपाणयः ।

मोटे ओठ और पीले पीले बाल थे, किसीके अनेक चरण किसीके अनेक ओठ,किसीके अनेक हाथ,किसीके अनेक दांत और किसीके अनेक शिर थे। अनेक प्रकारके चमडे ओढे, अनेक भाषाको जाननेवाले, ये सब गण परस्पर वार्त्ता करने लगे और प्रसन्न होकर सभामें आये। किसीका ऊंटके समान गला था किसीके बडे बडे नखून थे, किसीके बडे बडे चरण और किसीके बडे बडे हाथ थे। (१००-१०४)

हे भारत ! किसीके बन्दरके समान आंख थीं, किसीके गले नीले थे, किसीके लम्बे लम्बे कान थे, किसीका भेडियेके समान पेट था, कोई अञ्जनके समान काले शरीरवाला था, किसीकी सफेद आंख और गला था, किसीके पिङ्गलवर्ण नेत्र थे, किसीका विचित्र रङ्ग था, किसीका चमरके समान रंग था, किसीके शरीरपर लाल और सफेद बिन्दु थे, किसीके शरीरमें अनेक रंग थे, कोई एक ही रंगवाला था, और किसीका रंग मोरके समान था। (१०५-१०७)

हे राजन् ! अब तुम इनके शस्त्रोंका वर्णन सुनो। किसीके हाथमें फांसी, किसीका मुख गधेके समान, किसीकी पीठमें आंख थीं, किसीका कण्ठ नीला

असिमुद्गरहस्ताश्च दण्डहस्ताश्च भारत ॥ ११० ॥
गदामुशुंडिहस्ताश्च तथा तोमरपाणयः ।
आयुधैर्विविधैर्घोरैर्महात्मानो महाजवाः ॥ १११ ॥
महाबला महावेगा महापारिषदास्तथा ।
अभिषेकं कुमारस्य दृष्ट्वा हृष्टा रणप्रियाः ॥ ११२ ॥
घंटाजालपिनद्धांगा ननृतुस्ते महौजसः ।
एते चान्ये च बहवो महापारिषदा नृप ॥ ११३ ॥
उपतस्थुर्महात्मानं कार्तिकेयं यशस्विनम् ।
दिव्याश्चाप्यांतरिक्षाश्च पार्थिवाश्चानिलोपमाः ॥११४॥
व्यादिष्टा दैवतैः शूराः स्कंदस्यानुचरा भवन् ।
तादृशानां सहस्राणि प्रयुतान्यर्बुदानि च ॥
अभिषिक्तं महात्मानं परिवार्योपतस्थिरे ॥ ११५ ॥[२६८४]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यपर्वांतर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने स्कन्दाभिषेके पंचचत्वारिंशोऽध्यायः ॥४५॥

वैशंपायन उवाच- शृणु मातृगणान् राजन्कुमारानुचरानिमान् ।
कीर्त्यमानान्मया वीर सपत्नगणसूदनान् ॥ १ ॥
यशस्विनीनां मातॄणां शृणु नामानि भारत ।

था । किसीके हाथमें परिघ, किसीके शतघ्नी, किसीके चक्र, किसीके मुशल, किसीके खड्ग, किसीके दण्ड, किसीके गदा, किसीके भुशुण्डी और किसीके हाथमें तोमर था। महावेगवाले महात्मा महाबलवान गणोंके हाथमें और भी अनेक प्रकारके शस्त्र थे। प्रारब्धसे कार्त्तिकेयका अभिषेक देखकर यह सब युद्ध करनेवाले वीर बहुत प्रसन्न हुए, फिर घण्टे बांधकर नांचने लगे, और भी अनेक पारिषद यशस्वी महात्मा कार्त्तिकेयके पास आये । देवतोंकी आज्ञासे पृथ्वी और अन्तरिक्षमें रहनेवाले वायुके समान वेगवान राजा और पहिले लिखे गणोंके समान हजारों लाखों करोडों और पद्मों गण अभिषेक होते हुए कार्त्तिकेयके चारों ओर खडे होगये ॥ (१०८-११५) [२६८४]

शल्यपर्वमें पैंतालीस अध्याय समाप्त ।

शल्यपर्वमें छतालीस अध्याय ।

श्रीवैशम्पायन मुनि बोले, हे राजन् जनमेजय ! अब हम कार्तिकेयके सङ्ग रहनेवाली शत्रुनाशिनी मातृगणोंका वर्णन करते हैं । तुम सुनो । (१)

याभिर्व्याप्तास्त्रयो लोकाः कल्याणीभिश्च भागशः ॥२॥
प्रभावती विशालाक्षी पालिता गोस्तनी तथा ।
श्रीमती बहुला चैव तथैव बहुपुत्रिका ॥ ३ ॥
अप्सु जाता च गोपाली बृहदंबालिका तथा ।
जयावती मालतिका ध्रुवरत्नाऽभयंकरी ॥ ४ ॥
वसुदामा च दामा च विशोकानन्दिनी तथा ।
एकचूडा महाचूडा चक्रनेमिश्च भारत ॥ ५ ॥
उत्तेजनी जयत्सेना कमलाक्ष्याथ शोभना ।
शत्रुंजया तथा चैव क्रोधना शलभी खरी ॥ ६ ॥
माधवी शुभवक्त्रा च तीर्थसेनिश्च भारत ।
गीतप्रिया च कल्याणी रुद्ररोमाऽमिताशना ॥ ७ ॥
मेघस्वना भोगवती सुभ्रूश्च कनकावती ।
अलाताक्षी वीर्यवती विद्युज्जिह्वा च भारत ॥ ८ ॥
पद्मावती सुनक्षत्रा कन्दरा बहुयोजना ।
सन्तानिका च कौरव्य कमला च महाबला ॥ ९ ॥
सुदामा बहुदामा च सुप्रभा च यशस्विनी ।
नृत्यप्रिया च राजेन्द्र शतोलूखलमेखला ॥ १० ॥
शतघण्टा शतानन्दा भगनन्दा च भाविनी ।
वपुष्मती चन्द्रशीता भद्रकाली च भारत ॥ ११ ॥
ऋक्षांबिका निष्कुटिका वामा चत्वरवासिनी ।

हे भारत ! इन ही यशस्विनी कल्याणी मातृयोंसे ये सब जगत् व्याप्त है। प्रभावती, विशालाक्षी, पालिता, गोस्तनी, श्रीमती, बहुला, बहुपुत्रिका, अप्सुजाता, गोपाली, बृहदम्बिका, जयावती, मालतिका, ध्रुवरत्ना, अभयङ्करी, वसुदामा, दामा, विशोका, नन्दनी, एकचूडा, महाचूडा, चक्रनेमी, उत्तेजनी, जयत्सेना, कमलाक्षी, शोभना, शत्रुंजया, क्रोधना, शलभी, खरी, माधवी, शुभवक्रा, तीर्थसेनी, गीतप्रिया, कल्याणी रुद्ररोमा, अमिताशना, मेघस्वना, भोगवती, सुभ्रू, कनकावती, अलाताक्षी, वीर्यवती, विद्युज्जिह्वा, पद्मावती, सुनक्षत्रा, कन्दरा, बहुयोजना, सन्तानिका महाबला, कमला, सुदामा, बहुदामा, सुप्रभा, यशस्विनी, नृत्यप्रिया, शता, उलूखलमेखला, शतघण्टा, शतानन्दा, भगनन्दा, भाविनी वपुष्मती, चन्द्र

सुमंगला स्वस्तिमती बुद्धिकामा जयप्रिया ॥ १२ ॥
धनदा सुप्रसादा च भवदा च जलेश्वरी ।
एडी भेडी समेडी च वेतालजननी तथा ॥ १३ ॥
कण्डूतिः कालिका चैव देवमित्रा च भारत ।
वसुश्रीः कोटरा चैव चित्रसेना तथाऽचला ॥ १४ ॥
कुक्कुटिका शङ्खलिका तथा शकुनिका नृप ।
कुण्डारिका कौकुलिका कुम्भिकाऽथ शतोदरी ॥१५ ॥
उत्क्राथिनी जलेला च महावेगा च कङ्कणा ।
मनोजवा कण्टकिनी प्रघसा पूतना तथा ॥ १६ ॥
केशयंत्री त्रुटिर्वामा क्रोशनाथऽतडित्प्रभा ।
मन्दोदरी च मुण्डी च कोटरा मेघवाहिनी ॥ १७ ॥
सुभगा लम्बिनी लम्बा ताम्रचूडा विकाशिनी ।
ऊर्ध्ववेणीधरा चैव पिङ्गाक्षी लोहमेखला ॥ १८ ॥
पृथुवस्त्रा मधुलिका मधुकुम्भा तथैव च ।
पक्षालिका मत्कुलिका जरायुर्जर्जरानना ॥ १९ ॥
ख्याता दहदहा चैव तथा धमधमा नृप ।
खण्डखण्डा च राजेन्द्र पूषणा मणिकुट्टिका ॥ २० ॥
अमोघा चैव कौरव्य तथा लम्बपयोधरा ।
वेणुवीणाधरा चैव पिङ्गाक्षी लोहमेखला ॥ २१ ॥

शीता, भद्रकाली, ऋक्षा, आम्बिका, निष्कुटिका, वामा, चत्वरवासिनी, सुमङ्गला स्वस्तिमती, वुद्धिकामा, जयप्रिया, धनदा, सुप्रसादा, भवदा, जलेश्वरी, एडी, भेडी समेडी, वेतालजननी, कण्डूती, कालिका, देवमित्रा, वसुश्री, कोटरा, चित्रसेना, कुक्कुटिका, शङ्खलिका, शकुनिका, कुण्डारिका, कौकुलिका, कुम्भिका, शतोदरी, उत्क्राथिनी, जलेला, महावेगा, कङ्कणा, मनोजवा, कण्टकिनी, प्रघसा, पूतना, केशयन्त्री, त्रुटी, वामा, क्रोशना, तड़ित्प्रभा, मन्दोदरी, मुण्डी, कोटरा मेघवाहिनी, सुभगा, लम्बिनी, लम्बा, ताम्र चूडा, विकाशिनी, ऊर्ध्ववेणीधरा, पिंगाक्षी, लोहमेखला, पृथुवस्त्रा, मधूलिका, मधुकुम्भा, पक्षालिका, मत्कुलिका, जरायु, जर्जरानना, ख्याता दहदहा, धमधमा, खण्डखण्डा, पूषणा, मणिकुट्टिका, अमोघा, लम्बपयोधरा, वेणुवीणाधरा, पिंगाक्षी, लोहमेखला,

शशोलूकमुखी कृष्णा खरजङ्घा महाजवा।
शिशुमारमुखी श्वेता लोहिताक्षी विभीषणा ॥ २२ ॥
जटीलिका कामचरी दीर्घजिह्वा बलोत्कटा।
कालेहिका वामनिका मुकुटा चैव भारत ॥ २३ ॥
लोहिताक्षी महाकाया हरिपिण्डा च भूमिप।
एकत्वचा सुकुसुमा कृष्णकर्णी च भारत ॥ २४ ॥
क्षुरकर्णी चतुष्कर्णी कर्णप्रावरणा तथा।
चतुष्पथनिकेता च गोकर्णी महिषानना ॥ २५ ॥
खरकर्णी महाकर्णी भेरीस्वनमहास्वना।
शङ्खकुम्भश्रवाश्चैव भगदा च महाबला ॥ २६ ॥
गणा च सुगणा चैव तथाऽभीत्यथ कामदा।
चतुष्पथरता चैव भूतितीर्थाऽन्यगोचरी ॥ २७ ॥
पशुदा वित्तदा चैव सुखदा च महायशाः।
पयोदा गोमहिषदा सुविशाला च भारत ॥ २८ ॥
प्रतिष्ठा सुप्रतिष्ठा च रोचमाना सुरोचना।
नौकर्णी मुखकर्णी च विशिरा मन्थिनी तथा ॥ २९ ॥
एकचन्द्रा मेघकर्णा मेघमाला विरोचना।
एताश्चान्याश्च बहवो मातरो भरतर्षभ ॥ ३० ॥
कार्तिकेयानुयायिन्यो नानारूपाः सहस्रशः।

शशोलूकमुखी, कृष्णा, खरजङ्घा, महाजवा, शिशुमारमुखी, श्वेता, लोहिताक्षी, विभीषणा, जटीलिका, कामचरी, दीर्घजिह्वा, बलोत्कटा, कालेहिका, वामनिका, मुकुटा, लोहिताक्षी, महाकाया, हरिपिण्डा, एकत्वचा, सुकुसुमा, कृष्णकर्णी, क्षुरकर्णी, चतुःकर्णी, कर्णप्रावरणा, चतुष्पथनिकेता, गोकर्णी, महिषानना, खरकर्णी, महाकर्णी, भेरिस्वनमहास्वना, शङ्खकुम्भश्रवा, भगदा, महाबला, गणा, सुगणा अभीति, कामदा, चतुष्पथरता, भूतितीर्था, अन्यगोचरी, पशुदा, सुखदा, महायशा, पयोदा गोदा, महिषदा, विशाला, प्रतिष्ठा, सुप्रतिष्ठा, रोचमाना, सुरोचना, नौकर्णी, मुखकर्णा, विशिरा, मन्थिनी, एकचन्द्रा, मेघकर्णा, मेघमाला और विरोचना। हे भरतकुल सिंह! इनको आदि लेकर और भी सहस्रों मातृगण अनेक प्रकारके स्वरूप बनाकर कार्त्तिकेयके संग रहती हैं। इन सबके बडे बडे दांत

दीर्घनख्यो दीर्घदन्त्यो दीर्घतुण्ड्यश्च भारत ॥ ३१ ॥
सबला मधुराश्चैव यौवनस्थाः स्वलंकृताः ।
माहात्म्येन च संयुक्ताः कामरूपधरास्तथा ॥ ३२ ॥
निर्मांसगात्र्यः श्वेताश्च तथा काञ्चनसन्निभाः ।
कृष्णमेघनिभाश्चान्या धूम्राश्च भरतर्षभ ॥ ३३ ॥
अरुणाभा महाभोगा दीर्घकेश्यः सिताम्बराः ।
ऊर्ध्ववेणीधराश्चैव पिङ्गाक्ष्यो लम्बमेखलाः ॥ ३४ ॥
लम्बोदर्यो लम्बकर्णास्तथा लम्बपयोधराः ।
ताम्राक्ष्यस्ताम्रवर्णाश्च हर्यक्ष्यश्च तथाऽपराः ॥ ३५ ॥
वरदाः कामचारिण्यो नित्यं प्रमुदितास्तथा ।
याम्या रौद्रास्तथा सौम्याः कौबेर्योऽथ महाबलाः॥३६॥
वारुण्योऽथ च माहेन्द्र्यस्तथाऽऽग्नेय्यः परन्तप ।
वायव्यश्चाथ कौमार्यो ब्राह्मयश्च भरतर्षभ ॥ ३७ ॥
वैष्णव्यश्च तथा सौर्यो वाराह्यश्च महाबलाः ।
रूपेणाप्सरसां तुल्या मनोहार्यो मनोरमाः ॥ ३८ ॥
परपुष्टोपमा वाक्ये तथर्ध्या धनदोपमाः ।
शक्रवीर्योपमा युद्धे दीप्त्या वह्निसमास्तथा ॥ ३९ ॥

और बडे बडे मुख हैं सब बल मधुरता, यौवन, भूषण और महात्म्यसे भरी हैं । इच्छानुसार रूप धारण करसक्ती हैं किसीकी के शरीर में मांस नहीं है, कोई सफेद है । किसीका सोनेके समान रङ्ग है । कोई मेघके समान काली, कोई धूवेंके समान सुन्दर और कोई लाल रङ्गवाली है । (२-३३)

सब बडे बलवाली सफेद वस्त्र धारिणी, ऊपरको देखनेवाली, पिङ्गवर्ण नेत्रवाली, किसीके बडे बडे पेट, लम्बे लम्बे कान, लम्बे लम्बे स्तन, कोई लालनेत्रवाली, किसीके बन्दरके समान नेत्र हैं, ये सब वरदान देनेमें समर्थ हैं और सदा प्रसन्न रहनेवाली हैं और सब इच्छानुसार घूमती हैं । कोई यम, रुद्र, चन्द्रमा, कुबेर, वरुण, इन्द्र, अग्नि, वायु, कार्त्तिकेय, सूर्य और कोई वराहकी शक्तिसे बनी हैं । रूपमें अप्सराओंके तुल्य हैं; इनको देखते ही मन वशमें नहीं रहता, इनकी बडी मोठी वाणी है, वचनमें कुबेरके समान युद्ध करने और बलमें इन्द्रके समान और तेजमें अग्निके समान हैं । इन्हें देखकर

शत्रूणां विग्रहे नित्यं भयदास्ता भवन्त्युत।
कामरूपधराश्चैव जवे वायुसमास्तथा ॥ ४० ॥
अचिन्त्यबलवीर्याश्च तथाऽचिन्त्यपराक्रमाः।
वृक्षचत्वरवासिन्यश्चतुष्पथनिकेतनाः ॥ ४१ ॥
गुहाश्मशानवासिन्यः शैलप्रस्रवणालयाः।
नानाभरणधारिण्यो नानामाल्याम्बरास्तथा ॥ ४२ ॥
नानाविचित्रवेषाश्च नानाभाषास्तथैव च।
एते चान्ये च बहवो गणाः शत्रुभयङ्कराः ॥ ४३ ॥
अनुजग्मुर्महात्मानं त्रिदशेन्द्रस्य संमते।
ततः शक्त्यस्त्रमददद्भगवान्पाकशासनः ॥ ४४ ॥
गुहाय राजशार्दूल विनाशाय सुरद्विषाम्।
महास्वनां महाघण्टां द्योतमानां सितप्रभाम् ॥ ४५ ॥
अरुणादित्यवर्णां च पताकां भरतर्षभ।
ददौ पशुपतिस्तस्मै सर्वभूतमहाचमूम् ॥ ४६ ॥
उग्रां नानाप्रहरणां तपोवीर्यबलान्विताम्।
अजेयां स्वगणैर्युक्तां नाम्ना सेनां धनंजयाम् ॥ ४७ ॥
रुद्रतुल्यबलैर्युक्तां योधानामयुतैस्त्रिभिः।
न सा विजानाति रणात्कदाचिद्विनिवर्तितुम् ॥ ४८ ॥

युद्धमें शत्रु बहुत डरते हैं। ये सब इच्छानुसार रूप धारण कर सक्ती हैं। शीघ्र चलनेमें वायुके समान हैं इनका बल, वीर्य और पराक्रम अपार है। ये सब वृक्ष, चौराहे, गुफा, स्मशान, पर्वत और दुर्गोंमें रहती हैं। अनेक प्रकारके वस्त्र; आभूषण और माला धारण करती हैं। विचित्र वेष बनाती हैं और अनेक प्रकारकी भाषा बोलती हैं। (२४-४३)

हे राज शार्दूल! इनको आदि लेकर और भी सहस्रों भयानक गण इन्द्रकी आज्ञासे कार्त्तिकेयके सङ्ग चले; फिर इन्द्रने दानवोंका नाश करनेके लिये बडे शब्दवाली घंटोंसे युक्त अपने तेजसे प्रकाश करती हुई एक शक्ति कार्त्तिकेयको दई और प्रातः कालके सूर्यके समान एक पताका तथा अनेक शस्त्र और बलसे भरी महा तेजस्वी शत्रुओंसे लडनेवाली रुद्रके समान पराक्रमी तीस सहस्र वीरोंसे भरी धनञ्जय नामक सेना शिवने दी। यह सेना कभी युद्धसे लौटना नहीं जानती। (४३-४८)

विष्णुर्ददौ वैजयन्तीं मालां बलविवर्धिनीम् ।
उमा ददौ विरजसी वाससी रविसप्रभे ॥ ४९ ॥
गंगा कमण्डलुं दिव्यममृतोद्भवमुत्तमम् ।
ददौ प्रीत्या कुमाराय दण्डं चैव बृहस्पतिः ॥ ५० ॥
गरुडो दयितं पुत्रं मयूरं चित्रबर्हिणम् ।
अरुणस्ताम्रचूडं च प्रददौ चरणायुधम् ॥ ५१ ॥
नागं तु वरुणो राजा बलवीर्यसमन्वितम् ।
कृष्णाजिनं ततो ब्रह्मा ब्रह्मण्याय ददौ प्रभुः ॥ ५२ ॥
समरेषु जयं चैव प्रददौ लोकभावनः ।
सैनापत्यमनुप्राप्य स्कन्दो देवगणस्य ह ॥ ५३ ॥
शुशुभे ज्वलितोऽर्चिष्मान् द्वितीय इव पावकः ।
ततः पारिषदैश्चैव मातृभिश्च समन्वितः ॥ ५४ ॥
ययौ दैत्यविनाशाय ह्लादयन्सुरपुङ्गवान् ।
सा सेना नैर्ऋती भीमा सघण्टोच्छ्रितकेतना ॥ ५५ ॥
सभेरीशङ्खमुरजा सायुधा सपताकिनी ।
शारदी द्यौरिवाभाति ज्योतिर्भिरिव शोभिता ॥५६॥
ततो देवनिकायास्ते नानाभूतगणास्तथा ।
वादयामासुरव्यग्रा भेरीः शङ्खांश्च पुष्कलान् ॥ ५७ ॥

विष्णुने बल बढानेवाली वैजयन्ती माला, पार्वतीने सूर्यके समान दो निर्मल वस्त्र; गङ्गाने अमृतसे उत्पन्न हुवा कमण्डलु; बृहस्पतिने प्रसन्न होकर दण्ड, गरुडने विचित्र पङ्खवाला अपना प्यारा पुत्र मोर; अरुणने लाल चोटीवाला मुर्गा; राजा वरुणने बलवान साँप; भगवान ब्रह्माने हरिणका चमडा और युद्धमें जय होनेका आशीर्वाद दिया। (४८-५३)

इस प्रकार कार्त्तिकेय देवतोंके सेनापति बनकर उस पर्वतके ऊपर जलती हुई अग्निके समान प्रकाशित होने लगे। फिर अपने पार्षद और मातृगणके सहित कार्त्तिकेय देवतोंको प्रसन्न और राक्षसोंका नाश करनेके लिये चले; फिर उस भयानक नैर्ऋती सेनामें शङ्ख और भेर आदि बाजे बजने लगे। ध्वजा उडने लगी। जैसे शरत्कालके आकाशमें तारे चमकते हैं ऐसे शस्त्र चमकने लगे। देवतोंने और सब भूत गणोंने सावधान होकर शङ्ख, भेर, पटह क्रकच, बजायके सींग आडम्बर और बडे शब्द-

पटहान् झर्झरांश्चैव क्रकचान् गोविषाणिकान् ।
आडम्बरान् गोमुखांश्च डिंडिमांश्च महास्वनान् ॥५८॥
तुष्टुवुस्ते कुमारं तु सर्वे देवाः सवासवाः ।
जगुश्च देवगन्धर्वा ननृतुश्चाप्सरो गणाः ॥ ५९ ॥
ततः प्रीतो महासेनस्त्रिदशेभ्यो वरं ददौ ।
रिपून् हन्ताऽस्मि समरे ये वो वधचिकीर्षवः ॥ ६० ॥
प्रतिगृह्य वरं देवास्तस्माद्विबुधसत्तमात् ।
प्रीतात्मानो महात्मानो मेनिरे निहतान् रिपून् ॥६१॥
सर्वेषां भूतसङ्घानां हर्षान्नादः समुत्थितः ।
अपूरयत लोकांस्त्रीन् वरे दत्ते महात्मना ॥ ६२ ॥
स निर्ययौ महासेनो महत्या सेनया वृतः ।
वधाय युधि दैत्यानां रक्षार्थं च दिवौकसाम् ॥ ६३ ॥
व्यवसायो जयो धर्मः सिद्धिर्लक्ष्मीर्धृतिः स्मृतिः ।
महासेनस्य सैन्यानामग्रे जग्मुर्नराधिप ॥ ६४ ॥
स तया भीमया देवः शूलमुद्गरहस्तया ।
ज्वलितालातधारिण्या चित्राभरणवर्मया ॥ ६५ ॥
गदामुसलनाराचशक्तितोमरहस्तया ।
दृप्तसिंहनिनादिन्या विनद्य प्रययौ गुहः ॥ ६६ ॥

वाले डिण्डिम आदि बाजे बजाये। फिर इन्द्रादिक देवता कार्त्तिकेयकी स्तुति करने लगे; गन्धर्व और देवता गाने लगे और अप्सरा नाचने लगीं। (५४-५९)

अनन्तर कार्त्तिकेयने प्रसन्न होकर वरदान दिया कि जो शत्रु तुम लोगोंको मारना चाहते हैं हम उनका नाश करेंगे। कार्त्तिकेयसे वरदान पाकर महात्मा देवता बहुत प्रसन्न हुए और उन्होंने अपने शत्रुओंको मरा हुवा जान लिया। कार्त्तिकेयका वरदान सुनकर सब प्राणी प्रसन्न होकर गर्जने लगे । यह शब्द तीनों लोकोंमें पूरित होगया। (६०-६२)

हे राजन् ! उस शूल और मुशल धारियोंकी महासेनाको संग लेकर कार्त्तिकेय दैत्योंका नाश और देवतोंकी रक्षा करनेको चले । हे राजन् ! उस अलात, गदा, मुशल, नाराच, सांगी और तोमर धारिणी कार्त्तिकेयकी सेनाके आगे पुरुषार्थ, विजय, धर्म, सिद्धि, लक्ष्मी, धारणाशक्ति और स्मरण शक्ति

तं दृष्ट्वा सर्वदैतेया राक्षसा दानवास्तथा ।
व्यद्रवन्त दिशः सर्वा भयोद्विग्नाः समन्ततः ॥ ६७ ॥
अभ्यद्रवन्त देवास्तान् विविधायुधपाणयः ।
दृष्ट्वा च स ततः क्रुद्धः स्कन्दस्तेजोबलान्वितः ॥ ६८ ॥
शक्त्यस्त्रं भगवान् भीमं पुनः पुनरवाकिरत् ।
आदधच्चात्मनस्तेजो हविषेद्ध इवानलः ॥ ६९ ॥
अभ्यस्यमाने शक्त्यस्त्रे स्कन्देनामिततेजसा ।
उल्का ज्वाला महाराज पपात वसुधातले ॥ ७० ॥
संह्रादयन्तश्च तथा निर्घाताश्चापतन् क्षितौ ।
यथान्तकालसमये सुघोराः स्युस्तथा नृप ॥ ७१ ॥
क्षिप्ताह्येका यदा शक्तिः सुघोराऽनलसूनुना ।
ततः कोट्यो विनिष्पेतुः शक्तीनां भरतर्षभ ॥ ७२ ॥
ततः प्रीतो महासेनो जघान भगवान्प्रभुः ।
दैत्येन्द्रं तारकं नाम महाबलपराक्रमम् ॥ ७३ ॥
वृतं दैत्यायुतैर्वीरैर्बलिभिर्दशभिर्नृप ।
महिषं चाष्टभिः पद्मैर्वृतं सङ्ख्ये निजघ्निवान् ॥ ७४ ॥
त्रिपादं चायुतशतैर्जघान दशभिर्वृतम् ।

चली। कार्त्तिकेयके सेनाके वीर मतवाले सिंहके समान गर्जने लगे। (६३-६६)

तेज और बलसे भरे कार्त्तिकेयको आते देख दैत्य, दानव और राक्षस सब ओरसे व्याकुल होकर इधर उधरको भागने लगे। देवता भी शस्त्र लेकर उनके पीछे दौडे। कार्त्तिकेयको भी उन्हें देखकर बहुत क्रोध हुआ और बार बार शक्ति चलाने लगे, उस समय कार्त्तिकेयका ऐसा तेज बढा जैसे आहुती जलातेहुए अग्निका। हे महाराज! जिस समय अनन्त तेजस्वी कार्त्तिकेयने शक्ती चलाई, उस समय पृथ्वीमें आकाशसे बिजली गिरी और अनेक तारे टूट टूट इस प्रकार गिरे कि जैसे प्रलयमें गिरते हैं। (६७-७१)

हे महाराज! जब कार्त्तिकेयने शक्ति छोडी उसी समय उससे करोडों शक्ति निकलने लगीं। तब भगवान् कार्त्तिकेयने प्रसन्न होकर उन्हीं शक्तियोंसे एक लाख वीरोंके सहित महापराक्रमी महाबली दैत्यराज तारकको मारा, महिपासुरको आठपद्म वीरोंके सहित मारा, त्रिपाद नामकदानवको एक करोड दानवोंके

ह्रदोदरं निखर्वैश्च वृतं दशभिरीश्वरः ॥ ७५ ॥
जघानानुचरैः सार्धं विविधायुधपाणिभिः ।
तथाऽकुर्वन्त विपुलं नादं वध्यत्सु शत्रुषु ॥ ७६ ॥
कुमारानुचरा राजन्पूरयन्तो दिशो दश ।
ननृतुश्च ववल्गुश्च जहसुश्च मुदाऽन्विताः ॥ ७७ ॥
शक्त्यस्त्रस्य तु राजेन्द्र ततोऽर्चिर्भिः समन्ततः ।
त्रैलोक्यं त्रासितं सर्वं जृम्भमाणाभिरेव च ॥ ॥७८॥
दग्धाः सहस्रशो दैत्या नादैः स्कन्दस्य चापरे ।
पताकयाऽवधूताश्च हताः केचित्सुरद्विषः ॥७९॥
केचिद्धण्टारवत्रस्ता निषेदुर्वसुधातले ।
केचित्प्रहरणैश्छिन्ना विनिष्पेतुर्गतायुषः ॥ ८० ॥
एवं सुरद्विषोऽनेकान् बलवानाततायिनः ।
जघान समरे वीरः कार्तिकेयो महाबलः ॥ ८१ ॥
बाणो नामाथ दैतेयो बलेः पुत्रो महाबलः ।
क्रौञ्चं पर्वतमाश्रित्य देवसङ्घानबाधत ॥ ८२ ॥
तमभ्ययान्महासेनः सुरशत्रुमुदारधीः ।
स कार्तिकेयस्य भयात्क्रौञ्चं शरणमीयिवान् ॥ ८३ ॥

सहित मारा और ह्रदोदर नामक दानव को दशनिखर्व दानवोंके सहित मारा। जिस समय अनेक शस्त्रधारी पार्षदोंके सहित कार्त्तिकेय शत्रुओंका नाश कर रहे थे, उस समय दोनों ओरकी सेनामें घोर शब्द होने लगा, और वीर नाचने, कूदने, गर्जने और दौडने लगे। (७२-७७)

हे राजन् ! उस समय सब जगत् कार्त्तिकेयकी शक्तिके तेजसे सुना जाता था, सहस्रों दानव शक्तिकी ज्वलासे जल गये, सहस्रों कार्त्तिकेयके शब्दसे मर गये, और सहस्रों ध्वजाकी हवासे उड गये। कोई घण्टेका शब्द सुनकर भयसे पृथ्वीमें गिर गये और कोई शस्त्रोंसे कटकर मर गये। इस प्रकार महाबलवान कार्त्तिकेयने सहस्रों दुष्ट दानवोंको मार डाला। (७८-८१)

अनन्तर बलीका बेटा बलवान बाण नामक दानव क्रौञ्च पर्वतपर खडा होकर देवतोंका नाश करने लगा। तब महाबुद्धिमान कार्त्तिकेय उस देवतोंके शत्रुको मारने चले। वह उनसे डरकर क्रौञ्च पर्वतमें छिप गया, तब कार्तिके-

ततः क्रौञ्चं महामन्युः क्रौञ्चनादनिनादितम् ।
शक्त्या बिभेद भगवान् कार्तिकेयोऽग्निदत्तया ॥८४॥
स शालस्कन्धशबलं त्रस्तवानरवारणम् ।
प्रोड्डीनोद्भ्रान्तविहगं विनिष्पतितपन्नगम् ॥ ८५ ॥
गोलांगूलर्क्षसङ्घैश्च द्रवद्भिरनुनादितम् ।
कुरङ्गमविनिर्घोषनिनादितवनान्तरम् ॥ ८६ ॥
विनिष्पतद्भिः शरभैः सिंहैश्च सहसा द्रुतैः ।
शोच्यामपि दशां प्राप्तो रराजेव सपर्वतः ॥ ८७ ॥
विद्याधराः समुत्पेतुस्तस्य शृङ्गनिवासिनः ।
किन्नराश्च समुद्विग्नाः शक्तिपातरवोद्धताः ॥ ८८ ॥
ततो दैत्या विनिष्पेतुः शतशोऽथ सहस्रशः ।
प्रदीप्तात्पर्वतश्रेष्ठाद्विचित्राभरणस्रजः ॥ ८९ ॥
तान्निजघ्नुरतिक्रम्य कुमारानुचरा मृधे ।
स चैव भगवान् क्रुद्धो दैत्येन्द्रस्य सुतं तदा ॥ ९० ॥
सहानुजं जघानाशु वृत्रं देवपतिर्यथा ।
बिभेद क्रौञ्चं शक्त्या च पावकिः परवीरहा ॥ ९१ ॥
बहुधा चैकधा चैव कृत्वाऽऽत्मानं महाबलः ।
शक्तिः क्षिप्ता रणे तस्य पाणिमेति पुनः पुनः ॥ ९२ ॥

यने क्रोध करके क्रौञ्चपक्षियोंके शब्दसे भरे, उस पर्वतको तोड दिया उसके टूटनेसे बडे शालके वृक्ष टूटने लगे। बन्दर, हाथी डरकर भागने लगे। लंगर और रीछ इधर उधरको भागकर चिल्लाने लगे, हरिन घबडाकर भागने और बोलने लगे, शरभ और सिंह इधर उधर दौडने लगे। उसके शिखरों-पर रहनेवाले, विद्याधर गिरने लगे। शक्तिका शब्द सुनकर किन्नर घबडा गये। उस समय उस पर्वतकी एक विचित्र शोभा दीखती थी। ८२—८८

अनन्तर उस पर्वतसे विचित्र माला और आभूषण पहिने सैकडों सहस्रों दानव निकले, उन सबको कार्त्तिकेयके वीरोंने मार डाला। अनन्तर भगवान कार्त्तिकेयने क्रोध करके भाईके सहित बाण नामक दैत्यको इस प्रकार मारा जैसे इन्द्रने वृत्रासुरको मारा था। शत्रु-नाशन कार्त्तिकेयने अनेक वार शक्ति छोडकर पर्वतके एकही वार अनेक टुकडे कर दिये, कार्त्तिकेयके हाथसे छूट

एवं प्रभावो भगवांस्ततो भूयश्च पावकिः ।
शौर्याद्द्विगुणयोगेन तेजसा यशसा श्रिया ॥ ९३ ॥
क्रौञ्चस्तेन विनिर्भिन्नो दैत्याश्च शतशो हताः ।
ततः स भगवान्देवो निहत्य विबुधद्विषः ॥ ९४ ॥
स भज्यमानो विबुधैः परं हर्षमवापह ।
ततो दुन्दुभयो राजन्नेदुः शङ्खाश्च भारत ॥ ९५ ॥
मुमुचुर्देवयोषाश्च पुष्पवर्षमनुत्तमम् ।
योगिनामीश्वरं देवं शतशोऽथ सहस्रशः ॥ ९६ ॥
दिव्यगन्धमुपादाय ववौ पुण्यश्च मारुतः ।
गन्धर्वास्तुष्टुवुश्चैनं यज्वानश्च महर्षयः ॥ ९७ ॥
केचिदेनं व्यवस्यन्ति पितामहसुतं प्रभुम् ।
सनत्कुमारं सर्वेषां ब्रह्मयोनिं तमग्रजम् ॥ ९८ ॥
केचिन्महेश्वरसुतं केचित्पुत्रं विभावसोः ।
उमायाः कृत्तिकानां च गङ्गायाश्च वदन्त्युत ॥ ९९ ॥
एकधा च द्विधा चैव चतुर्धा च महाबलम् ।
योगिनामीश्वरं देवं शतशोऽथ सहस्रशः ॥ १०० ॥
एतत्ते कथितं राजन् कार्तिकेयाभिषेचनम् ।

छूटकर शक्ति फिर उन्हींके हाथमें आ जाती थी। भगवान कार्त्तिकेय इस प्रकार सहस्रों देवतोंके शत्रु दानवोंको मारकर और क्रौञ्च नामक पर्वतको तोडकर पहिलेसे हि गुण तेज प्रभाव लक्ष्मी, यश और तेजसे प्रकाशित हुए। ८९-९४

हे राजन्! इस प्रकार दानवोंका नाश करके महाबलवान कार्त्तिकेय बहुत प्रसन्न हुए। देवता शङ्ख और नगारे बजाने लगे, देवतोंकी स्त्री फूल वर्षाने लगीं, योगी, और देवतोंके स्वामी कार्त्तिकेयकी ओर दिव्य सुगन्धी लेकर वायु चलने लगा। गन्धर्व, यज्ञ करनेवाले, महाऋषी इनकी स्तुति करने लगे, इनही कार्त्तिकेयको कोई ब्रह्माका पुत्र, कोई सनातन, कोई शिवकापुत्र, कोई अग्रिका पुत्र, कोई कृत्तिकापुत्र, कोई पार्वतीका पुत्र और कोई गंगाका पुत्र मानते हैं। कोई एक शरीर, कोई दो शरीर, कोई तीन शरीर, और कोई सहस्रों शरीर मानते हैं। (९५-१००)

हे राजन्! हमने देवता और योगियोंके स्वामी कार्त्तिकेयके अभिषेककी कथा तुमसे कही, अब सरस्वतीके पवित्र

श्रृणु चैव सरस्वत्यास्तीर्थवर्यस्य पुण्यताम् ॥ १०१ ॥
बभूव तीर्थप्रवरं हतेषु सुरशत्रुषु।
कुमारेण महाराज त्रिविष्टपमिवापरम् ॥ १०२ ॥
ऐश्वर्याणि च तत्रस्थो ददावीशः पृथक् पृथक्।
ददौ नैर्ऋतमुख्येभ्यस्त्रैलोक्यं पावकात्मजः ॥ १०३ ॥
एवं स भगवांस्तस्मिंस्तीर्थे दैत्यकुलान्तकः।
अभिषिक्तो महाराज देवसेनापतिः सुरैः ॥ १०४ ॥
तैजसं नाम तत्तीर्थं यत्र पूर्वमपां पतिः।
अभिषिक्तः सुरगणैर्वरुणो भरतर्षभ ॥ १०५ ॥
अस्मिंस्तीर्थवरे स्नात्वा स्कन्दं चाभ्यर्च्य लांगली।
ब्राह्मणेभ्यो ददौ रुक्मं वासांस्याभरणानि च ॥१०६॥
उषित्वा रजनीं तत्र माधवः परवीरहा।
पूज्यतीर्थवरं तच्च स्पृष्ट्वा तोयं च लांगली ॥ १०७ ॥
हृष्टः प्रीतमनाश्चैव ह्यभवन्माधवोत्तमः।
एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि।
यथाभिषिक्तो भगवान् स्कंदो देवैः समागतैः ॥१०८॥२७९२

इतिश्रीमहाभारते० शल्यपर्वांतर्गतगदापर्वणि बलदेव० सारस्वतो० तारकवधे षट्चत्वारिंशोऽध्यायः ॥४६॥

जनमेजय उवाच-अत्यद्भुतमिदं ब्रह्मन् श्रुतवानस्मि तत्त्वतः।

तीर्थकी कथा सुनो। जब कार्त्तिकेयने दानवोंको मारा, तभी से यह तीर्थ स्वर्गके समान होगया, वहीं बैठकर कार्त्तिकेयने सबको अलग ऐश्वर्य बांट दिये, प्रधान नैऋतोंको तीनों लोक दिये। हे महाराज ! इस प्रकार दैत्योंके वंशनाशक कार्त्तिकेयका इस तीर्थपर अभिषेक हुआ था। इस तीर्थका नाम तैजस तीर्थ है, यहींपर देवतोंने वरुणको जलका राजा बनाया था। (१०१-१०५)

उस तीर्थमें स्नान करके बलदेवने कार्त्तिकेयकी पूजा करी और प्रसन्न होकर ब्राह्मणोंको सेना, वस्त्र और आभूषण दान किये, फिर प्रसन्न होकर एक रात रहकर पूजा करी और तीर्थमें स्नान किये। हे राजन् ! तुमने जो हमसे पूंछा था, सो हमने कहा, इस प्रकार सब देवतोंने आकर भगवान् कार्त्तिकेयका अभिषेक किया था। (१०६-१०८)

शल्यपर्वमें छतालीस अध्याय समाप्त। २७९२

शल्यपर्वमें सैतालीस अध्याय।

राजा जनमेजय बोले, हे ब्रह्मन् !

अभिषेकं कुमारस्य विस्तरेण यथाविधि ॥ १ ॥
यच्छ्रुत्वा पूतमात्मानं विजानामि तपोधन।
प्रहृष्टानि च रोमाणि प्रसन्नं च मनो मम ॥ २ ॥
अभिषेकं कुमारस्य दैत्यानां च वधं तथा।
श्रुत्वा मे परमा प्रीतिर्भूयः कौतूहलं हि मे ॥ ३ ॥
अपां पतिः कथं ह्यस्मिन्नभिषिक्तः पुरा सुरैः।
तन्मे ब्रूहि महाप्राज्ञ कुशलो ह्यसि सत्तम ॥ ४ ॥
वैशम्पायन उवाच-शृणु राजन्निदं चित्रं पूर्वकल्पे यथातथम्।
आदौ कृतयुगे राजन्वर्तमाने यथाविधि ॥ ५ ॥
वरुणं देवताः सर्वाः समेत्येदमथाब्रुवन्।
यथाऽस्मान् सुरराट् शक्रो भयेभ्यः पाति सर्वदा ॥६॥
तथा त्वमपि सर्वासां सरितां वै पतिर्भव।
वासश्च ते सदा देव सागरे मकरालये ॥ ७ ॥
समुद्रोऽयं तव वशे भविष्यति नदीपतिः।
सोमेन सार्धं च तव हानिवृद्धी भविष्यतः ॥ ८ ॥
एवमस्त्विति तान्देवान्वरुणो वाक्यमब्रवीत्।

आपने हमसे विधिपूर्वक कार्त्तिकेयके अभिषेककी अद्भुत कथा कही जिसको सुनकर मैंने अपने शरीरको पवित्र माना। कार्त्तिकेयका अभिषेक और दैत्योंका नाश सुनकर हमारे रोंये खडे होगये और मन प्रसन्न होगया। हे महाबुद्धिमानोंमें श्रेष्ठ! आप सब विषयोंमें निपुण हो और मुझे कथा सुननेमें परम प्रीति और इच्छा है। इसलिये आप हमसे वरुणके अभिषेककी कथा कहिये। देवतोंने कि प्रकार वरुणको जलका राजा बनाया था। (१—४)

श्रीवैशम्पायन मुनि बोले, हे राजन्! अब यह पहिले कल्पकी अद्भुत कथा तुमसे कहते हैं सुनो, पहिले सतयुगमें सब देवतोंने वरुणसे आकर कहा, हे देव! जैसे इन्द्र भयसे हम लोगोंकी रक्षा करते हैं। तैसे ही आप भी नदियोंके स्वामी होकर जलकी रक्षा कीजिये। आपको रहनेके लिये मछलियोंका स्थान समुद्र मिलेगा, नद और नदियोंका स्वामी समुद्र तुम्हारे वशमें रहेगा। तुम्हारी वृद्धी और हानि चन्द्रमाके घटने और बढनेके अनुसार हुआ करेगी, अर्थात् चन्द्रमाके बढनेसे बढोगे और घटनेसे घटोगे। (५—८)

समागम्य ततः सर्वे वरुणं सागरालयम् ॥ ९ ॥
आपां पतिं प्रचक्रुर्हि विधिदृष्टेन कर्मणा ।
अभिषिच्य ततो देवा वरुणं यादसां पतिम् ॥ १० ॥
जग्मुः स्वान्येव स्थानानि पूजयित्वा जलेश्वरम् ।
अभिषिक्तस्ततो देवैर्वरुणोऽपि महायशाः ॥ ११ ॥
सरितः सागरांश्चैव नदांश्चापि सरांसि च ।
पालयामास विधिना यथा देवान् शतक्रतुः ॥ १२ ॥
ततस्तत्राप्युपस्पृश्य दत्वा च विविधं वसु ।
अग्नितीर्थं महाप्राज्ञो जगामाथ प्रलंबहा ॥ १३ ॥
नष्टो न दृश्यते यत्र शमीगर्भे हुताशनः ।
लोकालोकविनाशे च प्रादुर्भूते तदाऽनघ ॥ १४ ॥
उपतस्थुः सुरा यत्र सर्वलोकपितामहम् ।
अग्निः प्रणष्टो भगवान् कारणं च न विद्महे ॥ १५ ॥
सर्वभूतक्षयो राजन् संपादय विभोऽनलम् ।
जनमेजय उवाच–किमर्थं भगवानग्निः प्रणष्टो लोकभावनः ॥ १६ ॥
विज्ञातश्च कथं देवैस्तन्ममाचक्ष्व तत्त्वतः ।

देवतोंके वचन सुन वरुणने कहा कि बहुत अच्छा । तब सब देवता समुद्रके तटपर आये, और शास्त्रमें लिखी विधि के अनुसार वरुणको जलका स्वामी बनाया, फिर जल और जलजन्तुवोंके-पति वरुणकी प्रशंसा करते हुए सब देवता अपने अपने घरको चले गए। महायशस्वी वरुण भी जलका अधिकार पाकर समुद्र, नदी, नद और तालावोंकी इस प्रकार रक्षा करने लगे। जैसे इन्द्र देवतोंकी रक्षा करते हैं। प्रलम्बासुरनाशक बलराम उस तीर्थमें भी स्नान करके अनेक प्रकारके दान देकर अग्नि तीर्थको चले गये ॥ (९-१३)

हे पापरहित जनमेजय ! इसही तीर्थ में अग्नि शमी गर्भमें आकर छिपे थे, उस समय सब जगत् नष्ट होनेको उपस्थित होगया था। तब सब देवता ब्रह्माके पास जाकर बोले कि, हे जगत्-पते ! न जाने भगवान अग्निका किस कारण नाश होगया है, इस जगत्का नाश हुवा जाता है। अब आप अग्निको सम्पादन कीजिये। (१४-१६)

राजा जनमेजय बोले, हे भगवन् ! जगत्पूज्य भगवान अग्नि कैसे नष्ट हो-गये थे ? और फिर देवतोंने उन्हें कैसे

वैशम्पायन उवाच-भृगोः शापाद् भृशं भीतो जातवेदाः प्रतापवान् ॥१७॥
शमीगर्भमथासाद्य ननाश भगवांस्ततः।
प्रणष्टे तु तदा वह्नौ देवाः सर्वे सवासवाः ॥ १८ ॥
अन्वैषन्त तदा नष्टं ज्वलनं भृशदुःखिताः।
ततोऽग्नितीर्थमासाद्य शमीगर्भस्थमेव हि ॥ १९ ॥
ददृशुर्ज्वलनं तत्र वसमानं यथाविधि।
देवाः सर्वे नरव्याघ्र बृहस्पतिपुरोगमाः ॥ २० ॥
ज्वलनं तं समासाद्य प्रीताऽभूवन्सवासवाः।
पुनर्यथागतं जग्मुः सर्वभक्षश्च सोऽभवत् ॥ २१ ॥
भृगोः शापान्महाभाग यदुक्तं ब्रह्मवादिना।
तत्राप्याप्लुत्य मतिमान् ब्रह्मयोनिं जगाम ह ॥ २२ ॥
ससर्ज भगवान्यत्र सर्वलोकपितामहः।
तत्राप्लुत्य ततो ब्रह्मा सह देवैः प्रभुः पुरा ॥ २३ ॥
ससर्ज तीर्थानि तथा देवतानां यथाविधि।
तत्र स्नात्वा च दत्वा च वसूनि विविधानि च ॥२४॥

जाना? यह कथा आप हमसे कहिये। (१५-१७)

श्रीवैशम्पायन मुनि बोले, एक समय भृगुके शापसे प्रतापवान अग्नि बहुत डरकर शमी नामक लकडीके भीतर घुस गये और वहीं नष्ट होगये।१७-१८

अग्निको नष्ट हुए देख सब देवता बहुत घबडाये और अत्यन्त दुःखित होकर इन्द्रादिक उन्हें ढूढने लगे। फिर अग्नितीर्थमें आकर देखा कि अग्नि शमी वृक्षके भीतर विधिके अनुसार वास करते हैं। (१८—२०)

हे पुरुषसिंह! उनको देखकर बृहस्पति आदि देवता बहुत प्रसन्न हुए, और फिर अपने अपने घरको चले गये। अग्नि भी भृगुके शापसे सब वस्तु खानेवाले होगये यह कथा तुमने पहिले सुनी है,उस तीर्थमें भी स्नान करके बुद्धिमान बलराम ब्रह्मयोनि तीर्थको चले गये। हे राजन्! ब्रह्माने पहिले इसी तीर्थ में विधिपूर्वक देवतोंके तीर्थ बनाये थे, और देवतोंके सहित स्नान भी किया था। बलदेव वहां भी स्नान करके कौवेर नामक तीर्थको चले गये।(२१-२२)

हे राजन्! इसी स्थानमें तपस्या करनेसे इलविलाके पुत्र कुबेर धनपति हुए थे, इनको वहीं धन और निधि प्राप्त हुई थी, वहां भी बलरामने विधि-

कौबेरं प्रययौ तीर्थं तत्र तप्त्वा महत्तपः ।
धनाधिपत्यं सम्प्राप्तो राजन्नैलविलः प्रभुः ॥ २५ ॥
तत्रस्थमेव तं राजन् धनानि निधयस्तथा ।
उपतस्थुर्नरश्रेष्ठ तत्तीर्थं लांगली बलः ॥ २६ ॥
गत्वा दत्त्वा च विधिवद्ब्राह्मणेभ्यो धनं ददौ ।
ददृशे तत्र तत् स्थानं कौबेरे काननोत्तमे ॥ २७ ॥
पुरा यत्र तपस्तप्तं विपुलं सुमहात्मना ।
यक्षराज्ञा कुबेरेण वरा लब्धाश्च पुष्कलाः ॥ २८ ॥
धनाधिपत्यं सख्यं च रुद्रेणामिततेजसा ।
सुरत्वं लोकपालत्वं पुत्रं च नलकूबरम् ॥ २९ ॥
यत्र लेभे महाबाहो धनाधिपतिरंजसा ।
अभिषिक्तश्च तत्रैव समागम्य मरुद्गणैः ॥ ३० ॥
वाहनं चास्य तद्दत्तं हंसयुक्तं मनोजवम् ।
विमानं पुष्पकं दिव्यं नैर्ऋतैश्वर्यमेव च ॥ ३१ ॥
तत्राप्लुत्य बलो राजन् दत्त्वा दायांश्च पुष्कलान् ।
जगाम त्वरितो रामस्तीर्थं श्वेतानुलेपनः ॥ ३२ ॥
निषेवितं सर्वसत्त्वैर्नाम्ना बदरपाचनम् ।
नानर्तुकवनोपेतं सदापुष्पफलं शुभम् ॥ ३३ ॥ [२८३५]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने स्कन्दाभिषेके सप्तचत्वारिंशोऽध्यायः ॥४७॥

पूर्वक ब्राह्मणोंको बहुत धनदान किया और जलमें यक्षराज महात्मा कुबेरका यह स्थान देखा। जहां कुबेरने तपस्या करके धनपतिका पद और महातेजस्वी शिवसे मित्रता पाई थी, वहीं कुबेर धनपति देवता और लोकपाल बने थे, और वहीं उनके नलकूबर नामक पुत्र हुआ था वहीं देवतोंने उनका अभिषेक किया था। वहीं उन्हे बहुत शीघ्र चलनेवाला हंसयुक्त पुष्पक नामक दिव्य विमान मिला था, और वहीं वे निर्ऋत कुलके स्वामी बने थे, वहां स्नान करके और अनेक प्रकारके दान करके सफेद चन्दनधारी बलराम शीघ्रता सहित अनेक जन्तुवोंसे भरे सब ऋतुयोंमें फलने और फूलनेवाले वृक्षोंसे शोभित बदरपाचन नामक तीर्थको चले गये। २३-३३

शल्यपर्वमें सैतालिस अध्याय समाप्त। [२८३५]

वैशंपायन उवाच-ततस्तीर्थवरं रामो ययौ बदरपाचनम्।
तपस्विसिद्धचरितं यत्र कन्या धृतव्रता ॥ १ ॥
भरद्वाजस्य दुहिता रूपेणाप्रतिमा भुवि।
श्रुतावती नाम विभो कुमारी ब्रह्मचारिणी ॥ २ ॥
तपश्चचार सात्युग्रं नियमैर्बहुभिर्वृता।
भर्ता मे देवराजः स्यादिति निश्चित्य भामिनी ॥ ३ ॥
समास्तस्या व्यतिक्रान्ता बह्व्यः कुरुकुलोद्वह।
चरंत्या नियमांस्तांस्तान् स्त्रीभिस्तीव्रान् सुदुश्चरान् ॥४॥
तस्यास्तु तेन वृत्तेन तपसा च विशांपते।
भक्त्या च भगवान्प्रीतः परया पाकशासनः ॥ ५ ॥
आजगामाश्रमं तस्यास्त्रिदशाधिपतिः प्रभुः।
आस्थाय रूपं विप्रर्षेर्वसिष्ठस्य महात्मनः ॥ ६ ॥
सा तं दृष्ट्वोग्रतपसं वसिष्ठं तपतां वरम्।
आचारैर्मुनिभिर्दृष्टैः पूजयामास भारत ॥ ७ ॥
उवाच नियमज्ञा च कल्याणी सा प्रियंवदा।
भगवन्मुनिशार्दूल किमाज्ञापयसि प्रभो ॥ ८ ॥

शल्यपर्वमें अठतालीस अध्याय।

श्रीवैशम्पायन मुनि बोले, हे राजन् जनमेजय! वहांसे चलकर बलराम बदरपाचन नामक तीर्थमें पहुंचे, इसी स्थानमें एक कन्याने व्रत धारण करके सिद्धोंके समान तप किया था। श्रुतावती नामक कन्या भरद्वाज मुनिकी पुत्री जगत्में असाधारण रूपवती और बालकहीसे ब्रह्मचारिणी थी। हे महाराज! उसने देवराज इन्द्रको अपना पति बनाने लिये घोर तप और नियम करने आरम्भ किये। इस प्रकार स्त्रियोंसे न होने योग्य अनेक घोर तप और नियम करते करते उस कुमारी कन्याको बहुत वर्ष बीत गये। (१—४)

हे पृथ्वीनाथ! उसके इस प्रकार तप, भक्ति, नियम, प्रेम और आचरण देखकर देवतोंके स्वामी भगवान इन्द्र प्रसन्न हुए और महात्मा वशिष्ठका रूप बनाकर उसके आश्रममें आये। हे भारत! महातपस्वी वशिष्ठको अपने यहां आये देख उस कन्याने शास्त्रकी विधिके अनुसार उनकी पूजा करी। फिर वह नियम जाननेवाली कल्याणभरी कन्या मीठे वचन बोली। हे भगवन्! हे मुनिश्रेष्ठ! हे व्रतधारण करनेवाले! आप क्या

सर्वमद्य यथाशक्ति तव दास्यामि सुव्रत ।
शक्र भक्त्या च ते पाणिं न पास्यामि कथंचन ॥ ९ ॥
व्रतैश्च नियमैश्चैव तपसा च तपोधन ।
शक्रस्तोषयितव्यो वै मया त्रिभुवनेश्वरः ॥ १० ॥
इत्युक्तो भगवान्देवः स्मयन्निव निरीक्ष्य ताम् ।
उवाच नियमं ज्ञात्वा सांत्वयन्निव भारत ॥ ११ ॥
उग्रं तपश्चरसि वै विदिता मेऽसि सुव्रते ।
यदर्थमयमारंभस्तव कल्याणि हृद्गतः ॥ १२ ॥
तच्च सर्वं यथाभूतं भविष्यति वरानने ।
तपसा लभ्यते सर्वं यथाभूतं भविष्यति ॥ १३ ॥
यथा स्थानानि दिव्यानि विबुधानां शुभानने ।
तपसा तानि प्राप्याणि तपोमूलं महत्सुखम् ॥ १४ ॥
इति कृत्वा तपो घोरं देहं संन्यस्य मानवाः ।
देवत्वं यान्ति कल्याणि शृणुष्वैकं वचो मम ॥ १५ ॥
पंच चैतानि सुभगे बदराणि शुभव्रते ।
पचेत्युक्त्वा तु भगवान् जगाम बलसूदनः ॥ १६ ॥
आमंत्र्यतां तु कल्याणीं ततो जप्यं जजाप सः ।

आज्ञा देनेको मेरे पास आये हैं ? आपकी जो आज्ञा होगी सो मैं सत्यके अनुसार पूरी करूंगी, परन्तु मेरी भक्ति इन्द्रमें अधिक है, इसलिये मैं तुम्हारी स्त्री न बनूंगी । हे तपोधन ! मैंने यह प्रतिज्ञा की है, कि व्रत, नियम और तपसे तीन लोकोंके स्वामी इन्द्रको प्रसन्न करूंगी । (५—१०)

हे भारत ! भगवान इन्द्र उस कन्याके ऐसे वचन सुन हंसकर उसकी ओर देखने लगे और उसके नियम जानकर बोले । हे कल्याणी ! हे उत्तम व्रतधारिणी ! तुम घोर तप कर रही हो; हम जानते हैं । तुमने जो इच्छा धारण करके यह व्रत किया है । वह सब वैसे ही सिद्ध होगा; जगत्में तपसे सब कुछ मिल सक्ता है, मनुष्य तपसे देवतोंके स्थानोंमें जाता है, तपसे महासुख प्राप्त होता है । यह विचार कर भी मनुष्य तप करके शरीर छोडते हैं और दूसरा जन्म पाकर देवता होजाते हैं । अब हम तुमसे जो वचन कहते हैं, सो सुनिये । पांच बेर तुम्हारे पास हम धरे जाते हैं, तुम इनको पकावो और हम नहाकर आते हैं, ऐसा

अविदूरे ततस्तस्मादाश्रमात्तीर्थमुत्तमम् ॥ १७ ॥
इंद्रतीर्थेऽतिविख्यातं त्रिषु लोकेषु मानद।
तस्य जिज्ञासनार्थं स भगवान्पाकशासनः ॥ १८ ॥
बदराणामपचनं चकार विबुधाधिपः।
ततः प्रतप्ता सा राजन् वाग्यता विगतक्लमा ॥ १९ ॥
तत्परा शुचिसंवीता पावके समधिश्रयत्।
अपचद्राजशार्दूल बदराणि महाव्रता ॥ २० ॥
तस्याः पचंत्याः सुमहान् कालोऽगात्पुरुषर्षभ।
न च स्म तान्यपच्यन्त दिनं च क्षयमभ्यगात् ॥ २१॥
हुताशनेन दग्धश्च यस्तस्याः काष्ठसञ्चयः।
अकाष्ठमग्निं सा दृष्ट्वा स्वशरीरमथादहत् ॥ २२ ॥
पादौ प्रक्षिप्य सा पूर्वं पावके चारुदर्शना।
दग्धौ दग्धौ पुनः पादावुपावर्तयतानघ ॥ २३ ॥
चरणौ दह्यमानौ च नाचिन्तयदनिन्दिता।
कुर्वाणा दुष्करं कर्म महर्षिप्रियकाम्यया ॥ २४ ॥
न वैमनस्यं तस्यास्तु मुखभेदोऽथवाऽभवत्।
शरीरमग्निनाऽऽदीप्य जलमध्येव हर्षिता ॥ २५ ॥

कहकर भगवान इन्द्र वहांसे चलेगये और वहांसे थोडी दूर जाकर तीनों लोकोंमें विदित इन्द्रतीर्थमें जाकर तप करने लगे और उस कन्याकी परीक्षा करनेके लिये ऐसी माया करी कि अग्नि· में बेर न पक सकें। (११-१९)

हे राजन् ! तब उस कन्याने पवित्र और सावधान होकर आगमें उन बेरोंको पकाना आरम्भ किया, परन्तु पकाते पकाते सब दिन बीत गया और वे बेर न पके। जब उसकी सब लकडी भी जल चुकीं, तब बहुत घबडाई और आग में अपना शरीर जलानेकी इच्छा करी। सुन्दरी श्रुतावतीने पहिले आगमें अपने पैर जलाये। जलते हुए पैरोंको बार बार आगमें जलाती थी, इस प्रकार निन्दा· रहित श्रुतावतीने वशिष्ठके प्रसन्न करने· के लिये ऐसा घोर कर्म किया, और उसका कुछ विचार न किया, और कुछ उसके मनमें दुःख न हुआ और कुछ उसके मुखका रङ्ग भी न बदला, जैसे कोई पानी पडनेसे प्रसन्न होता है, ऐसे ही वह आगमें जलनेसे प्रसन्न होती थी, उसके मनमें यह निश्चय रहा कि मैं

तच्चास्या वचनं नित्यमवर्तद् धृदि भारत ।
सर्वथा बदराण्येव पक्तव्यानीति कन्यका ॥ २६ ॥
सा तन्मनसि कृत्वैव महर्षेर्वचनं शुभा ।
अपचद्बदराण्येव न चापच्यन्त भारत ॥ २७ ॥
तस्यास्तु चरणौ वह्निर्ददाह भगवान्स्वयम् ।
न च तस्या मनो दुःखं स्वल्पमप्यभवत्तदा ॥ २८ ॥
अथ तत्कर्म दृष्ट्वाऽस्याः प्रीतस्त्रिभुवनेश्वरः ।
ततः संदर्शयामास कन्यायै रूपमात्मनः ॥ २९ ॥
उवाच च सुरश्रेष्ठस्तां कन्यां सुदृढव्रताम् ।
प्रीतोऽस्मि ते शुभे भक्त्या तपसा नियमेन च ॥३० ॥
तस्माद्योऽभिमतः कामः स ते संपत्स्यते शुभे ।
देहं त्यक्त्वा महाभागे त्रिदिवे मयि वत्स्यसि ॥ ३१ ॥
इदं च ते तीर्थवरं स्थिरं लोके भविष्यति ।
सर्वपापापहं सुभ्रु नाम्ना बदरपाचनम् ॥ ३२ ॥
विख्यातं त्रिषु लोकेषु ब्रह्मर्षिभिरभिप्लुतम् ।
अस्मिन् खलु महाभागे शुभे तीर्थवरेऽनघे ॥ ३३ ॥
त्यक्त्वा सप्तर्षयो जग्मुर्हिमवन्तमरुन्धतीम् ।
ततस्ते वै महाभागा गत्वा तत्र सुसंशिताः ॥ ३४ ॥

जैसे होगा वैसे ही बेर पकाऊंहीगी, इस प्रकार उसने निश्चय कर लिया परन्तु बेर तब भी न पके। भगवान् अग्निने उसके सब पैर जला दिये, परन्तु तौभी उसके मनमें कुछ दुःख न हुआ। (२०-२८)

तब तीन लोकके स्वामी इन्द्र प्रसन्न हुए और उसको अपना रूप दिखलाकर बोले, हे दृढव्रतवाली सुन्दरी ! मैं तेरी भक्ति और तपसे प्रसन्न हुआ। अब तेरे मनकी इच्छा पूरी होगी, हे महाभागे ! अब तुम थोडे दिनमें शरीर छोडकर स्वर्गको जाओगी और वहां हमारे सङ्ग रहोगी। और लोक में यह तुम्हारा तीर्थ स्थिर रहेगा, हे सुन्दर भौंहवाली ! इस सब पापनाशन तीर्थका नाम बदरपाचन होगा, इसमें सदा ब्रह्मऋषी स्नान करेंगे। (२९-३३)

हे पापरहित ! महाभाग्यवती ! इस ही तीर्थपर अरुन्धतीको छोडकर सप्त ऋषी हिमाचलको चले गये थे, वहां जाकर इन्होंने फल, मूल खाकर तप

वृत्त्यर्थं फलमूलानि समाहर्तुं ययुः किल ।
तेषां वृत्त्यार्थिना तत्र वसतां हिमवद्वने ॥ ३५ ॥
अनावृष्टिरनुप्राप्ता तदा द्वादशवार्षिकी ।
ते कृत्वा चाश्रमं तत्र न्यवसन्त तपस्विनः ॥ ३६ ॥
अरुन्धत्यपि कल्याणी तपोनित्याऽभवत्तदा ।
अरुन्धतीं ततो दृष्ट्वा तीव्रं नियममास्थिताम् ॥ ३७ ॥
अथागमत्त्रिनयनः सुप्रीतो वरदस्तदा ।
ब्राह्मं रूपं ततः कृत्वा महादेवो महायशाः ॥ ३८ ॥
तामभ्येत्याब्रवीद्देवो भिक्षामिच्छाम्यहं शुभे ।
प्रत्युवाच ततः सा तं ब्राह्मणं चारुदर्शना ॥ ३९ ॥
क्षीणोऽन्नसंचयो विप्र बदराणीह भक्षय ।
ततोऽब्रवीन्महादेवः पचस्वैतानि सुव्रते ॥ ४० ॥
इत्युक्ता साऽपचत्तानि ब्राह्मणप्रियकाम्यया ।
अधिश्रित्य समिद्धेऽग्नौ बदराणि यशस्विनी ॥ ४१ ॥
दिव्या मनोरमाः पुण्याः कथाः शुश्राव सा तदा ।
अतीता सा त्वनावृष्टिर्घोरा द्वादशवार्षिकी ॥ ४२ ॥
अनश्नन्त्याः पचन्त्याश्च शृण्वन्त्याश्च कथाः शुभाः ।
दिनोपमः स तस्याऽथ कालोऽतीतः सुदारुणः॥ ४३ ॥

करना आरम्भ किया, तब हिमाचलपर बारह वर्ष तक जल न वर्षा । परन्तु ये तपस्वी आश्रम बनाकर रहते ही रहे । भगवती अरुन्धती भी यहां रह कर तप करने लगी, उसको घोर तप करते देख महायशस्वी वरदान देनेवाले शिव प्रसन्न हुए । अनन्तर ब्राह्मणका वेष बनाकर उसके पास आये और कहने लगे कि, हे सुन्दरी ! हम तुमसे भिक्षा चाहते हैं । (३४-३९)

सुन्दरी अरुन्धती बोली, हे ब्राह्मण! हमारे यहां अन्न घट गया है, ये बेर खाइये । महादेव बोले, हे उत्तम व्रतधारिणी ! इनको पका दो । शिवके वचन सुन अरुन्धती शिवके प्रसन्न करनेके लिये जलती हुई अग्निमें उन बेरोंको पकाने लगी। और शिव उनके पास बैठकर दिव्य पवित्र और मनोहारिणी कथा सुनाते रहे, कुछ न खाते, पकाते और कथा सुनाते अरुन्धतीको वह बारह वर्षका अकाल एक दिनके समान बीत गया । (३९-४३)

ततस्तु मुनयः प्राप्ताः फलान्यादाय पर्वतात् ।
ततः स भगवान्प्रीतः प्रोवाचारुन्धतीं ततः ॥ ४४ ॥
उपसर्पस्व धर्मज्ञे यथापूर्वमिमानृषीन् ।
प्रीतोऽस्मि तव धर्मज्ञे तपसा नियमेन च ॥ ४५ ॥
ततः संदर्शयामास स्वरूपं भगवान् हरः ।
ततोऽब्रवीत्तदा तेभ्यस्तस्याश्च चरितं महत् ॥ ४६ ॥
भवद्भिर्हिमवत्पृष्ठे यत्तपः समुपार्जितम् ।
अस्याश्च यत्तपो विप्रा न समं तन्मतं मम ॥ ४७ ॥
अनया हि तपस्विन्या तपस्तप्तं सुदुश्चरम् ।
अनश्नन्त्या पचन्त्या च समा द्वादशपारिताः ॥ ४८ ॥
ततः प्रोवाच भगवांस्तामेवारुंधतीं पुनः ।
वरं वृणीष्व कल्याणि यत्तेऽभिलषितं हृदि ॥ ४९ ॥
साब्रवीत्पृथुताम्राक्षी देवं सप्तर्षिसंसदि ।
भगवन्यदि मे प्रीतस्तीर्थं स्यादिदमद्भुतम् ॥ ५० ॥
सिद्धदेवर्षिदयितं नाम्ना बदरपाचनम् ।
तथास्मिन्देवदेवेश त्रिरात्रमुषितः शुचिः ॥ ५१ ॥

तब सप्तऋषी भी फल लेकर पर्वतसे लौटे; तब शिवने अरुन्धतीसे कहा कि, हे धर्म जाननेवाली! हम तुम्हारे नियम और तपसे बहुत प्रसन्न हुए, अब तुम जैसे पहिले मुनियोंके सङ्ग जाती थीं वैसे ही जाओ। फिर भगवान् शिवने अपना रूप दिखाकर अरुन्धतीका चरित्र सुनाया और कहा कि तुम लोगोंने जो हिमाचलमें तप किया और अरुन्धतीने जो घरमें तप किया सो हमारे सम्मतिमें दोनों समान नहीं हुए। तपस्विनी अरुन्धतीने घोर तप किया इसने बारह वर्षतक कुछ नहीं खाया और बेर पका कर समय बिता दिया। (४३-४८)

अनन्तर भगवान् शिव फिर प्रसन्न होकर अरुन्धतीसे बोले, हे कल्याणी! तेरे मनमें जो इच्छा हो सो वरदान हमसे मांगो। महादेवके वचन सुन बडे बडे लाल नेत्रवाली अरुन्धती सप्तऋषियोंके बीचमें बोली, यदि आप मुझसे प्रसन्न हुए हैं, तब यह वरदान दीजिये कि इस तीर्थका फल अद्भुत होजाय। सिद्ध, देवता और ऋषी इससे प्रेम करें और इसका नाम बदरपाचन तीर्थ हो। जो तीन दिनतक पवित्र होकर इस तीर्थमें रहे और उपवास करे, उसे बारह वर्षका

प्राप्नुयादुपवासेन फलं द्वादशवार्षिकम् ।
एवमस्त्विति तां देवः प्रत्युवाच तपस्विनीम् ॥ ५२ ॥
सप्तर्षिभिः स्तुतो देवस्ततो लोकं ययौ तदा।
ऋषयो विस्मयं जग्मुस्तां दृष्ट्वा चाप्यरुंधतीम् ॥ ५३ ॥
अश्रांतां चाविवर्णां च क्षुत्पिपासाऽसमायुताम् ।
एवं सिद्धिः परा प्राप्ता अरुंधत्या विशुद्धया ॥ ५४ ॥
यथा त्वया महाभागे मदर्थं संशितव्रते ।
विशेषो हि त्वया भद्रे व्रते ह्यस्मिन्समर्पितः ॥ ५५ ॥
तथा चेदं ददाम्यद्य नियमेन सुतोषितः।
विशेषं तव कल्याणि प्रयच्छामि वरं वरे ॥ ५६ ॥
अरुन्धत्या वरस्तस्या यो दत्तो वै महात्मना ।
तस्य चाहं प्रभावेन तव कल्याणि तेजसा ॥ ५७ ॥
प्रवक्ष्यामि परं भूयो वरमत्र यथाविधि ।
यस्त्वेकां रजनीं तीर्थे वत्स्यते सुसमाहितः ॥ ५८ ॥
स स्नात्वा प्राप्स्यते लोकान् देहन्यासात्सुदुर्लभान् ।
इत्युक्त्वा भगवान् देवः सहस्राक्षः प्रतापवान् ॥५९॥
स्रुतावतीं ततः पुण्यां जगाम त्रिदिवं पुनः ।
गते वज्रधरे राजंस्तत्र वर्षं पपात ह ॥ ६० ॥
पुष्पाणां भरतश्रेष्ठ दिव्यानां पुण्यगन्धिनाम् ।

फल होय । शिवने उस तपस्विनीसे कहा कि , ऐसा ही होगा, तब सप्तऋषियोंने उनकी स्तुति करी और वे अपने लोकको चले गये, अरुन्धतीको सावधान, भूख और प्याससे रहित,तथा पहिलेके समान सुन्दर देखकर ऋषियोंको विस्मय हुआ। इस प्रकार पतिव्रता अरुन्धतीको इस तीर्थमें सिद्धिप्राप्ति हुई थी, हे कल्याणी ! तुमने भी हमारे लिये ऐसा ही व्रत किया, परन्तु तुमने कुछ विशेष किया। इसलिये हम प्रसन्न होकर अधिक वर देते हैं, अरुन्धतीको महात्मा शिवने जो वरदान दिया था,उसके प्रताप और तुम्हारे तेजसे हम यह वरदान देते हैं कि जो मनुष्य सावधान होकर इस तीर्थमें, एक दिन रहेगा और स्नान करेगा वह मरकर दुर्लभ लोकोंको जायगा,ऐसा कहकर देवतोंके स्वामी प्रतापवान भगवान् इन्द्र स्वर्गको चले गये। (४९-६०)

देवदुन्दुभयश्चापि नेदुस्तत्र महास्वनाः ॥ ६१ ॥
मारुतश्च ववौ पुण्यः पुण्यगन्धो विशाम्पते ।
उत्सृज्य तु शुभा देहं जगामास्य च भार्यताम् ॥६२॥
तपसोग्रेण तं लब्ध्वा तेन रेमे सहाच्युत ।
जनमेजय उवाच-का तस्या भगवन्माता क संवृद्धा च शोभना ॥६३॥
श्रोतुमिच्छाम्यहं विप्र परं कौतूहलं हि मे ।
वैशम्पायन उवाच-भरद्वाजस्य विप्रर्षेः स्कन्नं रेतो महात्मनः ॥ ६४ ॥
दृष्ट्वाऽप्सरसमायान्तीं घृताचीं पृथुलोचनाम् ।
स तु जग्राह तद्रेतः करेण जपतां वर ॥ ६५ ॥
तदापतत्पर्णपुटे तत्र सा संभवत्सुता ।
तस्यास्तु जातकर्मादि कृत्वा सर्वं तपोधनः ॥ ६६ ॥
नाम चास्याः स कृतवान् भरद्वाजो महामुनिः ।
श्रुतावतीति धर्मात्मा देवर्षिगणसंसदि ।
स्वे च तामाश्रमे न्यस्य जगाम हिमवद्वनम् ॥ ६७ ॥
तत्राप्युपस्पृश्य महानुभावो वसूनि दत्वा च महाद्विजेभ्यः । [२९०३]
जगाम तीर्थं सुसमाहितात्मा शक्रस्य वृष्णिप्रवरस्तदानीम् ॥ ६८ ॥

इतिश्री महा० श० गदाप० बलदेवतीर्थ० सारस्वतो० बदरपाचनतीर्थकथने अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

हे राजन् ! इन्द्रके जाते ही श्रुतावतीके ऊपर पवित्र सुगन्ध भरे फूलोंकी वर्षा होने लगी, देवता आकाशमें खडे होकर नगारे बजाने लगे। उत्तम पवित्र और सुगन्धि भरा वायु चलने लगा। फिर श्रुतावती मरकर उग्र तपके प्रभावसे इन्द्रकी स्त्री बनी और उनके संग विहार करने लगी। (६१-६२)

राजा जनमेजय बोले, हे भगवन् ! सुन्दरी श्रुतावतीकी माता कौन थी? और वह कहां पली थी? यह कथा आप हमसे कहो, हमें सुननेको बहुत इच्छा है। (६३-६४)

श्रीवैशम्पायन मुनि बोले, एक दिन महात्मा भरद्वाजके आश्रमके पासको विशालनैनी घृताची चली जाती थी, उसको देखकर मुनिका वीर्य गिरा, मुनीश्वरने उसे अपने हाथमें लेकर दोना में रख दिया, उससे यह कन्या उत्पन्न होगई। भगवान् भरद्वाजने उसका जातकर्म करके ब्रह्मऋषियोंकी सभामें उसका नाम श्रुतावती रक्खा, फिर उसे अपने आश्रममें छोडकर हिमाचलके वनमें तपस्या करनेको चले गये। वृष्णि

वैशम्पायन उवाच-इंद्रतीर्थं ततो गत्वा यदूनां प्रवरो बलः।
विप्रेभ्यो धनरत्नानि ददौ स्नात्वा यथाविधि ॥ १ ॥
तत्र ह्यमरराजोऽसावीजे क्रतुशतेन च।
बृहस्पतेश्च देवेशः प्रददौ विपुलं धनम् ॥ २ ॥
निरर्गलान्सजारूथ्यान्सर्वान्विविधदक्षिणान्।
आजहार क्रतूंस्तत्र यथोक्तान्वेदपारगैः ॥ ३ ॥
तान्क्रतून्भरतश्रेष्ठ शतकृत्वो महाद्युतिः।
पूरयामास विधिवत्ततः ख्यातः शतक्रतुः ॥ ४ ॥
तस्य नाम्ना च तत्तीर्थं शिवं पुण्यं सनातनम्।
इन्द्रतीर्थमिति ख्यातं सर्वपापप्रमोचनम् ॥ ५ ॥
उपस्पृश्य च तत्रापि विधिवन्मुसलायुधः।
ब्राह्मणान्पूजयित्वा च सदाऽऽच्छादनभोजनैः ॥ ६ ॥
शुभं तीर्थवरं तस्माद्रामतीर्थं जगाम ह।
यत्र रामो महाभागो भार्गवः सुमहातपाः ॥ ७ ॥
असकृत्पृथिवीं जित्वा हतक्षत्रियपुङ्गवाम्।
उपाध्यायं पुरस्कृत्य कश्यपं मुनिसत्तमम् ॥ ८ ॥

कुलश्रेष्ठ महानुभाव बलवान उस तीर्थमें स्नान करके ब्राह्मणोंको बहुत दान देकर इन्द्रतीर्थको चले गये। (६५—६८)

शल्यपर्वमें अठतालीस अध्याय समाप्त। २९०३

शल्यपर्वमें उनचास अध्याय।

श्रीवैशम्पायन मुनि बोले, हे राजन् जनमेजय! यदुकुलश्रेष्ठ महाबलवान बलदेव वहांसे चलकर इन्द्र तीर्थपर पहुंचे और वहां ब्राह्मणोंको अनेक रत्न और धन विधिपूर्वक दान किये। (१)

हे राजेन्द्र! इस ही स्थानपर इन्द्रने सौ यज्ञ करीं थीं और बृहस्पतिको बहुत धन दिया था। इन्द्रने उन यज्ञोंको सर्वांग सम्पन्न और वेदपाठी ब्राह्मणोंको पूर्ण दक्षिणा देकर विधिपूर्वक पूर्ण किया था, उसी दिनसे महातेजस्वी इन्द्रका नाम शतक्रतु अर्थात् सौ यज्ञ करनेवाला हुआ, उन्हींके नामसे यह सनातन और प्रसिद्ध तीर्थ भी होगया, इसपर जानेसे सब प्रकारके पाप दूर होजाते हैं। (२-५)

वहांपर मुशलधारी बलदेवने ब्राह्मणोंको उत्तम भोजन और वस्त्रादिक दान करके राम तीर्थकी यात्रा करी। हे राजन्! इस ही तीर्थपर भृगुवंशी महाभागी महातपस्वी परशुरामने उत्तम क्षत्रियोंका

अयजद्वाजपेयेन सोऽश्वमेधशतेन च ।
प्रददौ दक्षिणां चैव पृथिवीं वै ससागराम् ॥ ९ ॥
दत्त्वा च दानं विविधं नानारत्नसमन्वितम् ।
सगोहस्तिकदासीकं साजाविगतवान्धनम् ॥ १० ॥
पुण्ये तीर्थवरे तत्र देवब्रह्मर्षिसेविते ।
मुनींश्चैवाभिवाद्याथ यमुनातीर्थमागमत् ॥ ११ ॥
यत्रानयामास तदा राजसूयं महीपते ।
पुत्रोऽदितेर्महाभागो वरुणो वै सितप्रभः ॥ १२ ॥
तत्र निर्जित्य संग्रामे मानुषान्देवतांस्तथा ।
वरं क्रतुं समाजह्रे वरुणः परवीरहा ॥ १३ ॥
तस्मिन्क्रतुवरे वृत्ते संग्रामः समजायत ।
देवानां दानवानां च त्रैलोक्यस्य भयावहः ॥ १४ ॥
राजसूये क्रतुश्रेष्ठे निवृत्ते जनमेजय ।
जायते सुमहाघोरः संग्रामः क्षत्रियान्प्रति ॥ १५ ॥
तत्रापि लांगली देव ऋषीनभ्यर्च्य पूजया ।
इतरेभ्योऽप्यदाद्दानमर्थिभ्यः कामदो विभुः ॥ १६ ॥
वनमाली ततो हृष्टः स्तूयमानो महर्षिभिः ।

नाश करनेके पीछे मुनियोंमें श्रेष्ठ कश्यपको पुरोहित बनाकर वाजपेय यज्ञ और सौ अश्वमेध यज्ञ करी थी, वहीं उन्होंने दक्षिणा में सब पृथ्वी दान कर दी थी ॥ (६-९)

बलदेवने वहां भी ब्राह्मणोंको अनेक प्रकारके रत्न, गौ, हाथी, दास, दासी, बकरी और भेड आदि दान करी। अनन्तर मुनियोंको प्रणाम करके उस देव ऋषि पूजित तीर्थसे यमुना तीर्थकी ओर गये इसी तीर्थमें अदितीके पुत्र सफेद रंगवाले वरुणने राजसूय यज्ञ करी थी, जब यह राजसूय यज्ञ आरम्भ हुई तब तीनों लोकोंको भय देनेवाला देवता और दानवोंका घोर युद्ध होने लगा। वरुणने पहिले भी देवता और दानवोंको जीतकर यज्ञारम्भ करा था, वह नियम है कि राजसूय यज्ञके अन्तमें घोर युद्ध होता है (१०-१५)

हे महाराज ! बलरामने वहां भी ब्राह्मण और ऋषियोंकी पूजा करके भिक्षुकोंको उनकी इच्छानुसार दान दिया। वनमालाधारी कमलनेत्र बलराम ऋषिओंके मुखसे कथा सुनते हुए प्रसन्न होकर

तस्माद्गादित्यतीर्थं च जगाम कमलेक्षणः ॥ १७ ॥
यत्रेष्ट्वा भगवान्ज्योतिर्भास्करो राजसत्तम।
ज्योतिषामाधिपत्यं च प्रभावं चाभ्यपद्यत ॥ १८ ॥
तस्या नद्यास्तु तीरे वै सर्वे देवाः सवासवाः।
विश्वेदेवाः समरुतो गन्धर्वाप्सरसश्च ह ॥ १९ ॥
द्वैपायनः शुकश्चैव कृष्णश्च मधुसूदनः।
यक्षाश्च राक्षसाश्चैव पिशाचाश्च विशाम्पते ॥ २० ॥
एते चान्ये च बहवो योगसिद्धाः सहस्रशः
तस्मिंस्तीर्थे सरस्वत्याः शिवे पुण्ये परंतप ॥ २१ ॥
तत्र हत्वा पुरा विष्णुरसुरौ मधुकैटभौ।
आप्लुत्य भरतश्रेष्ठ तीर्थप्रवर उत्तमे ॥ २२ ॥
द्वैपायनश्च धर्मात्मा तत्रैवाप्लुत्य भारत।
संप्राप्य परमं योगं सिद्धिं च परमां गतः ॥ २३ ॥
असितो देवलश्चैव तस्मिन्नेव महातपाः।
परमं योगमास्थाय ऋषिर्योगमवाप्तवान्॥ २४ ॥ [२९२७]

इतिश्रीमहाभारते शल्यपर्वांतर्गतगदापर्वणि बलदेवती० सारस्वतो० एकोनपंचाशत्तमोऽध्यायः ॥४९॥

वैशम्पायन उवाच-तस्मिन्नेव तु धर्मात्मा वसति स्म तपोधनः।
गार्हस्थ्यं धर्ममास्थाय ह्यसितो देवलः पुरा ॥ १ ॥

वहांसे चले और आदिति तीर्थपर पहुंचे। हे राजोंमें श्रेष्ठ ! वहीं यज्ञ करनेसे सूर्यको इतना तेज और नक्षत्रोंका राज्य मिला है। इसी तीर्थपर रहनेसे इन्द्रादिक सब देवता, विश्वेदेव, मरुत, गन्धर्व, अप्सरा, वेदव्यास, शुकदेव, मधुनाशक कृष्ण, यक्ष, राक्षस और अनेक पिशाचादि सहस्रों योगी सिद्ध होगये हैं॥ यह सरस्वतीका तीर्थ बहुत ही पवित्र और कल्याण दायक है, इस ही तीर्थमें पहिले समयमें विष्णुने मधु और कैटभ नामक दानवोंको मारा था, इसी उत्तम तीर्थमें स्नान करनेसे धर्मात्मा वेदव्यासको योग और परम सिद्धि प्राप्त हुई थी। इसी तीर्थमें महातपस्वी असित देवलने योग किया था और सिद्ध होगये थे॥ (१६-२४) [२९२७]

शल्यपर्वमें उनचास अध्याय समाप्त।

शल्यपर्वमें पचास अध्याय।

श्रीवैशम्पायन मुनि बोले, हे राजन् जनमेजय ! पहिले समयमें इस तीर्थमें गृहस्थ धर्म धारण करणे महातपस्वी

धर्मनित्यः शुचिर्दान्तो न्यस्तदण्डो महातपाः ।
कर्मणा मनसा वाचा समः सर्वेषु जन्तुषु ॥ २ ॥
अक्रोधनो महाराज तुल्यनिंदात्मसंस्तुतिः ।
प्रियाप्रिये तुल्यवृत्तिर्यमवत्समदर्शनः ॥ ३ ॥
कांचने लोष्ठभावे च समदर्शी महातपाः ।
देवानपूजयन्नित्यमतिथींश्च द्विजैः सह ॥ ४ ॥
ब्रह्मचर्यरतो नित्यं सदा धर्मपरायणः ।
ततोऽभ्येत्य महाभाग योगमास्थाय भिक्षुकः ॥ ५ ॥
जैगीषव्यो मुनिर्धीमांस्तस्मिंस्तीर्थे समाहितः ।
देवलस्याश्रमे राजन्न्यवसत्स महाद्युतिः ॥ ६ ॥
योगनित्यो महाराज सिद्धिं प्राप्तो महातपाः ।
तं तत्र वसमानं तु जैगीषव्यं महामुनिम् ॥ ७ ॥
देवलो दर्शयन्नेव नैवायुंजत धर्मतः ।
एवं तयोर्महाराज दीर्घकालो व्यतिक्रमत् ॥ ८ ॥
जैगीषव्यं मुनिवरं न ददर्शाथ देवलः ।
आहारकाले मतिमान्परिव्राड् जनमेजय ॥ ९ ॥

धर्मात्मा असित देवल मुनि रहते थे। वे मनसे, वचनसे और कर्मसे सब प्राणियोंको समान समझते थे, पवित्र होकर सदा धर्म करते थे, इन्द्रियोंको सदा वशमें रखते थे, दण्ड धारण करते थे। कभी क्रोध नहीं करते थे, अपनी निन्दा और स्तुतीको समान ही मानते थे, शत्रु और मित्रको एकसा सोने और डेलेको समान ही मानते थे; सदा देवता ब्राह्मण और अतिथियोंकी पूजा किया करते थे, सदा ब्रह्मचर्य धारण और धर्म करते थे ॥ (१-५)

हे महाराज ! एक दिन उनके पास जैगिषव्य नामक बुद्धिमान योगी मुनि आये और महातेजस्वी देवलके आश्रममें सावधान होकर ठहरे, सदा योग करनेवाले महातपस्वी सिद्धि देवल महामुनिने जैगिषव्यको देखकर धर्मके अनुसार पूजन करी। अनन्तर महातेजस्वी जैगिषव्य ऋषी भी उनके आश्रमके पास ही रहने लगे। इस प्रकार इन दोनोंको रहते रहते बहुत समय बीत गया ॥ (६-८)

हे जनमेजय ! देवलने कभी भी उनको भोजनके समय न देख एकदिन महामुनि जैगिषव्य भिक्षाके समय धर्म

उपातिष्ठत धर्मज्ञो भैक्षकाले स देवलम् ।
स दृष्ट्वा भिक्षुरूपेण प्राप्तं तत्र महामुनिम् ॥ १० ॥
गौरवं परमं चक्रे प्रीतिं च विपुलां तथा ।
देवलस्तु यथाशक्ति पूजयामास भारत ॥ ११ ॥
ऋषिदृष्टेन विधिना समा बह्वीः समाहितः ।
कदाचित्तस्य नृपते देवलस्य महात्मनः ॥ १२ ॥
चिन्ता सुमहती जाता मुनिं दृष्ट्वा महाद्युतिम् ।
समास्तु समतिक्रान्ता बह्व्यः पूजयतो मम ॥ १३ ॥
न चायमलसो भिक्षुरभ्यभाषत किंचन ।
एवं विगणयन्नेव स जगाम महोदधिम् ॥ १४ ॥
अंतरिक्षचरः श्रीमान् कलशं गृह्य देवलः ।
गच्छन्नेव स धर्मात्मा समुद्रं सरितां पतिम् ॥ १५ ॥
जैगीषव्यं ततोऽपश्यद्गतं प्रागेव भारत ।
ततः सविस्मयश्चिंतां जगामाथामितप्रभः ॥ १६ ॥
कथं भिक्षुरयं प्राप्तः समुद्रे स्नात एव च ।
इत्येवं चिंतयामास महर्षेरसितस्तदा ॥ १७ ॥
स्नात्वा समुद्रे विधिवच्छुचिर्जप्यं जजाप सः ।
कृतजप्याह्निकः श्रीमानाश्रमं च जगाम ह ॥ १८ ॥
कलशं जलपूर्णं वै गृहीत्वा जनमेजय ।

जाननेवाले, देवल ऋषीके आश्रममें आये। महात्मा महातेजस्वी जैगिषव्यको अपने आश्रममें आया देख देवलने बहुत प्रसन्न होकर उनका बहुत आदर किया, और विधिपूर्वक शक्तिके अनुसार उनकी पूजा भी करी। तब जैगिषव्य महात्मा देवलके स्थानमें रोज आने लगे। एक दिन देवलने विचारा कि मैं कै वर्षसे इस अतिथीकी पूजा करता हूं। परन्तु इसे कुछ भी आलस्य नहीं है, ऐसा विचारते हुए धर्मात्मा श्रीमान् देवल मुनि घडा लेकर आकाश मार्गसे नदियोंके स्वामी समुद्रको चले, वहां जाकर देखा कि महातेजस्वी जैगिषव्य बैठे हैं। तब उनको बहुत आश्चर्य हुआ और कहने लगे कि यह भिक्षुक यहां कैसे आगया। (९—१७)

फिर महामुनि देवलने विधिपूर्वक समुद्रमें स्नान करके नित्य कर्म और जप किया। फिर घडेमें जल भरकर अपने

ततः स प्रविशन्नेव स्वमाश्रमपदं मुनिः ॥ १९ ॥
आसीनमाश्रमे तत्र जैगीषव्यमपश्यत ।
न व्याहरति चैवैनं जैगीषव्यः कथंचन ॥ २० ॥
काष्ठभूतोऽऽश्रमपदे वसति स्म महातपाः ।
तं दृष्ट्वा चाप्लुतं तोये सागरे सागरोपमम् ॥ २१ ॥
प्रविष्टमाश्रमं चापि पूर्वमेव ददर्श सः ।
असितो देवलो राजंश्चिंतयामास बुद्धिमान् ॥ २२ ॥
दृष्ट्वा प्रभावं तपसो जैगीषव्यस्य योगजम् ।
चिन्तयामास राजेन्द्र तदा स मुनिसत्तमः ॥ २३ ॥
मया दृष्टः समुद्रे च आश्रमे च कथं त्वयम् ।
एवं विगणयन्नेव स मुनिर्मन्त्रपारगः ॥ २४ ॥
उत्पपाताश्रमात्तस्मादन्तरिक्षं विशांपते ।
जिज्ञासार्थं तदा भिक्षोर्जैगीषव्यस्य देवलः ॥ २५ ॥
सोन्तऽरिक्षचरान् सिद्धान् समपश्यत्समाहितान् ।
जैगीषव्यं च तैः सिद्धैः पूज्यमानमपश्यत ॥ २६ ॥
ततोऽसितः सुसंरब्धो व्यवसायी दृढव्रतः ।
अपश्यद्वै दिवं यातं जैगीषव्यं स देवलः ॥ २७ ॥
तस्मात्तु पितृलोकं तं व्रजन्तं सोऽन्वपश्यत ।
पितृलोकाच्च तं यातं याम्यं लोकमपश्यत ॥ २८ ॥

आश्रमको चले आये । हे जनमेजय ! जब देवल अपने आश्रममें आये तब देखा तो जैगिषव्य वहीं बैठे हैं । परन्तु कुछ बोलते नहीं, केवल काष्ठके समान बैठे तपस्या कर रहे हैं । और जलमें भींगे हैं, समुद्रके समान गंभीर जैगिषव्यको देखकर देवलमुनिको बहुत चिन्ता हुई । उनको वैसे ही आसनमें बैठे छोड गये थे, जैगिषव्यके योग प्रभावको देखकर देवलको बहुत आश्चर्य हुआ, वे कहने लगे, कि मैंने उन्हें अभी समुद्रमें देखा था, अब ये यहां कैसे आगये ? (१८—२४)

ऐसा विचारते देवल मुनि उसकी परीक्षा करनेको फिर आकाशको उडे । आकाशमें उडनेवाले सिद्ध जैगिषव्यकी पूजा कर रहे हैं । अनन्तर दृढव्रतधारी महापरिश्रमी देवलने एक ओर जाते जैगिषव्यको देखा, वहांसे पितर लोकको, वहांसे यमलोक, वहांसे चन्द्र लोक,

तस्मादपि समुत्पत्य सोमलोकमभिप्लुतम् ।
व्रजन्तमन्वपश्यत्स जैगीषव्यं महामुनिम् ॥ २९ ॥
लोकान्समुत्पतन्तं तु शुभानेकान्तयाजिनाम् ।
ततोऽग्निहोत्रिणां लोकांस्ततश्चाप्युत्पपात ह ॥ ३० ॥
दर्शं च पौर्णमासं च ये यजन्ति तपोधनाः ।
तेभ्यः स ददृशे धीमाँल्लोकेभ्यः पशुयाजिनाम् ॥३१॥
व्रजन्तं लोकममलमपश्यद्देवपूजितम् ।
चातुर्मास्यैर्बहुविधैर्यजन्ते ये तपोधनाः ॥ ३२ ॥
तेषां स्थानं ततो यातं तथाग्निष्टोमयाजिनाम् ।
अग्निष्टुतेन च तथा ये यजन्ति तपोधनाः ॥ ३३ ॥
तत्स्थानमनुसंप्राप्तमन्वपश्यत देवलः ।
वाजपेयं क्रतुवरं तथा बहुसुवर्णकम् ॥ ३४ ॥
आहरंति महाप्राज्ञास्तेषां लोकेष्वपश्यत ।
यजंते राजसूयेन पुंडरीकेण चैव ये ॥ ३५ ॥
तेषां लोकेष्वपश्यच्च जैगीषव्यं स देवलः ।
अश्वमेधं क्रतुवरं नरमेधं तथैव च ॥ ३६ ॥
आहरंति नरश्रेष्ठास्तेषां लोकेष्वपश्यत ।
सर्वमेधं च दुष्प्रापं तथा सौत्रामणिं च ये ॥ ३७ ॥
तेषां लोकेष्वपश्यच्च जैगीषव्यं स देवलः ।
द्वादशाहैश्च सत्रैश्च यजन्ते विविधैर्नृप ॥ ३८ ॥
तेषां लोकेष्वपश्यच्च जैगीषव्यं स देवलः ।

वहांसे एकान्तमें यज्ञ करनेवाले मुनियोंके लोक, वहांसे अग्निहोत्रियोंके लोक, वहांसे दर्श और पौर्णमास यज्ञ करनेवाले महात्माओंके लोकमें, वहांसे पशुओंसे यज्ञ करनेवालोंके लोकमें, वहांसे देवपूजित चातुर्मास्य यज्ञ करनेवालोंके लोकमें, वहांसे अग्निष्टोम यज्ञ करनेवालोंके लोकमें, वहांसे बहुत दक्षिणायुक्त वाजपेय यज्ञ करनेवालोंके लोकमें, वहांसे राजसूय और पुण्डरीक यज्ञ करनेवाले महाबुद्धिमानोंके लोकमें, वहांसे अश्वमेध और नरमेध यज्ञ करनेवालोंके लोकमें, वहांसे अत्यन्त दुःखसे करने योग्य सर्वमेध और सौत्रामणि यज्ञ करनेवालोंके लोकमें, वहांसे द्वादशाह यज्ञ करनेवालोंके लोकमें, वहांसे मित्रावरुण लोकमें,

मैत्रावरुणयोर्लोकानादित्यानां तथैव च ॥ ३९ ॥
सलोकतामनुप्राप्तमपश्यत ततोऽसितः ।
रुद्राणां च वसूनां च स्थानं यच्च बृहस्पतेः ॥ ४० ॥
तानि सर्वाण्यतीतानि समपश्यत्ततोऽसितः ।
आरुह्य च गवां लोकं प्रयातो ब्रह्मसत्रिणाम् ॥ ४१ ॥
लोकानपश्यद्गच्छन्तं जैगीषव्यं ततोऽसितः ।
त्रींल्लोकानपरान् विप्रमुत्पतन्तं स्वतेजसा ॥ ४२ ॥
पतिव्रतानां लोकांश्च व्रजन्तं सोऽन्वपश्यत ।
ततो मुनिवरं भूयो जैगीषव्यमथासितः ॥ ४३ ॥
नान्वपश्यत लोकस्थमन्तर्हितमरिन्दम ।
सोऽचिन्तयन्महाभागो जैगीषव्यस्य देवलः ॥ ४४ ॥
प्रभावं सुव्रतत्वं च सिद्धिं योगस्य चातुलाम् ।
असितोऽपृच्छत तदा सिद्धाँल्लोकेषु सत्तमान् ॥ ४५ ॥
प्रयतः प्राञ्जलिर्भूत्वा धीरस्तान्ब्रह्मसत्रिणः ।
जैगीषव्यं न पश्यामि तं शंसध्वं महौजसम् ॥ ४६ ॥
एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ।
सिद्धा ऊचुः— शृणु देवल भूतार्थं शंसतां नो दृढव्रत ॥ ४७ ॥
जैगीषव्यः स वै लोकं शाश्वतं ब्रह्मणो गतः ।
वैशम्पायन उवाच-स श्रुत्वा वचनं तेषां सिद्धानां ब्रह्मसत्रिणाम् ॥ ४८ ॥
असितो देवलस्तूर्णमुत्पपात पपात च ।

वहांसे आदित्य लोकमें, वहांसे रुद्रलोक, बृहस्पति लोक, गोलोक, ब्रह्म सत्र लोक, तीन महालोक और वहांसे पतिव्रता-लोकमें जाते देखा। उसके पश्चात् महा-मुनि जैगिषव्य अन्तर्धान होगये, और देवल उन्हें न देख सके। तब महाभाग देवल जैगिषव्यके प्रभाव, व्रत, सिद्धि और योगबलका विचार करने लगे। (३५—४५)

अनन्तर महाधीरधारी देवल बोले कि, हे सिद्धों! हम महातेजस्वी जैगि-षव्यको नहीं देखते, तुम लोग ब्रह्मयज्ञ करते हो इसलिये, कहो कि जैगिषव्य कहां गये? हमें सुननेकी बहुत इच्छा है। सिद्ध बोले, हे दृढव्रतधारी देवल! जैगिषव्य सनातन ब्रह्म लोकको चले गये। (४६—४८)

श्रीवैशम्पायन मुनि बोले, ब्रह्मयज्ञ

ततः सिद्धास्त ऊचुर्हि देवलं पुनरेव ह ॥ ४९ ॥
न देवल गतिस्तत्र तव गन्तुं तपोधन।
ब्रह्मणः सदने विप्र जैगीषव्यो यदाप्तवान् ॥ ५० ॥
वैशम्पायन उवाच-तेषां तद्वचनं श्रुत्वा सिद्धानां देवलः पुनः।
आनुपूर्व्येण लोकांस्तान्सर्वानवततार ह ॥ ५१ ॥
स्वमाश्रमपदं पुण्यमाजगाम पतत्रिवत्।
प्रविशन्नेव चापश्यज्जैगीषव्यं स देवलः ॥ ५२ ॥
ततो बुद्ध्या व्यगणयद्देवलो धर्मयुक्तया।
दृष्ट्वा प्रभावं तपसो जैगीषव्यस्य योगजम् ॥ ५३ ॥
ततोऽब्रवीन्महात्मानं जैगीषव्यं स देवलः।
विनयावनतो राजन्नुपसर्प्य महामुनिम् ॥ ५४ ॥
मोक्षधर्मं समास्थातुमिच्छेयं भगवन्नहम्।
तस्य तद्वचनं श्रुत्वा उपदेशं चकार सः ॥ ५५ ॥
विधिं च योगस्य परं कार्याकार्यस्य शास्त्रतः।
संन्यासकृतबुद्धिं तं ततो दृष्ट्वा महातपाः ॥ ५६ ॥
सर्वाश्चास्य क्रियाश्चक्रे विधिदृष्टेन कर्मणा।
संन्यासकृतबुद्धिं तं भूतानि पितृभिः सह ॥ ५७ ॥
ततो दृष्ट्वा प्ररुरुदुः कोऽस्मान्संविभजिष्यति।

करनेवाले सिद्धोंके वचन सुन देवल मुनि शीघ्रतासहित ब्रह्मलोकको चलने लगे, परन्तु गिर पडे; तब वे सिद्ध फिर बोले, हे तपोधन देवल! तुम ब्रह्मलोकमें नहीं जासक्ते हो, वहां जानेकी शक्ति जैगिषव्यहीको है। (४९—५०)

श्रीवैशम्पायन मुनि बोले, सिद्धोंके वचन सुन महामुनि देवल क्रमसे उन्हीं लोकोंमें उतरते हुए अपने पवित्र आश्रममें आये और देखा कि जैगिषव्य मुनि वहीं बैठे हैं। तब देवलने धर्मयुक्त बुद्धिसे विचार कर और महात्मा जैगिषव्यके योगबलको देखकर हाथ जोडकर देवल मुनि बोले हे भगवन्! हम आपसे मोक्ष धर्म सुनना चाहते हैं। देवलके वचन सुन महामुनि जैगिषव्यने शास्त्रके अनुसार उन्हें ज्ञान उपदेश किया। तब महामुनि देवलने विधिपूर्वक सब कर्मोंको छोडकर सन्यास लेनेकी इच्छा करी। (५१—५६)

उन्हे सन्यासी होते देख सब पितर और भूतगण रोकर कहने लगे, कि अब

देवलस्तु वचः श्रुत्वा भूतानां करुणं तथा ॥ ५८ ॥
दिशो दश व्याहरतां मोक्षं त्यक्तुं मनो दधे ।
ततस्तु फलमूलानि पवित्राणि च भारत ॥ ५९ ॥
पुष्पाण्योषधयश्चैव रोरूयन्ति सहस्रशः ।
पुनर्नो देवलः क्षुद्रो नूनं छेत्स्यति दुर्मतिः ॥ ६० ॥
अभयं सर्वभूतेभ्यो यो दत्वा नावबुध्यते ।
ततो भूयो व्यगणयत्स्वबुद्ध्या मुनिसत्तमः ॥ ६१ ॥
मोक्षे गार्हस्थ्यधर्मे वा किं नु श्रेयस्करं भवेत् ।
इति निश्चित्य मनसा देवलो राजसत्तम ॥ ६२ ॥
त्यक्त्वा गार्हस्थ्यधर्मं स मोक्षधर्ममरोचयत् ।
एवमादीनि सञ्चिन्त्य देवलो निश्चयात्ततः ॥ ६३ ॥
प्राप्तवान्परमां सिद्धिं परं योगं च भारत ।
ततो देवाः समागम्य बृहस्पतिपुरोगमाः ॥ ६४ ॥
जैगीषव्यं तपश्चास्य प्रशंसन्ति तपस्विनः ।
अथाब्रवीदृषिवरो देवान्वै नारदस्तथा ॥ ६५ ॥
जैगीषव्ये तपो नास्ति विस्मापयति योऽसितम् ।
तमेवं वादिनं धीरं प्रत्यूचुस्ते दिवौकसः ॥ ६६ ॥
नैवमित्यवशंसन्तो जैगीषव्यं महामुनिम् ।

हमें अन्न भाग कौन देगा? सब ओरसे भूतोंके करुणायुक्त वचन सुन देवलने सन्यास छोडनेकी इच्छा करी। उन्हें सन्यास छोडते देख पवित्र फल, मूल और वृक्ष रोरोकर कहने लगे, कि मूर्ख क्षुद्र देवल अब फिर हमारा नाश करेगा इसने पहिले सब प्राणियोंको अभय दान दिया और अब फिर मूर्खता करता है। (५६—६१)

तब देवल मुनि फिर विचारने लगे, कि गृहस्थधर्म अच्छा है वा सन्यास? हे राजेन्द्र! तब उनकी बुद्धिमें सन्यास धर्म अच्छा ठहरा और उसके करनेसे उन्हें परम सिद्धी और योग सिद्धि प्राप्त हुई। तब बृहस्पति आदि देवता जैगिषव्यके पास आकर उनकी प्रशंसा करने लगे। तब ऋषिश्रेष्ठ नारद बोले जैगिषव्य कुछ तपस्वी नहीं है, इसने देवलको भ्रममें डाल दिया। ६२—६५)

धीर नारदके वचन सुन देवता बोले, आप महात्मा जैगिषव्यको ऐसे वचन मत कहिये इनके तप, तेज और योगके

नातः परतरं किञ्चित्तुल्यमस्ति प्रभावतः ॥ ६७ ॥
तेजसस्तपसश्चास्य योगस्य च महात्मनः ।
एवं प्रभावो धर्मात्मा जैगीषव्यस्तथाऽसितः ।
तयोरिदं स्थानवरं तीर्थं चैव महात्मनोः ॥ ६८ ॥
तत्राप्युपस्पृश्य ततो महात्मा दत्वा च वित्तं हलभृद् द्विजेभ्यः ।
अवाप्य धर्मं परमार्थकर्मा जगाम सोमस्य महत्सुतीर्थम् ॥६९॥ [२९९६]
इति श्रीमहाभारते शतसाहस्र्यां० शल्यपर्वान्तर्गतगदा० बलदेवती० सारस्व० पंचाशत्तमोऽध्यायः ॥ ५० ॥

वैशम्पायनउवाच-यत्रेजिवानुडुपती राजसूयेन भारत ।
तस्मिंस्तीर्थे महानासीत्संग्रामस्तारकामयः ॥ १ ॥
तत्राप्युपस्पृश्य बलो दत्वा दानानि चात्मवान् ।
सारस्वतस्य धर्मात्मा मुनेस्तीर्थं जगाम ह ॥ २ ॥
तत्र द्वादशवार्षिक्यामनावृष्ट्यां द्विजोत्तमान् ।
वेदानध्यापयामास पुरा सारस्वतो मुनिः ॥ ३ ॥
जनमेजय उवाच-कथं द्वादशवार्षिक्यामनावृष्ट्यां द्विजोत्तमान् ।
ऋषीनध्यापयामास पुरा सारस्वतो मुनिः ॥ ४ ॥
वैशम्पायन उवाच-आसीत्पूर्वं महाराज मुनिर्धीमान्महातपाः ।

समान किसीका प्रभाव नहीं है। हे राजन्! हमने महात्मा जैगिषव्य और देवलका इस प्रकार प्रभाव वर्णन किया। यह तीर्थ उन्ही दोनों महात्माओंका स्थान है। महात्मा उत्तम कर्म करनेवाले बलदेवने वहां भी ब्राह्मणोंको अनेक दान देकर धर्म और अर्थको प्राप्त किया, फिर वहांसे सोमतीर्थको चले गये। (६६-६९) [२९९६]

शल्यपर्वमें पचास अध्याय समाप्त।

शल्यपर्वमें एकावन अध्याय।

श्रीवैशम्पायन मुनि बोले, हे राजन् जनमेजय! इसी तीर्थपर चन्द्रमाने राजसूय यज्ञ किया था, और यहीं तारकासुरसे घोर युद्ध हुवा था। वहां भी स्नान करके और ब्राह्मणोंको दान देकर सावधान बलदेव महाऋषि सारस्वतके तीर्थको चले गये। हे राजन्! इस ही तीर्थपर बारह वर्षके अकालमें सारस्वत मुनिने ब्राह्मणोंको वेद पढाया था। (१--३)

राजा जनमेजय बोले, पहिले समयमें जब बारह वर्षका अकाल पडा था, तब सारस्वत मुनिने ब्राह्मणोंको कैसे वेद पढाया था। (४)

श्रीवैशम्पायन मुनि बोले, हे महा-

दधीच इति विख्यातो ब्रह्मचारी जितेंद्रियः ॥ ५ ॥
तस्यातितपसः शक्रो बिभेति सततं विभो ।
न स लोभयितुं शक्यः फलैर्बहुविधैरपि ॥ ६ ॥
प्रलोभनार्थं तस्याथ प्राहिणोत्पाकशासनः ।
दिव्यामप्सरसं पुण्यां दर्शनीयामलंबुषाम् ॥ ७ ॥
तस्य तर्पयतो देवान् सरस्वत्यां महात्मनः ।
समीपतो महाराज सोपातिष्ठत भाविनी ॥ ८ ॥
तां दिव्यवपुषं दृष्ट्वा तस्यर्षेर्भावितात्मनः ।
रेतः स्कन्नं सरस्वत्यां तत्सा जग्राह निम्नगा ॥ ९ ॥
कुक्षौ चाप्यदधद्दृष्टा तद्रेतः पुरुषर्षभ ।
सा दधार च तं गर्भं पुत्रहेतोर्महानदी ॥ १० ॥
सुषुवे चापि समये पुत्रं सा सरितां वरा ।
जगाम पुत्रमादाय तमृषिं प्रति च प्रभो ॥ ११ ॥
ऋषिसंसदि तं दृष्ट्वा सा नदी मुनिसत्तमम् ।
ततः प्रोवाच राजेंद्र ददती पुत्रमस्य तम् ॥ १२ ॥
ब्रह्मर्षे तव पुत्रोऽयं त्वद्भक्त्या धारितो मया ।
दृष्ट्वा तेऽप्सरसं रेतो यत्स्कन्नं प्रागलंबुषाम् ॥ १३ ॥
तत्कुक्षिणा वै ब्रह्मर्षे त्वद्भक्त्या धृतवत्यहम् ।

राज ! पहिले समयमें महातपस्वी ब्रह्मचारी और बुद्धिमान दधीच नामक मुनि थे, उनके तपसे इन्द्र सदा भय करते थे, परन्तु अनेक लोभ दिखलानेपर भी दधीचि मोहित नहीं होते थे। तब इन्द्रने सुन्दर रूपवती अलम्बुषा नामक अप्सराको उनका तप भङ्ग करनेके लिये भेजा। वह अप्सरा सरस्वतीमें देवतोंका तर्पण करते महात्मा दधीचिके पास पहुंची। उस सुन्दरीको देख महात्मा दधीचिका वीर्य सरस्वतीमें गिरा, सरस्वतीने प्रसन्न होकर पुत्र होनेके लिये उस वीर्यको धारण किया और कुछ समयमें उनके पुत्र हुआ। (५—१०)

तब सरस्वती उस पुत्रको लेकर दधीचिके पास गई और उस पुत्रको देकर ऋषियोंके बीचमें ऋषिश्रेष्ठ दधीचिसे बोली, हे ब्रह्मऋषे! जिस समय अलम्बुषा नामक अप्सराको देखकर तुम्हारा वीर्य गिरा था, तब तुम्हारा तेज नष्ट न हो यह विचारकर मैंने उस वीर्यको धारण कर लिया था, सो अब उत्तम पुत्र हुआ

न विनाशमिदं गच्छेत्त्वत्तेज इति निश्चयात् ॥ १४ ॥
प्रतिगृह्णीष्व पुत्रं स्वं मया दत्तमनिंदितम्।
इत्युक्तः प्रतिजग्राह प्रीतिं चावाप पुष्कलाम् ॥ १५ ॥
स्वसुतंचाप्यजिघ्रंतं मूर्ध्नि प्रेम्णा द्विजोत्तमः।
परिष्वज्य चिरं कालं तदा भरतसत्तम ॥ १६ ॥
सरस्वत्यै वरं प्रादात्प्रीयमाणो महामुनिः।
विश्वेदेवाः सपितरो गंधर्वाप्सरसां गणाः ॥ १७ ॥
तृप्तिं यास्यंति सुभगे तर्प्यमाणास्तवांभसा।
इत्युक्त्वा स तु तुष्टाव वचोभिर्वै महानदीम् ॥ १८ ॥
प्रीतः परमहृष्टात्मा यथावच्छृणु पार्थिव।
प्रसुतासि महाभागे सरसो ब्रह्मणः पुरा ॥ १९ ॥
जानंति त्वां सरिच्छ्रेष्ठे मुनयः संशितव्रताः।
मम प्रियकरी चापि सततं प्रियदर्शने ॥ २० ॥
तस्मात्सारस्वतः पुत्रो महांस्ते वरवर्णिनि।
तवैव नाम्ना प्रथितः पुत्रस्ते लोकभावनः ॥ २१ ॥
सारस्वत इति ख्यातो भविष्यति महातपाः।
एष द्वादशवार्षिक्यामनावृष्ट्यां द्विजर्षभान् ॥ २२ ॥
सारस्वतो महाभागे वेदानध्यापयिष्यति।
पुण्याभ्यश्च सरिद्भ्यस्त्वं सदा पुण्यतमा शुभे ॥२३ ॥

है। आप लीजिए हमने केवल तुम्हारी भक्ती ही से इसे धारण किया था। (११—१४)

सरस्वतीके वचन सुन दधीचि मुनि बहुत प्रसन्न हुए। फिर पुत्रको लेकर उसको कण्ठसे लगाया और उसका माथा सूंघा। फिर महामुनि दधीचिने सरस्वतीको यह वरदान दिया कि, हे सरस्वती! तुम्हारे जलमें तर्पण करनेसे विश्वेदेव, पितर अप्सरा और गधर्व तृप्त होंगे। हे राजन्! ऐसा कहकर दधीचि मुनि प्रसन्न होकर महानदी सरस्वती की इस प्रकार स्तुति करने लगे। (१५—१८)

हे महाभागे! तुम पहिले ब्रह्माके तलावसे निकली हो, महाव्रतधारी ब्राह्मण तुम्हें जानते हैं। हे प्रियदर्शने! तुमने हमारा बहुत प्रिय काम करा इसलिये तुम्हारे इस महातपस्वी लोक पूजित पुत्रका नाम सारस्वत मुनि होगा, ये

भविष्यसि महाभागे मत्प्रसादात्सरस्वति ।
एवं सा संस्तुताऽनेन वरं लब्ध्वा महानदी ॥ २४ ॥
पुत्रमादाय मुदिता जगाम भरतर्षभ ।
एतस्मिन्नेव काले तु विरोधे देवदानवैः ॥ २५ ॥
शक्रः प्रहरणान्वेषी लोकांस्त्रीन्विचचार ह ।
न चोपलेभे भगवान् शक्रः प्रहरणं तदा ॥ २६ ॥
यद्वै तेषां भवेद्योग्यं वधाय विबुधद्विषाम् ।
ततोऽब्रवीत्सुरान् शक्रो न मे शक्या महासुराः॥२७॥
ऋतेऽस्थिभिर्दधीचस्य निहन्तुं त्रिदशद्विषः ।
तस्माद्गत्वा ऋषिश्रेष्ठो याच्यतां सुरसत्तमाः ॥ २८ ॥
दधीचास्थीनि देहीति तैर्वधिष्यामहे रिपून् ।
स च तैर्याचितोऽस्थीनि यत्नादृषिवरस्तदा ॥ २९ ॥
प्राणत्यागं कुरुश्रेष्ठ चकारैवाविचारयन् ।
स लोकानक्षयान्प्राप्तो देवप्रियकरस्तदा ॥ ३० ॥
तस्यास्थिभिरथो शक्रः संप्रहृष्टमनास्तदा ।
कारयामास दिव्यानि नानाप्रहरणानि च ॥ ३१ ॥
गदावज्राणि चक्राणि गुरून् दण्डांश्च पुष्कलान् ।
स हि तीव्रेण तपसा सम्भृतः परमर्षिणा ॥ ३२ ॥

बारह वर्षके अकालमें ब्राह्मणोंको वेद पढावेंगे, तुम हमारी कृपासे सब नदियोंमें अत्यन्त श्रेष्ठ होजावोगी।(१९-२४)

हे राजन् ! ऋषीके ऐसे वचन सुन और वरदान पाकर सरस्वती उस पुत्रको लेकर अपने घर चली गई। उसी समय देवता और दानवोंका घोर युद्ध होने लगा। तब भगवान् इन्द्र राक्षसोंको मारने योग्य शस्त्र ढूंढनेको तीनों लोकोंमें घूमे, परन्तु कहीं न मिला; तब देवतोंसे बोले कि, दधीचि की हड्डी के विना हम दानवोंको नहीं मार सक्ते। इसलिये तुम दधीचि से जाकर उन की हड्डी मांगो। (२४-२८)

देवताने जाकर उनसे कहा, हे दधीचि ! तुम अपनी हड्डी हमको दो, हम इनसे दानवोंका नाश करेंगे। देवतोंके वचन सुन दधीचि मुनिने विना विचार अपना प्राण छोड दिया, और देवतोंका कल्याण करनेके लिये अक्षय लोकको चले गये, तब इन्द्रने प्रसन्न होकर दधीचिकी हड्डियोंसे अनेक गदा, वज्र,

प्रजापतिसुतेनाथ भृगुणा लोकभावनः।
अतिकायः स तेजस्वी लोकसारो विनिर्मितः ॥ ३३ ॥
जज्ञे शैलगुरुः प्रांशुर्महिम्ना प्रथितः प्रभुः।
नित्यमुद्विजते चास्य तेजसः पाकशासनः ॥ ३४ ॥
तेन वज्रेण भगवान् यन्त्रयुक्तेन भारत।
भृशन्क्रोधविसृष्टेन ब्रह्मतेजोद्भवेन च ॥ ३५ ॥
दैत्यदानववीराणां जघान नवतीर्नव।
अथ काले व्यतिक्रान्ते महत्यतिभयङ्करे ॥ ३६ ॥
अनावृष्टिरनुप्राप्ता राजन् द्वादशवार्षिकी।
तस्यां द्वादशवार्षिक्यामनावृष्ट्यां महर्षयः ॥ ३७ ॥
वृत्यर्थं प्राद्रवन् राजन् क्षुधार्ताः सर्वतो दिशम्।
दिग्भ्यस्तान् प्रद्रुतान् दृष्ट्वा मुनिः सारस्वतस्तदा ॥३८॥
गमनाय मतिं चक्रे तं प्रोवाच सरस्वती।
न गन्तव्यमितः पुत्र तवाहारमहं सदा ॥ ३९ ॥
दास्यामि मत्स्यप्रवरानुष्यतामिह भारत।
इत्युक्तस्तर्पयामास स पितॄन् देवतास्तथा ॥ ४० ॥
आहारमकरोन्नित्यं प्राणान्वेदांश्च धारयन्।
अथ तस्यामनावृष्ट्यामतीतायां महर्षयः ॥ ४१ ॥

चक्र, और भारी भारी दण्ड बनाये। महाऋषी प्रजापति पुत्र भृगुने बहुत तपस्या करके महा तेजस्वी दधीचिको लोकका सार लेकर बनाया था। ये पर्वतके समान भारी और ऊंचे थे, इन्द्र सदा उनके तेजसे डरते थे। हे राजन्! इन्द्रने उस ही ब्राह्मणके तेजसे उत्पन्न हुए वज्रको क्रोध और मन्तसे छोडकर आठ सौ दश दानवोंको मारा। जब वह भयानक काल बीत गया तब बारह वर्षका घोर अकाल पडा। (२९-३७)

हे महाराज! उस अकालमें बडे बडे ऋषी भूखसे व्याकुल होकर इधर उधर दौडने लगे। उनको भागते देख सारस्वत मुनिने भी भागनेकी इच्छा करी, तब उनसे सरस्वती बोली, हे पुत्र! तुम कहीं मत जाओ, हम तुम्हें खानेके लिये प्रतिदिन मछली देंगी, तुम उन्हें ही खाओ और यहीं रहो। सरस्वतीके वचन सुन सारस्वत मुनिने देवता और पितरोंका तर्पण किया और मछली खाकर वेद पढने लगे। उस घोर अनावृष्टिमें एक

अन्योन्यं परिपप्रच्छुः पुनः स्वाध्यायकारणात् ।
तेषां क्षुधापरीतानां नष्टा वेदाऽभिधावताम् ॥ ४२ ॥
सर्वेषामेव राजेन्द्र न कश्चित्प्रतिभानवान् ।
अथ कश्चिद्दृषिस्तेषां सारस्वतमुपेयिवान् ॥ ४३ ॥
कुर्वाणं संशितात्मानं स्वाध्यायमृषिसत्तमम् ।
स गत्वाऽचष्ट तेभ्यश्च सारस्वतमतिप्रभम् ॥ ४४ ॥
स्वाध्यायममरप्रख्यं कुर्वाणं विजने वने ।
ततः सर्वे समाजग्मुस्तत्र राजन्महर्षयः ॥ ४५ ॥
सारस्वतं मुनिश्रेष्ठमिदमूचुः समागताः ।
अस्मानध्यापयस्वेति तानुवाच ततो मुनिः ॥ ४६ ॥
शिष्यत्वमुपगच्छध्वं विधिवद्धि ममेत्युत ।
तत्राब्रुवन्मुनिगणा बालस्त्वमसि पुत्रक ॥ ४७ ॥
स तानाह न मे धर्मो नश्येदिति पुनर्मुनीन् ।
यो ह्यधर्मेण वै ब्रूयाद् गृह्णीयाद्योऽप्यधर्मतः ॥ ४८ ॥
हीयेतां तावुभौ क्षिप्रं स्यातां वा वैरिणावुभौ ।
न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ॥ ४९ ॥
ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ।

मुनि दूसरेसे खानेका पूछने लगे, भूखसे व्याकुल इधर उधर भागते मुनियोंके वेद भूल गये। (३८-४२)

हे राजेन्द्र! तब एक मुनिने निर्जन वनमें बैठे वेदपाठी महामुनि सारस्वत को देवतोंके समान देखा, तब उसने जाकर सब मुनियोंसे कह दिया। तब सब मुनि सारस्वतके पास आकर बोले, आप हम लोगोंको वेद पढाइये, उनके वचन सुन सारस्वत बोले, तुम सब विधिपूर्वक हमारे शिष्य बन जाओ। (४३-४६)

उनके वचन सुन मुनि बोले, हे पुत्र! तुम अभी बालक हो, हमें शिष्य कैसे करोगे? सारस्वत मुनि बोले, जो अधर्मसे कहे और जो अधर्मसे किसीको शिष्य करे, उन दोनोंका नाश होजाता है। हमारा धर्म नाश नहीं होगा प्राचीन मुनि अधिक अवस्था बूढे बाल, धन और बान्धवोंकी सहायतासे तप नहीं करते थे, अर्थात् ब्राह्मणोंमें अधिक अवस्था बूढे बाल, धन और बन्धुओंसे कोई बूढा नहीं कहाता, हम लोगोंमें जो अधिक विद्वान् होता है वही बडा कहा-

एतच्छ्रुत्वा वचस्तस्य मुनयस्ते विधानतः ॥ ५० ॥
तस्माद्वेदाननुप्राप्य पुनर्धर्मं प्रचक्रिरे ।
षष्टिर्मुनिसहस्राणि शिष्यत्वं प्रतिपेदिरे ॥ ५१ ॥
सारस्वतस्य विप्रर्षेर्वेदस्वाध्यायकारणात् ।
मुष्टिं मुष्टिं ततः सर्वे दर्भाणां ते ह्युपाहरन् ।
तस्यासनार्थं विप्रर्षेर्बालस्यापि वशे स्थिताः ॥ ५२ ॥
तत्रापि दत्वा वसु रौहिणेयो महाबलः केशवपूर्वजोऽथ ।
जगाम तीर्थं मुदितः क्रमेण ख्यातं महद् वृद्धकन्या स्म यत्र ॥५३॥ [३०४९]

इतिश्रीमहाभारते०शल्यपर्वांतर्गतगदापर्वणि बलदेव० सारस्वतो० एकपंचाशत्तमोऽध्यायः ॥ ५१ ॥

जनमेजय उवाच-कथं कुमारी भगवन्तपोयुक्ता ह्यभूत्पुरा ।
किमर्थं च तपस्तेपे को वाऽस्या नियमोऽभवत् ॥ १ ॥
सुदुष्करमिदं ब्रह्मंस्त्वत्तः श्रुतमनुत्तमम् ।
आख्याहि तत्त्वमखिलं यथा तपसि सा स्थिता ॥ २ ॥
वैशम्पायन उवाच-ऋषिरासीन्महावीर्यः कुणिर्गर्गो महायशाः ।
स तप्त्वा विपुलं राजंस्तपो वै तपतां वरः ॥ ३ ॥
मनसाऽथ सुतां सुभ्रूं समुत्पादितवान्विभुः ।
तां च दृष्ट्वा मुनिः प्रीतः कुणिर्गर्गो महायशाः ॥ ४ ॥

ता है। सारस्वत मुनिके ऐसे वचन सुन साठ सहस्र मुनि उनके शिष्य होगये और उनसे वेद पढकर धर्म करने लगे। साठ सहस्र ऋषी सारस्वतके आसनके लिये एक एक मुटी कुशा लाते थे और उस बालक ऋषीके वशमें रहते थे। महाबलवान् कृष्णके बडे भाई रोहिणीपुत्र बलदेवने वहां भी प्रसन्न होकर बहुत दान किया, फिर वहांसे वृद्ध कन्या नामक तीर्थको चले गये। (४७-५३)

शल्यपर्वमें एकानव अध्याय समाप्त। [३०४९]

शल्यपर्वमें बावन अध्याय।

जनमेजय बोले, हे ब्रह्मन्! उस स्थानमें रहकर कन्याने कैसे किसलिये और कौन कौन नियमोंसे तप किया था? हम ये सविस्तर कथा आपसे सुनना चाहते हैं अब आप हमसे यथार्थ वर्णन कीजिये। (१-२)

श्रीवैशम्पायन मुनि बोले हे राजन्! पहिले समयमें एक महातपस्वी महायशस्वी और महावीर्यवान कुणीगर्ग नामक मुनि हुए थे, उन्होंने घोर तप करके मनसे सुभ्रू नामक कन्या उत्पन्न करी, उसको देखकर मुनि बहुत प्रसन्न हुए

जगाम त्रिदिवं राजन्सन्त्यज्येह कलेवरम् ।
सुभ्रूः सा ह्यथ कल्याणी पुण्डरीकनिभेक्षणा ॥ ५ ॥
महता तपसाग्रेण कृत्वाऽऽश्रममनिंदिता ।
उपवासैः पूजयन्ती पितॄन्देवांश्च सा पुरा ॥ ६ ॥
तस्यास्तु तपसोग्रेण महान्कालोऽत्यगान्नृप ।
सा पित्रा दीयमानापि तत्र नैच्छदनिंदिता ॥ ७ ॥
आत्मनः सदृशं सा तु भर्तारं नान्वपश्यत ।
ततः सा तपसोग्रेण पीडयित्वाऽऽत्मनस्तनुम् ॥ ८ ॥
पितृदेवार्चनरता बभूव विजने वने ।
साऽऽत्मानं मन्यमानाऽपि कृतकृत्यं श्रमान्विता ॥ ९ ॥
वार्धकेन च राजेन्द्र तपसा चैव कर्शिता ।
सा नाशकद्यदा गन्तुं पदात्पदमपि स्वयम् ॥ १० ॥
चकार गमने बुद्धिं परलोकाय वै तदा ।
मोक्तुकामां तु तां दृष्ट्वा शरीरं नारदोऽब्रवीत् ॥ ११ ॥
असंस्कृतायाः कन्यायाः कुतो लोकास्तवानघे ।
एवं तु श्रुतमस्माभिर्देवलोके महाव्रते ॥ १२ ॥
तपः परमकं प्राप्तं न तु लोकास्त्वया जिताः ।
तन्नारदवचः श्रुत्वा साऽब्रवीदृषिसंसदि ॥ १३ ॥

और शरीर छोडकर स्वर्गको चले गये, कल्याणी कमल नयनी सुभ्रूभी आश्रम पर रहकर उपवास, नियम और घोर तप करके देवता और पितरोंकी पूजा करने लगी। (३-६)

अनन्तर घोर तप करके उस कन्याने बहुत समय बिता दिया, यद्यपि उसके पिताने उसका विवाह न करना चाहा, परन्तु उसने अपने समान पति न पानेके कारण विवाह न किया और अपने शरीरको घोर तपसे सुखाने लगी। हे राजन्! कुछ दिन तप करते करते वह कन्या बूढी होगई तब उसने उस तपके बलसे अपनेको कृतार्थ माना। जब वह एक चरण भी चलनेमें समर्थ न रही, तब उसने परलोकमें जानेकी इच्छा करी। (७-११)

उसको शरीर छोडते देख नारद मुनि बोले, कि हमने महाव्रतधारियोंसे देव लोकमें सुना है कि विना विवाही कन्याको स्वर्ग नहीं मिलता। यद्यपि तुमने बहुत तपस्या करी, परन्तु किसी

तपसोऽर्धं प्रयच्छामि पाणिग्राहस्य सत्तम।
इत्युक्ते चास्या जग्राह पाणिं गालवसंभवः ॥ १४ ॥
ऋषिः प्राक् श्रृंगवान्नाम समयं चेममब्रवीत्।
समयेन तवाद्याहं पाणिं स्प्रक्ष्यामि शोभने ॥ १५ ॥
यद्येकरात्रं वस्तव्यं त्वया सह मयेति ह।
तथेति सा प्रतिश्रुत्य तस्मै पाणिं ददौ तदा ॥ १६ ॥
यथा दृष्टेन विधिना हुत्वा चाग्निं विधानतः।
चक्रे च पाणिग्रहणं तस्योद्वाहं च गालविः ॥ १७ ॥
सा रात्रावभवद्राजंस्तरुणी वरवर्णिनी।
दिव्याभरणवस्त्रा च दिव्यगंधानुलेपना ॥ १८ ॥
तां दृष्ट्वा गालविः प्रीतो दीपयंतीमिव श्रिया।
उवास च क्षपामेकां प्रभाते साऽब्रवीच्च तम् ॥ १९ ॥
यस्त्वया समयो विप्र कृतो मे तपतां वर।
तेनोषिताऽस्मि भद्रं ते स्वस्ति तेऽस्तु व्रजाम्यहम्॥२०॥
सा निर्गता ब्रवीद्भूयोऽस्मिंस्तीर्थे समाहितः।
वसते रजनीमेकां तर्पयित्वा दिवौकसः ॥ २१ ॥
चत्वारिंशतमष्टौ च द्वौ चाष्टौ सम्यगाचरेत्।

लोकमें जाने योग्य नहीं हुई। (११-१२)

नारदके वचन सुन कन्या बोली कि जो मुझसे व्याह करे उसको मैं अपना आधा तप दे दूंगी। कन्याके वचन सुन गालवके पुत्र श्टङ्गवान् मुनि बोले, हे सुन्दरी! हम तुमसे विवाह करते हैं, और एक नियम कर लेते हैं कि एक ही रात्रि तुम्हारे सङ्ग रहेंगे, उस कन्याने यही स्वीकार करके विधिपूर्वक अग्निमें आहुति देके व्याह कर लिया, उस रात्रिको सुभ्रू बडी सुन्दरी युवती होगई दिव्य वस्त्र और दिव्य गन्ध धारण करके अपने पतिके पास गई। उसको घरमें चान्दना करते हुये देख श्टङ्गवान् बडे प्रसन्न हुये और रात भर उसके सङ्ग रहे। (१२—१९)

प्रातःकाल सुभ्रू अपने पतिसे बोली, हे ब्राह्मण! हमने जो तुमसे प्रतिज्ञा करी थी, सो पूरी हुई, अब हम जाती है तुम्हारा कल्याण हो। हे राजन्! ऐसा कहकर वह सुभ्रू वहांसे चली गई और चलती चलती कहने लगी, जो मनुष्य एक रात्रि रहकर इस स्थानमें देवतोंकी पूजा करेगा उसे अठावन वर्ष ब्रह्मचर्य

यो ब्रह्मचर्यं वर्षाणि फलं तस्य लभेत सः ॥ २२ ॥
एवमुक्त्वा ततः साध्वी देहं त्यक्त्वा दिवं गता ।
ऋषिरप्यभवद्दीनस्तस्या रूपं विचिन्तयन् ॥ २३ ॥
समयेन तपोऽर्धं च कृच्छ्रात्प्रतिगृहीतवान् ।
साधयित्वा तदात्मानं तस्याः स गतिमन्वियात ॥२४॥
दुःखितो भरतश्रेष्ठ तस्या रूपबलात्कृतः ।
एतत्ते वृद्धकन्याया व्याख्यातं चरितं महत ॥ २५ ॥
तथैव ब्रह्मचर्यं च स्वर्गस्य च गतिः शुभा ।
तत्रस्थश्चापि शुश्राव हतं शल्यं हलायुधः ॥ २६ ॥
तत्रापि दत्वा दानानि द्विजातिभ्यः परंतपः ।
शुश्राव शल्यं संग्रामे निहतं पांडवैस्तदा ॥ २७ ॥
समंतपंचकद्वारात्ततो निष्क्रम्य माधवः ।
पप्रच्छर्षिगणान् रामः कुरुक्षेत्रस्य यत्फलम् ॥ २८ ॥
ते पृष्टा यदुसिंहेन कुरुक्षेत्रफलं विभो ।
समाचख्युर्महात्मानस्तस्मै सर्वं यथातथम् ॥ २९ ॥ [३०७८]

इतिश्रीमहाभारते० शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थ० सारस्वतो० द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥

ऋषय ऊचुः– प्रजापतेरुत्तरवेदिरुच्यते सनातनं राम समन्तपंचकम् ।

करनेका फल मिलेगा, ऐसा कहकर पतिव्रता सुभ्रू स्वर्गको चली गई।१९-२३

उसके मरनेसे श्टङ्गवान् ऋषी भी उसके रूपके शोचमें व्याकुल होगये और प्रतिज्ञाके अनुसार उसका आधा तप बहुत दुःखसे ग्रहण किया, फिर तप करके शरीर छोडके उसीके पास चले गये, जीवन भर उसके रूपका स्मरण करके दुःख भोगते रहे।(२३-२५)

हे राजन् ! हमने तुमसे वृद्ध कन्या की कथा ब्रह्मचर्य और स्वर्ग जानेका वर्णन करी, वहां भी हलधारी बलरामने ब्राह्मणोंको अनेक दान किये, वहीं उन्होंने सुना कि पाण्डवोंने महावीर शल्यको मार दिया। तब यहांसे चलकर समन्त पञ्चक नामक तीर्थके द्वारपर आये और ऋषियोंसे कुरुक्षेत्रका फल पूंछने लगे। यदुकुलसिंह शत्रुनाशन बलरामका प्रश्न सुन मुनि लोग कुरुक्षेत्रका यथार्थ फल कहने लगे। (२६—२९) [३०७८]

शल्यपर्वमें बावन अध्याय समाप्त !

शल्यपर्वमें त्रेपन अध्याय।

ऋषी बोले, हे राम ! यह सनातन समन्तपञ्चक तीर्थ ब्रह्माकी उत्तरवेदी

समीजिरे यत्र पुरा दिवौकसो वरेण सत्रेण महावरप्रदाः ॥ १ ॥
पुरा च राजर्षिवरेण धीमता बहूनि वर्षाण्यमितेन तेजसा।
प्रकृष्टमेतत्कुरुणा महात्मना ततः कुरुक्षेत्रमितीह पप्रथे ॥ २ ॥
राम उवाच—किमर्थं कुरुणा कृष्टं क्षेत्रमेतन्महात्मना।
एतदिच्छाम्यहं श्रोतुं कथ्यमानं तपोधनाः ॥ ३ ॥
ऋषय ऊचुः- पुरा किल कुरुं राम कर्षन्तं सततोत्थितम्।
अभ्येत्य शक्रस्त्रिदिवात्पर्यपृच्छत कारणम् ॥ ४ ॥
इंद्र उवाच— किमिदं वर्तते राजन्प्रयत्नेन परेण च।
राजर्षे किमभिप्रेत्य येनेयं कृष्यते क्षितिः ॥ ५ ॥
कुरुरुवाच— इह ये पुरुषाः क्षेत्रे मरिष्यन्ति शतक्रतो।
ते गमिष्यन्ति सुकृताँल्लोकान्पापविवर्जितान् ॥ ६ ॥
अवहस्य ततः शक्रो जगाम त्रिदिवं पुनः।
राजर्षिरप्यनिर्विण्णः कर्षत्येव वसुन्धराम् ॥ ७ ॥
आगम्यागम्य चैवैनं भूयो भूयोऽवहस्य च।
शतक्रतुरनिर्विण्णं पृष्ट्वा पृष्ट्वा जगाम ह ॥ ८ ॥
यदा तु तपसोग्रेण चकर्ष वसुधां नृपः।

कहा जाता है, यहीं उत्तम वर देनेवाले देवतोंने अनेक यज्ञ करीं थीं पहिले समयमें महातेजस्वी राजऋषी बुद्धिमान महात्मा कुरुने अनेक वर्षतक इसमें निवास किया था और इस पृथ्वीको जोता था इसलिये इसका नाम कुरुक्षेत्र हुआ। (१—२)

बलराम बोले, हे महर्षियों! महात्मा कुरुने इस पृथ्वीको क्यों जोता था? यह कथा हम आप लोगोंसे सुनना चाहते हैं। ऋषी बोले, हे राम! पहिले समयमें कुरुको प्रतिदिन यह पृथ्वी जोतते देख इन्द्र स्वर्गसे आये और पूंछने लगे। (३—४)

इन्द्र बोले, हे राजर्षी! आप प्रतिदिन अत्यन्त यत्न करके इस पृथ्वीको क्यों जोतते हैं? कुरु बोले, हे इन्द्र! हमारी यह इच्छा है कि जो मनुष्य यहां मरेंगे, वह स्वर्गको जावेंगे, इन्द्र उनके वचन सुन बहुत हंसे और स्वर्गको चले गये। राजा कुरु भी उसी प्रकार पृथ्वी जोतते रहे। (५—६)

इस प्रकार अनेक बार इन्द्र आये और पूंछकर हंस हंसकर स्वर्गको चले गये, जब इसी प्रकार तप इन्द्रने करते करते कुरुको बहुत दिन होगये, तब

ततः शक्रोऽब्रवीद्देवान् राजर्षेर्यच्चिकीर्षितम् ॥ ९ ॥
एतच्छ्रुत्वाऽब्रुवन् देवाः सहस्राक्षमिदं वचः।
वरेण च्छंद्यतां शक्र राजर्षिर्यदि शक्यते ॥ १० ॥
यदि ह्यत्र प्रमीता वै स्वर्गं गच्छन्ति मानवाः।
अस्मानविष्ट्वा क्रतुभिर्भागो नो न भविष्यति ॥ ११ ॥
आगम्य च ततः शक्रस्तदा राजर्षिमब्रवीत्।
अलं खेदेन भवतः क्रियतां वचनं मम ॥ १२ ॥
मानवा ये निराहारा देहं त्यक्ष्यन्त्यतन्द्रिताः।
युधि वा निहताः सम्यगपि तिर्यग्गता नृप ॥ १३ ॥
ते स्वर्गभाजो राजेन्द्र भविष्यन्ति महामते।
तथाऽस्त्विति ततो राजा कुरुः शक्रमुवाच ह ॥ १४ ॥
ततस्तमभ्यनुज्ञाप्य प्रहृष्टेनान्तरात्मना।
जगाम त्रिदिवं भूयः क्षिप्रं बलनिषूदनः ॥ १५ ॥
एवमेतद्यदुश्रेष्ठ कृष्टं राजर्षिणा पुरा।
शक्रेण चाभ्यनुज्ञातं ब्रह्माद्यैश्च सुरैस्तथा ॥ १६ ॥
नातः परतरं पुण्यं भूमेः स्थानं भविष्यति।
इह तप्स्यन्ति ये केचित्तपः परमकं नराः ॥ १७ ॥

इन्द्रने देवतोंको बुलाकर कुरुकी यह इच्छा कह सुनाई। (८-९)

इन्द्रके वचन सुन देवता बोले, यदि यही उचित हो तो राजऋषि कुरुको वरदान दीजिये, परन्तु कठिनता यही है कि यदि कुरुक्षेत्रमें मरे सब मनुष्य स्वर्गको चले आवेंगे तो हमें यज्ञमें भाग नहीं मिलेगा। (१०—११)

देवतोंके वचन सुन इन्द्र राजऋषि कुरुके पास आकर बोले, आप वृथा परिश्रम कर रहे हैं। हमारे वचन सुनिये, जो पशु वा मनुष्य इस स्थानमें भोजन छोडकर और सावधान होकर मरेगा, अथवा युद्धमें मरेगा, वह स्वर्गको जायगा। इन्द्रके वचन सुन कुरुने कहा बहुत अच्छा, फिर कुरुकी आज्ञा लेकर इन्द्र प्रसन्न हो कर स्वर्ग को चले गये। (१२—१५)

हे यदुकुलश्रेष्ठ! इस प्रकार पहिले समयमें राजऋषि कुरुने इस तीर्थको स्थापन किया था, इन्द्र और ब्रह्मादिक देवतोंने इस प्रकार इसे वरदान दिया था, जगत्में इस स्थानके समान पवित्र स्थान और नहीं है, जो मनुष्य यहां

देहत्यागेन ते सर्वे यास्यन्ति ब्रह्मणः क्षयम् ।
ये पुनः पुण्यभाजो वै दानं दास्यंति मानवाः ॥ १८ ॥
तेषां सहस्रगुणितं भविष्यत्यचिरेण वै ।
ये चेह नित्यं मनुजा निवत्स्यन्ति शुभैषिणः ॥ १९ ॥
यमस्य विषयं ते तु न द्रक्ष्यंति कदाचन ।
यक्ष्यंति ये च क्रतुभिर्महद्भिर्मनुजेश्वराः ॥ २० ॥
तेषां त्रिविष्टपे वासो यावद्भूमिर्धरिष्यति ।
अपि चात्र स्वयं शक्रो जगौ गाथां सुराधिपः ॥ २१ ॥
कुरुक्षेत्रनिबद्धां वै तां शृणुष्व हलायुध ।
पांसवोऽपि कुरुक्षेत्राद्वायुना समुदीरिताः ।
अपि दुष्कृतकर्माणं नयन्ति परमां गतिम् ॥ २२ ॥
सुरर्षभा ब्राह्मणसत्तमाश्च तथा नृगाद्या नरदेवमुख्याः ।
इष्ट्वा महार्हैः क्रतुभिर्नृसिंह सन्त्यज्य देहान् सुगतिं प्रपन्नाः ॥२३॥
तरंतुकारंतुकयोर्यदन्तरं रामह्रदानां च मचक्रुकस्य च ।
एतत्कुरुक्षेत्र समन्तपञ्चकं प्रजापतेरुत्तरवेदिरुच्यते ॥२४॥
शिवं महापुण्यमिदं दिवौकसां सुसम्मतं सर्वगुणैः समन्वितम् ।
अतश्च सर्वे निहता नृपा रणे यास्यन्ति पुण्यां गतिमक्षयां सदा॥२५॥

घोर तप करते हैं, वह मरनेके पश्चात् ब्रह्म लोकको जाते हैं, जो यहां दान देते हैं उनका वह दान शीघ्र ही सहस्र गुण होजाता है, जो कल्याण चाहनेवाले मनुष्य सदा यहां निवास करते हैं वे कदापि यमराजकी पुरी नहीं देखते, जो राजा यहां उत्तम यज्ञ करते हैं वे पृथ्वी रहने तक स्वर्गमें रहते हैं। (१९-२०)

हे हलायुध ! देवराज इन्द्रने इस तीर्थके विषयमें जो कुछ कहा है सो सुनो, कुरुक्षेत्रकी धूलि वायुसे उडकर जिस मनुष्यके ऊपर गिरजाती है वह महापापी हो तौ भी परम गतिको प्राप्त होता है। (२१—२२)

हे पुरुषसिंह ! इस स्थानमें यज्ञ करनेसे अनेक देवता ब्राह्मण और नृग आदि राजा शरीर छोडकर स्वर्गको चले गये। (२३)

तरन्तुक, अरन्तुक, रामह्रद और मचक्रुक इन तीर्थके बीचकी भूमिका नाम कुरुक्षेत्र, समन्तपञ्चक और ब्रह्मा की उत्तर वेदी है, यह सब गुणोंसे भरा देवतोंसे सेवित और कल्याणदायक तीर्थ है, इसलिये तीर्थमें मरे राजा सब स्वर्ग-

इत्युवाच स्वयं शक्रः सहब्रह्मादिभिस्तथा ।
तच्चानुमोदितं सर्वं ब्रह्मविष्णुमहेश्वरैः ॥ २६ ॥ [३१०४]

इतिश्री महा० शल्यपर्वणि० गदाप०बलदेवतीर्थ० सारस्वतो० कुरुक्षेत्रकथने त्रिपञ्चाशत्तमोऽध्यायः॥५३॥

वैशम्पायन उवाच-कुरुक्षेत्रं ततो दृष्ट्वा दत्वा दायांश्च सात्वतः ।
आश्रमं सुमहद्दिव्यमगमज्जनमेजय ॥ १ ॥
मधूकाम्रवणोपेतं प्लक्षन्यग्रोधसंकुलम् ।
चिरबिल्वयुतं पुण्यं पनसार्जुनसंकुलम् ॥ २ ॥
तं दृष्ट्वा यादवश्रेष्ठः प्रवरं पुण्यलक्षणम् ।
पप्रच्छ तानृषीन्सर्वान्कस्याश्रमवरस्त्वयम् ॥ ३ ॥
ते तु सर्वे महात्मानमूचू राजन् हलायुधम् ।
शृणु विस्तरशो राम यस्यायं पूर्वमाश्रमः ॥ ४ ॥
अत्र विष्णुः पुरा देवस्तप्तवांस्तप उत्तमम् ।
अत्रास्य विधिवद्यज्ञाः सर्वे वृत्ताः सनातनाः ॥ ५ ॥
अत्रैव ब्राह्मणी सिद्धा कौमारब्रह्मचारिणी ।
योगयुक्ता दिवं याता तपःसिद्धा तपस्विनी ॥ ६ ॥
बभूव श्रीमती राजन् शांडिल्यस्य महात्मनः ।
सुता धृतव्रता साध्वी नियता ब्रह्मचारिणी ॥ ७ ॥

को जायंगे, इन्द्र और ब्रह्मादिक देवतोंने यही कहा था और ब्रह्मा, विष्णु तथा शिवने इसकी बडी प्रशंसा करी थी। (२४-२६) [३१०४]

शल्यपर्वमें तिरपन अध्याय समाप्त ।

शल्यपर्वमें चौवन अध्याय।

श्रीवैशम्पायन मुनि बोले, हे राजा जनमेजय ! कुरुक्षेत्रमें जाकर बलरामने बहुत दान दिये; वहांसे महुवे, आम, पाकर, बडगद, करञ्जवा, कटहल और इन्द्रजवके वृक्षोंसे पूरित पवित्र आश्रमकी ओर चले गये। वहां जाकर मुनियोंसे पूंछा कि यह पवित्र उत्तम लक्षणोंसे भरा श्रेष्ठ आश्रम किसका है ! (१-३)

ऋषी बोले, हे राम ! यह जिसका आश्रम है उसकी कथा विस्तारसे सुनो। यहांपर पहिले देवश्रेष्ठ विष्णुने घोर तप किया था, यहीं उन्होंने अनेक सनातन यज्ञ समाप्त किये थे, यहींसे बाल ब्रह्मचारिणी ब्राह्मणी नामक तपस्विनी योग और तप करके सिद्ध होकर स्वर्गको गई थी। (४—५)

हे राजन् ! महात्मा शाण्डिल्य मुनिकी पुत्री पतिव्रता ब्रह्मचारिणीने ऐसा

सा तु तप्त्वा तपो घोरं दुश्चरं स्त्रीजनेन ह ।
गता स्वर्गं महाभागा देवब्राह्मणपूजिता ॥ ८ ॥
श्रुत्वा ऋषीणां वचनमाश्रमं तं जगाम ह ।
ऋषींस्तानभिवाद्याथ पार्श्वे हिमवतोऽच्युतः ॥ ९ ॥
संध्याकार्याणि सर्वाणि निर्वर्त्यारुरुहेऽचलम् ।
नातिदूरं ततो गत्वा नगं तालध्वजो बली ॥ १० ॥
पुण्यं तीर्थवरं दृष्ट्वा विस्मयं परमं गतः ।
प्रभावं च सरस्वत्याः प्लक्षप्रस्रवणं बलः ॥ ११ ॥
संप्राप्तः कारपवनं प्रवरं तीर्थमुत्तमम् ।
हलायुधस्तत्र चापि दत्त्वा दानं महाबलः ॥ १२ ॥
आप्लुतः सलिले पुण्ये सुशीते विमले शुचौ ।
सन्तर्पयामास पितॄन् देवांश्च रणदुर्मदः ॥ १३ ॥
तत्रोष्यैकां तु रजनीं यतिभिर्ब्राह्मणैः सह ।
मित्रावरुणयोः पुण्यं जगामाश्रममच्युतः ॥ १४ ॥
इंद्रोऽग्निरर्यमा चैव यत्र प्राक् प्रीतिमाप्नुवन् ।
तं देशं कारपवनाद्यमुनायां जगाम ह ॥ १५ ॥
स्नात्वा तत्र च धर्मात्मा परां प्रीतिमवाप्य च ।

घोर तप किया, जो स्त्रियोंसे नहीं हो सक्ता। अन्तको वह महाभाग्यवती ब्राह्मणी देवता और ब्राह्मणोंसे पूजित होकर स्वर्गको चली गई। हे राजन् ! ऋषिवचन सुन बलदेव हिमाचलपर उस आश्रमका दर्शन करनेको गये और ऋषियोंको प्रणाम किया। (७-९)

अनन्तर वहीं सन्ध्यावन्दन करके ताडकी ध्वजावाले बलराम थोडी दूरतक पर्वतके ऊपर चढे, वहां उस आश्रमको देखकर बहुत आश्चर्य करने लगे। वहां सरस्वतीके प्रभावसे एक पोकरके वृक्षमें से जल निकलते देखा, वहांसे उत्तम तीर्थ करके वनको चले गये, वहां अनेक प्रकार दान किये, और पवित्र निर्मल ठण्डे जलमें स्नान करके देवता और पितरोंका तर्पण किया। (१०-१३)

महाबलवान महायोद्धा बलरामने वहां ब्राह्मणों और सन्यासियोंके सहित एक रात्रिरहकर मित्रवरुणाश्रमको यात्रा करी। हे राजन् ! इस ही तीर्थमें पहिले इन्द्र, अग्नि, और अर्यमा प्रसन्न हुये थे, वहांसे यमुनाकी ओर चले गये। महाबलवान बलदेवजीने वहां जाकर ऋषी

ऋषिभिश्चैव सिद्धैश्च सहितो वै महाबलः ॥ १६ ॥
उपविष्टः कथाः शुभ्राः शुश्राव यदुपुंगवः ।
तथा तु तिष्ठतां तेषां नारदो भगवानृषिः ॥ १७ ॥
आजगामाथ तं देशं यत्र रामो व्यवस्थितः ।
जटामण्डलसंवीतः स्वर्णचीरो महातपाः ॥ १८ ॥
हेमदण्डधरो राजन् कमण्डलुधरस्तथा ।
कच्छपीं सुखशब्दां तां गृह्य वीणां मनोरमाम् ॥१९॥
नृत्ये गीते च कुशलो देवब्राह्मणपूजितः ।
प्रकर्ता कलहानां च नित्यं च कलहप्रियः ॥ २० ॥
तं देशमगमद्यत्र श्रीमान् रामो व्यवस्थितः ।
प्रत्युत्थाय च तं सम्यक् पूजयित्वा यतव्रतम् ॥ २१ ॥
देवर्षिं पर्यपृच्छत्स यथावृत्तं कुरून्प्रति ।
ततोऽस्याकथयद्राजन् नारदः सर्वधर्मवित् ॥ २२ ॥
सर्वमेतद्यथा वृत्तमतीव कुरुसंक्षयम् ।
ततोऽब्रवीद्रौहिणेयो नारदं दीनया गिरा ॥ २३ ॥
किमवस्थं तु तत् क्षत्रं ये तु तत्राभवन्नृपाः ।
श्रुतमेतन्मया पूर्वं सर्वमेव तपोधन ॥ २४ ॥
विस्तरश्रवणे जातं कौतूहलमतीव मे ।

और सिद्धोंके सहित स्नान किया, और बहुत प्रसन्न हुए, और वहां बैठकर ऋषियोंसे उत्तम उत्तम कथा सुनने लगे, उसी समय सोनेके समान वस्त्र पहिने, सोनेका दण्डा हाथमें किये, कमण्डलु धारण किये, मोटे शब्दवाली, मनोहर वीना बजाते नाचते और गानेमें निपुण, देवता और ब्राह्मणोंसे पूजित, सदा लडाई करानेवाले,लडाईके प्यारे भगवान् नारदऋषी आये, उनको देखकर श्रीमान् बलदेव खडे होगये और नियमके अनुसार पूजा करके महाव्रतधारी ब्रह्मऋषी नारदसे कौरवोंका समाचार पूछने लगे। (१४-२२)

बलराम बोले, हे तपोधन! यद्यपि मैंने यह सब समाचार सुना है, तौ भी विस्तारसे सुनना चाहता हूं। मैं आपसे दीन वाणीसे पूंछता हूं, कि कुरुक्षेत्रमें जो क्षत्रिय और राजा इकट्ठे हुए थे उनकी क्या दशा है? हे राजन्! रोहिणीपुत्रके वचन सुन सब धर्म जाननेवाले नारदने कुरुकुल नाशक इस प्रकार

नारद उवाच— पूर्वमेव हतो भीष्मो द्रोणः सिंधुपतिस्तथा ॥ २५ ॥
हतो वैकर्तनः कर्णः पुत्राश्चास्य महारथाः।
भूरिश्रवा रौहिणेय मद्रराजश्च वीर्यवान् ॥ २६ ॥
एते चान्ये च बहवस्तत्र तत्र महाबलाः।
प्रियान्प्राणान्परित्यज्य जयार्थं कौरवस्य वै ॥ २७ ॥
राजानो राजपुत्राश्च समरेष्वनिवर्तिनः।
अहतांस्तु महाबाहो शृणु मे तत्र माधव ॥ २८ ॥
धार्त्तराष्ट्रबले शेषास्त्रयः समितिमर्दनाः।
कृपश्च कृतवर्मा च द्रोणपुत्रश्च वीर्यवान् ॥ २९ ॥
तेऽपि वै विद्रुता राम दिशो दश भयात्तदा।
दुर्योधनो हते शल्ये विद्रुतेषु कृपादिषु ॥ ३० ॥
ह्रदं द्वैपायनं नाम विवेश भृशदुःखितः।
शयानं धार्त्तराष्ट्रं तु सलिले स्तम्भिते तदा ॥ ३१ ॥
पाण्डवाः सह कृष्णेन वाग्भिरुग्राभिरार्दयन्।
स तुद्यमानो बलवान्वाग्भी राम समन्ततः ॥ ३२ ॥
उत्थितः स ह्रदाद्वीरः प्रगृह्य महतीं गदाम्।
स चाप्युपगतो योद्धुं भीमेन सह साम्प्रतम् ॥ ३३ ॥
भविष्यति तयोरद्य युद्धं राम सुदारुणम्।

वर्णन करना आरम्भ किया।(२३-२५)

नारद बोले, हे रोहिणीपुत्र! भीष्म, द्रोणाचार्य, जयद्रथ, महारथ पुत्रोंके सहित कर्ण, भूरिश्रवा, और महापराक्रमी मद्रराज शल्य, आदि अनेक राजा और राजपुत्र अपने प्यारे प्राणोंको छोडकर स्वर्गको चले गये, उन सब युद्धसे न हटनेवाले वीरोंने दुर्योधनकी विजयके लिये प्राण दिये। अब दुर्योधनकी ओरके वीरोंमेंसे केवल शत्रुनाशन कृपाचार्य, कृतवर्मा, और वीर अश्वत्थामा यही तीन जीते बचे हैं, ये भी पाण्डवोंके डरसे इधर उधर भागे फिरते हैं।(२६-३०)

शल्यके मरने और कृपाचार्य आदि वीरोंके भागनेपर राजा दुर्योधन दुःखसे व्याकुल होकर द्वैपायन नामक तालावमें घुस गये, उस स्तम्भन किये हुए जलमें दुर्योधनको सोते सुन श्रीकृष्णके सहित पाण्डव आये, और चारों ओरसे वचन रूपी कोडे मारने लगे। (३०-३२)

तब महावीर दुर्योधन भी भारी गदा लेकर पानीसे निकले और अब भीमसे

यदि कौतूहलं तेऽस्ति व्रज माधव मा चिरम् ॥ ३४ ॥
पश्य युद्धं महाघोरं शिष्ययोर्यदि मन्यसे ।
वैशम्पायन उवाच-नारदस्य वचः श्रुत्वा तानभ्यर्च्य द्विजर्षभान् ॥ ३५ ॥
सर्वान्विसर्जयामास ये तेनाभ्यागताः सह ।
गम्यतां द्वारकां चेति सोन्वशादनुयायिनः ॥ ३६ ॥
सोऽवतीर्याचलश्रेष्ठात्प्लक्षप्रस्रवणाच्छुभात् ।
ततः प्रीतमना रामः श्रुत्वा तीर्थफलं महत् ।
विप्राणां सन्निधौ श्लोकमगायदिममच्युतः ॥ ३७ ॥
सरस्वतीवाससमा कुतो रतिः सरस्वतीवाससमाः कुतो गुणाः ।
सरस्वतीं प्राप्य दिवं गता जनाः सदा स्मरिष्यंति नदीं सरस्वतीम् ॥३८॥
सरस्वती सर्वनदीषु पुण्या सरस्वती लोकशुभावहा सदा ।
सरस्वतीं प्राप्य जनाः सुदुष्कृतं सदा न शोचन्ति परत्र चेह च॥ ३९ ॥
ततो मुहुर्मुहुः प्रीत्या प्रेक्षमाणः सरस्वतीम् ।
हयैर्युक्तं रथं शुभ्रमातिष्ठत परन्तपः ॥ ४० ॥
स शीघ्रगामिना तेन रथेन यदुपुङ्गवः ।
दिदृक्षुरभिसंप्राप्तः शिष्ययुद्धमुपस्थितम् ॥ ४१ ॥ [३१४५]

इति श्रीमहाभारते० शल्यपर्वांतर्गतगदा० बलदेवतीर्थयात्रायां सारस्वतोपाख्याने चतुष्पञ्चाशत्तमोऽध्यायः ५४

घोर युद्ध करेंगे, यदि शिष्योंका घोर युद्ध देखनेकी आपको इच्छा हो तो शीघ्र जाइये क्यों कि यह भयानक युद्ध अभी होने वाला है। (३३—३५)

श्रीवैशम्पायन मुनि बोले, नारदके ऐसे वचन सुन बलदेवने ब्राह्मणोंको पूजा करके विदा किया, और अपने सङ्गियोंसे कहा कि तुम सब द्वारिकाको जावो। अनन्तर बार बार सरस्वतीको देखते हुए प्लक्षप्रस्रवणसे चलकर पर्वतसे उतरे और प्रसन्न होकर ब्राह्मणोंके आगे नीचे लिखे अर्थका पद्य गाने लगे। (३५-३७)

सरस्वतीनदीके तटपर निवास करनेके समान सुख कहां होसकता है और सरस्वतीनदीके गुणोंके समान भी गुण कहां हैं? सरस्वतीनदीको प्राप्त होकर जन स्वर्गको प्राप्त होते हैं, और वे सदा सरस्वतीनदीका स्मरण करते हैं। सरस्वती सब नदियोंमें पुण्यकारण है, सरस्वती सब लोगोंका सुख बढानेवाली है। सरस्वती नदीको प्राप्त होकर सब लोग अपने पापोंके भोगोंसे छुटकारा पाते हैं। (३८-३९)

वैशम्पायन उवाच-एवं तदभवद्युद्धं तुमुलं जनमेजय।
यत्र दुःखान्वितो राजा धृतराष्ट्रोऽब्रवीदिदम् ॥ १ ॥
धृतराष्ट्र उवाच—रामं संनिहितं दृष्ट्वा गदायुद्ध उपस्थिते।
मम पुत्रः कथं भीमं प्रत्ययुध्यत सञ्जय ॥ २ ॥
सञ्जय उवाच— रामसान्निध्यमासाद्य पुत्रो दुर्योधनस्तव।
युद्धकामो महाबाहुः समहृष्यत वीर्यवान् ॥ ३ ॥
दृष्ट्वा लाङ्गलिनं राजा प्रत्युत्थाय च भारत।
प्रीत्या परमया युक्तः समभ्यर्च्य यथाविधि ॥ ४ ॥
आसनं च ददौ तस्मै पर्यपृच्छदनामयम्।
ततो युधिष्ठिरं रामो वाक्यमेतदुवाच ह ॥ ५ ॥
मधुरं धर्मसंयुक्तं शूराणां हितमेव च।
मया श्रुतं कथयतामृषीणां राजसत्तम ॥ ६ ॥
कुरुक्षेत्रं परं पुण्यं पावनं स्वर्ग्यमेव च।
दैवतैर्ऋषिभिर्जुष्टं ब्राह्मणैश्च महात्मभिः ॥ ७ ॥
तत्र वै योत्स्यमाना ये देहं त्यक्षन्ति मानवाः।

अनन्तर यदुकुलश्रेष्ठ शत्रुनाशन बलराम शीघ्र चलनेवाले, सफेद घोडोंके रथपर चढकर शिष्योंका युद्ध देखनेको चले। (४०-४१) [३१४५]

शल्यपर्वमें चौपन अध्याय समाप्त।

शल्यपर्वमें पचपन अध्याय।

श्रीवैशम्पायन मुनि बोले, हे राजन् जनमेजय इस प्रकार यह घोर युद्ध होना आरम्भ हुवा तब राजा धृतराष्ट्रने दुःखमें भरकर सञ्जयसे पूछा। (१)

धृतराष्ट्र बोले, हे सञ्जय! जब बलराम युद्धमें पहुंच गये, तब हमारे पुत्र दुर्योधनने भीमसेनके सङ्ग कैसे युद्ध किया? सजय बोले, हे महाराज! बलदेवको अपने पास आया देख तुम्हारे पुत्र महाबलवान महाबाहु दुर्योधन बहुत प्रसन्न हुए। (२-३)

महाराज युधिष्ठिर भी हलधारी बलरामको देख प्रसन्नता सहित खडे हुये, और विधिपूर्वक उनकी पूजा करके आसन दिया, तथा कुशल पुछी। अनन्तर बलराम मीठे धर्मयुक्त और सब वीरोंके कल्याणसे भरे, वचन बोले, हे राजोंमें श्रेष्ठ! हमने ऋषियोंसे सुना है कि कुरुक्षेत्र स्वर्ग देनेवाला और परम पवित्र तीर्थ है, वहां, देवता ऋषि और महात्मा ब्राह्मण रहते हैं। वह ब्रह्माकी उत्तर वेदी है, वहां जो युद्धमें मरता है

तेषां स्वर्गे ध्रुवो वासः शक्रेण सह मारिष ॥ ८ ॥
तस्मात्समन्तपञ्चकमितो याम द्रुतं नृप।
प्रथितोत्तरवेदी सा देवलोके प्रजापतेः ॥ ९ ॥
तस्मिन्महापुण्यतमे त्रैलोक्यस्य सनातने।
संग्रामे निधनं प्राप्य ध्रुवं स्वर्गो भविष्यति ॥ १० ॥
तथेत्युक्त्वा महाराज कुन्तीपुत्रो युधिष्ठिरः।
समन्तपञ्चकं वीरः प्रायादभिमुखः प्रभुः ॥ ११ ॥
ततो दुर्योधनो राजा प्रगृह्य महतीं गदाम्।
पद्भ्याममर्षी द्युतिमानगच्छत्पाण्डवैः सह ॥ १२ ॥
तथा यान्तं गदाहस्तं वर्मणा चापि दंशितम्।
अन्तरिक्षचरा देवाः साधु साध्वित्यपूजयन् ॥ १३ ॥
वातिकाश्चारणा ये तु दृष्ट्वा ते हर्षमागताः।
सपाण्डवैः परिवृतः कुरुराजस्तवात्मजः ॥ १४ ॥
मत्तस्येव गजेन्द्रस्य गतिमास्थाय सोऽव्रजत्।
ततः शङ्खनिनादेन भेरीणां च महास्वनैः ॥ १५ ॥
सिंहनादैश्च शूराणां दिशः सर्वाः प्रपूरिताः।
ततस्ते तु कुरुक्षेत्रं प्राप्ता नरवरोत्तमाः ॥ १६ ॥
प्रतीच्यभिमुखं देशं यथोद्दिष्टं सुतेन ते।
दक्षिणेन सरस्वत्याः स्वयनं तीर्थमुत्तमम् ॥ १७ ॥

वह सदा इन्द्रके सहित स्वर्गमें निवास करता है। (४—८)

हे राजन्! इसलिये हम सब लोग भी समन्त पञ्चक तीर्थमें चले, वहां जो युद्धमें मरेगा वही स्वर्गको जायगा। हे राजन्! जगत्के हितेच्छु महावीर राजा युधिष्ठिर उनके वचन सुनकर समन्तपञ्चकको ओर चले, उनके सङ्ग ही राजा दुर्योधन भी भारी गदा लेकर मतवाले हाथीके समान झूमते झामते चले, कुरुराजको उनके सङ्ग कवच और गदा धारण किये पैरोंपैरों सावधान चलते देख अन्तरिक्ष और वायु मण्डलमें घूमनेवाले देवता और सिद्ध साधु साधु और धन्य धन्य कहने लगे। (९-१५)

तब सेनामें शङ्ख और भेर आदि बाजे बजने लगे। सब वीर सिंहोंके समान गर्जने लगे। यह शब्द सब दिशाओंमें पूरित होगया; तब ये सब वीर क्रमसे चलते चलते कुरुक्षेत्रमें पहुंचे।

तस्मिन्देशे त्वनिरिणे ते तु युद्धमरोचयन्।
ततो भीमो महाकोटिं गदां गृह्याथ वर्मभृत् ॥ १८ ॥
बिभ्रद्रूपं महाराज सदृशं हि गरुत्मतः।
अवबद्धशिरस्त्राणः संख्ये काञ्चनवर्मभृत् ॥ १९ ॥
रराज राजन्पुत्रस्ते काञ्चनः शैलराडिव।
वर्मभ्यां संयतौ वीरौ भीमदुर्योधनावुभौ ॥ २० ॥
संयुगे च प्रकाशेते संरब्धाविव कुञ्जरौ।
रणमण्डलमध्यस्थौ भ्रातरौ तौ नरर्षभौ ॥ २१ ॥
अशोभेतां महाराज चन्द्रसूर्याविवोदितौ।
तावन्योऽन्यं निरीक्षेतां क्रुद्धाविव महाद्विपौ ॥ २२ ॥
दहन्तौ लोचनै राजन्परस्परवधैषिणौ।
सम्प्रहृष्टमना राजन् गदामादाय कौरवः ॥ २३ ॥
सृक्किणी संलिहन् राजन् क्रोधरक्तेक्षणः श्वसन्।
ततो दुर्योधनो राजन् गदामादाय वीर्यवान् ॥ २४ ॥
भीमसेनमभिप्रेक्ष्य गजो गजमिवाह्वयत्।
अद्रिसारमयीं भीमस्तथैवादाय वीर्यवान् ॥ २५ ॥

अनन्तर उस सद्गति देनेवाले तीर्थमें दुर्योधनकी सम्मतिसे सरस्वतीके दक्षिण तटपर पूर्वको मुह करके दुर्योधन और भीमसेन खडे हुए। उस समयानुसार अर्थात् ऊसर रहित पृथ्वीमें युद्ध करनेको खडे हुए, तब भीमसेन कवच पहिनकर भारी गदा लेकर गरुडके समान शीघ्रतासे युद्धभूमिमें आये। इधरसे दुर्योधन भी टोप और सोनेका कवच पहनकर सोनेके पर्वतके समान अचल होकर युद्धभूमिमें खडे हुए, ये दोनों पुरुषसिंह भाई दुर्योधन और भीमसेन कवच पहनकर दो मतवाले, हाथियोंके समान उपस्थित हुए। (१६-२१)

हे महाराज! उस समय ये दोनों वीर ऐसे दीखते थे, जैसे एक समय उदय हुए चन्द्रमा और सूर्य। एक दूसरेको मारनेकी इच्छासे इस प्रकार देखने लगे, मानों भसकर देंगे। अनन्तर क्रोधसे लाल नेत्र करके दांत चबाकर सांस लेते हुए बलवान दुर्योधनने गदा उठाई और भीमसेनकी ओर देखकर ऐसे ललकारा जैसे हाथी हाथीको ललकारता है। अनन्तर बलवान भीमसेनने भी पहाडके समान भारी गदा उठाकर राजा दुर्योधनको इस प्रकार पुकारा जैसे

आह्वयामास नृपतिं सिंहं सिंहो यथा वने ।
तावुद्यतगदापाणी दुर्योधनवृकोदरौ ॥ २६ ॥
संयुगे च प्रकाशेतां गिरी सशिखराविव ।
तावुभौ समतिक्रुद्धावुभौ भीमपराक्रमौ ॥ २७ ॥
उभौ शिष्यौ गदायुद्धे रौहिणेयस्य धीमतः ।
उभौ सदृशकर्माणौ यमवासवयोरिव ॥ २८ ॥
तथा सदृशकर्माणौ वरुणस्य महाबलौ ।
वासुदेवस्य रामस्य तथा वैश्रवणस्य च ॥ २९ ॥
सदृशौ तौ महाराज मधुकैटभयोर्युधि ।
उभौ सदृशकर्माणौ तथा सुन्दोपसुन्दयोः ॥ ३० ॥
रामरावणयोश्चैव वालिसुग्रीवयोस्तथा ।
तथैव कालस्य समौ मृत्योश्चैव परन्तपौ ॥ ३१ ॥
अन्योन्यमभिधावन्तौ मत्ताविव महाद्विपौ ।
वासितासङ्गमे दृप्तौ शरदीव मदोत्कटौ ॥ ३२ ॥
उभौ क्रोधविषं दीप्तं वमन्तावुरगाविव ।
अन्योन्यमभिसंरब्धौ प्रेक्षमाणावरिन्दमौ ॥ ३३ ॥
उभौ भरतशार्दूलौ विक्रमेण समन्वितौ ।
सिंहाविव दुराधर्षौ गदायुद्धविशारदौ ॥ ३४ ॥
नखदंष्ट्रायुधौ वीरौ व्याघ्राविव दुरुत्सहौ ।
प्रजासंहरणे क्षुब्धौ समुद्राविव दुस्तरौ ॥ ३५ ॥

वनमें सिंह सिंहको पुकारता है । ये दोनों गरुडके समान वीर यम और इन्द्रके समान युद्धमें खडे हुए; ये दोनों श्रीकृष्ण, बलदेव, कुबेर, मधु, कैटभ, सुन्द, उपसुन्द, राम, रावण, वालि, सुग्रीव, काल और मृत्युके समान खडेहोकर मतवाले हाथीके समान युद्ध करनेको लगे। दोनों क्रोधी सांपके समान क्रोध रूपी विष छोडने लगे । दोनों वीर एक दूसरेकी तरफको देखने लगे; दोनों शार्दूलके समान पराक्रमी, युद्ध विद्याके जाननेवाले, भरत कुलसिंह वीरसिंहके समान युद्ध करने लगे । दोनों नखून और दांत रूपी शस्त्रयुक्त सिंहके समान वीर, दोनों प्रलयकालमें बढे हुए, दो समुद्रोंके समान दुस्तर, दोनों महाबलवान, महारथ, पृथ्वीके लिये इस प्रकार युद्ध करने लगे, जैसे शरत ऋतुमें एक हथिनीके

लोहिताङ्गाविव क्रुद्धौ प्रतपन्तौ महारथौ।
पूर्वपश्चिमजौ मेघौ प्रेक्षमाणावरिन्दमौ ॥ ३६ ॥
गर्जमानौ सुविषमं क्षरन्तौ प्रावृषीव हि।
रश्मियुक्तौ महात्मानौ दीप्तिमन्तौ महाबलौ ॥ ३७ ॥
ददृशाते कुरुश्रेष्ठौ कालसूर्याविवोदितौ।
व्याघ्राविव सुसंरब्धौ गर्जन्ताविव तोयदौ ॥ ३८ ॥
जहृषाते महाबाहू सिंहकेसरिणाविव।
गजाविव सुसंरब्धौ ज्वलिताविव पावकौ ॥ ३९ ॥
ददृशाते महात्मानौ सश्रृङ्गाविव पर्वतौ।
रोषात्प्रस्फुरमाणोष्ठौ निरीक्षन्तौ परस्परम् ॥ ४० ॥
तौ समेतौ महात्मानौ गदाहस्तौ नरोत्तमौ।
उभौ परमसंहृष्टावुभौ परमसम्मतौ ॥ ४१ ॥
सदश्वाविव हेषन्तौ बृंहन्ताविव कुञ्जरौ।
वृषभाविव गर्जन्तौ दुर्योधनवृकोदरौ ॥ ४२ ॥
दैत्याविव बलोन्मत्तौ रेजतुस्तौ नरोत्तमौ।
ततो दुर्योधनो राजन्निदमाह युधिष्ठिरम् ॥ ४३ ॥
भ्रातृभिः सहितं चैव कृष्णेन च महात्मना।
रामेणामितवीर्येण वाक्यं शौटीर्यसम्मतम् ॥ ४४ ॥
केकयैः सृञ्जयैर्दृप्तं पञ्चालैश्च महात्मभिः।

लिये दो मतवाले हाथी लडते हैं। दोनों गर्जते और वर्षते हुए वर्षाऋतुके पूर्व और पश्चिमके मेघके समान, दोनों शत्रुनाशन दो मङ्गल ग्रहोंके समान, दोनों महात्मा, महातेजस्वी, महादीप्तमान कुरुकुलश्रेष्ठ प्रलयकालमें उदय होते हुए, सूर्योंके समान दीखने लगे। दोनों महाबाहु वीरसिंह और केशरीके समान युद्ध करने लगे। दोनों गदाधारी वीर शिखरधारी पर्वतके समान दीखने लगे। और दोनोंके ओठ क्रोधसे फरकने लगे। दोनों एक दूसरेकी और देखने लगे, दोनों पुरुष उत्तम महात्मा वीर गदा लेकर युद्धमें खडे हुए और दोनों अत्यन्त प्रसन्न होकर उत्तम घोडोंके समान कूदने लगे। मतवाले हाथी, और बैलोंके समान गर्जने लगे उस समय इन दोनोंकी शोभा दो दानवोंके समान दीखती थी। (२२-४३)

तब अर्जुन, नकुल, सहदेव, महात्मा

इदं व्यवसितं युद्धं मम भीमस्य चोभयोः ॥ ४५ ॥
उपोपविष्टाः पश्यध्वं सहितैर्नृपपुंगवैः ।
श्रुत्वा दुर्योधनवचः प्रत्यपद्यन्त तत्तथा ॥ ४६ ॥
ततः समुपविष्टं तत्सुमहद्राजमण्डलम् ।
विराजमानं ददृशे दिवीवादित्यमण्डलम् ॥ ४७ ॥
तेषां मध्ये महाबाहुः श्रीमान् केशवपूर्वजः ।
उपविष्टो महाराज पूज्यमानः समन्ततः ॥ ४८ ॥
शुशुभे राजमध्यस्थो नीलवासाः सितप्रभः ।
नक्षत्रैरिव संपूर्णो वृतो निशि निशाकरः ॥ ४९ ॥
तौ तथा तु महाराज गदाहस्तौ सुदुःसहौ ।
अन्योन्यं वाग्भिरुग्राभिस्तक्षमाणौ व्यवस्थितौ ॥५०॥
अप्रियाणि ततोऽन्योन्यमुक्त्वा तौ कुरुसत्तमौ ।
उदीक्षन्तौ स्थितौ तत्र वृत्रशक्रौ तथाऽऽहवे॥ ५१ ॥[३१९६]

इतिश्रीमहाभारते शतसाहस्र्यां संहितायां० शल्यपर्वान्तर्गतगदायुद्धारंभे पञ्चपंचाशत्तमोऽध्यायः ॥ ५५ ॥

वैशम्पायन उवाच-ततो वाग्युद्धमभवत्तुमुलं जनमेजय ।
यत्र दुःखान्वितो राजा धृतराष्ट्रोऽब्रवीदिदम् ॥ १ ॥

कृष्ण, महापराक्रमी बलदेव, केकयवंशी क्षत्रिय सृञ्जयवंशी क्षत्रिय और महात्मा पाञ्चालदेशीय वीरोंके बीचमें बैठे अभिमानसे भरे महाराज युधिष्ठिरसे दुर्योधन वीरोंके समान वचन बोले, आज सब राजोंके सहित बैठकर हमारा और भीमसेनका गदा युद्ध यहां देखिये। (४४-४६)

महाराजने दुर्योधनके वचन सुन वैसाही किया, अर्थात् बैठकर देखने लगे। उस समय वह युधिष्ठिरकी राजसभा ऐसी सुन्दर दीखती थी जैसे आकाशमें सूर्यका मण्डल। उस सभाके बीचमें बैठे हुए नील वस्त्रधारी गोरे वर्णवाले, श्रीमान् बलराम ऐसे दीखते थे, जैसे तारोंके बीचमें रात्रिको चन्द्रमा। हे महाराज! उस समय ये दोनों शत्रुनाशन महापराक्रमी वीर एक दूसरेको कठोर वचन कहने लगे। एक दूसरेको इस प्रकार देखने लगे। जैसे वृत्रासुर और इन्द्र परस्पर देखते थे। (४७-५१)

शल्यपर्वमें पचपन अध्याय समाप्त। [३१९६]

शल्यपर्वमें छपन अध्याय।

श्रीवैशम्पायन मुनि बोले, हे राजन्! पहिले भीमसेन और दुर्योधनका घोर वचनसे युद्ध हुआ, तब राजा धृतराष्ट्र

धिगस्तु खलु मानुष्यं यस्य निष्ठेयमीदृशी।
एकादशचमूभर्ता यत्र पुत्रो ममानघ ॥ २ ॥
आज्ञाप्य सर्वान्नृपतीन् भुक्त्वा चेमां वसुंधराम्।
गदामादाय वेगेन पदातिः प्रस्थितो रणे ॥ ३ ॥
भूत्वा हि जगतो नाथो ह्यनाथ इव मे सुतः।
गदामुद्यम्य यो याति किमन्यद्भागधेयतः ॥ ४ ॥
अहो दुःखं महत्प्राप्तं पुत्रेण मम संजय।
एवमुक्त्वा स दुःखार्तो विरराम जनाधिपः ॥ ५ ॥
सञ्जय उवाच— स मेघनिनदो हर्षान्निनदन्निव गोवृषः।
आजुहाव तदा पार्थं युद्धाय युधि वीर्यवान् ॥ ६ ॥
भीममाह्वयमाने तु कुरुराजे महात्मनि।
प्रादुरासन्सुघोराणि रूपाणि विविधान्युत ॥ ७ ॥
ववुर्वाताः सनिर्घाताः पांसुवर्षं पपात च।
बभूवुश्च दिशः सर्वास्तिमिरेण समावृताः ॥ ८ ॥
महास्वनाः सुनिर्घातास्तुमुला लोमहर्षणाः।
पेतुस्तथोल्काः शतशः स्फोटयन्त्यो नभस्तलात् ॥९॥
राहुश्चाग्रसदादित्यमपर्वणि विशाम्पते।

दुःखित होकर सञ्जयसे बोले हे पापरहित सञ्जय! मनुष्यके बलको धिक्कार है, जिसका फल ऐसा घोर होता है। देखो जो मेरा पुत्र किसी समय ग्यारह अक्षोहिणियोंका स्वामी था, जिसकी आज्ञामें सब राजा चलते थे,जो इस पृथ्वीका राज्य करता था वही आज गदा लेकर एकला पैरों युद्ध करनेको चला। जो इस जगत्का स्वामी कहलाता था, सो ही आज गदा लेकर एकला पैरों युद्ध करनेको चला जाता है। यह देखकर हम प्रारब्धको बलवान् न कहें तो किसको कहें? हाय! हमारा पुत्र घोर आपत्तिमें पडा है ऐसा कहकर महाराज धृतराष्ट्र चुप होगये। (१—५)

सञ्जय बोले, हे महाराज! अनन्तर महावीर्यवान् दुर्योधनने प्रसन्नतासे मेघ और मतवाले बैलके समान गर्जकर युद्ध करनेके लिये भीमसेनको ललकारा। हे महाराज! जिस समय महात्मा दुर्योधनने भीमसेनको पुकारा उस समय घोर अशकुन होने लगे। घोर वायु चलने लगा, आकाशसे धूलि वर्षने लगी, दशोंदिशामें अन्धकार होगया,

चकंपे च महाकंपं पृथिवी सवनद्रुमा ॥ १० ॥
दीप्ताश्च वाताः प्रववुर्नीचैः शर्करकर्षिणः ।
गिरीणां शिखराण्येव न्यपतन्त महीतले ॥ ११ ॥
मृगा बहुविधाकाराः संपतन्ति दिशो दश ।
दीप्ताः शिवाश्चाप्यनदन् घोररूपाः सुदारुणाः ॥१२॥
निर्घाताश्च महाघोरा बभूवुर्लोमहर्षणाः ।
दीप्तायां दिशि राजेन्द्र मृगाश्चाशुभवेदिनः ॥ १३ ॥
उदपानगताश्चापो व्यवर्धन्त समन्ततः ।
अशरीरा महा नादाः श्रूयन्ते स्म तदा नृप ॥ १४ ॥
एवमादीनि दृष्ट्वाऽथ निमित्तानि वृकोदरः ।
उवाच भ्रातरं ज्येष्ठं धर्मराजं युधिष्ठिरम् ॥ १५ ॥
नैष शक्तो रणे जेतुं मन्दात्मा मां सुयोधनः ।
अद्य क्रोधं विमोक्ष्यामि निगूढं हृदये चिरम् ॥ १६ ॥
सुयोधने कौरवेन्द्रे खाण्डवे पावको यथा ।
शल्यमद्योद्धरिष्यामि तव पांडव हृच्छयम् ॥ १७ ॥
निहत्य गदया पापमिमं कुरुकुलाधमम् ।
अद्य कीर्तिमयीं मालां प्रतिमोक्ष्याम्यहं त्वयि ॥ १८ ॥
हत्वेमं पापकर्माणं गदया रणमूर्धनि ।

अनेक बिजली घोर शब्द करती हुई पृथ्वीमें गिरी, बिना समय राहु सूर्यका ग्रास करने लगा, वन और वृक्षोंके सहित पृथ्वी कांपने लगी, पर्वतोंके शिखर टूट टूटकर पृथ्वीमें गिर गये, अनेक प्रकारके जन्तु चारों ओर घूमने लगे। रोती हुई शियारी मुखसे आग निकालती हुई चारों ओर घूमने लगीं, दीप्त दिशामें हरिन अपशकुनका चिन्ह देने लगे। अनेक प्रकारके शरीर रहित भूतोंके शब्द सुनाई देने लगे और जल बढने लगा। (५-१४)

इत्यादि और भी अनेक अपशकुन देखकर भीमसेन ने बडे भाई धर्मराज युधिष्ठिरसे बोले। हे पाण्डव! हे राजेन्द्र हे महाराज! मूर्ख दुर्योधन मुझे युद्धमें नहीं जीत सक्ता। आज मैं बहुत दिनसे हृदयमें भरा क्रोध निकालूंगा, आज दुष्ट दुर्योधनको मारकर आपके हृदयका शल्य निकालूंगा, आज इस कुरुकुलाधमको गदासे मारकर आपके गलेमें विजय कीर्त्तिकी माला पहिनाऊंगा,

अद्यास्य शतधा देहं भिनद्मि गदयाऽनया ॥ १९ ॥
नायं प्रवेष्टा नगरं पुनर्वारणसाह्वयम् ।
सर्पोत्सर्गस्य शयने विषदानस्य भोजने ॥ २० ॥
प्रमाणकोट्यां पातस्य दाहस्य जतुवेश्मनि ।
सभायामवहासस्य सर्वस्वहरणस्य च ॥ २१ ॥
वर्षमज्ञातवासस्य वनवासस्य चानघ ।
अद्यांतमेषां दुःखानां गन्ताऽहं भरतर्षभ ॥ २२ ॥
एकाह्ना विनिहत्येमं भविष्याम्यात्मनोऽनृणः ।
अद्यायुर्धार्तराष्ट्रस्य दुर्मतेरकृतात्मनः ॥ २३ ॥
समाप्तं भरतश्रेष्ठ मातापित्रोश्च दर्शनम् ।
अद्य सौख्यं तु राजेन्द्र कुरुराजस्य दुर्मतेः ॥ २४ ॥
समाप्तं च महाराज नारीणां दर्शनं पुनः ।
अद्यायं कुरुराजस्य शांतनोः कुलपांसनः ॥ २५ ॥
प्राणान् श्रियं च राज्यं च त्यक्त्वा शेष्यति भूतले ।
राजा च धृतराष्ट्रोऽद्य श्रुत्वा पुत्रं निपातितम् ॥ २६ ॥
स्मरिष्यत्यशुभं कर्म यत्तच्छकुनिबुद्धिजम् ।
इत्युक्त्वा राजशार्दूल गदामादाय वीर्यवान् ॥ २७ ॥
अभ्यतिष्ठत युद्धाय शक्रो वृत्रमिवाह्वयन् ।

आज इस गदासे युद्धमें इस पापीके शरीरके सौ सौ टुकडे करूंगा, अब यह फिर हस्तिनापुरमें नहीं जायगा । (१८-१९)

हे भरतकुलसिंह ? हे पापरहित ! शय्यापर सांप छोडने, भोजनमें विष देने, यमुनामें डूबने, लाक्षागृहमें जलाने, हंसने, कपटसे सर्वस्व छीनने, एक वर्ष छिपकर रहने, और बारह वर्ष वनमें रहने आदि सब दुःखोंके आज पार जाऊंगा, इसने हमें इतने दिनोंतक दुःख दिया है सो मैं आज एक दिनमें मारकर उसका बदला लेलूंगा, पापी दुर्बुद्धी दुर्योधनकी अवस्था समाप्त होगई, अब इस पापीको माता पिता और स्त्रियोंका दर्शन नहीं होगा । अब इसका सुख समाप्त होगया। यह कुरुकुलश्रेष्ठ सन्तानका कुलकलङ्क दुर्योधन राज्यलक्ष्मी और प्राण छोडकर पृथ्वीमें सोवेगा। आज अपने पुत्रको मरा हुवा सुन राजा धृतराष्ट्र भी शकुनीके वचनोंका स्मरण करेंगे । (२०-२७)

तमुद्यतगदं दृष्ट्वा कैलासमिव शृङ्गिणम् ॥ २८ ॥
भीमसेनः पुनः क्रुद्धो दुर्योधनमुवाच ह ।
राज्ञश्च धृतराष्ट्रस्य तथा त्वमपि चात्मनः ॥ २९ ॥
स्मर तद्दुष्कृतं कर्म यद्वृत्तं वारणावते ।
द्रौपदी च परिक्लिष्टा सभामध्ये रजस्वला ॥ ३० ॥
द्यूते च वञ्चितो राजा यत्त्वया सौबलेन च ।
वने दुःखं च यत्प्राप्तमस्माभिस्त्वत्कृतं महत् ॥ ३१ ॥
विराटनगरे चैव योऽन्यंतरगतैरिव ।
तत्सर्वं पातयाम्यद्य दिष्ट्या दृष्टोऽसि दुर्मते ॥ ३२ ॥
त्वत्कृतेऽसौ हतः शेते शरतल्पे प्रतापवान् ।
गाङ्गेयो रथिनां श्रेष्ठो निहतो याज्ञसेनिना ॥ ३३ ॥
हतो द्रोणश्च कर्णश्च तथा शल्यः प्रतापवान् ।
वैराग्नेरादिकर्ताऽसौ शकुनिः सौबलो हतः ॥ ३४ ॥
प्रातिकामी ततः पापो द्रौपद्याः क्लेशकृद्धतः ।
भ्रातरस्ते हताः सर्वे शूरा विक्रान्तयोधिनः ॥ ३५ ॥
एते चान्ये च बहवो निहतास्त्वत्कृते नृपाः
त्वामद्य निहनिष्यामि गदया नात्र संशयः ॥ ३६ ॥

हे राजशार्दूल ऐसा कहकर भीमसेनने गदा उठाई और जैसे इन्द्रने वृत्रासुरको पुकारा था, ऐसे दुर्योधनको ललकारा। अनन्तर गदाधारी दुर्योधनको शिखरधारी कैलाशके समान देख क्रोध करके भीमसेन बोले, अरे दुर्बुद्धे ! मैंने आज तुझे प्रारब्धहीसे युद्धमें देखा है, तु अपने और धृतराष्ट्रके पापोंका स्मरणकर जो हमारे सङ्ग वारणावत नगरमें करे थे तुझको स्मरण है, कि सभामें रजस्वला द्रौपदीको कैसे दुःख दिये थे! सभामें तैने और शकुनीने राजाको छला था, हमने वनमें कैसे कैसे दुःख उठाये हैं, विराटनगरमें हमको ऐसा जान पडता था कि मानो जन्मही दूसरा हुआ है, आज वह सब क्रोध तुझे मारकर शान्त करूंगा। तेरेही लिये महारथ गङ्गापुत्र भीष्म याज्ञसेनीके द्वारा मरकर शरशय्यापर सोते हैं। तेरेही लिये द्रोणाचार्य, कर्ण, प्रतापी शल्य, वैररूपी अग्निको जलानेवाला शकुनी, द्रौपदीको क्लेश देनेवाला पापी प्रातिकामी और विचित्र युद्ध करनेवाले शूरवीर तथा और भी अनेक राजा मारे गये। अब तुझे भी गदासे

इत्येवमुच्चै राजेन्द्र भाषमाणं वृकोदरम्।
उवाच गतभी राजन् पुत्रस्ते सत्यविक्रमः ॥ ३७ ॥
किं कत्थनेन बहुना युध्यस्व त्वं वृकोदर।
अद्य तेऽहं विनेष्यामि युद्धश्रद्धां कुलाधम ॥ ३८ ॥
न हि दुर्योधनः क्षुद्र केनचित्त्वद्विधेन वै।
शक्यस्त्रासयितुं वाचा यथाऽन्यः प्राकृतो नरः ॥३९॥
चिरकालेप्सितं दिष्ट्या हृदयस्थमिदं मम।
त्वया सह गदायुद्धं त्रिदशैरुपपादितम् ॥ ४० ॥
किं वाचा बहुनोक्तेन कत्थितेन च दुर्मते।
वाणी संपद्यतामेषा कर्मणा मा चिरं कृथाः ॥ ४१ ॥
तस्य तद्वचनं श्रुत्वा सर्वे एवाभ्यपूजयन्।
राजानः सोमकाश्चैव ये तत्रासन् समागताः ॥ ४२ ॥
ततः संपूजितः सर्वैः संप्रहृष्टतनूरुहः।
भूयो धीरां मतिं चक्रे युद्धाय कुरुनन्दनः ॥ ४३ ॥
उन्मत्तमिव मातङ्गं तलशब्दैर्नराधिपाः।
भूयः संहर्षयांचक्रुर्दुर्योधनममर्षणम् ॥ ४४ ॥
तं महात्मा महात्मानं गदामुद्यम्य पाण्डवः।
अभिदुद्राव वेगेन धार्तराष्ट्रं वृकोदरः ॥ ४५ ॥

निःसन्देह मारूंगा। (२८-३६)

हे राजेन्द्र! ऊंचे स्वरसे ऐसे वचन भीमसेनके सुन सत्यपराक्रमी दुर्योधन बेडर होकर बोले, रे क्षुद्र! रे कुलाधम! तुझे ऐसे साधारण मनुष्योंके वचनोंसे और मनुष्योंके समान दुर्योधन नहीं डरेगा, क्यों वृथा बक बक करता है युद्ध कर आज मैं तेरी युद्धकी श्रद्धा मिटा दूंगा। बहुत दिनसे मेरी इच्छा थी कि तेरा और मेरा गदायुद्ध हो, सो आज प्रारब्धसे वही समय आगया यह बात देवतोंने भी ऐसे ही रची थी। रे दुर्बुद्धि! बहुत कहनेसे क्या होता है जो तैंने वचन कहा है, उसे कर्म करके सत्य कर। (३७-४१)

दुर्योधनके वचन सुन सोमकवंशी क्षत्रिय आदि सब राजा उनकी प्रशंसा करने और उन्हें क्रोध बढानेके लिये ताली बजाने लगे। अपनी प्रशंसा सुन कुरुराजके रोंये खडे होगये और युद्ध करनेका निश्चय करने लगे। अनन्तर महात्मा भीमसेन गदा लेकर वेगसे म-

बृंहन्ति कुंजरास्तत्र हया हेषन्ति चासकृत् ।
शस्त्राणि चाप्यदीप्यन्त पाण्डवानां जयैषिणाम् ॥४६॥ ३२४२

इतिश्रीमहाभारते शतसाहस्र्यां० शल्यपर्वान्तर्गतगदापर्वणि गदायुद्धारंभे षट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥

सञ्जय उवाच— ततो दुर्योधनो दृष्ट्वा भीमसेनं तथागतम् ।
प्रत्युद्ययावदीनात्मा वेगेन महता नदन् ॥ १ ॥
समापेततुरन्योन्यं शृङ्गिणौ वृषभाविव ।
महानिर्घातघोषश्च प्रहाराणामजायत ॥ २ ॥
अभवच्च तयोर्युद्धं तुमुलं लोमहर्षणम् ।
जिगीषतोर्यथाऽन्योन्यमिन्द्रप्रह्लादयोरिव ॥ ३ ॥
रुधिरोक्षितसर्वाङ्गौ गदाहस्तौ मनस्विनौ ।
ददृशाते महात्मानौ पुष्पिताविव किंशुकौ ॥ ४ ॥
तथा तस्मिन्महायुद्धे वर्तमाने सुदारुणे ।
खद्योतसंघैरिव खं दर्शनीयं व्यरोचत ॥ ५ ॥
तथा तस्मिन्वर्तमाने संकुले तुमुले भृशम् ।
उभावपि परिश्रान्तौ युध्यमानावरिन्दमौ ॥६ ॥
तौ मुहूर्तं समाश्वस्य पुनरेव परन्तपौ ।
अभ्यहारयतान्योऽन्यं संप्रगृह्य गदे शुभे ॥ ७ ॥

हात्मा दुर्योधनकी ओर दौडे उस समय विजयी पाण्डवोंके हाथी चिल्लाने लगे। घोडे हींचने लगे और अस्त्र चमकने लगे। (४२—४६) [३२४२]

शल्यपर्वमें छपन अध्याय समाप्त ।

शल्यपर्वमें सतावन अध्याय ।

सञ्जय बोले, भीमसेनको अपनी ओर आते देख प्रसन्न दुर्योधन भी गर्जते हुये वेगसे उनकी ओर दौडे। ये दोनों महात्मा इस प्रकार लडने लगे, जैसे दो सींगवाले बैल लडते हैं। गदामें गदा लगनेसे घोर शब्द होने लगा। इन दोनों विजय चाहनेवाले वीरोंका ऐसा घोर युद्ध हुआ जैसा इन्द्र और प्रह्लाद-का हुवा था। इस युद्धको देखकर वीरोंके रोंये खडे होने लगे। (१-३)

अनन्तर दोनों गदाधारी वीर रुधि-रमें भीगकर फूले हुए टेसूके समान दीखने लगे। दोनोंकी गदाओंसे आग के पतङ्ग निकलने लगे और उनसे आकाश ऐसा शोभित होगया जैसा जुगुनुवोंसे। दोनों शत्रुनाशन वीर थोडे समयतक ऐसा घोर युद्ध करके थक गये, फिर मुहूर्त मात्र सांस लेकर दोनों

तौ तु दृष्ट्वा महावीर्यौ समाश्वस्तौ नरर्षभौ।
बलिनौ वारणौ यद्वद्वासितार्थे मदोत्कटौ ॥ ८ ॥
समानवीर्यौ संप्रेक्ष्य प्रगृहीतगदावुभौ।
विस्मयं परमं जग्मुर्देवगन्धर्वमानवाः ॥ ९ ॥
प्रगृहीतगदौ दृष्ट्वा दुर्योधनवृकोदरौ।
संशयः सर्वभूतानां विजये समपद्यत ॥ १० ॥
समागम्य ततो भूयो भ्रातरौ बलिनां वरौ।
अन्योन्यस्यान्तरप्रेप्सू प्रचक्रातेऽन्तरं प्रति ॥ ११ ॥
यमदण्डोपमां गुर्वीमिन्द्राशनिमिवोद्यताम्।
ददृशुः प्रेक्षका राजन् रौद्रीं विशसनीं गदाम् ॥ १२ ॥
आविद्ध्यतो गदां तस्य भीमसेनस्य संयुगे।
शब्दः सुतुमुलो घोरो मुहूर्तं समपद्यत ॥ १३ ॥
आविद्ध्यन्तमरिं प्रेक्ष्य धार्त्तराष्ट्रोऽथ पाण्डवम्।
गदामतुलवेगां तां विस्मितः संबभूव ह ॥ १४ ॥
चरंश्च विविधान्मार्गान्मण्डलानि च भारत।
अशोभत तदा वीरो भूय एव वृकोदरः ॥ १५ ॥
तौ परस्परमासाद्य यत्तावन्योन्यरक्षणे।

ने गदा उठाई और एक दूसरेको मारने लगे। दोनों महापराक्रमी पुरुषसिंह वीर थोडे समयतक सांस लेकर फिर इस प्रकार युद्ध करने लगे। जैसे एक हथिनीके लिये दो मतवाले हाथी लडते हैं। उन दोनोंको गदा धारण किये और समान बलवान देखकर देवता गन्धर्व और मनुष्य आश्चर्यमें आगये युद्धमें विजयमें बहुत सन्देह होने मिटा ।(४-१०)

कि तेरा और ये दोनों बलवान् भाई एक प्रारब्धसे वही स. लिये अन्तर देखने लगे और अनेक प्रकारकी गतिसे चलने लगे। उस समय भीमसेनकी भयानक गदा देखनेवालोंको यमराजके दण्ड और इन्द्रके वज्रके समान दीखती थी। जिस समय भीमसेन गदा चलाते थे तब मुहूर्त्त भर उसीका घोर शब्द सुनाई देता था। इसी प्रकार महावेगवाली दुर्योधनकी गदा भी चलती थी और सब लोग देखकर आश्चर्य करते थे। (११-१४)

हे भारत! अनेक प्रकारके मार्गसे चलते हुये भीमसेनकी शोभा बहुत बढी।

मार्जाराविव भक्षार्थे ततक्षाते मुहुर्मुहुः ॥ १६ ॥
अचरद्भीमसेनस्तु मार्गान्बहुविधांस्तथा ।
मण्डलानि विचित्राणि गतप्रत्यागतानि च ॥ १७ ॥
अस्त्रयन्त्राणि चित्राणि स्थानानि विविधानि च ।
परिमोक्षं प्रहाराणां वर्जनं परिधावनम् ॥ १८ ॥
अभिद्रवणमाक्षेपमवस्थानं सविग्रहम् ।
परिवर्तनसंवर्तमवप्लुतमुपप्लुतम् । ॥ १९ ॥
उपन्यस्तमपन्यस्तं गदायुद्धविशारदौ ।
एवं तौ विचरन्तौ तु न्यघ्नतां वै परस्परम् ॥ २० ॥
वञ्चयानौ पुनश्चैव चेरतुः कुरुसत्तमौ ।
विक्रीडन्तौ सुबलिनौ मण्डलानि विचेरतुः ॥ २१ ॥
तौ दर्शयन्तौ समरे युद्धक्रीडां समन्ततः ।
गदाभ्यां सहसान्योन्यमाजघ्नतुररिन्दमौ ॥ २२ ॥

ये दोनों वीर अपनी अपनी रक्षा करते हुए वार वार इस प्रकारयुद्ध करने लगे जैसे मांसके लिये दो बिलाव लडते हैं तब भीमसेन अनेक प्रकारके मार्गोंसे अनेक प्रकारके मण्डल करने लगे। कभी गत (शत्रुके सन्मुख जाना), कभी प्रत्यागत (शत्रुके आगेसे बिनामुख फेरे पीछेको लौटना), कभी विचित्र अस्त्र-यन्त्र (किसी मर्मको देखकर अस्त्र मार-ना अथवा शत्रुके शस्त्रसे अपने शस्त्रको बचाना), कभी अनेक प्रकारके स्थान (शस्त्र मारने योग्य मर्मस्थानोंको देखना), परिमोक्ष (शस्त्रको वृथा कर देना), प्रहार वर्जन (शत्रुके शस्त्रसे बचना), परिधावन (शीघ्रतासे दहिने बायें जाना), अभिद्रवण (शीघ्रतासे आगे जाना), आक्षेप (शत्रुके हाथसे चले हुये शस्त्रको अथवा उसके यन्त्रका वृथा करनेका उपाय करना), अवस्थान (सावधान और स्थिर होकर आगे खडा रहना), विग्रह (खडे हुए शत्रुसे युद्ध करना), परिवर्त्तन (सब ओरसे घूमकर शत्रुको मारना), सम्वर्त्तन (शत्रुके शस्त्रको रोकना), अवप्लुत (शत्रुके शस्त्रसे नीचा होकर बचना), उपप्लुत (उछलकर बचना), उपन्यस्त (पास आकर शस्त्र मारना), और अपन्यस्त (घूमकर पीठकी ओर हाथ करके शत्रुको मारना), आदि अनेक प्रकारकी गती दिखलाने लगे। दोनों कुरुकुलश्रेष्ठ वीर, दोनों गदा विद्या जाननेवाले, दोनों महापराक्रमी, अनेक प्रकारके मण्डल करते हुए युद्धमें चारों ओर खेलने लगे

परस्परं समासाद्य दंष्ट्राभ्यां द्विरदौ यथा।
अशोभेतां महाराज शोणितेन परिप्लुतौ ॥ २३ ॥
एवं तद्भवद्युद्धं घोररूपं परन्तप।
परिवृत्तेऽहनि क्रूरं वृत्रवासवयोरिव ॥ २४ ॥
गदाहस्तौ ततस्तौ तु मण्डलावस्थितौ बली।
दक्षिणं मण्डलं राजन् धार्तराष्ट्रोऽभ्यवर्तत ॥ २५ ॥
सव्यं तु मण्डलं तत्र भीमसेनोऽभ्यवर्तत।
तथा तु चरतस्तस्य भीमस्य रणमूर्धनि ॥ २६ ॥
दुर्योधनो महाराज पार्श्वदेशेऽभ्यताडयत्।
आहतस्तु ततो भीमः पुत्रेण तव भारत ॥ २७ ॥
आविद्ध्यत गदां गुर्वीं प्रहारं तमचिन्तयन्।
इन्द्राशनिसमां घोरां यमदण्डमिवोद्यताम् ॥ २८ ॥
ददृशुस्ते महाराज भीमसेनस्य तां गदाम्।
आविध्यन्तं गदां दृष्ट्वा भीमसेनं तवात्मजः ॥ २९ ॥
समुद्यम्य गदां घोरां प्रत्यविध्यत्परंतपः।
गदा मारुतवेगेन तव पुत्रस्य भारत ॥ ३० ॥
शब्द आसीत्सुतुमुलस्तेजश्च समजायत।
स चरन्विविधान्मार्गान् मण्डलानि च भागशः॥३१॥
समशोभत तेजस्वी भूयो भीमात्सुयोधनः।

और एक दूसरेको गदासे इस प्रकार मारने लगे। जैसे एक मतवाला हाथी दूसरेको दांतसे मारता है। तब दोनों रुधिरमें भीग गये। (१५--२३)

हे शत्रुनाशन! यह भयानक गदा युद्ध इन दोनोंका ऐसा हुवा जैसा इन्द्र और वृत्रासुरका हुवा था। हे महाराज! इस प्रकार इस घोर गदायुद्धमें तुम्हारे पुत्र दहिने और भीमसेन बायीं ओर घूमने लगे हे महाराज! ओर घूमते हुए भीमसेनकी पसुरीमें तुम्हारे पुत्रने एक गदा मारी; परन्तु भीमसेनने उसका कुछ भी विचार न किया और यमराजके दण्डके समान भयानक तथा इन्द्रके वज्रके समान घोर गदाको घूमाने लगे। उस समय घूमती हुई भीमसेनकी गदा मण्डलके समान दीखने लगी। अनन्तर शत्रुनाशन दुर्योधन भी अपनी घोर गदाका उठाकर घुमाने लगे। चारों ओर उसका वायु छा गया; उस समय महा-

आविद्धा सर्ववेगेन भीमेन महती गदा ॥ ३२ ॥
सधूमं सार्चिषं चाग्निं मुमोचोग्रमहास्वना ।
आधूतां भीमसेनेन गदां दृष्ट्वा सुयोधनः ॥ ३३ ॥
अद्रिसारमयीं गुर्वीमाविध्यन् बह्वशोभत ।
गदामारुतवेगं हि दृष्ट्वा तस्य महात्मनः ॥ ३४ ॥
भयं विवेश पाण्डूंस्तु सर्वानेव ससोमकान् ।
तौ दर्शयन्तौ समरे युद्धक्रीडां समन्ततः ॥ ३५ ॥
गदाभ्यां सहसाऽन्योन्यमाजघ्नतुररिन्दमौ ।
तौ परस्परमासाद्य दंष्ट्राभ्यां द्विरदौ यथा ॥ ३६ ॥
अशोभेतां महाराज शोणितेन परिप्लुतौ ।
एवं तदभवद्युद्धं घोररूपमसंवृतम् ॥ ३७ ॥
परिवृत्तेऽहनि क्रूरं वृत्रवासवयोरिव ।
दृष्ट्वा व्यवस्थितं भीमं तव पुत्रो महाबलः ॥ ३८ ॥
चरंश्चित्रतरान्मार्गान् कौन्तेयमभिदुद्रुवे ।
तस्य भीमो महावेगां जाम्बूनदपरिष्कृताम् ॥ ३९ ॥
अतिक्रुद्धस्य क्रुद्धस्तु ताडयामास तां गदाम् ।
सविस्फुलिङ्गो निर्ह्रादस्तयोस्तत्राभिघातजः ॥ ४० ॥

तेजस्वी दुर्योधन गदाको घुमाते हुए अनेक मार्गोंसे चलने लगे। तब उनका तेज भीमसेनसे बहुत अधिक होगया। तब भीमसेन भी अधिक बलसे अपनी गदा घुमाने लगे। और उससे घोर शब्द आगकी, चिनगारी तथा धुआं निकलने लगा। भीमसेनकी गदाका वेग देखकर दुर्योधन भी पर्वतके समान भारी गदाको बलसे घुमाने लगे। महात्मा दुर्योधनकी गदाके वायुका वेग देखकर सब पाण्डव और सोमकवंशी क्षत्रिय डरने लगे। (२८-३५)

अनन्तर ये दोनों शत्रुनाशन वीर एक दूसरेको गदासे इस प्रकार मारने लगे जैसे दांतसे एक हाथी दूसरे हाथीको मारता है,ऐसे दोनों युद्धमें घूमने लगे। (३७)

अनन्तर ये दोनों रुधिरमें भीग गये यह युद्ध उस दिन ऐसा घोर हुवा जैसे इन्द्र और वृत्रासुरका हुआ था। हे महाराज! बलवान् दुर्योधन भीमसेनको अपने आगे खडा देख विचित्र मार्गसे चलकर उनकी ओर दौडे, तब क्रोध भरे भीमसेनने दुर्योधनकी सोनेसे जडी गदामें

प्रादुरासीन्महाराज सृष्टयोर्वज्रयोरिव।
वेगवत्या तया तत्र भीमसेनप्रमुक्तया ॥ ४१ ॥
निपतन्त्या महाराज पृथिवी समकम्पत।
तां नामृष्यत कौरव्यो गदां प्रतिहतां रणे ॥ ४२ ॥
मत्तो द्विप इव क्रुद्धः प्रतिकुंजरदर्शनात्।
स सव्यं मण्डलं राजा उद्भ्रम्य कृतनिश्चयः ॥ ४३ ॥
आजघ्ने मूर्ध्नि कौन्तेयं गदया भीमवेगया।
तया त्वभिहतो भीमः पुत्रेण तव पाण्डवः ॥ ४४ ॥
नाकम्पत महाराज तदद्भुतमिवाभवत्।
आश्चर्यं चापि तद्राजन्सर्वसैन्यान्यपूजयन् ॥ ४५ ॥
यद्गदाभिहतो भीमो नाकंपत पदात्पदम्।
ततो गुरुतरां दीप्तां गदां हेमपरिष्कृताम् ॥ ४६ ॥
दुर्योधनाय व्यसृजद्भीमो भीमपराक्रमः।
तं प्राहरमसंभ्रान्तो लाघवेन महाबलः ॥ ४७ ॥
मोघं दुर्योधनश्चक्रे तत्राभूद्विस्मयो महान्।
सा तु मोघा गदा राजन्पतन्ती भीमचोदिता॥ ४८ ॥
चालयामास पृथिवीं महानिर्घातनिःस्वना।

एक गदा मारी, उसके लगते ही दोनों गदाओंमेंसे आगके पतङ्ग निकलने लगे। और दो वज्र लडनेके समान घोर शब्द उठा, जब भीमसेनने अपनी गदा दुर्योधनकी गदामें मारी तब पृथ्वी कांपने लगी। (३७—४२)

हे राजेन्द्र! उस गदा प्रहारको दुर्योधन क्षमा न कर सके और भीमसेनको खडा देख ऐसा क्रोध हुवा जैसे हाथीको देखकर दूसरे हाथीको क्रोध होता है। अनन्तर शीघ्रतासे बाईं ओर आकर भीमसेनके शिरपर एक गदा मारी परन्तु भीमसेन उससे कुछ भी कम्पित न हुये, इस आश्चर्यको देखकर सब सेनाके वीर आश्चर्य और भीमसेनकी प्रशंसा करने लगे। अनन्तर भीमसेन भी सोनेसे मढी प्रकाशसे भरी एक गदा दुर्योधनके फेंकके मारी;परन्तु दुर्योधनने उस गदाको बचा दिया, महाबलवान दुर्योधनकी इस विद्याको देखकर सब सेनाके लोग आश्चर्य करने लगे। वह भीमसेनके हाथसे छूटी हुई महावज्रके समान शब्दवाली गदा जब पृथ्वीमें गिरी तब सब पृथ्वी हिलने लगी।

आस्थाय कौशिकान्मार्गानुत्पतन्स पुनः पुनः ॥ ४९ ॥
गदानिपातं प्रज्ञाय भीमसेनं च वंचितम्।
वंचयित्वा तदा भीमं गदया कुरुसत्तमः ॥ ५० ॥
ताडयामास संक्रुद्धो वक्षो देशे महाबलः।
गदया निहतो भीमो मुह्यमानो महारणे ॥ ५१ ॥
नाभ्यमन्यत कर्तव्यं पुत्रेणाभ्याहतस्तव।
तस्मिंस्तथा वर्तमाने राजन्सोमकपाण्डवाः ॥ ५२ ॥
भृशोपहतसंकल्पा न हृष्टमनसोऽभवन्।
स तु तेन प्रहारेण मातंग इव रोषितः ॥ ५३ ॥
हस्तिवद्धस्तिसंकाशमभिदुद्राव ते सुतम्।
ततस्तु तरसा भीमो गदया तनयं तव ॥ ५४ ॥
अभिदुद्राव वेगेन सिंहो वनगजं यथा।
उपसृत्य तु राजानं गदामोक्षविशारदः ॥ ५५ ॥
आविध्यत गदां राजन्समुद्दिश्य सुतं तव।
अताडयद्भीमसेनः पार्श्वे दुर्योधनं तदा ॥ ५६ ॥
स विह्वलः प्रहारेण जानुभ्यामगमन्महीम्।
तस्मिन्कुरुकुलश्रेष्ठे जानुभ्यामवनीं गते ॥ ५७ ॥
उदतिष्ठत्ततो नादः सृञ्जयानां जगत्पते।
तेषां तु निनदं श्रुत्वा सृंजयानां नरर्षभः ॥ ५८ ॥

भीमसेन उस समय पागलके समान इधर उधर घुमने लगे। (४२—४९)

उनको पागलके समान इधर उधर घूमते और गदाको पृथ्वीमें पडी देख दुर्योधनने एक गदा उनकी पसुलीमें मारी। उस गदाके लगनेसे भीमसेनको अपने करने और न करने योग्य कामोंका कुछ भी ध्यान न रहा। (५१—५२)

भीमसेनकी यह दशा देख पाञ्चाल और पाण्डवोंके सब सङ्कल्प नष्ट होगये और सब अत्यन्त मलीन होगये। परन्तु भीमसेनको अत्यन्त क्रोध हुआ, जैसे अंकुश लगनेसे हाथीको। अनन्तर गदा उठाकर तुम्हारे पुत्रकी ओर ऐसे दौडे, जैसे हाथी हाथीकी ओर अथवा सिंह हाथीकी ओर दौडता है। अनन्तर गदायुद्धमें निपुण भीमसेनने दौडकर एक गदा मारी, उसके लगनेसे दुर्योधन ने व्याकुल होकर अपने घुठने पृथ्वीमें टेक दिये। हे राजन्! कुरुकुलश्रेष्ठ दुर्यो

अमर्षाद्भरतश्रेष्ठ पुत्रस्ते समकुप्यत।
उत्थाय तु महाबाहुर्महानाग इव श्वसन् ॥ ५९ ॥
दिधक्षन्निव नेत्राभ्यां भीमसेनमवैक्षत।
ततः स भरतश्रेष्ठो गदापाणिरभिद्रवन् ॥ ६० ॥
प्रमथिष्यन्निव शिरो भीमसेनस्य संयुगे।
स महात्मा महात्मानं भीमं भीमपराक्रमः ॥ ६१ ॥
अताडयच्छंखदेशे न चचालाचलोपमः।
स भूयः शुशुभे पार्थस्ताडितो गदया रणे।
उद्भिन्नरुधिरो राजन्प्रभिन्न इव कुञ्जरः ॥ ६२ ॥
ततो गदां वीरहणीमयोमयीं प्रगृह्य वज्राशनितुल्यनिःस्वनाम्।
अताडयच्छत्रुममित्रकर्षणो बलेन विक्रम्य धनंजयाग्रजः ॥ ६३ ॥
स भीमसेनाभिहतस्तवात्मजः पपात संकंपितदेहबन्धनः।
सुपुष्पितो मारुतवेगताडितो वने यथा शाल इवावघूर्णितः ॥ ६४ ॥
ततः प्रणेदुर्जहृषुश्च पांडवाः समीक्ष्य पुत्रं पतितं क्षितौ तव।
ततः सुतस्ते प्रतिलभ्य चेतनां समुत्पपात द्विरदो यथा ह्रदात् ॥६५॥

धनकी यह दशा देख सृञ्जयवंशी क्षत्री गर्जने लगे। परन्तु भरतकुलश्रेष्ठ दुर्योधन उस गर्जनेको क्षमा न कर सके और क्रोधमें भरकर सांस लेते हुये, हाथीके समान खडे हुए और भीमसेनकी ओर इस प्रकार देखने लगे, मानो इन्हे भस्म कर देंगे। (५३—६०)

अनन्तर महापराक्रमी महात्मा दुर्योधन गदा लेकर महात्मा भीमसेनकी ओर इस प्रकारसे दौडे मानो अभी इनका शिर तोड डालेंगे। फिर एक गदा भीमसेनकी कनपटीमें मारी, परन्तु भीमसेन उसके लगनेसे पर्वतके समान खडे ही रहे और रुधिरके बहनेसे उनकी ऐसी शोभा बढी जैसे मद बहते हुए हाथीकी। अनन्तर शत्रुनाशन भीमसेनने शत्रुओंका नाश करनेवाली लोहेकी बनी वज्र और बिजलीके समान घोर शब्दवाली गदा दुर्योधनके शरीरमें मारी। (६१—६३)

हे महाराज! उसके लगनेसे दुर्योधनके शरीरकी सन्धि ढीली होगई और इस प्रकार चक्कर खाकर पृथ्वीमें गिर पडे जैसे आंधी लगनेसे फला हुआ सालका वृक्ष टूटकर गिरता है। हे महाराज! दुर्योधनको पृथ्वीमें पडा देख पाण्डव बहुत प्रसन्न हुए फिर दुर्योधन चैतन्य होकर इस प्रकार उठे जैसे

स पार्थिवो नित्यममर्षितस्तदा महारथः शिक्षितवत्परिभ्रमन्।
अताडयत्पाण्डवमग्रतः स्थितं स विह्वलाङ्गो जगतीमुपास्पृशत्॥६६॥
स सिंहनादं विननाद कौरवो निपात्य भूमौ युधि भीममोजसा।
बिभेद चैवाशनितुल्यमोजसा गदानिपातेन शरीररक्षणम् ॥६७॥
ततोऽन्तरिक्षे निनदो महानभूद्दिवौकसामप्सरसां च नेदुषाम्।
पपात चोच्चैरमरप्रवेरितं विचित्रपुष्पोत्करवर्षमुत्तमम् ॥६८॥
ततः परानाविशदुत्तमं भयं समीक्ष्य भूमौ पतितं नरोत्तमम्।
अहीयमानं च बलेन कौरवं निशाम्य भेदं सुदृढस्य वर्मणः ॥६९॥
ततो मुहूर्तादुपलभ्य चेतनां प्रमृज्य वक्त्रं रुधिराक्तमात्मनः।
धृतिं समालंब्य विवृत्य लोचने बलेन संस्तभ्य वृकोदरः स्थितः ॥७०॥ ३३१२

इतिश्रीमहाभारते शतसाहस्र्यां संहितायां० शल्यपर्वांतर्गतगदापर्वणि गदायुद्धे सप्तपंचाशत्तमोऽध्यायः॥५७॥

सञ्जय उवाच— समुदीर्णं ततो दृष्ट्वा संग्रामं कुरुमुख्ययोः।
अथाब्रवीदर्जुनस्तु वासुदेवं यशस्विनम् ॥१॥
अनयोर्वीरयोर्युद्धे को ज्यायान् भवतो मतः।
कस्य वा को गुणो भूयानेतद्वद जनार्दन ॥२॥

मतवाला, हाथी तालावसे निकलता है। (६४-६५)

महारथ शिक्षित दुर्योधनने उठकर आगे खडे हुये, भीमसेनके शरीरमें एक गदा मारी उसके लगते ही भीमसेन मूर्च्छित होकर पृथ्वीमें गिर पडे, तब दुर्योधन सिंहके समान गर्जने लगे, और फिर एक गदासे वज्रके समान दृढ भीमसेनका कवच तोड दिया, उस समय आकाशमें खडे देवता और अप्सरा फूल वर्षाने लगे। और प्रशंसा करने लगे। पुरुषश्रेष्ठ भीमसेनको कवच रहित पृथ्वीमें पडा देख सोमक, सृञ्जय और पाण्डवोंको बहुत भय हुआ। अनन्तर एक मुहूर्तमें भीमसेनने चैतन्य होकर रुधिरमें भीगा मूंह पोंछा; आंख खोलीं और सावधान होकर बलसे खडे हुए। (६६-७०) [३३१२]

शल्यपर्वमें सतावन अध्याय समाप्त।

शल्यपर्वमें अठावन अध्याय।

सञ्जय बोले, हे राजन् धृतराष्ट्र! जब इन दोनों कुरुकुलश्रेष्ठ वीरोंका इस प्रकार घोर युद्ध होने लगा तब अर्जुनने यशस्वी कृष्णसे पूछा। हे जनार्दन! ये दोनों वीर युद्ध कर रहे हैं, आपकी सम्मतिसे इन दोनोंमेंसे कौन अधिक श्रेष्ठ है? और किसमें कौन गुण अधिक है? सो आप हमसे कहिये। (१-२)

वासुदेव उवाच—उपदेशोऽनयोस्तुल्यो भीमस्तु बलवत्तरः।
कृती यत्नपरस्त्वेष धार्तराष्ट्रो वृकोदरात् ॥ ३ ॥
भीमसेनस्तु धर्मेण युध्यमानो न जेष्यति।
अन्यायेन तु युध्यन्वै हन्यादेव सुयोधनम् ॥ ४ ॥
मायया निर्जिता देवैरसुरा इति नः श्रुतम्।
विरोचनस्तु शक्रेण मायया निर्जितः स वै ॥ ५ ॥
मायया चाक्षिपत्तेजो वृत्रस्य बलसूदनः।
तस्मान्मायामयं भीम आतिष्ठतु पराक्रमम् ॥ ६ ॥
प्रतिज्ञातं च भीमेन द्यूतकाले धनंजय।
ऊरू भेत्स्यामि ते संख्ये गदयेति सुयोधनम् ॥ ७ ॥
सोऽयं प्रतिज्ञां तां चापि पालयत्वरिकर्षणः।
मायाविनं तु राजानं माययैव निकृन्ततु ॥ ८ ॥
यद्येष बलमास्थाय न्यायेन प्रहरिष्यति।
विषमस्थस्ततो राजा भविष्यति युधिष्ठिरः ॥ ९ ॥
पुनरेव तु वक्ष्यामि पांडवेय निबोध मे।
धर्मराजापराधेन भयं नः पुनरागतम् ॥ १० ॥
कृत्वा हि सुमहत्कर्म हत्वा भीष्ममुखान्कुरून्।

श्रीकृष्ण बोले, हे अर्जुन! इन दोनोंको विद्या समानही है, परन्तु भीमसेनमें बल अधिक है। तैसे ही दुर्योधन भीमसेनसे चतुर और सावधान अधिक है, इसलिये भीमसेन धर्मयुद्धसे इसको न मार सकेंगे, परन्तु यदि अन्यायसे युद्ध करें तो अवश्य ही जीतेंगे, हमने सुना है कि देवतोंने छलसे अनेक दानवोंको जीता है, इन्द्रने विरोचनको छलसे मारा था, वृत्रासुरका तेज छलसे नष्ट किया था, इसलिये भीमसेन भी छलसे युद्ध करें। (३–६)

हे अर्जुन! भीमसेनने जुवेके समय भी प्रतिज्ञा करी थी, कि मैं गदासे तेरी जङ्घा तोडूंगा, सो अब शत्रुनाशन भीम छली दुर्योधनके सङ्ग छल करके अपनी प्रतिज्ञाको पालन करें। यदि भीमसेन केवल अपने बलके भरोसे न्यायसे युद्ध करते रहेंगे, तो राजा युधिष्ठिरको घोर आपत्तिमें पडना पडेगा। हे पाण्डव! अब हम तुमसे और वर्णन करते हैं, सो सुनो धर्मराज युधिष्ठिरके अपराधसे अब हम लोगोंको फिर भी घोर भयमें पडना हुआ, भीष्मादिक वीरोंको मारकर घोर

जयः प्राप्तो यशः प्राग्र्यं वैरं च प्रतियातितम् ॥ ११ ॥
तदेवं विजयः प्राप्तः पुनः संशयितः कृतः ।
अबुद्धिरेषा महती धर्मराजस्य पाण्डव ॥ १२ ॥
यदेकविजये युद्धं पाणितं घोरमीदृशम् ।
सुयोधनः कृती वीर एकायनगतस्तथा ॥ १३ ॥
अपि चोशनसा गीतः श्रूयतेऽयं पुरातनः ।
श्लोकस्तत्त्वार्थसहितस्तन्मे निगदतः शृणु ॥ १४ ॥
पुनरावर्तमानानां भग्नानां जीवितैषिणाम् ।
भेतव्यमरिशेषाणामेकायनगता हि ते ॥ १५ ॥
साहसोत्पतितानां च निराशानां च जीविते ।
न शक्यमग्रतः स्थातुं शक्रेणापि धनंजय ॥ १६ ॥
सुयोधनमिमं भग्नं हतसैन्यं ह्रदं गतम् ।
पराजितं वनप्रेप्सुं निराशं राज्यलंभने ॥ १७ ॥
को न्वेष संयुगे प्राज्ञः पुनर्द्वंद्वे समाह्वयेत् ।
अपि नो निर्जितं राज्यं न हरेत सुयोधनः ॥ १८ ॥

कर्म करके जय और उत्तम यश प्राप्त किया, तथा वैर शान्त किया, परन्तु अब वही प्राप्त हुई विजय फिर सन्देहमें पड गई। धर्मराज युधिष्ठिरने यह बडी भूल करी जो दुर्योधनसे यह कह दिया कि, तुम हममेंसे एकको मारकर राजा होजाओगे, दुर्योधन चतुर, वीर और एकायन गत अर्थात् मरने या विजय होनेकी निश्चय कर चुका है। (७-१३)

हे अर्जुन! शुक्रने अपनी नीतिमें जो कुछ लिखा है, सो तुम सुनो। जो शत्रु भागकर फिर युद्ध करनेको लौटे और जो बचनेको इच्छा न करे और जो मरते मरते शत्रुके कुलसे शेष रह जाय उससे सदा डरता रहै, क्यों कि इसे अपने हारने और मरनेका कुछ भय नहीं होता। हे अर्जुन! केवल साहससे युद्ध करते हुए और जीनेकी आशा छोडकर लडते हुये शत्रुके आगे इन्द्र भी नहीं लड सक्ता। (१४-१६)

यह दुर्योधन युद्ध छोडकर भागा है, तालावमें छिपा था, युद्धमें हारकर वनमें जानेकी इच्छा करता था, इसकी सब सेना मारी गई थी, ऐसा कौन बुद्धिमान होगा जो ऐसे शत्रुको द्वन्द्व युद्ध करनेको बुलावे? अब हमको यह सन्देह होगया है, कि ऐसा न हो कि दुर्योधन हमारा जीता हुवा राज्य छीन

यस्त्रयोदशवर्षाणि गदया कृतनिश्रमः।
चरत्यूर्ध्वं च तिर्यक् च भीमसेनजिघांसया ॥ १९ ॥
एनं चेन्न महाबाहुरन्यायेन हनिष्यति।
एष वः कौरवो राजा धार्तराष्ट्रो भविष्यति ॥ २० ॥
धनंजयस्तु श्रुत्वैतत्केशवस्य महात्मनः।
प्रेक्षतो भीमसेनस्य सव्यमूरुमताडयत् ॥ २१ ॥
गृह्य संज्ञां ततो भीमो गदया व्यचरद्रणे।
मंडलानि विचित्राणि यमकानीतराणि च ॥ २२ ॥
दक्षिणं मंडलं सव्यं गोमूत्रकमथापि च।
व्यचरत्पाण्डवो राजन्नरिं संमोहयन्निव ॥ २३ ॥
तथैव तव पुत्रोऽपि गदामार्गविशारदः।
व्यचरल्लघु चित्रं च भीमसेनजिघांसया ॥ २४ ॥
आधुन्वन्तौ गदे घोरे चन्दनागुरुरूषिते।
वैरस्यान्तं परिप्सन्तौ रणे क्रुद्धाविवान्तकौ ॥ २५ ॥
अन्योन्यं तौ जिघांसन्तौ प्रवीरौ पुरुषर्षभौ।
युयुधाते गरुत्मन्तौ यथा नागामिषैषिणौ ॥ २६ ॥
मण्डलानि विचित्राणि चरतोर्नृपभीमयोः।

लेः क्यों कि इसने तेरह वर्षतक भीमसेनको मारनेके लिये नीचे ऊपर घूमकर गदा युद्धका अभ्यास किया है, यदि महाबाहु भीमसेन अन्यायसे नहीं युद्ध करेंगे, तो अवश्य ही दुर्योधन राजा होजायगा अर्थात् भीमसेन मारे जांयगे। (१७—२०)

महात्मा श्रीकृष्णके ऐसे वचन सुन अर्जुनने भीमसेनको दिखलाकर अपनी बाई जांघमें हाथ मारा। उस चिन्हको देखकर भीमसेन भी चैतन्य होगए, और गदा लेकर युद्धमें अनेक प्रकारके विचित्र यमक, अयमक, दक्षिण, वाम और गोमूत्र आदि अनेक मण्डलोंसे घूमते हुये, दुर्योधनको मोहित करने लगे। उसी प्रकार तुम्हारे पुत्र दुर्योधन भी भीमसेनके लिये अनेक प्रकारकी गतियोंसे घूमने लगे। ये दोनों वीर यमराजके समान क्रोध करके वैर समाप्त करनेके लिये चन्दन और अगर लगी गदाको घुमाने लगे। (२१-२५)

दोनों वीर एक दूसरेको मारनेके लिये इस प्रकार लडने लगे। जैसे दो गरुड एक सांपका मांस खानेके लिये

गदासम्पातजास्तत्र प्रजज्ञुः पावकार्चिषः ॥ २७ ॥
समं प्रहरतोस्तत्र शूरयोर्बलिनोर्मृधे ।
क्षुब्धयोर्वायुना राजन् द्वयोरिव समुद्रयोः ॥ २८ ॥
तयोः प्रहरतोस्तुल्यं मत्तकुंजरयोरिव ।
गदानिर्घातसंह्रादः प्रहाराणामजायत ॥ २९ ॥
तस्मिंस्तदा संप्रहारे दारुणे संकुले भृशम् ।
उभावपि परिश्रान्तौ युध्यमानावरिन्दमौ ॥ ३० ॥
तौ मुहूर्तं समाश्वस्य पुनरेव परन्तप ।
अभ्यहारयतां क्रुद्धौ प्रगृह्य महती गदे ॥ ३१ ॥
तयोः समभवद्युद्धं घोररूपमसंवृतम् ।
गदानिपातै राजेन्द्र तक्षतो वै परस्परम् ॥ ३२ ॥
समरे प्रद्रुतौ तौ तु वृषभाक्षौ तरस्विनौ ।
अन्योन्यं जघ्नतुर्वीरौ पङ्कस्थौ महिषाविव ॥ ३३ ॥
जर्जरीकृतसर्वाङ्गौ रुधिरेणाभिसंप्लुतौ ।
ददृशाते हिमवति पुष्पिताविव किंशुकौ ॥ ३४ ॥
दुर्योधनस्तु पार्थेन विवरे संप्रदर्शिते ।
ईषदुन्मिषमाणस्तु सहसा प्रससार ह ॥ ३५ ॥
तमभ्याशगतं प्राज्ञो रणे प्रेक्ष्य वृकोदरः ।

युद्ध करते हैं, दोनों चारों ओर घूमकर गदा घुमाने लगे। गदामें गदा लगनेसे आगके पतङ्गे निकलने लगे। दोनों वीर उस घोर युद्धमें इस प्रकार उछलने लगे। जैसे वायु लगनेसे दो समुद्र। दोनोंके प्रहार समान ही चलते थे, इन दोनों मतवाले हाथियोंके समान लडते हुये वीरोंकी गदाका शब्द गिरती हुई बिजलीके समान सुनाई देता था। थोडे समयमें दोनों शत्रुनाशन वीर लडाई करते करते थक गए। और बैठ गए, फिर क्षण भरमें खडे होकर क्रोधमें भरकर गदा लेकर घोर युद्ध करने लगे। (२६-३०)

हे राजेन्द्र! ये दोनों बैलके समान आंखवाले वीर घोर युद्ध करने लगे। अनन्तर दोनोंके शरीर फूटने और रुधिरमें भीगनेके कारण ऐसे दीखने लगे जैसे हिमाचल पर फूले हुये टेसू। अनन्तर भीमसेनने दुर्योधनको छल करनेके लिये थोडा मार्ग दिया। तब भीमसेन उनके पीछे दौडे। और वेगसे एक गदा

अवाक्षिपद्गदां तस्मिन्वेगेन महता बली ॥ ३६ ॥
आक्षिपन्तं तु तं दृष्ट्वा पुत्रस्तव विशाम्पते ।
अवासर्पत्ततः स्थानात्सा मोघा न्यपतद्भुवि ॥ ३७ ॥
मोक्षयित्वा प्रहारं तं सुतस्तव सुसंभ्रमात् ।
भीमसेनं च गदया प्राहरत्कुरुसत्तम ॥ ३८ ॥
तस्य विस्यन्दमानेन रुधिरेणामितौजसः ।
प्रहार गुरुपाताच्च मूर्छेव समजायत ॥ ३९ ॥
दुर्योधनो न तं वेद पीडितं पाण्डवं रणे ।
धारयामास भीमोऽपि शरीरमतिपीडितम् ॥ ४० ॥
अमन्यत स्थितं ह्येनं प्रहरिष्यन्तमाहवे ।
अतो न प्राहरत्तस्मै पुनरेव तवात्मजः ॥ ४१ ॥
ततो मुहूर्तमाश्वस्य दुर्योधनमुपस्थितम् ।
वेगेनाभ्यपतद्राजन् भीमसेनः प्रतापवान् ॥ ४२ ॥
तमापतन्तं संप्रेक्ष्य संरब्धममितौजसम् ।
मोघमस्य प्रहारन्तं चिकीर्षुर्भरतर्षभ ॥ ४३ ॥
अवस्थाने मतिं कृत्वा पुत्रस्तव महामनाः ।
इयेषोत्पतितुं राजञ्छलयिष्यन् वृकोदरम् ॥ ४४ ॥

फेंककर मारी। तब दुर्योधनने हटकर उस गदाको वृथा कर दिया,वह गदा पृथ्वीमें गिर पडी। (३१-३७)

अनन्तर दुर्योधनने घूमकर बलसे एक गदा भीमसेनके शरीरमें मारी। तब महातेजस्वी भीमसेनके शरीरसे रुधिर बहने लगा और उन्हे मूर्च्छा सी आगई। परन्तु दुर्योधन यह न समझ सके कि भीमसेन अत्यन्त व्याकुल होगये हैं। उन्होंने यही जाना कि हमारे गदा मारना चाहते हैं। इसी लिये उन्होंने दूसरी गदा नहीं मारी। भीमसेनने भी बहुत कष्ट करके अपने शरीरको स्थिर किया, और थोडे ही समयमें सावधान होकर प्रतापी भीमसेन गदा लेकर वेगसे दुर्योधनको ओर दौडे। (३८-४२)

महातेजस्वी भीमसेनको अपनी ओर आते देख दुर्योधन उनकी उस गदाको नष्ट करनेके लिये इधर उधरको चलने लगे। और फिर छल कर भीमसेनको मारने दौडे। भीमसेनने भी दुर्योधनके मनकी बात जान ली और उसे छल करते देख सिंहके समान गर्जकर उनकी ओर दौडे। इतनेमें दुर्योधन भी उनके

अभ्युद्यच्छद्भीमसेनस्तु राज्ञस्तस्य चिकीर्षितम् ।
अथास्य समभिद्रुत्य समुत्क्रुश्य च सिंहवत् ॥ ४५ ॥
सृत्वा वञ्चयतो राजन्पुनरेवोत्पतिष्यतः ।
ऊरुभ्यां प्राहिणोद्राजन् गदां वेगेन पांडवः ॥ ४६ ॥
सा वज्रनिष्पेषसमा प्रहिता भीमकर्मणा ।
ऊरू दुर्योधनस्याथ बभञ्ज प्रियदर्शनौ ॥ ४७ ॥
स पपात नरव्याघ्रो वसुधामनुनादयन् ।
भग्नोरुर्भीमसेनेन पुत्रस्तव महीपते ॥ ४८ ॥
ववुर्वाताः सनिर्घाताः पांशुवर्षं पपात च ।
चचाल पृथिवी चापि सवृक्षक्षुपपर्वता ॥ ४९ ॥
तस्मिन्निपतिते वीरे पत्यौ सर्वमहीक्षिताम् ।
महास्वना पुनर्दीप्ता सनिर्घाता भयंकरी ॥ ५० ॥
पपात चोल्का महती पतिते पृथिवीपतौ ।
तथा शोणितवर्षं च पांशुवर्षं च भारत ॥ ५१ ॥
ववर्ष मघवांस्तत्र तव पुत्रे निपातिते ।
यक्षाणां राक्षसानां च पिशाचानां तथैव च ॥ ५२ ॥
अन्तरिक्षे महानादः श्रूयते भरतर्षभ ।
तेन शब्देन घोरेण मृगाणामथ पक्षिणाम् ॥ ५३ ॥
जज्ञे घोरतरः शब्दो बहूनां सर्वतो दिशम् ।
ये तत्र वाजिनः शेषा गजाश्च मनुजैः सह ॥ ५४ ॥
मुमुचुस्ते महानादं तव पुत्रे निपातिते ।

शिरमें गदा मारनेको उछले। हे राजन्! जैसे ही दुर्योधन उनके शिरमें गदा मारनेको उछले, वैसे ही भीमसेनने वेगसे उनकी जांघमें गदा मारी। वह वज्रके समान भीमसेनकी गदा लगते ही दुर्योधनकी अत्यन्त सुन्दर दोनों जङ्घा टूट गई। (४३—४७)

हे महाराज! जङ्घा टूटते ही तुम्हारे पुत्र पृथ्वीमें शब्द करते हुए गिर पडे, उस समय भयानक वायु चलने लगा, बिजली गिरी, आकाशसे धूलि और रुधिर बर्षने लगा, इन्द्र, यक्ष राक्षस और पिशाच आकाशमें गर्जने लगे। भयानक पक्षी और हरिन घोर शब्द करने लगे, पाण्डवोंकी औरके बचे हुये हाथी, घोडे और वीर गर्जने लगे। दुर्योधनको

भेरीशङ्खमृदङ्गानामभवच्च स्वनो महान् ॥ ५५ ॥
अन्तर्भूमिगतश्चैव तव पुत्रे निपातिते।
बहुपादैर्बहुभुजैः कबंधैर्घोरदर्शनैः ॥ ५६ ॥
नृत्यद्भिर्भयदैर्व्याप्ता दिशस्तत्राभवन्नृप।
ध्वजवन्तोऽस्त्रवन्तश्च शस्त्रवन्तस्तथैव च ॥ ५७ ॥
प्राकम्पन्त ततो राजंस्तव पुत्रे निपातिते।
ह्रदाः कूपाश्च रुधिरमुद्वेमुर्नृपसत्तम। ॥ ५८ ॥
नद्यश्च सुमहावेगाः प्रतिस्रोतोवहाऽभवन्।
पुल्लिंगा इव नार्यस्तु स्त्रीलिङ्गाः पुरुषाऽभवन् ॥ ५९ ॥
दुर्योधने तदा राजन्पतिते तनये तव।
दृष्ट्वा तानद्भुतोत्पातान् पञ्चालाः पाण्डवैः सह ॥६०॥
आविग्नमनसः सर्वे बभूवुर्भरतर्षभ।
ययुर्देवा यथाकामं गन्धर्वाप्सरसस्तथा ॥ ६१ ॥
कथयन्तोऽद्भुतं युद्धं सुतयोस्तव भारत।
तथैव सिद्धा राजेन्द्र तथा वातिकचारणाः ॥ ६२ ॥
नरसिंहौ प्रशंसन्तौ विप्रजग्मुर्यथागतम् ॥ ६३ ॥ [३३७५]

इतिश्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यपर्वान्तर्गतगदापर्वणि दुर्योधनवधे अष्टपञ्चाशत्तमोऽध्यायः॥ ५८ ॥

सञ्जय उवाच— तं पातितं ततो दृष्ट्वा महाशालमिवोद्गतम्।

गिरा हुआ देख पाण्डवोंकी सेनामें शङ्ख, भेर, मृदङ्ग, बजने लगे। अनेक देवता आकाशमें बाजे बजाने लगे, चारों ओर ध्वजा और शस्त्र लेकर अनेक पैर और हाथवाले भयानक रूपवाले और भय देनेवाले कबन्ध घूमने लगे। (४८-५७)

हे राजन्! कुए, तलाव और नदियोंके सब स्रोतोंमें रुधिर बहने लगा। पुरुष, स्त्री और स्त्री पुरुषोंके समान दिखाई देने लगे। इन घोर उत्पातोंको देखकर पाञ्चाल और पाण्डव बहुत घबड़ाए। हे राजन्! देवता, गन्धर्व, अप्सरा, सिद्ध और चारण इस ही युद्धका वर्णन करते और दोनों पुरुषसिंहोंकी प्रशंसा करते हुये अपने घरको चले गये। (५८—६३) [३३७५]

शल्यपर्वमें अठावन अध्याय समाप्त।

शल्यपर्वमें उनसाठ अध्याय।

सञ्जय बोले, हे महाराज! दुर्योधनको कटे हुए शाल वृक्षके समान

प्रहृष्टमनसः सर्वे ददृशुस्तत्र पांडवाः ॥ १ ॥
उन्मत्तमिव मातङ्गं सिंहेन विनिपातितम् ।
ददृशुर्हृष्टरोमाणः सर्वे ते चापि सोमकाः ॥ २ ॥
ततो दुर्योधनं हत्वा भीमसेनः प्रतापवान् ।
पातितं कौरवेन्द्रं तमुपगम्येदमब्रवीत ॥ ३ ॥
गौर्गौरिति पुरा मन्द द्रौपदीमेकवाससम् ।
यत्सभायां हसन्नस्मांस्तदा वदसि दुर्मते ॥ ४ ॥
तस्यावहासस्य फलमद्य त्वं समवाप्नुहि ।
एवमुक्त्वा स वामेन पदा मौलिमुपास्पृशत् ॥ ५ ॥
शिरश्च राजसिंहस्य पादेन समलोडयत् ।
तथैव क्रोधसंरक्तो भीमः परबलार्दनः ॥ ६ ॥
पुनरेवाब्रवीद्वाक्यं यत्तच्छृणु नराधिप ।
येऽस्मान्पुरोपनृत्यंत मूढा गौरिति गौरिति ॥ ७ ॥
तान्वयं प्रतिनृत्यामः पुनर्गौरिति गौरिति ।
नास्माकं निकृतिर्वह्निर्नाक्षद्यूतं न वञ्चना ।
स्वबाहुबलमाश्रित्य प्रबाधामो वयं रिपून् ॥ ८ ॥
सोऽवाप्य वैरस्य परस्य पारं वृकोदरः प्राह शनैः प्रहस्य ।
युधिष्ठिरं केशवसृञ्जयांश्च धनञ्जयं माद्रवतीसुतौ च ॥ ९ ॥

पृथ्वीमें पडा हुवा देख पाण्डव अत्यन्त प्रसन्न हुए, जैसे मतवाला हाथी सिंहसे मरकर पृथ्वीमें गिर जाता है, ऐसेही दुर्योधनको पडा देख सोमकवंशी क्षत्री अत्यन्त प्रसन्न हुये। (१—२)

हे महाराज ! पृथ्वीमें पडे हुए दुर्योधनके पास जाकर प्रतापवान् भीमसेन बोले, रे दुर्बुद्धे ! रे मूर्ख ! तैंने एक वस्त्र-धारिणी द्रौपदीको सभामें बुलाकर हंसकर हमको बैल बैल कहा था, यह उसी हंसनेका फल तुझको प्राप्त हुआ। हे महाराज ! ऐसा कहकर भीमसेनने अपना बायां पैर दुर्योधनके शिरपर रख दिया, फिर शत्रुनाशन भीम राजसिंह दुर्योधनके शिरको अपने बायें पैरसे ठकराते हुवे कहने लगे। (३—५)

जो मूर्ख पहिले हमको बैल बैल कहकर नाचते थे, अब हम भी उन्हें बैल बैल कह कर बार बार नाचते हैं। हम लोग, छल अग्नि, फांसे जुआ और कपट से किसीको जीतना नहीं चाहते परन्तु अपने बाहुबलसे शत्रुओंको जीतते हैं।

*

रजस्वलां द्रौपदीमानयन्ये ये चाप्यकुर्वत सदस्यवस्त्राम् ।
तान् पश्यध्वं पाण्डवैर्धार्तराष्ट्रान् रणे हतांस्तपसा याज्ञसेन्याः ॥१०॥
ये नः पुरा षंढतिलानवोचन् क्रूरा राज्ञो धृतराष्ट्रस्य पुत्राः ।
ते नो हताः सगणाः सानुबन्धाः कामं स्वर्गं नरकं वा पतामः ॥११॥
पुनश्च राज्ञः पतितस्य भूमौ स तां गदां स्कन्धगतां प्रगृह्य ।
वामेन पादेन शिरः प्रमृद्य दुर्योधनं नैकृतिकं न्यवोचत ॥ १२ ॥
हृष्टेन राजन्कुरुसत्तमस्य क्षुद्रात्मना भीमसेनेन पादम् ।
दृष्ट्वा कृतं मूर्धनि नाभ्यनन्दन् धर्मात्मानः सोमकानां प्रबर्हाः ॥१३॥
तव पुत्रं तथा हत्वा कत्थमानं वृकोदरम् ।
नृत्यमानं च बहुशो धर्मराजोऽब्रवीदिदम् ॥ १४ ॥
गतोऽसि वैरस्यानृण्यं प्रतिज्ञा पूरिता त्वया ।
शुभेनाथाशुभेनैव कर्मणा विरमाधुना ॥ १५ ॥
मा शिरोऽस्य पदा मर्दीर्माधर्मस्तेऽतिगो भवेत् ।
राजा ज्ञातिर्हतश्चायं नैतन्न्याय्यं तवानघ ॥ १६ ॥

हे राजन्! इस वैरको समाप्त करके भीमसेन हंसकर युद्धिष्ठिर, श्रीकृष्ण, अर्जुन, नकुल, सहदेव और धृष्टद्युम्न आदि पाञ्चालोंसे बोले, जिन मूर्खोंने रजस्वला द्रौपदीको सभामें बुलाकर वस्त्र खींचा था, उन धृतराष्ट्रके पुत्रोंको पाण्डवोंने युद्धमें मारा। देखो यह द्रौपदीके तप का फल है, जिन दुष्ट धृतराष्ट्रके पुत्रोंने हमें पहिले नपुंसक कहा था, उनको हमने बन्धु और सेनाके सहित मारा, अब हम चाहे नरकमें जांय और चाहे स्वर्गमें (६—११)

हे महाराज! अनन्तर भीमसेन फिर दुर्योधनके पास जाकर उनके कन्धेपर रक्खी हुई गदा हाथसे पकडकर और बायां पैर शिरपर रखकर कहा कि यही छली दुर्योधन है। क्षुद्र भीमसेनको कुरुकुलश्रेष्ठ दुर्योधनके शिरपर बायां पैर रखते देख धर्मात्मा सोमकवंशी क्षत्रिय प्रसन्न न हुये। (१२-१३)

अनन्तर भीमसेनको बार बार नाचते और दुर्योधनको इस दशामें पडे देख महाराज युधिष्ठिर भीमसेनसे बोले।

हे पापरहित भीम! तुमने धर्म अथवा अधर्मसे वैर समाप्त किया और अपनी प्रतिज्ञा पूरी करी अब दुर्योधनके पाससे हट जावो, यह राजा और अपने वंशका मनुष्य है इसके शिर पर पैर देना उचित नहीं है, इसके शिर पर पैर मत देवो, घोर अधर्ममें मत पडो;

एकादशचमूनाथं कुरूणामधिपं तथा ।
मा स्प्राक्षीर्भीम पादेन राजानं ज्ञातिमेव च ॥ १७ ॥
हतबंधुर्हतामात्यो भ्रष्टसैन्यो हतो मृधे ।
सर्वाकारेण शोच्योऽयं नावहास्योऽयमीश्वरः ॥ १८ ॥
विध्वस्तोऽयं हतामात्यो हतभ्राता हतप्रजः ।
उत्सन्नपिण्डो भ्राता च नैतन्न्याय्यं कृतं त्वया ॥१९॥
धार्मिको भीमसेनोऽसावित्याहुस्त्वां पुरा जनाः ।
स कस्माद्भीमसेन त्वं राजानमधितिष्ठसि ॥ २० ॥
इत्युक्त्वा भीमसेनं तु साश्रुकंठो युधिष्ठिरः ।
उपसृत्याब्रवीद्दीनो दुर्योधनमरिन्दमम् ॥ २१ ॥
तात मन्युर्न ते कार्यो नात्मा शोच्यस्त्वया तथा ।
नूनं पूर्वकृतं कर्म सुघोरमनुभूयते ॥ २२ ॥
धात्रोपदिष्टं विषमं नूनं फलमसंस्कृतम् ।
यद्वयं त्वां जिघांसामस्त्वं चास्मान्कुरुसत्तम ॥ २३ ॥
आत्मनो ह्यपराधेन महद्व्यसनमीदृशम् ।
प्राप्तवानसि यल्लोभान्मदाद्बाल्याच्च भारत ॥ २४ ॥
घातयित्वा वयस्यांश्च भ्रातॄनथ पितॄंस्तथा ।

यह ग्यारह अक्षौहिणियोंका स्वामी और कुरुकुलका महाराज था। इसके बान्धव, मन्त्री, सेना, भाई और पुत्र सब युद्धमें मारे गये, यह हमारा सपिण्ड ही नहीं किन्तु साक्षात भाई ही है। इसके सङ्ग ऐसा करना घोर अधर्म है; ये महाराज आज सब प्रकार सोचनीय दशामें पडे हैं, पहिले सब मनुष्य कहते थे कि भीमसेन धर्मात्मा हैं, सो तुम आज ऐसा अधर्म क्यों कर रहे हो? १४-२०

हे महाराज! भीमसेनसे ऐसा कह कर रोते हुए युधिष्ठिर शत्रुनाशन दुर्योधनके पास जाकर अत्यन्त दीन होकर कहने लगे। हे प्यारे दुर्योधन भाई! तुम कुछ क्रोध मत करना और कुछ शोच भी नहीं करना, क्यों कि पहिले किये हुवे पापोंका फल अवश्य ही होता है, मनुष्यकी प्रारब्धमें लिखा फल भोगना ही पडता है? हे कुरुकुलश्रेष्ठ! यदि यह बात सत्य न होती, तो क्या तुम हमसे वैर करते? हे भारत! तुम अपने अपराधसे, लोभसे और बालबुद्धिसे इस घोर आपत्तिमें पडे। तुम मित्र, भाई, पिता, पुत्र और पोते आदिकोंका नाश

पुत्रान्पौत्रांस्तथा चान्यांस्ततोऽसि निधनं गतः॥ २५ ॥
तवापराधादस्माभिर्भ्रातरस्ते निपातिताः।
निहता ज्ञातयश्चापि दिष्टं मन्ये दुरत्ययम् ॥ २६ ॥
आत्मा न शोचनीयस्ते श्लाघ्यो मृत्युस्तवानघ।
वयमेवाधुना शोच्याः सर्वावस्थासु कौरव ॥ २७ ॥
कृपणं वर्तयिष्यामस्तैर्हीना बंधुभिः प्रियैः।
भ्रातृणां चैव पुत्राणां तथा वै शोकविह्वलाः ॥ २८ ॥
कथं द्रक्ष्यामि विधवा वधूः शोकपरिप्लुताः।
त्वमेकः सुस्थितो राजन् स्वर्गे ते निलयो ध्रुवः॥ २९ ॥
वयं नरकसंज्ञं वै दुःखं प्राप्स्याम दारुणम्।
स्नुषाश्च प्रस्नुषाश्चैव धृतराष्ट्रस्य विह्वलाः।
गर्हयिष्यंति नो नूनं विधवाः शोककर्शिताः ॥ ३० ॥

सञ्जय उवाच— एवमुक्त्वा सुदुःखार्तो निशश्वास स पार्थिवः।
विललाप चिरं चापि धर्मपुत्रो युधिष्ठिरः ॥ ३१ ॥ [३४०६]

इतिश्रीमहाभारते शतसाहस्र्यां० शल्यपर्वांतर्गतगदापर्वणि युधिष्ठिरविलापे एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

धृतराष्ट्र उवाच- अधर्मेण हतं दृष्ट्वा राजानं माधवोत्तमः।
किमब्रवीत्तदा सूत बलदेवो महाबलः ॥ १ ॥

कराके अब मरे तुम्हारे अपराधसे तुम्हारे भाई और जातिके सब लोग मारे गये। (२१-२६)

हे पापरहित कौरव ! अब हमैं तुम्हारा कुछ शोच नहीं है, परन्तु अपना ही भारी शोच है। हाय ! अब हम अपने प्यारे बन्धुवोंसे हीन होकर जगत्में शोक कैसे भोगेंगे ? हाय ! हम शोकसे रोती हुई भाई और बेटोंकी विधवा स्त्रियोंको कैसे देखेंगे ? हे राजन्! तुम्हें धन्य है, जो सुखसे स्वर्गमें वास करोगे और हम इस नरकमें रहकर अनेक प्रकारके दुःख उठावेंगे। राजा धृतराष्ट्रके पुत्र और पोतोंकी विधवा स्त्री शोकसे व्याकुल होकर हमारी निन्दा करेंगी। सञ्जय बोले, ऐसा कहकर महाराज धर्मराज युधिष्ठिर ऊंचे सांस लेकर दुःखसे व्याकुल होकर बहुत समयतक ऊंचे स्वरसे रोते रहे। (२७-३१)

शल्यपर्वमें उनसाठ अध्याय समाप्त। [३४०६]

शल्यपर्वमें साठ अध्याय।

राजा धृतराष्ट्र बोले, हे सञ्जय ! हमारे पुत्रको अधर्मसे मरा हुआ देख महापराक्रमी गदायुद्धको विशेष रूपसे

गदायुद्धविशेषज्ञो गदायुद्धविशारदः ।
कृतवान् रौहिणेयो यत्तन्ममाचक्ष्व संजय ॥ २ ॥

सञ्जय उवाच— शिरस्यभिहतं दृष्ट्वा भीमसेनेन ते सुतम् ।
रामः प्रहरतां श्रेष्ठश्चुक्रोध बलवद्बली ॥ ३ ॥
ततो मध्ये नरेन्द्राणामूर्ध्वबाहुर्हलायुधः ।
कुर्वन्नार्तस्वरं घोरं धिग्धिग्भीमेत्युवाच ह ॥ ४ ॥
अहो धिग्यदधो नाभेः प्रहृतं धर्मविग्रहे ।
नैतद्दृष्टं गदायुद्धे कृतवान्यद्वृकोदरः ॥ ५ ॥
अधो नाभ्या न हन्तव्यमिति शास्त्रस्य निश्चयः ।
अयं त्वशास्त्रविन्मूढः स्वच्छन्दात्संप्रवर्तते ॥ ६ ॥
तस्य तत्तद् ब्रुवाणस्य रोषः समभवन्महान् ।
ततो राजानमालोक्य रोषसंरक्तलोचनः ॥ ७ ॥
बलदेवो महाराज ततो वचनमब्रवीत् ।
न चैष पतितः कृष्ण केवलं मत्समोऽसमः ॥ ८ ॥
आश्रितस्य तु दौर्बल्यादाश्रयः परिभर्त्स्यते ।
ततो लाङ्गलमुद्यम्य भीममभ्यद्रवद्बली ॥ ९ ॥
तस्योर्ध्वबाहोः सदृशं रूपमासीन्महात्मनः ।

जाननेवाले रोहिणीपुत्र बलदेवने क्या किया और क्या कहा ? सो हमसे कहो (१-२)

सञ्जय बोले, राजा दुर्योधनके शिर पर भीमसेनको पैर रखते देख बलवान् बलरामको महा क्रोध हुवा । फिर शस्त्र चलानेवालोंमें श्रेष्ठ हलधारी बलदेव राजोंके बीचमें हाथ उठाकर ऊंचे स्वरसे बोले । भीमसेनको धिक्कार है, भीमसेनको धिक्कार है, भीमसेनको बारबार धिक्कार है, हमने गदायुद्धके शास्त्रमें कहीं ऐसा नहीं देखा, जैसा अधर्म युद्ध में भीमसेनने किया, नाभीके नीचे शस्त्र न मारे यह शास्त्रका निश्चय है, परन्तु इस मूर्खने कुछ शास्त्र नहीं पढा, इसलिये इच्छानुसार जो चाहता है सो कर बैठता है। ३-६

हे राजन् ! ऐसा कहते कहते क्रोधके मारे बलदेवके नेत्र लाल होगये । फिर युधिष्ठिरकी ओर देखकर कृष्णसे बोले, यह असाधारण हमारे समान वीर एकला नहीं गिरा, वरन हम भी इसके सङ्गही गिर गये, क्यों कि जो जिसके आश्रय से रहता है उसके गिरनेसे आश्रयमें भी दोष आजाता है । (७-९)

बहुधा तु विचित्रस्य श्वेतस्येव महागिरेः ॥ १० ॥
तमुत्पतन्तं जग्राह केशवो विनयान्वितः ।
बाहुभ्यां पीनवृत्ताभ्यां प्रयत्नाद्बलवद्बली ॥ ११ ॥
सितासितौ यदुवरौ शुशुभातेऽधिकं तदा ।
नभोगतौ यथा राजंश्चन्द्रसूर्यौ दिनक्षये ॥ १२ ॥
उवाच चैनं संरब्धं शमयन्निव केशवः ।
आत्मवृद्धिर्मित्रवृद्धिर्मित्रमित्रोदयस्तथा ॥ १३ ॥
विपरीतं द्विषत्स्वेतत् षड्विधा वृद्धिरात्मनः ।
आत्मन्यपि च मित्रे च विपरीतं यदा भवेत् ॥ १४ ॥
तदा विद्यान्मनोग्लानिमाशु शान्तिकरो भवेत् ।
अस्माकं सहजं मित्रं पाण्डवाः शुद्धपौरुषाः ॥ १५ ॥
स्वकाः पितृष्वसुः पुत्रास्ते परैर्निकृता भृशम् ।
प्रतिज्ञापालनं धर्मः क्षत्रियस्येह वेद्म्यहम् ॥ १६ ॥

हे महाराज ! ऐसा कहकर बलवान् बलदेव हल उठाकर भीमसेनकी ओर दौडे । उस समय ऊपरको हाथ उठाये हल लिये महात्मा बलदेवका ऐसा रूप दीखने लगा जैसे अनेक धातुयुक्त सफेद पर्वतका । बलदेवको भीमसेनकी ओर वेगसे जाते हुए देख बलवान् श्रीकृष्णने दौडकर अपने लम्बे और मोठे हाथोंसे पकड लिया और हाथ जोडकर विनय करने लगे । उस समय इन दोनों यदुकुलश्रेष्ठ वीरोंकी ऐसी शोभा दीखती थी जैसे सन्ध्या समय आकाशमें उदय हुये सूर्य और चन्द्रमाकी (९-१२)

श्रीकृष्ण बोले, हे पुरुषसिंह ! अपनी वृद्धि, मित्रकी वृद्धि, मित्रके मित्रकी वृद्धि, शत्रुकी हानि, शत्रुके मित्रकी हानि और शत्रुके मित्रके मित्रकी हानि है छः प्रकारकी अपनी वृद्धि समझी जाती हैं, यदि इन छः वृद्धियोंमेंसे अपने मित्रके लिये उलटे फल हो अर्थात् अपनी, अपने मित्रकी और अपने मित्रके मित्रकी हानि हो और शत्रुकी वृद्धि, शत्रुके मित्रकी वृद्धि या शत्रुके मित्रके मित्रकी वृद्धि हो, तो मनको कुछ दुःख होना चाहिये और मनको शान्ति देनेका उपाय करना चाहिये । छलरहित पराक्रमी पाण्डव हमारे स्वभावहीसे मित्र हैं, अर्थात् हमारी फूफीके पुत्र हैं । इनको छलियोंने छल लिया था और हम यह भी जानते हैं कि अपनी प्रतिज्ञा पालन करना ही क्षत्रियोंका धर्म है । भीमसेनने पहिले ही सभामें प्रतिज्ञा

सुयोधनस्य गदया भंक्ताऽस्म्यूरू महाहवे।
इति पूर्वं प्रतिज्ञातं भीमेन हि सभातले ॥ १७ ॥
मैत्रेयेणाभिशप्तश्च सर्वमेव महर्षिणा।
ऊरू ते भेत्स्यते भीमो गदयेति परन्तप ॥ १८ ॥
अतो दोषं न पश्यामि मा क्रुद्धस्त्वं प्रलम्बहन्।
यौनैः स्वैः सुखहार्दैश्च सम्बन्धैः सह पाण्डवैः ॥१९॥
तेषां वृद्ध्या हि वृद्धिर्नो मा क्रुधः पुरुषर्षभ।
वासुदेववचः श्रुत्वा सीरभृत्प्राह धर्मवित् ॥ २० ॥
धर्मः सुचरितः सद्भिः स च द्वाभ्यां नियच्छति।
अर्थश्चात्यर्थलुब्धस्य कामश्चातिप्रसङ्गिणः ॥ २१ ॥
धर्मार्थौ धर्मकामौ च कामार्थौ चाप्यपीडयन्।
धर्मार्थकामान्योऽभ्येति सोऽत्यन्तं सुखमश्नुते ॥२२॥
तदिदं व्याकुलं सर्वं कृतं धर्मस्य पीडनात्।
भीमसेनेन गोविन्द कामं त्वं तु यथाऽऽत्थ माम् ॥२३॥
कृष्ण उवाच- अरोषणो हि धर्मात्मा सततं धर्मवत्सलः।

करी थी कि हम अपनी गदासे दुर्योधनकी जङ्घा तोडेंगे। (१३-१७)

हे शत्रुनाशन! महामुनि मैत्रेयने पहिले ही दुर्योधनको शाप दिया था कि तेरी जङ्घा भीमसेन अपनी गदासे तोडेंगे, इसलिये आप क्रोध न कीजिये। हम इसमें कुछ दोष नहीं देखते। हे प्रलम्बनाशन! हमारे पितामह और पाण्डवोंके नाना एक ही थे, पाण्डव हमारे गाढे सम्बन्धी और मित्र हैं, उनकी वृद्धिसे हमारी वृद्धि है। इसलिये आप क्षमा कीजिये, क्रोध मत कीजिये। (१८-२०)

श्रीकृष्णके वचन सुन धर्मात्मा बलदेव बोले, तुम्हारे मुखमें जो आता है सोई बकते जाते हो। धर्मकी एक बात भी नहीं कहते, महात्मा धर्म ही करते हैं, और जो मनुष्य उस धर्मको नाश करते हैं, अर्थात् अत्यन्त लोभी अर्थका नाश करता है, और अत्यन्त कामी कामका नाश कर देता है, जो मनुष्य धर्मसे अर्थको धर्मसे कामको और कामसे अर्थको नाश नहीं करता, अर्थात् धर्मके आश्रयसे अर्थ, अर्थके आश्रयसे धर्म और अर्थधर्मके आश्रयसे काम करता है वही अत्यन्त सुख भोगता है, यहां भीमसेनने धर्मका नाश किया, इसलिये सब नाश होगया। (२१-२३)

श्रीकृष्ण बोले, यदि इस समय आप

भवान्प्रख्यायते लोके तस्मात्संशाम्य मा क्रुधः॥ २४ ॥
प्राप्तं कलियुगं विद्धि प्रतिज्ञां पाण्डवस्य च ।
आनृण्यं यातु वैरस्य प्रतिज्ञायाश्च पाण्डवः ॥ २५ ॥
सञ्जय उवाच— धर्मच्छलमपि श्रुत्वा केशवात्स विशाम्पते ।
नैव प्रीतमना रामो वचनं प्राह संसदि ॥ २६ ॥
हत्वाऽधर्मेण राजानं धर्मात्मानं सुयोधनम् ।
जिह्मयोधीति लोकेऽस्मिन् ख्यातिं यास्यति पाण्डवः॥२७ ॥
दुर्योधनोऽपि धर्मात्मा गतिं यास्यति शाश्वतीम् ।
ऋजुयोधी हतो राजा धार्तराष्ट्रो नराधिपः ॥ २८ ॥
युद्धदीक्षां प्रविश्याजौ रणयज्ञं वितत्य च ।
हुत्वाऽऽत्मानममित्राग्नौ प्राप चावभृथं यशः॥ २९ ॥
इत्युक्त्वा रथमास्थाय रौहिणेयः प्रतापवान् ।
श्वेताभ्रशिखराकारः प्रययौ द्वारकां प्रति ॥ ३० ॥
पञ्चालाश्च सवार्ष्णेयाः पाण्डवाश्च विशाम्पते ।
रामे द्वारावतीं याते नातिप्रमनसोऽभवन् ॥ ३१ ॥
ततो युधिष्ठिरं दीनं चिन्तापरमधोमुखम् ।

शान्त होजांय तो सब लोक आपको क्रोधरहित, धर्मात्मा और धर्मका प्यारा कहेंगे, इसलिये आप क्रोध न कीजिये शान्त हूजिये, आप यह जानते हैं कि, कलियुग आगया इसलिये भीमसेनकी प्रतिज्ञा और वैरको पूरा होने दीजिये। (२४-२५)

सञ्जय बोले, श्रीकृष्णके धर्मरूपी छलसे भरे वचन सुनके बलराम प्रसन्न न हुये और राजोंके बीचमें बोले। धर्मात्मा दुर्योधनको भीमसेनने अधर्मसे मारा है, इसलिये जगतके वीर इन्हे छली योद्धा कहेंगे। धर्मात्मा धर्मसे युद्ध करनेवाले धृतराष्ट्रपुत्र राजा दुर्योधन भी युद्धरूपी यज्ञमें दीक्षा पाकर शत्रुरूपी अग्निमें अपना शरीर जलाकर सनातन स्वर्गको जांयगे और इनका यश जगत्में बना रहेगा। (२६-२९)

हे महाराज! ऐसा कहकर सफेद मेघके समान सुन्दर शरीरवाले रोहिणी पुत्र प्रतापी बलदेव रथपर चढकर द्वारिकाको चले गये। हे राजन्! जब बलदेव द्वारिकाको चले गये, तब पाञ्चाल, पाण्डव और श्रीकृष्ण अत्यन्त दुःख करने लगे। (३०—३१)

अनन्तर शोकसे व्याकुल चिन्तासे

शोकोपहतसङ्कल्पं वासुदेवोऽब्रवीदिदम् ॥ ३२ ॥

वासुदेव उवाच— धर्मराज किमर्थं त्वमधर्ममनुमन्यसे ।
हतबन्धोर्यदेतस्य पतितस्य विचेतसः ॥ ३३ ॥
दुर्योधनस्य भीमेन मृद्यमानं शिरः पदा ।
उपप्रेक्षसि कस्मात्त्वं धर्मज्ञः सन्नराधिप ॥ ३४ ॥

युधिष्ठिर उवाच— न ममैतत्प्रियं कृष्ण यद्राजानं वृकोदरः ।
पदा मूर्ध्न्यस्पृशत्क्रोधान्न च हृष्ये कुलक्षये ॥ ३५ ॥
निकृत्या निकृता नित्यं धृतराष्ट्रसुतैर्वयम् ।
बहूनि परुषाण्युक्त्वा वनं प्रस्थापिताः स्म ह ॥ ३६ ॥
भीमसेनस्य तद् दुःखमतीव हृदि वर्तते ।
इति संचिन्त्य वार्ष्णेय मयैतत्समुपेक्षितम् ॥ ३७ ॥
तस्माद्धत्वाऽकृतप्रज्ञं लुब्धं कामवशानुगम् ।
लभतां पाण्डवः कामं धर्मेऽधर्मे च वा कृते ॥ ३८ ॥

सञ्जय उवाच— इत्युक्ते धर्मराजेन वासुदेवोऽब्रवीदिदम् ।
काममस्त्वेतदिति वै कृच्छ्राद्यदुकुलोद्वहः ॥ ३९ ॥
इत्युक्तो वासुदेवेन भीमप्रियहितैषिणा ।

नीचा मुख किये शोकसे सङ्कल्प त्यागे एकान्तमें बैठे युधिष्ठिरके पास जाकर श्रीकृष्ण बोले। हे पृथ्वीनाथ! हे धर्मराज! आप धर्म जानकरके भी इतना शोच क्यों करते हैं, जब दुर्योधनके सब बन्धु बान्धव मारे गये, तब क्रोधमें यदि भीमसेनने उसके शिरपर पैर रख दिया तो क्या अधर्म हुवा? (३२-३४)

महाराज युधिष्ठिर बोले, हे कृष्ण! इस कुलनाशके समयमें जो भीमसेनने क्रोध करके राजाके शिरमें पैर मारा सो हमें अच्छा नहीं जान पडा, इसलिये हम प्रसन्न नहीं हैं धृतराष्ट्रके पुत्रोंने हमारे सङ्ग बहुत ही छल किये थे, और अनेक कठोर वचन कहके हमें वनको निकाला था, वही महादुःख भीमसेनके हृदयमें भरा था। यही विचारकर हमने इस समय क्षमा करी। अब इस छली, लोभी और कामीको धर्म अथवा अधर्मसे मारकर भीमसेन इच्छानुसार भोग करे। (३८)

सञ्जय बोले, धर्मराजके ऐसे वचन सुन श्रीकृष्ण बोले, इस समय हम सब लोगोंकी यही प्रार्थना है, कि आप भीमसेनपर कृपा कीजिये। भीमसेनका कल्याण चाहनेवाले श्रीकृष्णके ऐसे

अन्वमोदत तत्सर्वं यद्भीमेन कृतं युधि ॥ ४० ॥
भीमसेनोऽपि हत्वाजौ तव पुत्रममर्षणः।
अभिवाद्याग्रतः स्थित्वा संप्रहृष्टः कृताञ्जलिः ॥ ४१ ॥
प्रोवाच सुमहातेजा धर्मराजं युधिष्ठिरम्।
हर्षादुत्फुल्लनयनो जितकाशी विशाम्पते ॥ ४२ ॥
तवाद्य पृथिवी सर्वा क्षेमा निहतकण्टका।
तां प्रशाधि महाराज स्वधर्ममनुपालय ॥ ४३ ॥
यस्तु कर्ताऽस्य वैरस्य निकृत्या निकृतिप्रियः।
सोऽयं विनिहतः शेते पृथिव्यां पृथिवीपते ॥ ४४ ॥
दुःशासनप्रभृतयः सर्वे ते चोग्रवादिनः।
राधेयः शकुनिश्चैव हताश्च तव शत्रवः ॥ ४५ ॥
सेयं रत्नसमाकीर्णा मही सवनपर्वता।
उपावृत्ता महाराज त्वामद्य निहतद्विषम् ॥ ४६ ॥
युधिष्ठिर उवाच—गतो वैरस्य निधनं हतो राजा सुयोधनः।
कृष्णस्य मतमास्थाय विजितेयं वसुन्धरा ॥ ४७ ॥
दिष्ट्या गतस्त्वमानृण्यं मातुः कोपस्य चोभयोः।
दिष्ट्या जयसि दुर्धर्ष दिष्ट्या शत्रुर्निपातितः ॥४८॥ ३४५४

इति श्रीमहाभारते शतसाहस्र्यां० शल्यपर्वान्तर्गतगदापर्वणि० बलदेवसान्त्वने षष्टितमो ऽध्यायः ॥ ६० ॥

वचन सुन महाराजने कहा कि बहुत अच्छा। अनन्तर क्रोधी भीमसेन भी युद्धमें दुर्योधनको मारकर और प्रसन्न होकर अपने बडे भाईके पैरोंमें आपडे, फिर खडे होकर हाथ जोडकर अत्यन्त प्रसन्न होकर बोले। (३९-४२)

हे पृथ्वीनाथ! आज यह पृथ्वी आपके शत्रुवोंसे शून्य होगई, अब आप इसका राज्य कीजिये और अपने धर्मको पालन कीजिये। हे महाराज! वैरका मूल छली दुर्योधन पृथ्वीमें सोता है, कठोर वचन कहनेवाले दुःशासन, राधापुत्र कर्ण और शकुनी आदि सब आपके शत्रु मारे गये। अब यह रत्नोंसे भरी, वन और पर्वतोंके सहित सब पृथ्वी आपको शत्रुहीन महाराज जानके आपके आधीन हैं। (४३-४६)

महाराज युधिष्ठिर बोले, हे महावीर राजा दुर्योधन मारा गया, वैर समाप्त होगया, यह सब काम कृष्णकी सम्मतिसे हुवा, हमने पृथ्वी जीती, तुम प्रारब्धहीसे माता और क्रोधके ऋणसे छूटे;

धृतराष्ट्र उवाच—हतं दुर्योधनं दृष्ट्वा भीमसेनेन संयुगे ।
पाण्डवाः सृञ्जयाश्चैव किमकुर्वत सञ्जय ॥ १ ॥
सञ्जय उवाच— हतं दुर्योधनं दृष्ट्वा भीमसेनेन संयुगे ।
सिंहेनेव महाराज मत्तं वनगजं यथा ॥ २ ॥
प्रहृष्टमनसस्तत्र कृष्णेन सह पाण्डवाः ।
पञ्चालाः सृञ्जयाश्चैव निहते कुरुनन्दने ॥ ३ ॥
आविध्यन्नुत्तरीयाणि सिंहनादांश्च नेदिरे ।
नैतान्हर्षसमाविष्टानियं सेहे वसुन्धरा ॥ ४ ॥
धनूंष्यन्ये व्याक्षिपन्त ज्याश्चाप्यन्ये तथाऽक्षिपन् ।
दध्मुरन्ये महाशङ्खानन्ये जघ्नुश्च दुन्दुभीन् ॥ ५ ॥
चिक्रीडुश्च तथैवान्ये जहसुश्च तवाहिताः ।
अब्रुवंश्चासकृद्वीरा भीमसेनमिदं वचः ॥ ६ ॥
दुष्करं भवता कर्म रणेऽद्य सुमहत्कृतम् ।
कौरवेन्द्रं रणे हत्वा गदयाऽतिकृतश्रमम् ॥ ७ ॥
इन्द्रेणेव हि वृत्रस्य वधं परमसंयुगे ।
त्वया कृतममन्यन्त शत्रोर्वधमिमं जनाः ॥ ८ ॥

प्रारब्धहीसे हमारी विजय हुई और प्रारब्धहीसे वह शत्रु मारा गया॥ ४७-४८

शल्यपर्वमें साठ अध्याय समाप्त ! [३४५४]

शल्यपर्वमें एकसठ अध्याय ।

धृतराष्ट्र बोले, हे सञ्जय ! दुर्योधनको युद्धमें पडा हुवा देख पाण्डव और सृञ्जयोंने क्या किया ? सो हमसे कहो । (१)

सञ्जय बोले, जैसे सिंहसे मरकर मतवाला हाथी पृथ्वीमें गिर जाता है, ऐसे ही भीमसेनके हाथसे मरा हुआ दुर्योधनको देख सृञ्जय, पाण्डव और श्रीकृष्ण बहुत प्रसन्न हुये; कोई अपना दुपट्टा घुमाने लगा, कोई सिंहके समान गर्जने लगा । कोई धनुष टङ्कारने लगा, कोई रोदा लगाने लगा, कोई नगारा भी बजाने लगा, कोई शङ्ख बजाने लगा, कोई कूदने लगा, कोई उछलने लगा, और कोई हंसने लगा । हे महाराज ! पृथ्वी उनके इस आनन्दको न सह सकी । अनन्तर सब वीर भीमसेनके पास आकर कहने लगे, आपने इस समय घोर कर्म किया, दुर्योधनने बहुत दिनतक युद्धमें परिश्रम किया था, हम लोग इस कर्मको ऐसा समझते हैं, जैसे इन्द्रने वृत्रासुरको मारा था । अनेक मार्ग और

चरन्तं विविधान्मार्गान्मण्डलानि च सर्वशः।
दुर्योधनमिमं शूरं कोऽन्यो हन्याद्वृकोदरात् ॥ ९ ॥
वैरस्य च गतः पारं त्वमिहान्यैः सुदुर्गमम्।
अशक्यमेतदन्येन सम्पादयितुमीदृशम् ॥ १० ॥
कुञ्जरेणेव मत्तेन वीर संग्राममूर्धनि।
दुर्योधनशिरो दिष्ट्या पादेन मृदितं त्वया ॥ ११ ॥
सिंहेन महिषस्येव कृत्वा सङ्गरमुत्तमम्।
दुःशासनस्य रुधिरं दिष्ट्या पीतं त्वयाऽनघ ॥ १२ ॥
ये विप्रकुर्वन् राजानं धर्मात्मानं युधिष्ठिरम्।
मूर्ध्नि तेषां कृतः पादो दिष्ट्या ते स्वेन कर्मणा ॥ १३ ॥
अमित्राणामधिष्ठानाद्वधाद् दुर्योधनस्य च।
भीम दिष्ट्या पृथिव्यां ते प्रथितं सुमहद्यशः॥ १४ ॥
एवं नूनं हते वृत्रे शक्रं नन्दन्ति वन्दिनः।
तथा त्वां निहतामित्रं वयं नन्दाम भारत ॥ १५ ॥
दुर्योधनवधे यानि रोमाणि हृषितानि नः।
अद्यापि न विकृष्यन्ते तानि तद्विद्धि भारत ॥ १६ ॥
इत्यब्रुवन् भीमसेनं वातिकास्तत्र सङ्गताः।
तान् हृष्टान्पुरुषव्याघ्रान् पञ्चालान्पाण्डवैः सह ॥१७॥

मण्डलोंमें घूमते हुए वीर दुर्योधनको आपके सिवाय और कौन मार सक्ता था, आप वैरके पार होगये ऐसा कर्म दूसरा और क्षत्रिय कोई नहीं कर सकता आपने प्रारब्धहीसे युद्धमें मतवाले हाथी के समान दुर्योधनके शिरपर पैर दिया। (९—११)

हे पापरहित ! आपने दुःशासनका रुधिर इस प्रकार पिया जैसे भैंसेको मारकर सिंह रुधिर पीता है। जो राजा युधिष्ठिरका वैर करते थे, आपने प्रारब्धहीसे उनके शिरपर पैर दिया; दुर्योधन आदि शत्रुओंके मारनेसे आपका यश पृथ्वीमें प्रारब्धसे फैल गया; जैसे वृत्रासुरके मारनेसे इन्द्रकी प्रशंसा देवतोंने करी थी, वैसे ही हम लोग आपकी प्रशंसा करते हैं। दुर्योधनके मरनेसे जो हम लोगोंके रोंये खडे हुए हैं सो अबतक नहीं बैठते हैं। (१२—१६)

हे महाराज ! जहां भीमसेनके पास खडे हुए सोमक, पाण्डव और सृञ्जय ऐसे वचन कह रहे थे। तहां उसी समय

ब्रुवतोऽसदृशं तत्र प्रोवाच मधुसूदनः ।
न न्याय्यं निहतं शत्रुं भूयो हन्तुं नराधिपाः ॥ १८ ॥
असकृद्वाग्भिरुग्राभिर्निहतो ह्येष मन्दधीः ।
तदैवेष हतः पापो यदैव निरपत्रपः ॥ १९ ॥
लुब्धः पापसहायश्च सुहृदां शासनातिगः ।
बहुशो विदुरद्रोणकृपगाङ्गेयसृञ्जयैः ॥ २० ॥
पाण्डुभ्यः प्रार्थ्यमानोऽपि पित्र्यमंशं न दत्तवान् ।
नैष योग्योऽद्य मित्रं वा शत्रुर्वा पुरुषाधमः ॥ २१ ॥
किमनेनातिसुग्रेन वाग्भिः काष्ठसधर्मणा ।
रथेष्वारोहत क्षिप्रं गच्छामो वसुधाधिपाः ॥ २२ ॥
दिष्ट्या हतोऽयं पापात्मा सामात्यज्ञातिबांधवः ।
इति श्रुत्वा त्वधिक्षेपं कृष्णाद् दुर्योधनो नृपः ॥ २३ ॥
अमर्षवशमापन्न उदतिष्ठद्विशाम्पते ।
स्फिग्देशेनोपविष्टः स दोर्भ्यां विष्टभ्य मेदिनीम् ॥२४॥
दृष्टिं भ्रूसंकटां कृत्वा वासुदेवे न्यपातयत् ।
अर्धोन्नतशरीरस्य रूपमासीन्नृपस्य तु ॥ २५ ॥

वार्त्तावह समाचार फैलनेवाले, पहुंच गए तब पुरुषसिंह श्रीकृष्ण प्रसन्न पाञ्चाल और पाण्डवोंसे बोले, मरे हुए शत्रुको वचनोंसे मारना उचित नहीं। यह पापी उसी समय मारा गया था, जिस समय इसने लज्जा छोड दी थी, अब इस मूर्खको कठोर वचन सुनानेसे क्या होगा? इस लोभीके सब पापी ही सहायक थे, ये मित्रोंके वचन नहीं मानता था, कृपाचार्य, द्रोणाचार्य, विदुर, भीष्म और सृञ्जयोंके अनेक बार समझाते भी इस नीचने पाण्डवोंको पिताका राज्य न दिया, अब यह दुष्ट शत्रुही हो वा मित्रही हो, काष्ठके समान पडा है, इसे कठोर वचन सुनानेहीसे क्या होगा? यह पापी प्रारब्धहीसे वंश और मित्रोंके सहित मारा गया, अब आप लोग रथोंमें बैठकर डेरोंको चलिये। (१७—२३)

श्रीकृष्णके ऐसे वचन सुन दुर्योधनको महाक्रोध आया और उठकर पृथ्वीमें कुहनी टेककर बैठे। फिर भौंह टेढी करके श्रीकृष्णको देखा, उस समय पैर टूटे राजाकी ऐसी शोभा दीखती थी, जैसे क्रोध भरे पूंछ कटे विषीले सांपकी। उस समय महाराज अपने प्राण-

क्रुद्धस्याशीविषस्येव छिन्नपुच्छस्य भारत।
प्राणान्तकारिणीं घोरां वेदनामप्यचिन्तयन् ॥ २६ ॥
दुर्योधनो वासुदेवं वाग्भिरुग्राभिरार्दयत्।
कंसदासस्य दायाद न ते लज्जास्त्यनेन वै ॥ २७ ॥
अधर्मेण गदायुद्धे यदहं विनिपातितः।
ऊरू भिन्धीति भीमस्य स्मृतिं मिथ्या प्रयच्छता॥२८॥
किं न विज्ञातमेतन्मे यदर्जुनमवोचथाः।
घातयित्वा महीपालानृजुयुद्धान्सहस्रशः ॥ २९ ॥
जिह्मैरुपायैर्बहुभिर्न ते लज्जा न ते घृणा।
अहन्यहनि शूराणां कुर्वाणः कदनं महत् ॥ ३० ॥
शिखण्डिनं पुरस्कृत्य घातितस्ते पितामहः।
अश्वत्थाम्नः स नामानं हत्वा नागं सुदुर्मते ॥ ३१ ॥
आचार्यो न्यासितः शस्त्रं किं तन्न विदितं मया।
स चानेन नृशंसेन धृष्टद्युम्नेन वीर्यवान् ॥ ३२ ॥
पात्यमानस्त्वया दृष्टो न चैनं त्वमवारयः।
वधार्थं पाण्डुपुत्रस्य याचितां शक्तिमेव च ॥ ३३ ॥
घटोत्कचे व्यंसयतः कस्त्वत्तः पापकृत्तमः।
छिन्नहस्तः प्रायगतस्तथा भूरिश्रवा बली ॥ ३४ ॥

नाश पीडा करनेवाली पीडाको भूल कर श्रीकृष्णसे बहुत कठोर वचन बोले। (२३—२७)

अरे कंसके दासके संबधी दुर्बुद्धी पापी कृष्ण! तुझे कुछ भी लज्जा और घृणा नहीं है, मूझे अधर्मसे गदायुद्धमें मरा हुआ देख तुझे कुछ भी लज्जा नहीं होती, तैने ही भीमसेनको याद दिला दी कि इसकी जङ्घा तोड, क्या मैं यह नहीं जानता कि तैने धर्मसे युद्ध करते हुए सहस्रों राजोंको अर्जुनके हाथसे अधर्मसे मरवा दिया, तैने प्रतिदिन पाप और छल करके हमारी तरफके सहस्रों वीरोंको मरवा डाला, शिखण्डीको आगे करके पितामहको मारा। अरे दुर्बुद्धे! अश्वत्थामा नामक हाथीको मारकर बलवान गुरुजीसे शस्त्र रखवा लिये और उनको इस पापी धृष्टद्युम्नने मारडाला; तू देखता रहा तूने इसे न रोका। (२७—३२)

क्या मैंने यह नहीं सुना कि पाण्डवोंके मारनेके लिये जो इन्द्रने कर्णको

त्वयाऽभिसृष्टेन हतः शैनेयेन महात्मना ।
कुर्वाणश्चोत्तमं कर्म कर्णः पार्थजिगीषया ॥ ३५ ॥
व्यंसनेनाश्वसेनस्य पन्नगेन्द्रस्य वै पुनः ।
पुनश्च पतिते चक्रे व्यसनार्तः पराजितः ॥ ३६ ॥
पातितः समरे कर्णश्चक्रव्यग्रोऽग्रणीर्नृणाम् ।
यदि मां चापि कर्णं च भीष्मद्रोणौ च संयुतौ ॥ ३७ ॥
ऋजुना प्रतियुध्येथा न ते स्याद्विजयो ध्रुवम् ।
त्वया पुनरनार्येण जिह्ममार्गेण पार्थिवाः ॥ ३८ ॥
स्वधर्ममनुतिष्ठन्तो वयं चान्ये च घातिताः ।

वासुदेव उवाच— हतस्त्वमसि गान्धारे सभ्रातृसुतबान्धवः ॥ ३९ ॥
सगणः ससुहृच्चैव पापं मार्गमनुष्ठितः ।
तवैव दुष्कृतैर्वीरौ भीष्मद्रोणौ निपातितौ ॥ ४० ॥
कर्णश्च निहतः संख्ये तव शीलानुवर्तकः ।
याच्यमानं मया मूढ पित्र्यमंशं न दित्ससि ॥ ४१ ॥
पाण्डवेभ्यः स्वराज्यं च लोभाच्छकुनिनिश्चयात् ।
विषं ते भीमसेनाय दत्तं सर्वे च पाण्डवाः ॥ ४२ ॥
प्रदीपिता जतुगृहे मात्रा सह सुदुर्मते ।

शक्ती दी थी, वह तूने घटोत्कचके ऊपर छुड़वा दी ? तेरे समान जगत्में और कौन पापी होगा, जिसने नागराज अश्वसेनको मारकर, रथका पहिया उठाते हुए छबडाये हुए, कर्णको अर्जुनकी विजयके लिये मरवा दिया ! तेरीही सम्मतिसे हाथकटे बलवान भूरिश्रवाको महात्मा सात्यकीने मारा। यदि मैं कर्ण, भीष्म और द्रोणाचार्य, धर्मसे युद्ध करने पाते, तो तेरी कदापि विजय न होती, परन्तु तू ऐसा अनार्य है कि, तैने छल करके अनेक धार्मिक राजोंको मार डाला। (३३-३९)

श्रीकृष्ण बोले, हे दुष्टात्मन् गान्धारीपुत्र ! अब तू सेना, भाई, पुत्र और मित्रोंके सहित पाप करता करता मर गया, तेरेही पापसे वीर भीष्म और द्रोणाचार्य मारे गये, तेरे समान पापी कर्ण भी मारा गया, अरे मूर्ख ! हमने बार बार पाण्डवोंके पिताका राज्य मांगा पर तैने न दिया। तूने पहिले शकुनीकी सम्मति और लोभसे पाण्डवोंका राज्य न दिया। अरे दुर्बुद्धे ! तैने भीमसेनको विष दिया, माताके सहित

सभार्यां याज्ञसेनी च कृष्टा द्यूते रजस्वला ॥ ४३ ॥
तदैव तावद् दुष्टात्मन्वध्यस्त्वं निरपत्रप।
अनक्षज्ञं च धर्मज्ञं सौबलेनाक्षवेदिना ॥ ४४ ॥
निकृत्या यत्पराजैषीस्तस्मादसि हतो रणे।
जयद्रथेन पापेन यत्कृष्णा क्लेशिता वने ॥ ४५ ॥
यातेषु मृगयां चैव तृणबिन्दोरथाश्रमम्।
अभिमन्युश्च यद्बाल एको बहुभिराहवे ॥ ४६ ॥
त्वद्दोषैर्निहतः पाप तस्मादसि हतो रणे।
यान्यकार्याणि चास्माकं कृतानीति प्रभाषसे ॥ ४७ ॥
वैगुण्येन तवात्यर्थं सर्वं हि तदनुष्ठितम्।
बृहस्पतेरुशनसो नोपदेशः श्रुतस्त्वया ॥ ४८ ॥
वृद्धा नोपासिताश्चैव हितं वाक्यं न ते श्रुतम्।
लोभेनातिबलेन त्वं तृष्णया च वशीकृतः ॥ ४९ ॥
कृतवानस्यकार्याणि विपाकस्तस्य भुज्यताम्।
दुर्योधन उवाच- अधीतं विधिवद्दत्तं भूः प्रशास्ता ससागरा ॥ ५० ॥
मूर्ध्नि स्थितममित्राणां को नु स्वन्ततरो मया।
यदिष्टं क्षत्रबन्धूनां स्वधर्ममनुपश्यताम् ॥ ५१ ॥

सब पाण्डवोंको लाक्षागृहमें जलाया। जुवेके समय रजखला द्रौपदीको दुःख दिया। जुवा न जाननेवाले महात्मा धर्मज्ञ युधिष्ठिरको जुवा जाननेवाले शकुनीने छलसे जीता इसी लिये हमने तुझको इस प्रकार युद्धमें मारा। (३९-४५)

अरे दुष्ट निर्लज्ज! जिस समय तृणबिन्दु, मुनिके आश्रममें रहते हुये पाण्डव आखेटको गये थे, तब पापी जयद्रथने द्रौपदीको कैसा क्लेश दिया था? अनेक वीरोंने मिलकर एकले बालक अभिमन्युको मारा। इसी लिये हमने तुझको इस प्रकार युद्धमें मारा। तैने जो हमारे अपकार करे थे, उसीसे हमने भी ऐसा किया। तैने बृहस्पति और शुक्रका उपदेश नहीं सुना, बूढोंकी सेवा नहीं करी, इसीसे हमारे कल्याण भरे वचन नहीं सुने थे, तैने लोभ और तृष्णाके वश होकर जो जो पप करे थे, उन सबका फल भोग। (४५—५०)

दुर्योधन बोले, हे कृष्ण! हमने विधिपूर्वक वेद पढे, समुद्र पर्यन्त पृथ्वीका राज्य किया, शत्रुवोंके शिरपर पैर दिया, हमारे समान महात्मा कौन होगा?

तदिदं निधनं प्राप्तं को नु स्वन्ततरो मया ।
देवार्हा मानुषा भोगाः प्राप्ता असुलभा नृपैः ॥ ५२ ॥
ऐश्वर्यं चोत्तमं प्राप्तं को नु स्वन्ततरो मया।
ससुहृत्सानुगश्चैव स्वर्गं गताऽहमच्युत ॥ ५३ ॥
यूयं निहतसंकल्पाः शोचन्तो वर्तयिष्यथ ।
सञ्जय उवाच— अस्य वाक्यस्य निधने कुरुराजस्य धीमतः ॥ ५४ ॥
अपतत्सुमहद्वर्षं पुष्पाणां पुण्यगन्धिनाम् ।
अवादयन्त गन्धर्वा वादित्रं सुमनोहरम् ॥ ५५ ॥
जगुश्चाप्सरसो राज्ञो यशः सम्बद्धमेव च ।
सिद्धाश्च मुमुचुर्वाचः साधुसाध्विति पार्थिव ॥ ५६ ॥
ववौ च सुरभिर्वायुः पुण्यगन्धो मृदुः सुखः ।
व्यराजंश्च दिशः सर्वा नभो वैदूर्यसन्निभम् ॥ ५७ ॥
अत्यद्भुतानि ते दृष्ट्वा वासुदेवपुरोगमाः ।
दुर्योधनस्य पूजां तु दृष्ट्वा व्रीडामुपागमन् ॥ ५८ ॥
हतांश्चाधर्मतः श्रुत्वा शोकार्ताः शुशुचुर्हि ते ।
भीष्मं द्रोणं तथा कर्णं भूरिश्रवसमेव च ॥ ५९ ॥

महात्मा क्षत्रिय जिस प्रकार युद्धमें मरनेकी इच्छा करते हैं, उसी प्रकार हम मरे । जिन भोगोंको राजा नहीं भोग, सकते ऐसे देवतोंके योग्य भोग हमने भोगे, उत्तम ऐश्वर्य प्राप्त किया, हमारे समान महात्मा कौन होगा ? अब हम अपने मित्र और भाइयोंसे स्वर्गमें जाकर मिलेंगे, तुम लोग शोकसे व्याकुल होकर जगत्में रहोगे और तुम्हारे सब सङ्कल्प नष्ट होजायगे । (५०-५४)

सञ्जय बोले, इस वचनके कहतेही बुद्धिमान कुरुराजके ऊपर पवित्र सुगन्धि भरे फूल वर्षने लगे । गन्धर्व मनोहर बाजे बाजने लगे, अप्सरा नाचने लगीं, राजाका यश गाने लगीं, सिद्ध दुर्योधनको धन्य धन्य कहने लगे, उत्तम सुगन्धि भरा वायु चलने लगा, आकाश निर्मल वैदुर्य मणिके समान दीखने लगा; और दिशा भी निर्मल होगयीं । (५४—५७)

हे राजन् ! इन अद्भुत शकुनोंको देख और दुर्योधनकी प्रशंसा सुनके श्रीकृष्णादिक सब लजित होगये, भीष्म, द्रोणाचार्य, कर्ण और भूरिश्रवाको अधर्मसे मरा हुआ सुन सब लोग शोकसे व्याकुल होकर शोचने लगे । पाण्डवों·

*

तांस्तु चिन्तापरान् दृष्ट्वा पाण्डवान् दीनचेतसः।
प्रोवाचेदं वचः कृष्णो मेघदुन्दुभिनिःस्वनः ॥ ६० ॥
नैष शक्योऽतिशीघ्रास्त्रस्ते च सर्वे महारथाः।
ऋजुयुद्धेन विक्रान्ता हन्तुं युष्माभिराहवे ॥ ६१ ॥
नैष शक्यः कदाचित्तु हन्तुं धर्मेण पार्थिवः।
ते वा भीष्ममुखाः सर्वे महेष्वासा महारथाः ॥६२ ॥
मयानेकैरुपायैस्तु मायायोगेन चासकृत्।
हतास्ते सर्व एवाजौ भवतां हितमिच्छता ॥ ६३ ॥
यदि नैवं विधं जातु कुर्यां जिह्ममहं रणे।
कुतो वो विजयो भूयः कुतो राज्यं कुतो धनम् ॥६४॥
ते हि सर्वे महात्मानश्चत्वारोऽतिरथा भुवि।
न शक्या धर्मतो हन्तुं लोकपालैरपि स्वयम् ॥ ६५ ॥
तथैवायं गदापाणिर्धार्तराष्ट्रो गतक्लमः।
न शक्यो धर्मतो हन्तुं कालेनापीह दण्डिना ॥ ६६ ॥
न च वो हृदि कर्तव्यं यदयं घातितो रिपुः।
मिथ्यावध्यास्तथोपायैर्बहवः शत्रवोऽधिकाः ॥ ६७ ॥

को दीन और चिन्ता करते देखकर श्रीकृष्ण मेघ और नगारेके समान गम्भीर शब्दसे बोले, जिस मार्गसे महात्मा चले उसीसे सबको चलना चाहिये, दैत्यनाशक देवतोंने अनेक दानवोंको छलसे मारा है, इसलिये शत्रुको इस प्रकार मारनेका आप लोग शोच मत कीजिये, शत्रुवोंको किसी प्रकार छलादिकसे मारना ही धर्म है। केवल धर्मयुद्धसे आप लोग भीष्मादिक वीरोंको नहीं मार सकते थे, और इस शीघ्र शस्त्र चलानेवालेको भी नहीं मार सकते थे। (५७—६२)

मैंने यह सब छल और कपट केवल आप लोगोंके कल्याणहीके लिये किया है और उसी से ये सब भीष्मादिक युद्धमें मारे गये। यदि मैं ऐसे छल नहीं करता तो क्योंकर तुम्हारी विजय होती और राज्य धन कहांसे होता? भीष्म, द्रोणाचार्य, कर्ण और भूरिश्रवा ये चारों महारथ और महात्मा थे, इनको धर्म युद्धमें साक्षात् लोकपाल भी नहीं जीत सकते थे और परिश्रमरहित गदाधारी दुर्योधनको भी धर्म युद्धमें साक्षात् दण्डधारी यमराज भी नहीं मार सकते थे। आप लोग इसका कुछ विचार न कीजिये।

पूर्वैरनुगतो मार्गो देवैरसुरघातिभिः ।
सद्भिश्चानुगतः पन्थाः स सर्वैरनुगम्यते ॥ ६८ ॥
कृतकृत्याश्च सायाह्ने निवासं रोचयामहे ।
साश्वनागरथाः सर्वे विश्रमामो नराधिपाः ॥ ६९ ॥
वासुदेववचः श्रुत्वा तदानीं पाण्डवैः सह ।
पञ्चाला भृशसंहृष्टा विनेदुः सिंहसङ्घवत् ॥ ७० ॥
ततः प्राध्मापयन् शङ्खान् पाञ्चजन्यं च माधवः ।
हृष्टा दुर्योधनं दृष्ट्वा निहतं पुरुषर्षभ ॥ ७१ ॥ [३५२५]

इतिश्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यपर्वान्तर्गतगदापर्वणि कृष्णपाण्डवदुर्योधन-संवादे एकषष्टितमोऽध्यायः॥६१॥

सञ्जय उवाच- ततस्ते प्रययुः सर्वे निवासाय महीक्षितः ।
शङ्खान्प्रध्मापयन्तो वै हृष्टाः परिघबाहवः ॥ १ ॥
पाण्डवान् गच्छतश्चापि शिबिरं नो विशाम्पते ।
महेष्वासोऽन्वगात्पश्चाद्युयुत्सुः सात्यकिस्तथा ॥ २ ॥
धृष्टद्युम्नः शिखण्डी च द्रौपदेयाश्च सर्वशः ।
सर्वे चान्ये महेष्वासा ययुः स्वशिबिराण्युत ॥ ३ ॥
ततस्ते प्राविशन्पार्था हतत्विट्कं हतेश्वरम् ।
दुर्योधनस्य शिबिरं रङ्गवद्विसृते जने ॥ ४ ॥

अब हम लोग कृतकृत्य होगये, सन्ध्या होगई अब डेरोंको चलें, सब हाथी, घोडे और राजा विश्राम करें । हे महाराज ! श्रीकृष्णके ऐसे वचन सुन पाण्डव और पाञ्चाल बहुत प्रसन्न होकर सिंहके समान गर्जने लगे । फिर श्रीकृष्णने पाञ्चजन्य शङ्ख बजाया । अनन्तर सब वीर अपने अपने शङ्ख बजाने लगे और दुर्योधनको मरा हुआ देखकर बहुत प्रसन्न हुए । (६२-७१) [३५२५]

शल्यपर्वमें इकसठ अध्याय समाप्त ।

शल्यपर्वमें बासठ अध्याय ।

सञ्जय बोले, अनन्तर परिघके समान हाथ वाले राजोंने अपने अपने शङ्ख बजाए और प्रसन्न होकर हमारे डेरोंको चले, उस पाण्डवोंकी सेनाके पीछे महा धनुषधारी युयुत्सु , सात्यकी, सेनापति धृष्टद्युम्न, शिखण्डी और द्रौपदीके पांचों पुत्र आदि महाधनुषधारी चले । अनन्तर सब पाण्डवोंने हमारे स्वामी रहित डेरोंमें जाकर ठूठे हुए अखाडेके समान महाराज दुर्योधनका डेरा देखा ।

गतोत्सवं पुरमिव हृतनागमिव ह्रदम् ।
स्त्रीवर्षवरभूयिष्ठं वृद्धामात्यैरधिष्ठितम् ॥ ५ ॥
तत्रैतान्पर्युपातिष्ठन् दुर्योधनपुरःसराः ।
कृताञ्जलिपुटा राजन्काषायमलिनाम्बराः ॥ ६ ॥
शिबिरं समनुप्राप्य कुरुराजस्य पाण्डवाः ।
अवतेरुर्महाराज रथेभ्यो रथसत्तमाः ॥ ७ ॥
ततो गाण्डीवधन्वानमभ्यभाषत केशवः ।
स्थितः प्रियहिते नित्यमतीव भरतर्षभ ॥ ८ ॥
अवरोपय गाण्डीवमक्षय्यौ च महेषुधी ।
अथाहमवरोक्ष्यामि पश्चाद्भरतसत्तम ॥ ९ ॥
स्वयं चैवावरोह त्वमेतच्छ्रेयस्तवानघ ।
तच्चाकरोत्तथा वीरः पाण्डुपुत्रो धनञ्जयः ॥ १० ॥
अथ पश्चात्ततः कृष्णो रश्मीनुत्सृज्य वाजिनाम् ।
अवारोहत मेधावी रथाद्गाण्डीवधन्वनः ॥ ११ ॥
अथावतीर्णे भूतानामीश्वरे सुमहात्मनि ।
कपिरन्तर्दधे दिव्यो ध्वजो गाण्डीवधन्वनः ॥ १२ ॥
स दग्धो द्रोणकर्णाभ्यां दिव्यैरस्त्रैर्महारथः ।
आनादीप्तोऽग्निना ह्याशु प्रजज्वाल महीपते ॥ १३ ॥

उस समय उन डेरोंमें स्त्री, नपुंसक और बूढे मन्त्रियोंके सिवाय और कोई न था। उस डेरेकी शोभा ऐसी दीखती थी जैसे उत्सव रहित भूमि और हाथी रहित तलावकी। (१-५)

तब दुर्योधनके सब मन्त्री मैले और गेरूके कपडे पहने पाण्डवोंके आगे आ खडे हुए। डेरोंमें पहुंचकर पाण्डव आदि महारथ अपने अपने रथोंसे उतरे। अनन्तर पाण्डवोंका सदा कल्याण चाहनेवाले कृष्ण अर्जुनसे बोले, तुम बहुत शीघ्र अपना गाण्डीव धनुष चढावो और दोनों अक्षय तूणीर बांधकर शीघ्र रथसे कूदो। तब मैं पीछे रथसे उतरूंगा। हे पापरहित! तुम्हारा इसहीमें कल्याण है। (६-१०)

श्रीकृष्णके वचन सुन पाण्डुपुत्र अर्जुनने वैसाही किया। अनन्तर बुद्धिमान कृष्ण भी घोडेकी लगाम छोडकर रथसे कूद पडे। जगत् स्वामी महात्मा कृष्णके उतरनेसे ही वह रथ विना लगाये अग्निसे आप ही आप जल उठा, दिव्य कपि

सोपासङ्गः सरश्मिश्च साश्वः सयुगबन्धुरः ।
भस्मीभूतोऽपतद् भूमौ रथो गाण्डीवधन्वनः ॥ १४ ॥
तं तथा भस्मभूतं तु दृष्ट्वा पाण्डुसुताः प्रभो ।
अभवन्विस्मिता राजन्नर्जुनश्चेदमब्रवीत् ॥ १५ ॥
कृताञ्जलिः सप्रणयं प्रणिपत्याभिवाद्य ह ।
गोविन्द कस्माद्भगवन् रथो दग्धोऽयमग्निना ॥ १६ ॥
किमेतन्महदाश्चर्यमभवद्यदुनन्दन ।
तन्मे ब्रूहि महाबाहो श्रोतव्यं यदि मन्यसे ॥ १७ ॥
वासुदेव उवाच—अस्त्रैर्बहुविधैर्दग्धः पूर्वमेवायमर्जुन ।
मदधिष्ठितत्वात्समरे न विशीर्णः परन्तप ॥ १८ ॥
इदानीं तु विशीर्णोऽयं दग्धो ब्रह्मास्त्रतेजसा ।
मया विमुक्तः कौन्तेय त्वय्यद्य कृतकर्मणि ॥ १९ ॥
ईषदुत्स्मयमानस्तु भगवान्केशवोऽरिहा ।
परिष्वज्य च राजानं युधिष्ठिरमभाषत ॥ २० ॥
दिष्ट्या जयसि कौन्तेय दिष्ट्या ते शत्रवो जिताः ।
दिष्ट्या गाण्डीवधन्वा च भीमसेनश्च पाण्डवः ॥२१॥

ध्वजा अन्तर्द्धान होगई, थोडे ही समयमें आसन, लगाम, घोडे, धूर और पहियोंके समेत रथ भस्म होकर पृथ्वीमें गिर पडा। इस रथको पहले ही महारथ द्रोणाचार्य और कर्णने अपने शस्त्रोंसे भस्म कर दिया था, अर्जुनके रथको भस्म हुआ देख सब वीर लोग आश्चर्य करने लगे। (११-१५)

अनन्तर हाथ जोडकर और प्रणाम करके अर्जुन श्रीकृष्णसे बोले हे भगवान ! हे गोविन्द ! हे यदुनन्दन ! हे महाबाहो! यह क्या आश्चर्य हुवा ? यह रथ अग्निसे क्यों जल गया, यदि आप हमें सुनाने योग्य समझें तो मुझसे कहिये ? श्रीकृष्ण बोले, हे अर्जुन ! यह रथ कर्ण और द्रोणाचार्यके ब्रह्मास्त्र आदि शस्त्रोंसे पहिले ही जल चुका था परन्तु मैं बैठा था इसलिये भस्म नहीं होसका। अब यह सब काम होचुका, इसलिये मैं भी उतर गया और यह भस्म होगया। (१५—१९)

अनन्तर शत्रुनाशन श्रीकृष्ण हंसकर और महाराज युधिष्ठिरका हाथ पकड कर इस प्रकार बोले। हे कुन्तीपुत्र ! प्रारब्धहीसे आपकी विजय होती है और प्रारब्धहीसे आपका शत्रु मारा गया, प्रार-

त्वं चापि कुशली राजन्माद्रीपुत्रौ च पाण्डवौ।
मुक्ता वीरक्षयादस्मात्संग्रामान्निहतद्विषः ॥ २२ ॥
क्षिप्रमुत्तरकालानि कुरु कार्याणि भारत।
उपयातमुपप्लव्यं सह गाण्डीवधन्वना ॥ २३ ॥
आनीय मधुपर्कंमां यत्पुरा त्वमवोचथाः।
एष भ्राता सखा चैव तव कृष्ण धनञ्जयः ॥ २४ ॥
रक्षितव्यो महाबाहो सर्वास्वापत्स्विति प्रभो।
तव चैव ब्रुवाणस्य तथेत्येवाहमब्रुवम् ॥ २५ ॥
स सव्यसाची गुप्तस्ते विजयी च जनेश्वर।
भ्रातृभिः सह राजेन्द्र शूरः सत्यपराक्रमः ॥ २६ ॥
मुक्तो वीरक्षयादस्मात्संग्रामाल्लोमहर्षणात्।
एवमुक्तस्तु कृष्णेन धर्मराजो युधिष्ठिरः ॥ २७ ॥
हृष्टरोमा महाराज प्रत्युवाच जनार्दनम्।
युधिष्ठिर उवाच– प्रमुक्तं द्रोणकर्णाभ्यां ब्रह्मास्त्रमरिमर्दन ॥ २८ ॥
कस्त्वदन्यः सहेत्साक्षादपि वज्री पुरन्दरः।
भवतस्तु प्रसादेन संशप्तकगणा जिताः ॥ २९ ॥
महारणगतः पार्थो यच्च नासीत्पराङ्मुखः।

ब्धहीसे आप भीमसेन, अर्जुन, नकुल और सहदेव इस घोर वीर क्षयसे कुशल पूर्वक बचे और आपके शत्रु मारे गये। अब आपको जो कुछ इस समय करना हो सो शीघ्रतासे कीजिये। अब अर्जुनके सहित अपने डेरोंको चलिये। (२०–२३)

आपने जो पहिले मधुपर्क देखकर हमसे कहा था, कि यह अर्जुन आपका भाई और मित्र है, आप सब आपत्तियोंमें इसकी रक्षा कीजियेगा, और मैंने भी आपके वचन स्वीकार किये थे, सो यह वीर विजयी सत्य पराक्रमी अर्जुन अपने भाइयोंके सहित इस घोर युद्धसे बचे, हमने भी आपकी आज्ञानुसारही इनकी रक्षा करी। हे महाराज! श्रीकृष्णके ऐसे वचन सुन धर्मराज युधिष्ठिरके रोयें रोयें प्रसन्न होगये, और श्रीकृष्णसे बोले। (२४—२८)

हे शत्रुनाशन! कर्ण और द्रोणाचार्यके, छोडे हुए, ब्रह्मास्त्रको आपके सिवा साक्षात् वज्रधारी इन्द्र भी नहीं सह सकेंगे, आपहीकी कृपासे अर्जुनने संशप्तक सेनाको नाश किया, और घोर युद्धसे नहीं हटा। आपहीकी कृपासे हमको

तथैव च महाबाहो पर्यायैर्बहुभिर्मया ॥ ३० ॥
कर्मणामनुसन्तानं तेजसश्च गतीः शुभाः ।
उपप्लव्ये महर्षिर्मे कृष्णद्वैपायनोऽब्रवीत् ॥ ३१ ॥
यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः ।
इत्येवमुक्ते ते वीराः शिबिरं तव भारत ॥ ३२ ॥
प्रविश्य प्रत्यपद्यन्त कोशरत्नर्धिसंचयान् ।
रजतं जातरूपं च मणीनथ च मौक्तिकान् ॥ ३३ ॥
भूषणान्यथ मुख्यानि कंबलान्यजिनानि च ।
दासीदासमसंख्येयं राज्योपकरणानि च ॥ ३४ ॥
ते प्राप्य धनमक्षय्यं त्वदीयं भरतर्षभ ।
उदक्रोशन्महाभागा नरेन्द्रविजितारयः ॥ ३५ ॥
ते तु वीराः समाश्वस्य वाहनान्यवमुच्य च ।
अतिष्ठन्त मुहुः सर्वे पाण्डवाः सात्यकिस्तथा ॥ ३६ ॥
अथाब्रवीन्महाराज वासुदेवो महायशाः ।
अस्माभिर्मंगलार्थाय वस्तव्यं शिबिराद्बहिः ॥ ३७ ॥
तथेत्युक्त्वा हि ते सर्वे पाण्डवाः सात्यकिस्तथा ।
वासुदेवेन सहिता मंगलार्थं बहिर्ययुः ॥ ३८ ॥

अनेक प्रकारके कर्म, तेज और उत्तम गति प्राप्त हुई, हमसे विराट नगरमें पीहलेही वेद व्यासमुनिने कहा था, कि जहां धर्म तहां कृष्ण और जहां कृष्ण तहां विजय होगी। हे महाराज ! इन सब बातोंको समाप्त करके सब वीर आपके डेरोंमें घुसे; वहां उनके कोश (खजाना) रत्न आदि ऋद्धियोंके ढेर चांदी, सोना, मणी, मोती, उत्तम उत्तम आभूषण, कश्मीरी दुशाले, चमडे असंख्य दासी, दास, राज्यकी सब सामग्री मिली। उस आपके अक्षय धनको प्राप्त करके शत्रुहीन पाण्डव बहुत प्रसन्न हुए। (२८—३५)

अनन्तर ये सब वीर रथोंसे उतरकर थोडे समयतक वहांपर बैठे रहे और वाहनोंको शान्त किया। तब महायशस्वी श्रीकृष्ण बोले, कि सब सेना आज यहीं रहै परन्तु महाराज भीमसेन, अर्जुन, नकुल, सहदेव, सात्यकी और हम मङ्गलके लिये डेरोंसे बाहर रहेंगे। (३६-३७)

श्रीकृष्णके वचन सबने स्वीकार किये और ये सातों मङ्गलके लिये डेरों-

ते समासाद्य सरितं पुण्यां मोघवतीं नृप।
न्यवसन्नथ तां रात्रिं पाण्डवा हतशत्रवः ॥ ३९ ॥
युधिष्ठिरस्ततो राजा प्राप्तकालमचिंतयत्।
तत्र ते गमनं प्राप्तं रोचते तव माधव ॥ ४० ॥
गांधार्याः क्रोधदीप्तायाः प्रशमार्थमरिन्दम।
हेतुकारणयुक्तैश्च वाक्यैः कालसमीरितैः ॥ ४१ ॥
क्षिप्रमेव महाभाग गांधारीं प्रशमिष्यसि।
पितामहश्च भगवान् व्यासस्तत्र भविष्यति ॥ ४२ ॥
ततः संप्रेषयामासुर्यादवं नागसाह्वयम्।
स च प्रायाज्जवेनाशु वासुदेवः प्रतापवान् ॥ ४३ ॥
दारुकं रथमारोप्य येन राजांबिकासुतः।
तमूचुः सम्प्रयास्यन्तं शैब्यसुग्रीववाहनम् ॥ ४४ ॥
प्रत्याश्वासय गांधारीं हतपुत्रां यशस्विनीम्।
स प्रायात्पांडवैरुक्तस्तत्पुरं सात्वतां वरः ॥ ४५ ॥
आससाद ततः क्षिप्रं गान्धारीं निहतात्मजाम्॥४६॥३५७१

इतिश्रीमहाभारते शतसाहस्र्यां० शल्यपर्वांतर्गतगदापर्वणि वासुदेवप्रेषणे द्विषष्टितमोऽध्यायः ॥६२॥

से निकलकर सरस्वती नदीको चले गये और रात भर वहीं रहे। हे महाराज! वहां जाकर महाराज युधिष्ठिरने बहुत विचारकर समयके अनुसार श्रीकृष्णसे ऐसे वचन कहे। (३८-३९)

हे शत्रुनाशन कृष्ण! गान्धारी क्रोधसे बहुत ही व्याकुल होगी, इसलिये हमारी इच्छा है कि आप उनके पास जाइये और समयके अनुसार हेतु और कारण भरे ऐसे वचन सुनाइये जिसमें गान्धारी शान्त होय, वहां हमारे पितामह व्यास भी होंगे। हे महाराज! अनन्तर सब लोगोंकी यही सम्मति हुई कि श्रीकृष्णको हस्तिनापुर अवश्य ही भेजना चाहिये; तब श्रीकृष्ण भी शैब्य, सुग्रीव, मेघपुष्प और बलाहक नामक शीघ्र चलनेवाले घोडोंके रथपर बैठकर दारुक सारथीको साथ लेकर चल दिये, वहां प्रतापी, कृष्णको जाते देख सब पाण्डव श्रीकृष्णसे बोले, कि आप पुत्ररहित यशस्विनी गान्धारीको जाकर समझाइये। पाण्डवोंके वचन सुन श्रीकृष्ण हस्तिनापुरको चल दिये, और पुत्ररहित गान्धारी के पास पहुंचे। [४०-४६] [३५७१]

शल्यपर्वमें बासठ अध्याय समाप्त।

जनमेजय उवाच- किमर्थं द्विजशार्दूल धर्मराजो युधिष्ठिरः ।
गान्धार्याः प्रेषयामास वासुदेवं परंतपम् ॥ १ ॥
यदा पूर्वं गतः कृष्णः शमार्थं कौरवान्प्रति ।
न च तं लब्धवान्कामं ततो युद्धमभूदिदम् ॥ २ ॥
निहतेषु तु योधेषु हते दुर्योधने तदा ।
पृथिव्यां पाण्डवेयस्य निःसपत्ने कृते युधि ॥ ३ ॥
विद्रुते शिबिरे शून्ये प्राप्ते यशसि चोत्तमे ।
किं नु तत्कारणं ब्रह्मन् येन कृष्णो गतः पुनः ॥ ४ ॥
न चैतत्कारणं ब्रह्मन्नल्पं विप्रतिभाति मे ।
यत्रागमदमेयात्मा स्वयमेव जनार्दनः ॥ ५ ॥
तत्त्वतो वै समाचक्ष्व सर्वमध्वर्युसत्तम ।
यच्चात्र कारणं ब्रह्मन् कार्यस्यास्य विनिश्चये ॥ ६ ॥
वैशंपायन उवाच- त्वद्युक्तोऽयमनुप्रश्नो यन्मां पृच्छसि पार्थिव ।
तत्तेऽहं सम्प्रवक्ष्यामि यथावद्भरतर्षभ ॥ ७ ॥
हतं दुर्योधनं दृष्ट्वा भीमसेनेन संयुगे ।
व्युत्क्रम्य समयं राजन् धार्तराष्ट्रं महाबलम् ॥ ८ ॥
अन्यायेन हतं दृष्ट्वा गदायुद्धेन भारत ।

शल्यपर्वमें त्रेसठ अध्याय ।

महाराज जनमेजय बोले, हे ब्राह्मण-श्रेष्ठ वैशम्पायन मुने! धर्मराज युधिष्ठिरने शत्रुनाशन कृष्णको गान्धारीके पास क्यों भेजा? और कृष्ण क्यों गये? इसमें कोई भारी कारण होगा, क्योंकि श्रीकृष्ण इस युद्धसे पहिले ही एक बार शान्ति करानेके लिये हस्तिनापुर गये थे, परन्तु वह इनकी इच्छा पूर्ण नहीं हुई, तब फिर श्रीकृष्ण वहां क्यों गये? विशेषकर जब सब शत्रु मारे गये? दुर्योधन मर गये, जगत्में युधिष्ठिरका कोई शत्रु न रहा, शत्रुओंके डेरे शून्य होगये और उत्तम यश भी प्राप्त हो चुका; तब फिर स्वयं श्रीकृष्ण हस्तिनापुर क्यों गये? आप हमसे सब वर्णन कीजिये इस कार्यका जो कारण हो सो भी आप हमसे कहिये। (१-६)

श्रीवैशम्पायन मुनि बोले, हे भरतकुलश्रेष्ठ महाराज! आपने जो प्रश्न किया, वह आपहीके योग्य है। अब हम उसका कारण कहते हैं, आप सुनिये, महाराज युधिष्ठिरने महाबलवान दुर्योधनको अन्यायसे गदा युद्धमें मारा

युधिष्ठिरं महाराज महद्भयमथाविशत ॥ ९ ॥
चिंतयानो महाभागां गांधारीं तपसान्विताम् ।
घोरेण तपसा युक्तां त्रैलोक्यमपि सा दहेत ॥ १० ॥
तस्य चिंतयमानस्य बुद्धिः समभवत्तदा ।
गांधार्याः क्रोधदीप्तायाः पूर्वं प्रशमनं भवेत ॥ ११ ॥
सा हि पुत्रवधं श्रुत्वा कृतमस्माभिरीदृशम् ।
मानसेनाग्निना क्रुद्धा भस्मसान्नः करिष्यति ॥ १२ ॥
कथं दुःखमिदं तीव्रं गांधारी सम्प्रशक्ष्यति ।
श्रुत्वा विनिहतं पुत्रं छलेनाजिह्मयोधिनम् ॥ १३ ॥
एवं विचिन्त्य बहुधा भयशोकसमन्वितः ।
वासुदेवमिदं वाक्यं धर्मराजोऽभ्यभाषत ॥ १४ ॥
तव प्रसादाद्गोविन्द राज्यं निहतकण्टकम् ।
अप्राप्यं मनसाऽपीदं प्राप्तमस्माभिरच्युत ॥ १५ ॥
प्रत्यक्षं मे महाबाहो संग्रामे लोमहर्षणे ।
विमर्दः सुमहान्प्राप्तस्त्वया यादवनन्दन ॥ १६ ॥
त्वया देवासुरे युद्धे वधार्थममरद्विषाम् ।
यथा साह्यं पुरा दत्तं हताश्च विबुधद्विषः ॥ १७ ॥
साह्यं तथा महाबाहो दत्तमस्माकमच्युत ।
सारथ्येन च वार्ष्णेय भवता हि धृता वयम् ॥ १८ ॥

हुआ देख यह विचारा कि महाभाग्यवती गान्धारी घोरतप करती है। यह अपने तपसे तीनों लोकोंको भस्म कर सकती है, वह जब सुनेगी कि हमारे छलरहित पुत्रको पाण्डवोंने छलसे मारा तब क्रोध करके अपने मनकी अग्निसे भस्म कर देंगी, उस दुःखको वह कैसे सह सकेगी, ऐसा विचार करते करते महाराजकी बुद्धि भय और शोकसे व्याकुल होगई तब बहुत शोच विचारकर श्रीकृष्णसे बोले ॥ (७-१४)

हे कृष्ण! आपकी कृपासे हमने यह निष्कण्टक राज्य पाया, हम इस राज्यको मनसे भी नहीं पा सकते थे, हे महाबाहो! आपने हमारे देखते देखते इन सब शत्रुओंका नाश कर दिया, आपने देवासुर संग्राममें दानवोंको मारनेके लिये देवतोंको सहायता देकर दानवोंका नाश किया था, ऐसा ही हमें सहायता देकर कौरवोंका नाश किया। (१५-१८)

यदि न त्वं भवेन्नाथः फाल्गुनस्य महारणे ।
कथं शक्यो रणे जेतुं भवेदेष बलार्णवः ॥ १९ ॥
गदाप्रहारा विपुलाः परिघैश्चापि ताडनम् ।
शक्तिभिर्भिन्दिपालैश्च तोमरैः सपरश्वधैः ॥ २० ॥
अस्मत्कृते त्वया कृष्ण वाचः सुपरुषाः श्रुताः ।
शस्त्राणां च निपाता वै वज्रस्पर्शोपमा रणे ॥ २१ ॥
ते च ते सफला जाता हते दुर्योधनेऽच्युत ।
तत्सर्वं न यथा नश्येत्पुनः कृष्ण तथा कुरु ॥ २२ ॥
सन्देहदोलां प्राप्तं नश्चेतः कृष्णजये सति ।
गान्धार्या हि महाबाहो क्रोधं बुद्ध्यस्व माधव ॥ २३ ॥
सा हि नित्यं महाभागा तपसोग्रेण कर्शिता ।
पुत्रपौत्रवधं श्रुत्वा ध्रुवं नः संप्रधक्ष्यति ॥ २४ ॥
तस्याः प्रसादनं वीर प्राप्तकालं मतं मम ।
कश्च तां क्रोधताम्राक्षीं पुत्रव्यसनकर्शिताम् ॥ २५ ॥
वीक्षितुं पुरुषः शक्तस्त्वामृते पुरुषोत्तम ।
तत्र मे गमनं प्राप्तं रोचते तव माधव ॥ २६ ॥
गान्धार्याः क्रोधदीप्तायाः प्रशमार्थमरिन्दम ।

हे वार्ष्णेय ! आप यदि अर्जुनके सारथी और स्वामी न होते तो इस शत्रु सेनारूपी समुद्रका नाश कैसे होता ? आपने हमारे लिये परिघ, सांग, भिण्दिपाल, तोमर और परश्वध आदि वज्रके समान आयुधोंकी चोटें खाईं और अनेक कठोर वचन भी सुने, परन्तु दुर्योधनके मरनेसे आपका यह सब परिश्रम सफल हुआ, परन्तु यह सब जिसमें नष्ट न होजाय सो उपाय कीजिये। हमें विजय प्राप्त होनेपर भी गान्धारीके क्रोधसे सन्देह है, क्यों कि महाभागिनी गान्धारी सदा घोर तप करती रहती हैं, वे अपने पुत्र और पोतोंको मरा हुआ सुन हमें अवश्य ही भस्म कर देंगी। इसलिये उन्हे इस समय प्रसन्न करना हमारी सम्मति है। (१८-२४)

हे पुरुषोत्तम ! क्रोधसे लालनेत्रवाली और पुत्र शोकसे व्याकुल गान्धारीको आपके सिवाय कौन मनुष्य देख सक्ता है ? इसलिये हमारी सम्मतिमें आता है कि आप वहां जाइये; आप जगतके कर्त्ता नाशक और अव्यय हैं इसलिये क्रोध भरी गान्धारीको शान्त कीजिये

त्वं हि कर्ता विकर्ता च लोकानां प्रभवाव्ययः ॥२७॥
हेतुकारणसंयुक्तैर्वाक्यैः कालसमीरितैः ।
क्षिप्रमेव महाबाहो गान्धारीं शमयिष्यसि ॥ २८ ॥
पितामहश्च भगवान् कृष्णस्तत्र भविष्यति ।
सर्वथा ते महाबाहो गान्धार्याः क्रोधनाशनम् ॥२९ ॥
कर्तव्यं सात्वतां श्रेष्ठ पाण्डवानां हितार्थिना ।
धर्मराजस्य वचनं श्रुत्वा यदुकुलोद्वहः ॥ ३० ॥
आमंत्र्य दारुकं प्राह रथः सज्जो विधीयताम् ।
केशवस्य वचः श्रुत्वा त्वरमाणोऽथ दारुकः ॥ ३१ ॥
न्यवेदयद्रथं सज्जं केशवाय महात्मने ।
तं रथं यादवश्रेष्ठः समारुह्य परन्तपः ॥ ३२ ॥
जगाम हास्तिनपुरं त्वरितः केशवो विभुः ।
ततः प्रायान्महाराज माधवो भगवान् रथी ॥ ३३ ॥
नागसाह्वयमासाद्य प्रविवेश च वीर्यवान् ।
प्रविश्य नगरं वीरो रथघोषेण नादयन् ॥ ३४ ॥
विदितं धृतराष्ट्रस्य सोऽवतीर्य रथोत्तमात् ।
अभ्यगच्छददीनात्मा धृतराष्ट्रनिवेशनम् ॥ ३५ ॥
पूर्वं चाभिगतं तत्र सोऽपश्यदृषिसत्तमम् ।
पादौ प्रपीड्य कृष्णस्य राज्ञश्चापि जनार्दनः ॥ ३६ ॥

समयके अनुसार प्रत्यक्ष और अप्रत्यक्ष कारणोंसे भरे वचन सुनाकर आप गान्धारीको अवश्य ही शान्त करेंगे । हे महाबाहो ! हमारे पितामह भगवान् व्यास भी वहीं होंगे; आप सदा पाण्डवोंका कल्याण चाहते हैं, इसलिये सब प्रकारसे गान्धारीका क्रोध शान्त कीजियेगा । महाराजके ऐसे वचन सुन यदुकुलश्रेष्ठ कृष्णने दारुकको बुलाकर कहा कि हमारा रथ ले आओ ।(२५-३१

दारुकने महात्मा श्रीकृष्णके वचन सुन शीघ्र रथ तैयार करके कृष्णसे कहा कि रथ खडा है । अनन्तर यदुकुलश्रेष्ठ शत्रुनाशन श्रीकृष्ण रथपर बैठकर चल दिये और थोडे ही समयमें रथके शब्दसे दिशाओंको पूरित करते हुए हस्तिनापुर पहुंचे और महाराज धृतराष्ट्रको समाचार देकर उनके पास गये और वहां पहिलेहीसे बैठे मुनिश्रेष्ठ व्यासको देखा । अनन्तर श्रीकृष्णने वेदव्यास

अभ्यवादयदव्यग्रो गान्धारीं चापि केशवः ।
ततस्तु यादवश्रेष्ठो धृतराष्ट्रमधोक्षजः ॥ ३७ ॥
पाणिमालम्ब्य राजेन्द्र सुस्वरं प्ररुरोद ह ।
समुहूर्तादिवोत्सृज्य बाष्पं शोकसमुद्भवम् ॥ ३८ ॥
प्रक्षाल्य वारिणा नेत्रे ह्याचम्य च यथाविधि ।
उवाच प्रस्तुतं वाक्यं धृतराष्ट्रमरिन्दमः ॥ ३९ ॥
न तेऽस्त्यविदितं किञ्चिद्वृद्धस्य तव भारत ।
कालस्य च यथा वृत्तं तत्ते सुविदितं प्रभो ॥ ४० ॥
यदिदं पाण्डवैः सर्वैस्तव चित्तानुरोधिभिः ।
कथं कुलक्षयो न स्यात्तथा क्षत्रस्य भारत ॥ ४१ ॥
भ्रातृभिः समयं कृत्वा क्षान्तवान् धर्मवत्सलः ।
द्यूतच्छलजितैः शुद्धैर्वनवासो ह्युपागतः ॥ ४२ ॥
अज्ञातवासचर्या च नानावेषसमावृतैः ।
अन्ये च बहवः क्लेशास्त्वशक्तैरिव सर्वदा ॥ ४३ ॥
मया च स्वयमागम्य युद्धकाल उपस्थिते ।
सर्वलोकस्य सान्निध्ये ग्रामांस्त्वं पञ्च याचितः ॥ ४४ ॥
त्वया कालोपसृष्टेन लोभतो नापवर्जिताः ।

और राजाके चरणोंमें प्रणाम करके गान्धारीको प्रणाम किया । फिर राजाका हाथ पकडकर ऊंचे स्वरसे बहुत समय तक रोते रहे । फिर आंसू पोछकर मुंह धोकर कुल्ला किया और बैठकर शत्रुनाशन धृतराष्ट्रसे बोले । (३१-३९)

महाराज ! आप बूढे हैं, समयके अनुसार जो कुछ हुआ सो आपने सुना ही होगा, आपको कोई बात अविदित नहीं है, आप और पाण्डवोंका चित्त न मिला तब कुरुकुल और क्षत्रियोंका नाश क्यों न होता ? धर्मात्मा युधिष्ठिरने अपने सब भाइयोंको शान्त कर लिया था, परन्तु आपने उन्हें जुएमें जीतकर उनको वनवास दिया, वह भी उन्होंने स्वीकार किया, फिर एक वर्षतक अनेक प्रकारके रूप बनाकर छिपकर विराट नगरमें निवास किया, इत्यादि और भी अनेक क्लेश पाण्डवोंने सदा समर्थ होने पर भी असमर्थके समान सहे, आगे जब युद्ध होनेको उपस्थित होगया, तब स्वयं मैंने आकर आपसे पांच गांव मांगे, परन्तु आपने समयके फेरसे लोभके वश होकर वे भी न दिये । कहांतक

तवापराधान्नृपते सर्वं क्षत्रं क्षयं गतम् ॥ ४५ ॥
भीष्मेण सोमदत्तेन बाल्हीकेन कृपेण च।
द्रोणेन च सपुत्रेण विदुरेण च धीमता ॥ ४६ ॥
याचितस्त्वं शमं नित्यं न च तत्कृतवानसि।
कालोपहतचित्ता हि सर्वे मुह्यन्ति भारत ॥ ४७ ॥
यथा मूढो भवान्पूर्वमस्मिन्नर्थे समुद्यत।
किमन्यत्कालयोगाद्धि दिष्टमेव परायणम् ॥ ४८ ॥
मा च दोषान्महाप्राज्ञ पाण्डवेषु निवेशय।
अल्पोऽप्यतिक्रमो नास्ति पाण्डवानां महात्मनाम्॥४९॥
धर्मतो न्यायतश्चैव स्नेहतश्च परन्तप।
एतत्सर्वं तु विज्ञाय ह्यात्मदोषकृतं फलम् ॥ ५० ॥
असूयां पाण्डुपुत्रेषु न भवान्कर्तुमर्हति।
कुलं वंशश्च पिण्डाश्च यच्च पुत्रकृतं फलम् ॥ ५१ ॥
गान्धार्यास्तव वै नाथ पाण्डवेषु प्रतिष्ठितम्।
त्वं चैव कुरुशार्दूल गान्धारी च यशस्विनी ॥ ५२ ॥
मा शुचो नरशार्दूल पाण्डवान्प्रति किल्बिषम्।
एतत्सर्वमनुध्याय आत्मनश्च व्यतिक्रमम् ॥ ५३ ॥

कहैं आपहीके अपराधसे यह क्षत्रीवंश नष्ट होगया; भीष्म, सोमदत्त, बाह्लीक, कृपाचार्य, द्रोणाचार्य, अश्वत्थामा और बुद्धिमान् विदुरने बहुत बार आपसे शान्ति करनेको कहा परन्तु आपने उनके वचनको भी न सुना। (३९-४५)

हे भारत आपका इसमें कुछ भी दोष नहीं है समय बिगडनेसे सबकी बुद्धि ऐसी नष्ट होजाती है; आप इस कार्यसे मूर्ख होगए इसमें प्रारब्धके और कालके सिवा किसको दोष देवें ? हे महाबुद्धि-मान ! आप पाण्डवोंको कुछ दोष न दीजिये क्यों कि इस विषयमें महात्मा पाण्डवोंका कुछ भी दोष नहीं है आप धर्म, न्याय और स्नेहसे विचारिये, तो यह सब आपहीके किये दोषोंका फल जान पडेगा। आप पाण्डवोंको किसी प्रकार दोष मत दीजिये क्यों कि वे आपको और गान्धारीको पिण्ड देनेवाले कुलमें उत्पन्न हुवे पुत्र हैं। (४५-५१)

हे भरतकुलश्रेष्ठ ! आप और यश-स्विनी गान्धारी पाण्डवोंकी ओरसे कुछ द्वेष न करो क्यों कि यह सब आपहीके दोषोंका फल है, हम आपको प्रणाम करते

शिवेन पाण्डवान्पाहि नमस्ते भरतर्षभ।
जानासि च महाबाहो धर्मराजस्य या त्वयि ॥ ५४ ॥
भक्तिर्भरतशार्दूल स्नेहश्चापि स्वभावतः।
एतच्च कदनं कृत्वा शत्रूणामपकारिणाम् ॥ ५५ ॥
दह्यते स दिवारात्रौ न च शर्माधिगच्छति।
त्वां चैव नरशार्दूल गान्धारीं च यशस्विनीम् ॥ ५६ ॥
स शोचन्नरशार्दूलः शान्तिं नैवाधिगच्छति।
ह्रिया च परयाऽऽविष्टो भवन्तं नाधिगच्छति ॥ ५७ ॥
पुत्रशोकाभिसन्तप्तं बुद्धिव्याकुलितेन्द्रियम्।
एवमुक्त्वा महाराज धृतराष्ट्रं यदूत्तमः ॥ ५८ ॥
उवाच परमं वाक्यं गान्धारीं शोककर्शिताम्।
सौबलेयि निबोध त्वं यत्त्वां वक्ष्यामि तच्छृणु ॥५९॥
त्वत्समा नास्ति लोकेऽस्मिन्नद्य सीमन्तिनी शुभे।
जानासि च यथा राज्ञि सभायां मम सन्निधौ ॥ ६० ॥
धर्मार्थसहितं वाक्यमुभयोः पक्षयोर्हितम्।
उक्तवत्यसि कल्याणि न च ते तनयैः कृतम् ॥ ६१ ॥
दुर्योधनस्त्वया चोक्तो जयार्थी परुषं वचः।
शृणु मूढ वचो मह्यं यतो धर्मस्ततो जयः ॥ ६२ ॥

हैं आप कृपा करके पाण्डवोंकी रक्षा कीजिये। हे महाबाहो! महाराज युधिष्ठिरको आपकी कैसी भक्ति और प्रीति है, सो आप जानते हैं। सब अहितकारी शत्रुओंको मारकर भी आपके और यशस्विनी गान्धारीके सोचसे रात दिन व्याकुल रहते हैं; हमने उन्हें कभी भी शान्त नहीं देखा। (५१-५७)

हे पुरुषसिंह! आप पुत्रोंके शोकसे व्याकुल होरहे हैं इस ही लज्जासे महाराज स्वयं आपके पास नहीं आए। ऐसा कहकर यदुकुल श्रेष्ठ कृष्ण शोकसे पीडित गान्धारीसे बोले। हे सुवलपुत्री! मैं तुमसे जो कहता हूं सो सुनो, इस समय पीडित जगत्में तुम्हारे समान सौभाग्यवती स्त्री कोई नहीं है, तुमने हमारे आगे सभामें धर्म और अर्थसे भरे दोनों ओरके कल्याण करनेवाले वचन कहे; परन्तु तुम्हारे पुत्रोंने नहीं माना; युद्धको जाते समय भी तुमने दुर्योधनको कठोर वचन कहे कि, रे मूर्ख! जहां धर्म है वहीं ही विजय होती

तदिदं समनुप्राप्तं तव वाक्यं नृपात्मजे ।
एवं विदित्वा कल्याणि मा स्म शोके मनः कृथाः ॥ ६३ ॥
पाण्डवानां विनाशाय मा ते बुद्धिः कदाचन ।
शक्ता चासि महाभागे पृथिवीं सचराचराम् ॥ ६४ ॥
चक्षुषा क्रोधदीप्तेन निर्दग्धुं तपसो वलात् ।
वासुदेववचः श्रुत्वा गान्धारी वाक्यमब्रवीत् ॥ ६५ ॥
एवमेतन्महाबाहो यथा वदसि केशव ।
आधिभिर्दह्यमानाया मतिः सञ्चलिता मम ॥ ६६ ॥
सा मे व्यवस्थिता श्रुत्वा तव वाक्यं जनार्दन ।
राज्ञस्त्वंधस्य वृद्धस्य हतपुत्रस्य केशव ॥ ६७ ॥
त्वं गतिः सहितैर्वीरैः पाण्डवैर्द्विपदां वर ।
एतावदुक्त्वा वचनं मुखं प्रछाद्य वाससा ॥ ६८ ॥
पुत्रशोकाभिसन्तप्ता गान्धारी प्ररुरोद ह ।
तत एनां महाबाहुः केशवः शोककर्शिताम् ॥ ६९ ॥
हेतुकारणसंयुक्तैर्वाक्यैराश्वासयत्प्रभुः ।
समाश्वास्य च गान्धारीं धृतराष्ट्रं च माधवः ॥ ७० ॥
द्रौणिसङ्कल्पितं भावमवबुद्ध्यत केशवः ।

है, परन्तु उसने उनको भी नहीं माना। (५७-६२)

हे राजपुत्री ! तुम्हारे वे सब वचन सत्य होगये इसलिये तुम अपने मनमें कुछ शोक न करो। हे कल्याणी ! तुम अपने क्रोध भरे नेत्रोंसे चर और अचर जगत् तथा पृथ्वीको भस्म कर सक्ती हो परन्तु पहिले सब कारण विचारकर पाण्डवोंके नाशका विचार मत करो।

श्रीकृष्णके वचन सुन गान्धारी बोली, हे महाबाहो कृष्ण ! तुम जैसे हो सो अच्छेही हो, परन्तु शोकोंके कारण मेरी ही बुद्धि नष्ट होगई है, इस समय हमें पुत्ररहित अन्धे राजाको और वीर पाण्डवोंको केवल आप ही की शरण है, आपके वचन सुनकर मेरी बुद्धि स्थिर होगई, ऐसा कहकर पुत्रोंके शोकसे पीडित गान्धारी कपडेसे मुंह ढककर रोने लगी, तब फिर शोकपीडित गान्धारी और धृतराष्ट्रको श्रीकृष्ण अनेक प्रत्यक्ष और अप्रत्यक्ष कारणोंसे समझाने लगे। (६३—७०)

उसी समय श्रीकृष्णको अश्वत्थामाकी प्रतिज्ञाका स्मरण आगया, तब बहुत

ततस्त्वरित उत्थाय पादौ मूर्ध्ना प्रणम्य च ॥ ७१ ॥
द्वैपायनस्य राजेन्द्र ततः कौरवमब्रवीत् ।
आपृच्छे त्वां कुरुश्रेष्ठ मा च शोके मनः कृथाः ॥७२॥
द्रौणेः पापोऽस्त्यभिप्रायस्तेनास्मि सहसोत्थितः ।
पाण्डवानां वधे रात्रौ बुद्धिस्तेन प्रदर्शिता ॥ ७३ ॥
एतच्छ्रुत्वा तु वचनं गान्धार्या सहितोऽब्रवीत् ।
धृतराष्ट्रो महाबाहुः केशवं केशिसूदनम् ॥ ७४ ॥
शीघ्रं गच्छ महाबाहो पाण्डवान्परिपालय ।
भूयस्त्वया समेष्यामि क्षिप्रमेव जनार्दन ॥ ७५ ॥
प्रायात्ततस्तु त्वरितो दारुकेण सहाच्युतः ।
वासुदेवे गते राजन् धृतराष्ट्रं जनेश्वरम् ॥ ७६ ॥
आश्वासयदमेयात्मा व्यासो लोकनमस्कृतः ।
वासुदेवोऽपि धर्मात्मा कृतकृत्यो जगाम ह ॥ ७७ ॥
शिबिरं हास्तिनपुराद्दिदृक्षुः पाण्डवान्नृप ।
आगम्य शिबिरं रात्रौ सोऽभ्यगच्छत पाण्डवान् ।
तच्च तेभ्यः समाख्याय सहितस्तैः समाहितः ॥७८॥ [३६४९]

इति श्रीमहाभारते० शल्यपर्वान्तर्गतगदापर्वणि० धृतराष्ट्रगांधारीसमाश्वासने त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

धृतराष्ट्र उवाच– अधिष्ठितः पदा मूर्ध्नि भग्नसक्थो महीं गतः ।

शीघ्रतासे उठे और राजा धृतराष्ट्रके चरणोंमें शिर रखकर कहने लगे कि, हे कुरुकुलश्रेष्ठ ! आप किसी प्रकारका शोक न कीजिये, आज रात्रिको अश्वत्थामाने पाण्डवोंको मारनेका विचार किया है, इसलिये मुझे वहां जानेकी आज्ञा दीजिए। ऐसा कहकर कृष्णने व्यासदेवको प्रणाम किया। (७०–७३)

केशिनाशन श्रीकृष्णके वचन सुन महाबाहु धृतराष्ट्र और गान्धारी शीघ्रतासे बोले। हे महाबाहो ! हम तुमसे फिर मिलेंगे, अब तुम शीघ्र जाओ और पाण्डवोंकी रक्षा करो। महाराजके वचन सुन कृष्ण दारुकके सहित रथपर बैठकर सेनाकी तरफ चले गये। कृष्णके जानेके पीछे महात्मा व्यास राजा धृतराष्ट्रको समझाते रहे। महात्मा कृष्ण भी कृतकृत्य होकर हस्तिनापुरसे चलकर पाण्डवोंको देखनेके लिये डेरोंमें पहुंचे और उनसे मिलकर प्रसन्नतापूर्वक सब समाचार कह सुनाये। (७३–७८) [३६४९]

शल्यपर्वमें त्रेसठ अध्याय समाप्त।

शौटीर्यमानी पुत्रो मे किमभाषत संजय ॥ १ ॥
अत्यर्थं कोपनो राजा जातवैरश्च पाण्डुषु ।
व्यसनं परमं प्राप्तः किमाह परमाहवे ॥ २ ॥
संजय उवाच— शृणु राजन्प्रवक्ष्यामि यथावृत्तं नराधिप ।
राज्ञा यदुक्तं भग्नेन तस्मिन्व्यसन आगते ॥ ३ ॥
भग्नसक्थो नृपो राजन्पांसुना सोऽवगुण्ठितः ।
यमयन्मूर्धजांस्तत्र वीक्ष्य चैव दिशो दश ॥ ४ ॥
केशान्नियम्य यत्नेन निःश्वसन्नुरगो यथा ।
संरम्भाश्रुपरीताभ्यां नेत्राभ्यामभिवीक्ष्य माम् ॥ ५ ॥
बाहू धरण्यां निष्पिष्य सुदुर्मत्त इव द्विपः ।
प्रकीर्णान्मूर्धजान्धुन्वन् दन्तैर्दन्तानुपस्पृशन् ॥ ६ ॥
गर्हयन्पांडवं ज्येष्ठं निःश्वस्येदमथाब्रवीत् ।
भीष्मे शांतनवे नाथे कर्णे शस्त्रभृतां वरे ॥ ७ ॥
गौतमे शकुनौ चापि द्रोणे चास्त्रभृतां वरे ।
अश्वत्थाम्नि तथा शल्ये शूरे च कृतवर्मणि ॥ ८ ॥
इमामवस्थां प्राप्तोऽस्मि कालो हि दुरतिक्रमः ।
एकादशचमूभर्ता सोऽहमेतां दशां गतः ॥ ९ ॥

शल्यपर्वमें चौसठ अध्याय ।

महाराज धृतराष्ट्र बोले, हे सञ्जय ! जङ्घा टूटनेके पश्चात् अभिमानी हमारे पुत्रने तुमसे क्या कहा ? वह हमारा पुत्र सदासे क्रोधी और पाण्डवोंका वैरी था, तब इस आपत्तिमें पडकर तुमसे क्या कहा ? (१—२)

सञ्जय बोले, हे महाराज ! उस आपत्तिमें पडकर जांघ टूटनेके पश्चात महाराजने हमसे जो कहा सो सुनिये, मुझको अपने पास खडे देख जङ्घा टूटे महाराज उठे और मेरी ओर देखा। उस समय महाराजका सब शरीर धूलिसे भर रहा था। अनन्तर अपने हाथ ऊंचे टेककर मतवाले, हाथीके समान बैठे और इधर उधर बिथरे हुए बालोंको घुमाते हुए दांतसे दातोंको पीसकर महाराज युधिष्ठिरको धिक्कार देकर लम्बा सांस लेकर क्रोध और आंसू भरे नेत्रोंसे मेरी ओर देखकर बोले। (३-७)

हे सञ्जय ! किसी समय शान्तनुपुत्र भीष्म, शस्त्रधारियोंमें श्रेष्ठ कर्ण, कृपाचार्य, शकुनी, महाशस्त्रधारी द्रोण, अश्वत्थामा, वीर शल्य और कृतवर्मा-

कालं प्राप्य महाबाहो न कश्चिदतिवर्तते ।
आख्यातव्यं मदीयानां येऽस्मिन् जीवंति संयुगे ॥१०॥
यथाऽहं भीमसेनेन व्युत्क्रम्य समयं हतः ।
बहूनि सुनृशंसानि कृतानि खलु पाण्डवैः ॥ ११ ॥
भूरिश्रवसि कर्णे च भीष्मे द्रोणे च श्रीमति ।
इदं चाकीर्तिजं कर्म नृशंसैः पाण्डवैः कृतम् ॥ १२ ॥
येन ते सत्सु निर्वेदं गमिष्यंति हि मे मतिः ।
का प्रीतिः सत्वयुक्तस्य कृत्वोपाधिकृतं जयम् ॥ १३ ॥
को वा समयभेत्तारं बुधः संमन्तुमर्हति ।
अधर्मेण जयं लब्ध्वा को नु हृष्येत पण्डितः ॥ १४ ॥
यथा संहृष्यते पापः पाण्डुपुत्रो वृकोदरः ।
किन्नु चित्रमितस्त्वद्य भग्नसक्थस्य यन्मम ॥ १५ ॥
क्रुद्धेन भीमसेनेन पादेन मृदितं शिरः ।
प्रतपन्तं श्रिया जुष्टं वर्तमानं च बन्धुषु ॥ १६ ॥
एवं कुर्यान्नरो यो हि स वै संजय पूजितः ।
अभिज्ञौ युद्धधर्मस्य मम माता पिता च मे ॥ १७ ॥

दि मेरे सङ्ग थे, मैं ग्यारह अक्षोहिणियों-का स्वामी था और आज इस दुर्दशामें पड़ा हूं, समयकी गति बड़ी कठोर है। समयको कोई नांघ नहीं सक्ता। हे महाबाहो ! यदि कोई हमारा जीता हुआ मित्र मिले तो कहना कि भीमसे-नने दुर्योधनको ऐसे अन्यायसे मारा। पापी पाण्डवोंने श्रीमान् भीष्म, द्रोणा-चार्य, भूरिश्रवा और कर्णके सङ्ग भी ऐसेही ऐसे अधर्म किये थे, इनका अप यश जगत्में फैलेगा, हमें यह निश्चय है, कि हमारे मित्रोंके मरनेसे और इस छलयुक्त पाण्डवोंकी विजयसे महात्मा प्रसन्न नहीं होंगे, क्यों कि अन्याय कर्मकी कौन महात्मा प्रशंसा करता है ? अधर्मसे विजय करके पापी पाण्डुपुत्र भीमसेनके सिवा और कौन प्रसन्न होगा ? (७-१५)

हे सञ्जय ! इसमें क्या आश्चर्य है जो जङ्घा टूटनेके पश्चात् क्रोधी भीमसे-नने मेरे शिरपर पैर धर दिया ? हे सञ्जय ! जो तेजसे भरे राज्यपर बैठे बन्धुवोंसे युक्त शत्रुओंका निरादर करै उसकी प्रशंसा करनी चाहिये। मेरे माता और पिता दोनों ही युद्ध विद्याको पूर्ण-रीतिसे जानते हैं ! आज वह दुःखसे

तौ हि संजय दुःखार्तौ विज्ञाप्यौ वचनाद्धि मे।
इष्टं भृत्या भृताः सम्यग्भूः प्रशास्ता ससागरा ॥ १८ ॥
मूर्ध्नि स्थितममित्राणां जीवतामेव सञ्जय।
दत्ता दाया यथाशक्ति मित्राणां च प्रियं कृतम् ॥१९॥
अमित्रा बाधिताः सर्वे को नु स्वंततरो मया।
मानिता बांधवाः सर्वे वश्यः संपूजितो जनः ॥ २० ॥
त्रितयं सेवितं सर्वं को नु स्वन्ततरो मया।
आज्ञप्तं नृपमुख्येषु मानः प्राप्तः सुदुर्लभः ॥ २१ ॥
आजानेयैस्तथा यातं को नु स्वन्ततरो मया।
यातानि परराष्ट्राणि नृपा भुक्ताश्च दासवत् ॥ २२ ॥
प्रियेभ्यः प्रकृतं साधु को नु स्वन्ततरो मया।
अधीतं विधिवद्दत्तं प्राप्तमायुर्निरामयम् ॥ २३ ॥
स्वधर्मेण जिता लोकाः को नु स्वन्ततरो मया।
दिष्ट्या नाहं जितः संख्ये परान्प्रेष्यवदाश्रितः ॥२४॥
दिष्ट्या मे विपुला लक्ष्मीर्मृते त्वन्यगता विभो।
यदिष्टं क्षत्रबन्धूनां स्वधर्ममनुतिष्ठताम् ॥ २५ ॥

व्याकुल होंगे। तुम उनसे कहना कि तुम्हारे पुत्रने ऐसे कहा है, कि हमने अपने जीवनमें अनेक यज्ञ करे, सेवकोंको सन्तुष्ट करा, समुद्र सहित पृथ्वीको अपनी आज्ञामें चलाया, जीते हुए शत्रुओंके शिरपर पैर रक्खा, शक्तिके अनुसार दान किये, मित्रोंका हित किया, और शत्रुओंको दबाया, हमारे समान और महात्मा कौन होगा, बन्धुवोंका समान किया, देवऋण, पितृऋण, और ऋषिऋणसे शरीरको छुडाया, हमारे समान जगत्में और कौन महात्मा होगा। राजोंमें मुख्य महाराजोंके ऊपर आज्ञा चलाई, दुर्लभ मान प्राप्त किया। अब उत्तम मार्गसे स्वर्गको जाता हूं। मेरे समान और महात्मा कौन होगा। दूसरोंके राज्य छीने, राजोंसे दासोंके समान सेवा कराई, मेरे समान महात्मा कौन होगा। विधिके अनुसार सब वेद पढे, अनेक दान दिये, रोगरहित अवस्था पाई और अपने धर्मसे स्वर्गको जाता हूं। मेरे समान और महात्मा कौन होगा, मुझे प्रारब्धहीसे शत्रुवोंने जीतकर अपना दास नहीं बनाया, प्रारब्धहीसे मेरी लक्ष्मी मरनेके पश्चात् शत्रुओंके हाथमें गई, अपना धर्म करने-

निधनं तन्मया प्राप्तं को नु स्वन्ततरो मया ।
दिष्ट्या नाहं परावृत्तो वैरात्प्राकृतवज्जितः ॥ २६ ॥
दिष्ट्या न विमतिं कांचिद्भजित्वा तु पराजितः ।
सुप्तं वाथ प्रमत्तं वा यथा हन्याद्विषेण वा ॥ २७ ॥
एवं व्युत्क्रांतधर्मेण व्युत्क्रम्य समयं हतः ।
अश्वत्थामा महाभागः कृतवर्मा च सात्वतः ॥ २८ ॥
कृपः शारद्वतश्चैव वक्तव्या वचनान्मम ।
अधर्मेण प्रवृत्तानां पाण्डवानामनेकशः ॥ २९ ॥
विश्वासं समयघ्नानां न यूयं गन्तुमर्हथ ।
वार्तिकांश्चाब्रवीद्राजा पुत्रस्ते सत्यविक्रमः ॥ ३० ॥
अधर्माद्भीमसेनेन निहतोऽहं यथा रणे ।
सोऽहं द्रोणं स्वर्गगतं कर्णशल्यावुभौ तथा ॥ ३१ ॥
वृषसेनं महावीर्यं शकुनिं चापि सौबलम् ।
जलसंधं महावीर्यं भगदत्तं च पार्थिवम् ॥ ३२ ॥
सोमदत्तं महेष्वासं सैन्धवं च जयद्रथम् ।
दुःशासनपुरोगांश्च भ्रातॄनात्मसमांस्तथा ॥ ३३ ॥

वाले महात्मा क्षत्री जिस रीतिसे मरना चाहते हैं, आज मैं उसी रीतिसे मरा । मेरे समान और महात्मा कौन होगा ? (१५-२६)

अच्छा हुआ जो मैंने अपना वैर न छोडा और न्यायसे न हारा। अच्छा हुवा जो मैंने युद्धमें कोई अधर्म न किया। जो मनुष्य सोतेको, मद्य पियेको मारता है, अथवा विष देकर मारता है उसकी प्रशंसा जगत्में नहीं होती। ऐसे ही जो धर्म छोडकर युद्ध करता है, उसकी भी प्रशंसा जगत्में नहीं होती। हे सञ्जय ! तुम बलवान अश्वत्थामा, कृपाचार्य और कृतवर्मासे हमारी ओरसे यह कहना कि तुम लोग अधर्मी, विश्वासघाती पाण्डवोंका विश्वास कभी न करना। (२६—३०)

हे महाराज ! मुझसे ऐसा कहकर महापराक्रमी दुर्योधन वार्तावह (समाचार प्रसिद्ध करनेवाले) लोगोंसे बोले, पापी भीमसेनने हमें अधर्मसे मारा, सो अब हम स्वर्गमें जाकर द्रोणाचार्य, कर्ण, शल्य, महापराक्रमी वृषसेन, सुबल पुत्र शकुनी, महावीर जलसन्ध, राजा भगदत्त, महाधनुषधारी सोमदत्त, सिन्धुराज जयद्रथ, दुःशासन आदि सौ भाई

दौःशासनिं च विक्रान्तं लक्ष्मणं चात्मजावुभौ ।
एतांश्चान्यांश्च सुबहून् मदीयांश्च सहस्रशः ॥ ३४ ॥
पृष्ठतोऽनुगमिष्यामि सार्थहीनो यथाऽध्वगः ।
कथं भ्रातॄन् हतान् श्रुत्वा भर्तारं च स्वसा मम ॥३५॥
रोरूयमाणा दुःखार्ता दुःशला सा भविष्यति ।
स्नुषाभिः प्रस्नुषाभिश्च वृद्धो राजा पिता मम ॥३६॥
गांधारीसहितश्चैव कां गतिं प्रतिपत्स्यति ।
नूनं लक्ष्मणमाताऽपि हतपुत्रा हतेश्वरा ॥ ३७ ॥
विनाशं यास्यति क्षिप्रं कल्याणी पृथुलोचना ।
यदि जानाति चार्वाकः परिव्राड् वाग्विशारदः॥ ३८॥
करिष्यति महाभागो ध्रुवं चापचितिं मम ।
समन्तपञ्चके पुण्ये त्रिषु लोकेषु विश्रुते ॥ ३९ ॥
अहं निधनमासाद्य लोकान्प्राप्स्यामि शाश्वतान् ।
ततो जनसहस्राणि बाष्पपूर्णानि मारिष ॥ ४० ॥
प्रलापं नृपतेः श्रुत्वा व्यद्रवन्त दिशो दश ।
स सागरवना घोरा पृथिवी सचराचरा ॥ ४१ ॥
चचालाथ सनिर्ह्रादा दिशश्चैवाविला भवन् ।

महाबलवान् दुःशासन पुत्र और लक्ष्मण आदि अपने सहस्रों बन्धुओंसे मिलेंगे, मैं उनके पीछे इस प्रकार स्वर्गको जाता हूं जैसे सामग्री रहित बटोही । ३०-३५

हाय हमारी बहिन दुःशला अपने सौ भाई और पतिको मरा हुआ सुन दुःखसे व्याकुल होकर क्या करेगी ? हमारे पिता बूढे महाराज, बहू, पोतोंकी बहू और गान्धारीके सहित किस दुर्दशामें पडेंगे ? हमें यह निश्चय है कि, विशालनयनी सुन्दरी लक्ष्मणकी माता पुत्र और पतिको मरा हुआ सुन अवश्य ही मर जायगी । यदि कहीं महापण्डित सब स्थानोंमें घूमनेवाले, महाभाग चार्वाक मेरी इस दशाको सुन लें, तो अवश्यही पाण्डवोंसे बदला लेंगे । मैं तीनों लोकोंमें प्रसिद्ध समन्त पञ्चक तीर्थपर मरकर स्वर्गको जाता हूं, तुम लोग भी जाओ । (३५-४०)

हे महाराज ! राजाके ऐसे वचन सुन वार्त्तावह रोने लगे और वहांसे चले गये, राजाका रोना सुनकर सब पशु पक्षी भी भाग गये, चर और अचर वन और समुद्रके सहित सब पृथ्वी

ते द्रोणपुत्रमासाद्य यथावृत्तं न्यवेदयन् ॥ ४२ ॥
व्यवहारं गदायुद्धे पार्थिवस्य च पातनम् ।
तदाख्याय ततः सर्वे द्रोणपुत्रस्य भारत ।
ध्यात्वा च सुचिरं कालं जग्मुरार्ता यथागतम् ॥४३॥३६९२

इतिश्री महाभारते० शल्यपर्वांतर्गतगदापर्वणि दुर्योधनविलापे चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

संजय उवाच— वार्तिकाणां सकाशात्तु श्रुत्वा दुर्योधनं हतम् ।
हतशिष्टास्ततो राजन् कौरवाणां महारथाः ॥ १ ॥
विनिर्भिन्नाः शितैर्बाणैर्गदातोमरशक्तिभिः ।
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ॥ २ ॥
त्वरिता जवनैरश्वैरायोधनमुपागमन् ।
तत्रापश्यन्महात्मानं धार्तराष्ट्रं निपातितम् ॥ ३ ॥
प्रभग्नं वायुवेगेन महाशालं यथा वने ।
भूमौ विचेष्टमानं तं रुधिरेण समुक्षितम् ॥ ४ ॥
महागजमिवारण्ये व्याधेन विनिपातितम् ।
विवर्तमानं बहुशो रुधिरौघपरिप्लुतम् ॥ ५ ॥
यदृच्छया निपतितं चक्रमादित्यगोचरम् ।
महावातसमुत्थेन संशुष्कमिव सागरम् ॥ ६ ॥
पूर्णचन्द्रमिव व्योम्नि तुषारावृतमण्डलम् ।

कांपने लगी। आकाशमें बिजली गिरी। ये वार्त्तावह अश्वत्थामाके पास पहुंचे और गदायुद्धमें राजाके गिरनेका समाचार सब कह दिया और थोडे समय तक रोते रहे, फिर सब इधर उधरको चले गये। (४०—४३) [३६९२]

शल्यपर्वमें चौसठ अध्याय समाप्त।

शल्यपर्वमें पैंसठ अध्याय।

सञ्जय बोले, हे महाराज! दुर्योधनको पृथ्वीमें गिरपडा सुन तेजवान शक्ती गदा और तोमरादि शस्त्रोंके घावोंसे व्याकुल आपकी ओरके वीरोंमेंसे बचे हुये; अश्वत्थामा, कृपाचार्य और कृतवर्मा तेज घोडोंके रथोंपर बैठकर राजाके पास आये, उन्होंने वहां आकर महात्मा दुर्योधनको वायुसे टूटे हुए वनमें पडे शालवृक्षके समान देखा। उस समय रुधिरमें भीगे, तडफते हुये महाराजकी ऐसी शोभा दीखती थी, जैसे व्याधेके बाणसे कटे हुए हाथीकी। रुधिरसे भीगे तडफते हुये, महाराजकी ऐसी शोभा दीखती थी, जैसे आकाशमें गिरे

रेणुध्वस्तं दीर्घभुजं मातङ्गमिव विक्रमे ॥ ७ ॥
वृतं भूतगणैर्घोरैः क्रव्यादैश्च समन्ततः।
यथा धनं लिप्समानैर्भृत्यैर्नृपतिसत्तमम् ॥ ८ ॥
भ्रुकुटीकृतवक्रान्तं क्रोधादुद्वृत्तचक्षुषम्।
सामर्षन्तं नरव्याघ्रं व्याघ्रं निपतितं यथा ॥ ९ ॥
ते तं दृष्ट्वा महेष्वासं भूतले पतितं नृपम्।
मोहमभ्यागमन्सर्वे कृपप्रभृतयो रथाः ॥ १० ॥
अवतीर्य रथेभ्यश्च प्राद्रवन् राजसन्निधौ।
दुर्योधनं च संप्रेक्ष्य सर्वे भूमावुपाविशन् ॥ ११ ॥
ततो द्रौणिर्महाराज वाष्पपूर्णेक्षणः श्वसन्।
उवाच भरतश्रेष्ठं सर्वलोकेश्वरेश्वरम् ॥ १२ ॥
न नूनं विद्यते सत्यं मानुषे किंचिदेव हि।
यत्र त्वं पुरुषव्याघ्र शेषे पांसुषु रूषितः ॥ १३ ॥
भूत्वा हि नृपतिः पूर्वं समाज्ञाप्य च मेदिनीम्।
कथमेकोऽद्य राजेन्द्र तिष्ठसे निर्जने वने ॥ १४ ॥
दुःशासनं न पश्यामि नापि कर्णं महारथम्।

सूर्यकी, वायुसे सूखे समुद्रकी, और आकाशमें स्थित तेजसे भरे चन्द्रमाके मण्डलकी। (१--७)

हाथीके समान पराक्रमी धूलसे भरे महाबाहु महाराजको उस समय मांस खानेवाले, जन्तु चारों ओरसे इस प्रकार घेर रहे थे, जैसे लोभी सेवक राजाको घेरे रहते हैं। क्रोधसे आंख फैलाये भौंह टेढी किये क्रोधसे भरे सिंहके समान पुरुषसिंह महाधनुषधारी दुर्योधनको पृथ्वीमें पडे देख एकबार इस तीनों वीरोंको मूर्च्छा आगयी। अनन्तर रथोंसे उतरकर सब राजाके पास गए और पृथ्वीमें बैठ गये। (८-११)

अनन्तर आंखोंमें आंसू भरकर ऊंचे सांस लेकर भरतकुलश्रेष्ठ सब लोकोंके राजोंके महाराज दुर्योधनसे अश्वत्थामा बोले। हे पुरुषसिंह! आप आज इस प्रकार धूलमें पडे लोटते हैं। इससे हमें निश्चय होता है, कि मनुष्यमें कुछ भी शक्ति नहीं है। हे राजेन्द्र! आप राजोंके महाराज और पृथ्वीके स्वामी होकर भी आज इस भयानक जङ्गलमें एकले क्यों पडे हैं। हे भरतकुलसिंह! आज यह क्या है जो आपके पास दुःशासन और महारथ कर्ण आदि मित्रों·

नापि तान् सुहृदः सर्वान् किमिदं भरतर्षभ ॥ १५ ॥
दुःखं नूनं कृतान्तस्य गतिं ज्ञातुं कथंचन ।
लोकानां च भवान्यत्र शेषे पांसुषु रूषितः ॥ १६ ॥
एष मूर्धाभिषिक्तानामग्रे गत्वा परन्तपः ।
स तृणं ग्रसते पांसुं पश्य कालस्य पर्ययम् ॥ १७ ॥
क्व ते तदमलं छत्रं व्यजनं क्व च पार्थिव ।
सा च ते महती सेना क्व गता पार्थिवोत्तम ॥ १८ ॥
दुर्विज्ञेया गतिर्नूनं कार्याणां कारणान्तरे ।
यद्वै लोकगुरुर्भूत्वा भवानेतां दशां गतः ॥ १९ ॥
अध्रुवा सर्वमर्त्येषु श्रीरुपालक्ष्यते भृशम् ।
भवतो व्यसनं दृष्ट्वा शक्रविस्पर्धिनो भृशम् ॥ २० ॥
तस्य तद्वचनं श्रुत्वा दुःखितस्य विशेषतः ।
उवाच राजन्पुत्रस्ते प्राप्तकालमिदं वचः ॥ २१ ॥
विमृज्य नेत्रे पाणिभ्यां शोकजं बाष्पमुत्सृजन् ।
कृपादीन्स तदा वीरान् सर्वानेव नराधिपः ॥ २२ ॥
ईदृशो लोकधर्मोऽयं धात्रा निर्दिष्ट उच्यते ।
विनाशः सर्वभूतानां कालपर्यायमागतः ॥ २३ ॥

को नहीं देखते ? हे महाराज ! आप भी आज धूलमें सोते हैं । इससे हमें निश्चय होता है, कि कालकी और जगत् की गतिको कोई नहीं जान सक्ता है । यही शत्रुनाशन महाराज पहिले क्षत्रियोंके आगे चलते थे, सो ही आज धूल और तिन खा रहे हैं । (११—१७)

हे राजोंमें श्रेष्ठ आपका वह निर्मल छत्र और पङ्खा कहां गया ? आपकी वह महासेना आजकहां गई ? कारणोंसे उत्पन्न हुए कार्योंकी गति जानना बडा कठिन है, आप लोक पूज्य होकर भी इस दुर्दशाको पहुंच गये । हे महाराज! आप सदा इन्द्रकी समानता करते थे, सो आज इस दुर्दशामें पडे हैं, इससे निश्चय होता है कि लक्ष्मी स्थिर नहीं । हे महाराज ! दुःख भरे अश्वत्थामाके ऐसे वचन सुन हाथोंसे आंख पोछकर तुम्हारे पुत्रने कृपादिक वीरोंको देखकर समय के अनुसार ऐसे वचन बोले । (१८—२२)

हे वीरों ! ब्रह्माने जगत्की ऐसी ही गति बनाई है, कि जो उत्पन्न हुआ है उसे एक दिन मरना ही है सो आप लो-

सोऽयं मां समनुप्राप्तः प्रत्यक्षं भवतां हि यः ।
पृथिवीं पालयित्वाऽहमेतां निष्ठामुपागतः ॥ २४ ॥
दिष्ट्या नाहं परावृत्तो युद्धे कस्याश्चिदापदि ।
दिष्ट्याऽहं निहतः पापैश्छलेनैव विशेषतः ॥ २५ ॥
उत्साहश्च कृतो नित्यं मया दिष्ट्या युयुत्सता ।
दिष्ट्या चास्मिन् हतो युद्धे निहतज्ञातिबान्धवः ॥२६॥
दिष्ट्या च वोऽहं पश्यामि मुक्तानस्माज्जनक्षयात् ।
स्वस्तियुक्तांश्च कल्यांश्च तन्मे प्रियमनुत्तमम् ॥ २७ ॥
मा भवन्तोऽत्र तप्यन्तां सौहृदान्निधनेन मे ।
यदि वेदाः प्रमाणं वो जिता लोका मयाऽक्षयाः॥२८॥
मन्यमानः प्रभावं च कृष्णस्यामिततेजसः ।
तेन न च्यावितश्चाहं क्षत्रधर्मात्स्वनुष्ठितात् ॥ २९ ॥
स मया समनुप्राप्तो नास्मि शोच्यः कथंचन ।
कृतं भवद्भिः सदृशमनुरूपमिवात्मनः ॥ ३० ॥
यतितं विजये नित्यं दैवं तु दुरतिक्रमम् ।
एतावदुक्त्वा वचनं बाष्पव्याकुललोचनः ॥ ३१ ॥

गोंके देखते देखते मैं भी इस गतिको प्राप्त हुआ, मैं किसी समय पृथ्वीका राजा था और आज इस दशाको प्राप्त हूं, अच्छा हुआ मैं युद्धमें किसीआपत्तीमें न पडा,अच्छा हुआ जो पापियोंने मुझे छल से मारा, अच्छा हुआ जो मैं युद्धके लिये सदा उत्साह करता रहा। आज मैं जाति और बान्धवोंसे रहित होकर प्रारब्धहीसे इस घोर युद्धसे बचे हुये कुशल सहित आप लोगोंको देखता हूं। मैं इससे बहुत प्रसन्न हुआ हूं, आप लोग मेरे मित्र हैं मेरे मरनेका कुछ शोक मत कीजिये, यदि आप लोग वेदोंको सत्य मानते हों तो मैं अपने सत्यसे सनातन स्वर्गको जाऊंगा, मैं महातेजस्वी कृष्णके प्रभावको जानता हूं, इसी लिये सनातन क्षत्रिय धर्मसे नहीं नष्ट हुआ मैं स्वर्गको जाता हूं। इसलिये आप लोग कुछ शोक न कीजिये। आप लोगोंने जो करने योग्य हमारी विजयके उपाय किये सो आप ही लोगोंके योग्य थे। (२३-३०)

हे महाराज! ऐसा कहकर महाराजकी आंख आंसुवोंसे भर गई और पीडासे व्याकुल होकर चुप होगए, राजाको शोकसे व्याकुल रोते देख अश्व

तूष्णीं बभूव राजेन्द्र रुजाऽसौ विह्वलो भृशम् ।
तथा तु दृष्ट्वा राजानं बाष्पशोकसमन्वितम् ॥ ३२ ॥
द्रौणिः क्रोधेन जज्वाल यथा वह्निर्जगत्क्षये ।
स च क्रोधसमाविष्टः पाणौ पाणिं निपीड्य च॥ ३३ ॥
बाष्पविह्वलया वाचा राजानमिदमब्रवीत् ।
पिता मे निहतः क्षुद्रैः सुनृशंसेन कर्मणा ॥ ३४ ॥
न तथा तेन तप्यामि यथा राजंस्त्वयाऽद्य वै ।
शृणु चेदं वचो मह्यं सत्येन वदतः प्रभो ॥ ३५ ॥
इष्टापूर्तेन दानेन धर्मेण सुकृतेन च ।
अद्याहं सर्वपञ्चालान्वासुदेवस्य पश्यतः ॥ ३६ ॥
सर्वोपायैर्हि नेष्यामि प्रेतराजनिवेशनम् ।
अनुज्ञां तु महाराज भवान्मे दातुमर्हति ॥ ३७ ॥
इति श्रुत्वा तु वचनं द्रोणपुत्रस्य कौरवः ।
मनसः प्रीतिजननं कृपं वचनमब्रवीत् ॥ ३८ ॥
आचार्य शीघ्रं कलशं जलपूर्णं समानय ।
स तद्वचनमाज्ञाय राज्ञो ब्राह्मणसत्तमः ॥ ३९ ॥
कलशं पूर्णमादाय राज्ञोऽन्तिकमुपागमत् ।

त्थामाको क्रोध आया और प्रलयकालकी जलती हुई अग्निके समान उनका रूप होगया । अनन्तर क्रोधमें भरकर हाथसे हाथ मलकर आंखोंमें आंसू भरकर राजासे बोले । हे महाराज। क्षुद्र पाञ्चालोंने मेरे पिताको भी अधर्मसे मारे, परन्तु मुझे इतना उनका शोक नहीं है जितना शोक आपका होगया है । हे महाराज । मैं आपसे सत्यकी शपथ खाकर कहता हूं सुनिये, यदि आजकी रात्रिमें कृष्णके देखते देखते सब पाञ्चालोंका नाश करूं तो मुझे इष्टापूर्त्ती, दान और धर्म आदि उत्तम कर्मोंका फल न होय । (३०-३६)

हे महाराज ! अब आप मुझे आज्ञा दीजिये मैं किसी न किसी उपायसे पाञ्चालोंका नाश करूंगा। अश्वत्थामाके ऐसे वचन सुन दुर्योधन बहुत प्रसन्न होकर कृपाचार्यसे बोले । हे गुरूजी ! आप बहुत शीघ्र एक कलशा जल भर लाइए, राजाके वचन सुन कृपाचार्य बहुत शीघ्र एक कलशा जल भर लाए । तब राजाने फिर कृपाचार्यसे कहा, हे ब्राह्मणश्रेष्ठ ! यदि आप हमारी प्रसन्नता

तमब्रवीन्महाराज पुत्रस्तव विशाम्पते ॥ ४० ॥
ममाज्ञया द्विजश्रेष्ठ द्रोणपुत्रोऽभिषिच्यताम् ।
सैनापत्येन भद्रं ते मम चेदिच्छसि प्रियम् ॥ ४१ ॥
राज्ञो नियोगाद्योद्धव्यं ब्राह्मणेन विशेषतः ।
वर्तता क्षत्रधर्मेण ह्येवं धर्मविदो विदुः ॥ ४२ ॥
राज्ञस्तु वचनं श्रुत्वा कृपः शारद्वतस्तथा ।
द्रौणिं राज्ञो नियोगेन सैनापत्येऽभ्यषेचयत् ॥ ४३ ॥
सोऽभिषिक्तो महाराज परिष्वज्य नृपोत्तमम् ।
प्रययौ सिंहनादेन दिशः सर्वा विनादयन् ॥ ४४ ॥
दुर्योधनोऽपि राजेन्द्र शोणितेन परिप्लुतः ।
तां निशां प्रतिपेदेऽथ सर्वभूतभयावहाम् ॥ ४५ ॥
अपक्रम्य तु ते तूर्णं तस्मादायोधनान्नृप ।
शोकसंविग्नमनसश्चिंताध्यानपराभवन् ॥ ४६ ॥ [३७३८]

इतिश्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शल्यपर्वांतर्गतगदापर्वणि अश्वत्थामसैनापत्याभिषेके पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

समाप्तं गदापर्व शल्यपर्व च ।

अतः परं सौप्तिकं पर्व भविष्यति ।

तस्यायमाद्यः श्लोकः—

संजय उवाच— ततस्ते सहिता वीराः प्रयाता दक्षिणामुखाः ।
उपास्तमनवेलायां शिविराभ्याशमागताः ॥ १ ॥

चाहते हैं तो अश्वत्थामाका सेनापति के स्थानमें अभिषेक कीजिये। धर्म जाननेवालोंने ऐसा कहा है कि, राजाकी आज्ञासे ब्राह्मण भी क्षत्रिय धर्मके अनुसार युद्ध करे। राजाके वचन सुन कृपाचार्यने अश्वत्थामाका अभिषेक किया। अश्वत्थामा भी सेनापति बन राजाका हाथ पकड सिंहके समान गर्जने लगे और वहांसे चल दिये। रुधिर भरे दुर्योधन भी उस भयावनी रात्रिको वहीं पडे रहे। हे राजेन्द्र! यह तीनों वीर भी शोक और चिन्तासे व्याकुल होकर उस युद्ध भूमिसे बाहर जाकर सोचने लगे। (३७-४६) [३७३८]

शल्यपर्वमें पैंसठ अध्याय समाप्त।

शल्यपर्व समाप्त।

शल्यपर्व की विषयसूची।

शल्यपर्वका सूचीपत्र समाप्त।

आदितः श्लोकसंख्या—

१ आदिपर्व– ८७०१
२ सभापर्व— २७६२
३ वनपर्व— ११८९२
४ विराटपर्व– २२६२
५ उद्योगपर्व– ६५९०
६ भीष्मपर्व–५८७०
७ द्रोणपर्व— ९६४२
८ कर्णपर्व — ५०१४
९ शल्यपर्व— ३७३८

सर्वयोग ५६४७१

शल्यपर्व समाप्तम्